Incomplete

Title: (maha) Bhāshya Pradipa

Author: Kaiyyat son of Jaiyyat

Editor: Jaiyyat

Year, Vols.:

Publisher:

Remarks: 80

भा॰कै॰१

१

श्रीगणेशायनमः श्रीसांबसदाशिवायनमः श्रीगुरुभ्योनमः सर्वाकारं निराकारं विश्वाध्यक्षमतींद्रियं सदसद्रूपतातीतमद्वयं मायया वृतं १ ज्ञानलोचनसंलक्ष्यं नारायणमजं विभुं प्रणम्य परमात्मानं सर्वविद्याविधायिनं २ पुरुषार्थप्रतिपत्तये तत्त्वं यदनुग्रहात् सरस्वतीं नतोऽस्म्यासर्वविद्याधिदेवतां ३ पदवाक्यप्रमाणानां पारं यातस्य धीमतः गुरोर्महेश्वरस्यापि कृत्वा चरणवंदनं ४ महाभाष्यार्णवावारपारीणं विवृतिप्लवम् यथागमं विधास्येऽहं कैयटो जैयटात्मजः ५ भाष्याब्धिः क्वातिगंभीरः क्वाहं मंदमतिस्ततः छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम् ६ तथापि हरिबद्धेन सारेण ग्रंथसेतुना क्रममाणः शनैः पारं तस्य प्राप्तास्मि पंगुवत् ७ भाष्यकारो विवरणकारत्वाद्व्याकरणस्य साक्षात्प्रयोजनमाह अथ शब्दानुशासनमिति प्रयोजनप्रयोजनानि तु रक्षोहादीनि प्रश्नाद्वक्ष्यंते स्ववाक्यं व्याख्यातुं तदवयवमथशब्दं तावद्व्याचष्टे अथेत्ययमिति इतिशब्दोऽथशब्दस्य स्वरूपे व्यवस्थापनाय प्रयुक्तः एवंविधपदांतरैः सामानाधिकरण्येन संबंधे सति अथशब्दो व्याख्यातुं शक्यते स्वरूपे व्यवस्थितश्च सर्वनाम्ना परामृश्यते अयमिति शब्द इति स्वरूपकथनं विस्पष्टप्रतिपत्त्यर्थं अधि

श्रीगणेशायनमः अथ शब्दानुशासनं अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् केषां शब्दानाम् श्रीरस्तु

कारार्थ इति अधिकारः प्रस्तावः योऽसत्त्वे नाथशब्दस्य प्रयोजनमित्यर्थः निपातानां च द्योतकत्वं वाक्यपदीये निर्णीतं अथशब्दस्याधिकारार्थत्वे यो वाक्यार्थः संपद्यते तं दर्शयति शब्दानुशासनमिति अनेकक्रियाविषयस्यापि शब्दानुशासनस्य प्रारभ्यमाणता अथशब्दसन्निधाने प्रतीयते व्याकरणस्यैव दमन्वर्थं नाम शब्दानुशासनमिति अत्र चाचार्यस्य कर्तुः प्रयोजनाभावादनुपादानादुभयप्राप्त्यभावान्नोभयप्राप्तौ कर्मणीत्यनेन षष्ठी अपि तु कर्तृकर्मणोः कृतीत्यनेनेति कर्मणि चेति समासप्रतिषेधाप्रसंगात् इध्मव्रश्चनादिवत्समासः शब्दशब्दस्य सामान्यशब्दत्वात् विनाप्रकरणादिना विशेषेऽवस्थानाभावात्तंत्रीशब्दकाकवाशितादीनामप्यनुशासनप्रसंग इति मत्वा पृच्छति केषामिति उत्तरपदार्थांतर्गतस्यापि पूर्वपदार्थस्य बुध्या प्रविभागात्प्रश्नपरामर्शः यथा राजपुरुषः कस्य राज्ञ इति ५७

२

सिद्धांतवादी तु व्याकरणस्य वेदांगत्वात्सामर्थ्याद्विशेषावगतिरिति मत्वाह लौकिकानामिति लोके विदिता इति लौकिकाः सर्वलोकादिति ठञ् एवं वेदे भवाः वैदिकाः वैदिकानां लौकिकत्वेऽपि प्राधान्यख्यापनाय पृथगुपादानं यथा ब्राह्मणा आगता वसिष्ठोऽप्यागत इति वसिष्ठस्य तेषां तु प्राधान्यं यत्नेनापि परिरक्षणात् अथवा भाषाशब्दानामेव लौकिकत्वमिति भेदेन निर्देशः तत्र लोके पदानुपूर्वीनियमाभावात्पदान्येव दर्शयति गौरश्व इति वेदे त्वानुपूर्वीनियमाद्वाक्यान्युदाहरति शन्न इति अयं गौरयं शुक्ल इति शब्दार्थयोरभेदेन लोके व्यवहारदर्शनात् शब्दस्वरूपनिर्धारणाय पृच्छति अथेति गौरित्यत्र क इति प्रतिभासमानत्वात् एकः शब्दस्यार्थः तान्येव वस्तूनि क्रमेण दर्शयति किं यदिति उद्दिश्यमानप्रतिनिर्दिश्यमानयोरैकत्वमापादयंति सर्वनामानि पर्यायेण तल्लिंगमुपाददत इति कामवारात्शब्द इति पुल्लिंगनिर्देशः नेत्याहेति भिन्नेंद्रियग्राह्यत्वाद्द्रव्यं शब्द इति प्रतीतावपि तु द्रव्यमिति यदि तु द्रव्यानुशासनं विवक्षितमभविष्यत् द्रव्यानुशासनमित्येवावक्ष्यत् अनेन च न्यायेन गुणक्रियासामान्यानां निराकृतावपि शब्दत्वप्रपंचार्थं तद्बोधपूर्वकं निराकरोति

लौकिकानां वैदिकानां च तत्र लौकिकास्तावत् गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति वैदिकाः खल्वपि शन्नो देवीरभिष्टये इषे त्वोर्जे त्वा अग्निमीळे पुरोहितं अग्न आयाहि वीतये इति अथ गौरित्यत्र कः शब्दः किं यत्तत्सास्नालांगूलककुदखुरविषाण्यर्थरूपं स शब्दः नेत्याह द्रव्यं नाम तत् यत्तर्हि तदिंगितं चेष्टितं निमिषितं स शब्दः नेत्याह क्रिया नाम सा यत्तर्हि तच्छुक्लो नीलः कृष्णः कपिलः कपोत इति स शब्दः नेत्याह गुणो नाम सः यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वछिन्नं सामान्यभूतं स शब्दः नेत्याह आकृतिर्नाम सा कस्तर्हि शब्दः येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः

शंक्यते परिहारस्तु पूर्ववत् तत्रेंगितमभिप्रायसूचकः शरीरस्य व्यापारः चेष्टितं कायपरिस्पंदः निमिषितं मक्षिव्यापारः शुक्लो नील इति द्रव्यस्य प्रागुपन्यासादुपमानाभिधायिनोऽत्र शुक्लादयः प्रयुक्ताः भिन्नेष्वभिन्नमित्यनेन सामान्यस्यैकत्वं कथ्यते छिन्नेष्वछिन्नमित्यनेन तु नित्यत्वं सामान्यभूतमिति सत्तारूप्यं महासामान्यं गोत्वादि सामान्यविशेषरूपं उपमानेन निर्दिष्टं सामान्यमिव सामान्यभूतं भूतशब्द उपमार्थः यथा पितृभूत इति द्व्यादिपुनिरस्ते पृच्छति कस्तर्हीति उत्तरमाह येनोच्चारितेनेति वैयाकरणाः वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छंति वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसंगात् आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात् अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्मृत्युपारूढानां वाचकत्वे सरो रस इत्यादावर्थप्रतीत्यविशेषप्रसंगात् तद्व्यतिरिक्तः स्फोटो नादाभिव्यंग्यो वाचक इति विस्तरेण वाक्यपदीये व्यवस्थापितः उच्चारितेन प्रकाशितेनेत्यर्थः

असंदेहार्थमिति संदेहस्य प्रागभावोत्र द्रष्टव्यः न तु प्रध्वंसाभावः नहि वैयाकरणस्य संशय उत्पद्य विनश्यति इतरस्येव तदुत्पादात् स्वरत इति पूर्वपदप्रकृति
स्वरात् बहुव्रीह्यर्थावसाय इत्यर्थः मुख्यानि प्रयोजनानि प्रदर्श्यानुषंगिकानि प्रदर्शयति इमानि चेति भूय इति पुनरित्यर्थः आनुषंगिकत्वाच्चैषां वर्गद्वयापादानं तेऽ
सुरा हेलय इति निंदार्थवादेन न म्लेछितवै इति म्लेछनं निषिध्यते तत्र केचिदाहुः हेहे प्रयोगे हेहयोरिति प्लुतप्रकृतिभावे च कर्तव्ये तदकरणं म्लेछनमिति पदद्विर्वचने का
थं वाक्यद्विर्वचनं लत्वं च म्लेछनमित्यपरे न म्लेछितवा इत्यस्य पर्यायो नापभाषितवा इति कृत्यार्थ इति तवेप्रत्ययः म्लेछ इति कर्मणि घञ् दुष्टः शब्द इति स्वरेण स्वरतः आद्यादि

असंदेहार्थं चाध्येयं व्याकरणम् याज्ञिकाः पठंति स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति तस्यां संदेहः स्थूला चासौ पृषती च स्थूलपृषती स्थूलानि वा पृषंति यस्याः
सा स्थूलपृषतीति तां नावैयाकरणः स्वरतो ध्यवस्यति यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः अथांतोदात्तत्वं ततस्तत्पुरुष इति इमानि च भूयः शब्दानुशासनस्य प्र
योजनानि तेऽसुराः दुष्टः शब्दो यदधीतं यस्तु प्रयुंक्ते विद्वांसो विभक्तिं कुर्वंति यो वा इमां चत्वारि उत त्वः सक्तुमिव सारस्वतीं दशम्यां पुत्रस्य सुदेवो असि वरुणेति तेऽसुरा
हेलयो हेलय इति कुर्वंतः पराबभूवुः तस्मात् ब्राह्मणेन न म्लेछितवै नापभाषितवै म्लेछो ह वा एष यदपशब्दः इति म्लेछा मा भूमेत्यध्येयं व्याकरणं तेऽसुराः दुष्टः श
ब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति दुष्टान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् दुष्टः शब्दः यदधीतं॥

स्वतः सिः मिथ्याप्रयुक्त इति यदर्थप्रतिपादनाय प्रयुक्तस्तं नोऽर्थांतरं स्वरवर्णदोषात् प्रतिपादयन् अभिमतमर्थं नाहेत्यर्थः वागेव वज्रो हिंसकत्वात् यथेंद्रशत्रुशब्दः स्वर
दोषाद्यजमानं हिंसितवानित्यर्थः इंद्रस्याभिचारार्थं वृत्रेणारब्धः तत्रेंद्रशत्रुर्वर्धस्वेति मंत्र ऊहितः तत्रेंद्रस्य शमयिता शातयिता वा भवेति क्रियाशब्दोत्र शत्रुशब्दः आश्रि
तः न तु रूढशब्दः तदाश्रयणे हि बहुव्रीहितत्पुरुषयोरर्थाभेदः तत्रेंद्रामित्रत्वे सिद्धे सति इंद्रस्य शत्रुर्भवत्वित्यत्रार्थे प्रतिपाद्ये तोदात्ते प्रयोक्तव्ये आद्युदात्तत्वेन प्रयु
क्त इति अर्थांतराभिधानादिंद्र एव वृत्रस्य शातयिता संपन्नः इंद्रशत्रुत्वस्य चाविधेयत्वात्संबोधनविभक्तेरनुवाद्यविषयत्वात् इहाभावः यथा राजा भव युध्यस्वे
ति ऊह्यमानस्य चामंत्रत्वात् यज्ञकर्मणीति जपादिपर्युदासेन मंत्राणामेकश्रुतिर्विधीयमानानेह भवति॥ श्री ॥ श्री ७ श्री ७ श्री

भा॰कै॰१

२

अर्थेति अन्यत्र ध्वनिस्फोटयोर्भेदेन व्यवस्थापितत्वादिह तदभेदेनापि व्यवहारे न दोषः द्वाभ्यामनशब्दः शब्दवाच्यो स्यत्र तात्पर्यात् ध्वनिं कुर्वन्निति विधिनिषेधयोः
प्रवृत्तिविषयत्वात् कथमस्य निर्भिः संबंधः उच्यते शब्दं कुर्वन्नपि शब्दं करिष्यत्यत विरामाशंकायां तन्निवृत्तये तथा अनभिमतशब्दश्रवणबुद्धिजितेनोच्यते माशब्दं
कार्षीरिति कान्निपुनरिति किं स्वाध्यायोपासनवद्व्याकरणाध्ययनं नित्यं कर्म उत काम्यमिति प्रश्नः पारंपर्येण पुरुषार्थसाधनत्वात् प्रयोजनान्याह रक्षेति लोके लोपा
धान्यः वेदे दृष्टाः प्राप्य वैयाकरणः वैयाकरणस्तु न भ्रमति वेदार्थं वा ध्यवस्यति तत्र लोपागमयोरुदाहरणं द्वाभ्यामिति दुहलंडासस्यादादेशः कृतलो
पस्तथा आसने पदे स्थिति तल्लोपः बहुलं छंदसि इति रूढिमिति रूपमेतत् विकारो यथा उद्ग्राभं च निग्राभं च मित्यत्र हग्रहोर्भश्छंदसि हस्य भ इति वक्तव्यमिति भकारः उद्ग्रा
भस्तत्र उद्ग्राभनिग्राभौ च छंदसि उन्निपूर्वात् ग्रहेः स्फुराद्यमननिपातनयोरिति कवनाः घञ् उह स्वल्पमिति इहयस्मिन्यागे इति कर्तव्यतोपदिष्टा यागा

अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते तद्यथा शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नेवमुच्यते तस्मात् ध्वनिः शब्दः का
नि पुनः शब्दानुशासनस्य प्रयोजनानि रक्षोहागमलघ्वसंदेहाः प्रयोजनं रक्षार्थं वेदानामध्येयं व्याकरणं लोपागमवर्णविकारज्ञो हि सम्य
क्वेदान्परिपालयिष्यतीति ऊहः खल्वपि न सर्वैर्लिंगैर्न च सर्वाभिर्विभक्तिभिर्वेदे मंत्रा निगदिताः ते चावश्यं यज्ञगतेन पुरुषेण यथाय
थं विपरिणमयितव्याः तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुं तस्मादध्येयं व्याकरणं आगमः खल्वपि ब्राह्मणेन निष्का
रणो धर्मः षडंगो वेदोऽध्येयो ज्ञेयश्च प्रधानं च षट्स्वंगेषु व्याकरणं प्रधाने च कृतो यत्नः फलवान्भवति लघ्वर्थं चाध्येयं व्याक
रणं ब्राह्मणेनावश्यं शब्दा ज्ञेया इति न चांतरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुम् ७

तरेणोपजीव्यते सा प्रकृतिः येनोपजीव्यते सा विकृतिः प्रकृतिवद्विकृतिः कर्तव्येति मीमांसकैर्व्यवस्थापितन्याये प्रकृतिप्रत्ययादीनामूहं वैयाक
रणः सम्यग्विजानाति तत्राग्नेर्मंत्रोऽस्ति अग्नये त्वा जुष्टं निर्वपामीति तत्र सौर्ये चरौ निर्वपेत् ब्रह्मवर्चसकाम इति सौर्ये चरौ मंत्र ऊह्यते सूर्याय त्वा
जुष्टं निर्वपामीति विस्तरेण भर्तृहरिणा प्रदर्शित ऊहः आगम इति आगमः प्रयोजकः प्रवर्तको निष्कर्मता व्याकरणाध्ययनस्य दर्शयति
प्रयोजनशब्देन च फलप्रयोजकत्वमुच्यते निष्कारण इति दृष्टं कारणमनपेक्ष्येत्यर्थः प्रधानं चेति पदपदार्थावगमस्य व्याकरणनिमित्तत्वा
त्तन्मूलत्वाद्वाक्यवाक्यार्थावसायस्येति भावः लघ्वर्थं चेति लाघवेन शब्दज्ञानमस्य प्रयोजनं ब्राह्मणेनेति अध्यापनं ब्राह्मणस्येति
न चा शब्दज्ञानमुपश्लिष्यति शिष्या इति लाघवेन शब्दज्ञानमस्य प्रयोजनम्

प्रमत्तगीतइति प्रमादेनविप्रतिपन्नत्वेनगीतइत्यर्थः कात्यायनोपनिबद्धभ्राजाख्यश्लोकमध्यपठितस्यतस्यश्लोकस्यश्रुतिरनुग्राहिकास्ति एकः शब्दःसुज्ञातः सुप्रयुक्तः स्वर्गेलोके कामधुग्भवतीति स्त्रीवच्चेति प्रत्यभिवादेहिगुरुणाप्लुतःकार्यःयस्तुप्लुतंकर्तुंनजानातिसस्त्रीवद्द्रष्टव्यः अभिवादयेदेवदत्तोहमित्यादिनासंस्कृतेनवाक्येनेत्यर्थः प्रयाजाइति प्रयाजमंत्राऊह्यमानाअग्निशब्दप्रकृतिकविभक्तियुक्ताइत्यर्थः यथासमिधः समिधोऽग्नआज्यस्यव्यंतुअग्निरग्नइति पदशइति पदंपदमितिसंख्यैकवचनाद्वीप्सायामितिशस् स्वरशइति स्वरउदात्तादिः अक्षरशइति अक्षरंव्यंजनसहितोऽच् आर्त्विजीनइति ऋत्विजमर्हतीत्यार्त्विजीनोयजमानः ऋत्विक्कर्मार्ह

प्रमत्तगीतएषः तत्रभवतोयस्त्वप्रमत्तगीतस्तत्प्रमाणं यस्तुप्रयुंक्ते अविद्वांसःअविद्वांसः प्रत्यभिवादेनाम्नोयेनप्लुतिंविदुः कामंतेषुतुविप्रोष्यस्त्रीष्विवायमहंवदेत् स्त्रीवन्माभूमेत्यध्येयंव्याकरणं अविद्वांसः विभक्तिंकुर्वंति याज्ञिकाः पठंति प्रयाजाःसविभक्तिकाःकार्याइति नचांतरेणव्याकरणं प्रयाजाःसविभक्तिकाः शक्याःकर्तुं विभक्तिंकुर्वंतियोवाइमांपदशःस्वरशोऽक्षरशोवाचंविदधातिसआर्त्विजीनोभवति आर्त्विजीनाःस्यामेत्यध्येयंव्याकरणं योवाइमांचत्वारि चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यां आविवेशेति चत्वारिशृंगाणिचत्वारिपदजातानि नामाख्यातोपसर्गनिपाताश्च त्रयोअस्यपादाः त्रयःकालाः भूतभविष्यद्वर्तमानाः द्वेशीर्षे द्वौशब्दात्मानौ नित्यःकार्यश्च सप्तहस्तासोअस्यसप्तविभक्तयः त्रिधाबद्धः त्रिषुस्थानेषुबद्धः उरसिकंठेशिरसीति वृषभोवर्षणात् रोरवीतिशब्दंकरोति कुतएतत् रौतिःशब्दकर्मामहोदेवोमर्त्यांआविवेशेति महान्देवःशब्दोमर्त्याःमरणधर्माणोमनुष्याः तानाविवेश महतादेवेननःसाम्यंयथास्यादित्यध्येयंव्याकरणं॥

तीतियाजकोर्त्विजीनः यज्ञर्त्विग्भ्यांघखञाविति सूत्रेणयज्ञर्त्विग्भ्यांतत्कर्मार्हतीतिचोपसंख्यानमिति वार्त्तिकेनखञ् विद्वान्यजेतविद्वान्याजयेदिति द्वयोरपिविदुषोरधिकारात् चत्वारीतिशब्दस्वरूपस्तवेननिरूपणं त्रयः कालाइति लडादिविषयाः नित्यः कार्यश्चेति व्यंग्यव्यंजकभेदेन सप्तविभक्तयइति सुपइत्यर्थः केचित्तुतिङामपरिग्रहणप्रसंगात्सहशेषेणसप्तकारकाणिविभक्तिशब्दाभिधेयानीतिव्याचक्षते वर्षणादिति कामानांज्ञानपूर्वकानुष्ठानफलत्वात् महतेति परेणब्रह्मणेत्यर्थः चत्वारीत्यनेनैकदेशेनसदृशेन वाक्यांतरमपिसूच्यतइत्याह॥ श्री ६ श्री ६ श्री ६ श्री ६ श्री ६ श्री

भा॰वै॰

२

अविज्ञातमिति अविदितस्वरादिसंस्कारत्वादर्थापरिज्ञानाद्वा निगदेनेति पाठमात्रेण नतज्ज्वलतीति निष्फलंभवति अनर्थकमिति निष्प्रयोजनं यस्तुप्रयुंक्तइति अनेनाभ्युदयहेतुत्वंव्याकरणस्यदर्शयति विशेषइति सएवशब्दः क्वचिदर्थेकेनचिन्निमित्तेनप्रयुक्तःसाधुरन्यथात्वसाधुः यथाश्वेःस्वशब्दोधनाभावनिमित्तकः साधुःजातिनिमित्तकोसाधुः गविचगोणीशब्दः साधर्म्यात्प्रयुक्तःसाधुः जातिप्रयुक्तस्त्वसाधुः कइति वाग्योगविदःश्रुतत्वाद्दोषदर्शनाच्चप्रश्नःप्रश्नैवपरमतमाशंक्याह वाग्योगविदेवेति एवमपशब्दज्ञानेपीति यथाश्लेष्मिकद्रव्यसेवयाश्लेष्मिकव्याधिसंभवः तद्विपरीतसेवयात्वारोग्यं तथात्रापियथोक्तन्या

अभ्यीयामःशब्दान्॥ २

यदधीतमविज्ञातंनिगदेनैवशब्द्यते अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचित् तस्मादनर्थकंमाधिगीष्महीत्यध्येयंव्याकरणं यदधीतं यस्तुप्रयुंक्तेकुशलोविशेषेशब्दान्यथावद्व्यवहारकाले सोऽनंतमाप्नोतिजयंपरत्रवाग्योगविद्दुष्यतिचापशब्दैः कःवाग्योगविदेव कुतएतत् योहिशब्दान्जानातिअपशब्दानप्यसौजानाति यथैवहि शब्दज्ञानेधर्मः एवमपशब्दज्ञानेप्यधर्मः अथवाभूयानधर्मः प्राप्नोति भूयांसोपशब्दाःएकैकस्यशब्दस्यबहवोऽपभ्रंशास्तद्यथा गौरित्यस्यगावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः अथयोवाग्योगवित् अज्ञानंतस्यशरणं विषमउपन्यासःनात्यंतायाज्ञानंशरणंभवितुमर्हति योह्यजानन्वैब्राह्मणंहन्यात्सुरांवापिबेत्सोपिमन्येपतितःस्यात् एवंतर्हिसोऽनंतमाप्नोतिजयंपरत्रवाग्योगविद्दुष्यतिचापशब्दैःकः अवाग्योगविदेव अथयोवाग्योगविदविज्ञानंतस्यशरणं क्वपुनरिदंपठितंभ्राजानामश्लोकाःकिंचभोः श्लोकाअपिप्रमाणंकिंचातःयदिप्रमाणंअयमपिप्रमाणंभवितुमर्हति यदुदुंबरवर्णानांघटीनांमंडलंमहत् पीतंनगमयेत्स्वर्गंकिंतत्क्रतुगतंनयेत्इति श्री

प्यमितिभावः भूयांसोल्पीयांसइति परमतापेक्षयाप्रकर्षप्रत्ययः यदिमन्येसेहवःशब्दाःअल्पेऽपशब्दाः अंगभूयांस्त्वाच्चफलभूयस्त्वमिति तन्न यस्मात् भूयांसोपशब्दाः अल्पीयांसस्तुशब्दाःअज्ञानमिति तथाचांतरश्चांज्ञानहत्यादिफलाभावः नात्यंतायेति पुरुषाणांविधिनिषेधयोरधिकारात् परिज्ञानेप्रयत्नस्यन्याय्यत्वात् प्रकरणात्सामर्थ्यंबलीयइत्याह अवाग्योगविदिति वाग्योगवित्उभयत्रापिशब्दान्प्रयुंक्तेनापशब्दानितिज्ञानपूर्वकात्प्रयोगादभ्युदयभाक्भवति श्लोकस्यास्यपरिज्ञानात्पृच्छति क्वपुनरिति प्रातिपदिकार्थप्रश्नेएवात्रतात्पर्यं किंदत्तिंयत्रेदंपठितमित्यर्थः अतएवश्लोकाइति प्रथमांतेनोत्तरं अन्यथाश्लो

२

अज्ञासखायइति सखित्वनुरूपेतिदीर्घः सखायः समानख्यातयोभेदगहस्मिवृत्तत्वात्सर्वमेकमितिमन्यंते सख्यानीति सायुज्यानीत्यर्थः एकगम्यइति ज्ञानेनेत्यर्थः वाचीति
वेदत्वेन्नद्राणिवालक्ष्मी र्वेदांतेषु परमार्थसंविल्लक्षणा सेयं निहितेत्यर्थः प्रायश्चित्तीयामिति अत्रार्थे प्रश्नः प्रायश्चित्तीयाइति प्रायश्चित्ताय पापशोधनाय श्रुतिस्मृ
तिविहिताय कर्मणेहिताल्लक्ष्मिनितोस्यादकामाभूमेत्यर्थः दशम्युत्तरकालमिति दशम्याउत्तरइति पंचमीतियोगविभागात्समासः ततः कालशब्देन बहुव्रीहिः क्रियावि
शेषणं वेनत दशादिनान्याशौचं भवतीति दशम्युत्तरकालं इत्युक्तं येपिगृह्यकाराः पठंति दशम्यांपुत्रस्येति तेदशम्यामिति सामीप्यकमधिकरणं व्याख्येयं घोषवद्दादीति

अज्ञासखायः सख्यानिजानते अज्ञसखायः संतः सख्यानिजानंते सायुज्यानिजानते क्वचएषदुर्गमोमार्गः एकगम्योवाग्विषयः केपुनस्ते वैयाकरणाः कुतएतत
भद्रैषांलक्ष्मीर्निहिताधिवाचि एषांवाचिभद्रालक्ष्मीर्निहिताभवति लक्ष्मीर्लक्षणात् भासनात् परिवृढाभवति सक्तुमिवसारस्वती याज्ञिकाः पठंति आहिता
ग्निरपशब्दंप्रयुज्यप्रायश्चित्तीयां सारस्वतीमिष्टिंनिर्वपेदिति प्रायश्चित्तीयामाभूमेत्यध्येयं व्याकरणं सारस्वतीं इष्टिं दशम्यांपुत्रस्य याज्ञिकाः पठंति दशम्युत्तरकालं
पुत्रस्यजातस्यनामविदध्यात् घोषवदाद्यंतरं तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमंभवति द्व्यक्षरंचतुरक्षरंवानामकृतं कुर्यान्नतद्धितमिति
नचांतरेण व्याकरणं कृतस्तद्धिता वाशक्याविज्ञातुं सारस्वती दशम्यांपुत्रस्य सुदेवोअसिवरुणयस्यतेसप्तसिंधवः अनुक्षरंतिकाकुदं सूर्म्यं सुषिरामिव
सुदेवो असिवरुणसत्यदेवोसियस्यतेसप्तसिंधवः सप्तविभक्तयः अनुक्षरंतिकाकुदं काकुदं तालुकंकाकुर्जिह्वासा स्मिन्नुद्यतइतिकाकुदं सूर्म्यं सुषिरामिव
तद्यथाशोभनांसूर्मिं सुषिरामग्निरंतः प्रविश्यदहति एवंसप्तसिंधवः सप्तविभक्तयः स्तात्वनुक्षरंति तेनासिसत्यदेवः सत्यदेवास्यामेत्यध्येयं व्याकरणं सुदेवोसि।

घोषवंतोयेवर्णाः शिक्षायां प्रदर्शिताः तदादिअंतरंतस्थमिति मध्येयरलवास्यत्वादित्यर्थः त्रिपुरुषानूकमिति नामकरणेयो अधिकारीपितातस्ययेत्रयः पुरुषास्ता
ननुकायत्वाभिधत्तइतित्रिपुरुषानूकम् अन्येषामपिदृश्यतइतिदीर्घः सुदेवोअसीति वरुणस्ययंस्तुतिः यतोहेतोर्व्याकरणज्ञानात्सत्यदेवोसि ततोहेतोरन्येपि
सत्यदेवाभवंतीत्यर्थः सिंधवइति नद्यइवविभक्तयइत्यर्थः सीतिमिन्नुद्यतइति अनेकार्थत्वाद्धातूनामुक्षिप्यतेइत्यर्थः अनुक्षरंतीति तालुप्राप्य प्रकाशंतइत्य
र्थः सूर्म्यमिति सूर्मिमितिप्राप्तेअमिपूर्वइत्यत्रवाछंदसीत्यनुवृत्त्या यणादेशः॥ श्री ॐ श्री ॐ श्री ॐ श्री ॐ श्री

भा॰ कै॰ ४

अपरआहेति परिमितानीति प्राप्ते शेश्छंदसिबहुलमिति शेर्लोपे परिमितेतिभवति परिमितानिपरिछिन्नानिएतावंत्येवेत्यर्थः मनीषिशब्दः पृषोदरादित्वात्साधुः कथं
मनीषिणएववविदंतीत्याह गुहेति अज्ञानमेवगुहातस्यामित्यर्थः सुपांसुलुगितिसप्तम्यालुक् व्याकरणप्रदीपेनतुतानिप्रकाशंते तत्रचतुर्णांपदजातानामेकैक
स्यचतुर्भागंमनुष्या अवैयाकरणावदंतिनेंगयंतीत्यस्यैवव्याख्यानं नचेष्टंतेनानिमिषंतीति उतत्वइति त्वशब्दोन्यवाचीउतशब्दोपिशब्दस्यार्थेस्त्वभिन्नक्रमः प्रत्यक्षे

अपरआह चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंति चत्वारिवाक्परिमितापदानिचत्वारिपद
जातानि नामाख्यातोपसर्गनिपाताश्च तानिविदुर्ब्राह्मणायेमनीषिणः मनसईषिणोमनीषिणः गुहात्रीणिनिहितानेंगयंति गुहायांत्रीणिनिहितानि ने
गयंतिनचेष्टंतेननिमिषंतीत्यर्थः तुरीयंवाचोमनुष्यावदंति तुरीयंवाएतद्वाचोयन्मनुष्येषुवर्तते चतुर्थमित्यर्थः चत्वारिउतत्वः उतत्वःपश्यन्नददर्शवाचमुत
त्वःशृण्वन्नशृणोत्येनां उतोत्वस्मैतन्वंविसस्रेजायेवपत्यउशतीसुवासाः अपिखल्वेकःपश्यन्नपिनपश्यति अपिखल्वेकःशृण्वन्नपिनशृणोति एनामिति
अविद्वांसमाहार्धं उतोत्वस्मैतन्वंविसस्रेतनुंविवृणुतेजायेवपत्यउशतीसुवासाः जायेवपत्येकामयमानासुवासाः स्वमात्मानंविवृणुते एवंवाक्वाग्विदेस्वा
त्मानंविवृणुते वाङ्नोविवृणुयादात्मानमित्यध्येयंव्याकरणं उतत्वः सक्तुमिव सक्तुमिवतितउनापुनंतोयत्रधीरामनसावाचमक्रत अज्ञासखायःसख्यानिजान
तेभद्रैषांलक्ष्मीर्निहिताधिवाचि सक्तुःसचतेर्दुर्धावोभवतिकसतेर्वाविपरीताद्विकसितोभवति तितउपरिपवनंभवति ततवद्वातुन्नवद्वाधीराध्यानवंतोमनसाप्रज्ञानेनवा
म	चमकृत अरूषत॥

णशब्दंरूपं उपलभ्यमानोपिअर्थापरिज्ञानान्नपश्यतीत्यर्थः उतोइति उतउइतिनिपातसमाहारः अविद्वांसमाहार्धमिति अविद्वत्क्षणमर्थमर्धं चेआहे
त्यर्थः सचतेरिति षच्वसेचनइत्यस्य दुर्धावइतिदुःशोधःयथातितउनासक्तोस्तकयापनीयते तथाव्याकरणेनवाचोपशब्दाइत्यर्थः कसतेरिति पृषोदरा
दित्वाद्वर्णव्यत्ययः ततवादिति विस्तारयुक्तमित्यर्थः तुन्नवदिति बहुछिद्रं। धीराइति॥ वैयाकरणाः वाचमकृतेति अपशब्देभ्योविविक्तांकृतवंतः मंत्रेघसे

भा॰ ४

भा॰ कै॰ ५

किंपुनरिति ननु कानि पुनरस्येति येन प्रश्नः स एव कथं पुनरितिकिंपुनरिति एवं तर्हि भाष्यकारः प्रयोजनान्वाख्यानस्य विषयविभागं दर्शयति पुरा वेदाध्ययनात्पूर्वं व्याकरणम
धीयते तेन बाल्यात्प्रभृति समर्था इति न प्रयोजनमन्वाख्येयं अद्यत्वे तु स्वल्पायुष्ट्वात्पूर्वमेव वेदं प्रधानमधीयते ततः मन्दं समर्थत्वात् व्याकरणाध्ययनस्य प्रयोजनं पृच्छन्ती
ति अवश्यं अन्वाख्येयं प्रयोजनं न पुनरन्यदिति वेदमप्यधिजिगांसमानेभ्य इत्यर्थः ओमित्युक्तेति अभ्युपगम्येत्यर्थः वृत्तान्तशः इति वृत्तान्तः प्रपाठक उच्यते वृत्तान्तं वृत्तां

किंपुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते न पुनरन्यदपि किंचित् ओमित्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान् पठन्ति पुराक
ल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते तेभ्यस्तत्र स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते तदद्यत्वे न तथा वेदमधी
त्य एव त्वरिता वक्तारो भवन्ति वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः अनर्थकं व्याकरणमिति तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य
इदं शास्त्रमन्वाचष्टे इमानि प्रयोजनान्यध्येयं व्याकरणमिति उक्तः शब्दः स्वरूपमप्युक्तं प्रयोजनान्यप्युक्तानि शब्दानुशासनमिदानीं कर्तव्यं कथं कर्तव्यं
किं शब्दोपदेशः कर्तव्यः आहोस्विदपशब्दोपदेशः आहोस्विदुभयोपदेश इति अन्यतरोपदेशेन कृतं स्यात् तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते
पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतत् अतोऽन्येऽभक्ष्या इति अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः तद्यथा अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यशू
करः इत्युक्ते गम्यत एतत् आरण्यो भक्ष्य इति एवमिहापि यदि तावच्छब्दोपदेशः क्रियते गौरित्येतस्मिन्नुपदिष्टे गम्यत एतत् गाव्यादयोऽपशब्दा इति अ
पशब्दोपदेशः क्रियते गाव्यादिषूपदिष्टेषु गम्यत एतत् गौरित्येष शब्द इति॥ ५ श्री ५ ६ ५ श्री

उभयोपदेश इति हेयोपादेयोपदेशे स्पष्टा प्रतिपत्तिर्भवति
तं पठन्तीत्यर्थः अद्यत्वे इति अद्यत्वेशब्दो निपातोऽस्मिन्काल इत्यस्मिन्नर्थे वर्तते त्वरिता इति विवाहादौ अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् द्वि
इत्युभयोपदेश उद्भावितः यद्यपि प्रतिपत्तिः स्पष्टा गौरवं तु भवतीत्याह अन्यतरेति शब्दापशब्दयोरित्यर्थः सामर्थ्यादन्येभ्यो निवर्तन्ते नत्वयं विधिरप्राप्तेरभावात्॥ श्री ५
बहुविषये निर्धारणे वर्तेते पञ्चेति अर्थलक्षणं प्राप्तं पञ्चसु पञ्चनखेषु नियम्यमानं

किंपुनरिति उभयोपदेशात् गुरोर्द्वाववि प्रश्नस्योत्तरयोः कतरो ज्यायानित्यर्थः इष्टेति साधुशब्दप्रयोगाद्धर्मो नान्यथेति इत्यर्थः अथवोपादेयोपदेशात् लाघवात् प्रतिपत्तिर्भवतीति
भावः बृहस्पतिरिन्द्रायेति प्रतिपदपाठस्याशक्यत्वं प्रतिपादयितुमयमर्थवादः शब्दानामिति शब्दपारायणशब्दो योगरूढः शास्त्रविशेषस्य तत्र प्रतिपदोक्तानामि
ति विशेषणानिधानाय गम्यमानार्थस्यापि शब्दानामित्यस्य प्रयोगः एकदेशाप्रयोगादपि लोक उपयुक्तमित्युच्यते यथौषधसंस्कृतघृतमात्रैकदेशोपयोगे उपयुक्तं घृत
मित्यपशब्दोपदेशः ८

किंपुनरत्र ज्यायः लघुत्वाच्छब्दोपदेश एव ज्यायान् लघीयाञ्छब्दोपदेशः एकैकस्य शब्दस्य बहवोऽपभ्रंशाः तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोत
लिकादयोऽपभ्रंशाः इष्टान्वाख्यानं खल्वपि भवति अथैतस्मिन् शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः गौरश्वः पुरुषो हस्ती शकुनिर्मृगो
ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः नेत्याह अनभ्युपायः एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदो
क्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम बृहस्पतिश्च वक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः न चान्तं जगाम किं पुनरद्यत्वे यः स
र्वथा चिरं जीवति स वर्षशतं जीवति चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति तत्र
चागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः कथं तर्हीमे शब्दाः प्रतिपत्तव्याः किंचित्सामान्यविशे
षवल्लक्षणं प्रवर्त्यं येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् किं पुनस्तत् उत्सर्गापवादौ कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः कथंजातीयकः पुन
रुत्सर्गः कर्तव्यः कथंजातीयकोऽपवादः सामान्येनोत्सर्गः कर्तव्यः तद्यथा कर्मण्यण् तस्य विशेषेणापवादः तद्यथा आतोऽनुपसर्गे कः॥ ५ श्री ५

मिति व्यवहारः तथेहेति प्रतिपादयति चतुर्भिरिति आगमकालो ग्रहणकालः स्वाध्यायकालोऽभ्यासकालः प्रवचनकालोऽध्यापनकालः व्यवहारो याज्ञिककर्मणि
किंचिदिति सामान्यविशेषो यस्मिन् तत्सामान्यविशेषवत् कर्मण्यण् आतोऽनुपसर्गे क इत्यादि सकलशास्त्रव्यवस्थैकतरपक्षाश्रयणेन सिध्यतीति पक्षद्वयाश्रयणं प्र

२

रीकरोति॥

कूटस्थेष्विति अविनाशिषु अविचालिष्विति देशांतरप्राप्तिरहितेषु ननु नेति सिद्धशब्दात् क्रियानिष्पत्त्योर्ध्यार्थो गम्यत इत्यर्थः संग्रहे तावदिति नचाहि किं कार्यः शब्दोथ सिद्ध इति
पक्षद्वयविचारः तत्र कार्यप्रतिपक्षार्थाभिधायी सामर्थ्यात् सिद्धशब्द इति स्थितं तत्समानतंत्रत्वादिहापि तथैव युक्तमित्यर्थः अथवेति एवशब्दप्रयोगे हि पदमवधारणं द्योतक
स्तेन एवशब्दस्यापेक्षणाद्यदा तु द्योतकत्वं तेन सामर्थ्यादवधारणं गम्यते तदा तदेकपदमित्युच्यते तत्र सर्व एवाधीत्य क्षयत्वेनीत्य प्रश्नस्य श्रुतेः सामर्थ्यान्नियममवगमयति
अथ एवेति इहापि नित्यानित्यव्यतिरेकेण शब्दांतराभावात् सिद्धशब्दोपादानान्नियमोवगम्यते सिद्ध एवेति कार्याणां तु पदार्थानां प्रागभावप्रध्वंसावस्थयोः सिद्धता नास्तीति न ते सिद्धाः
अथवेति कथं पुनर्देवदत्तशब्दे संज्ञाकालेन विनियुक्ते एकदेशः प्रयुज्यते न ह्यसौ संज्ञात्वेन विनियुक्तः नचैकदेशात् स्मर्यमाणस्य समुदायस्य वाचकत्वमुपपद्यते प्रतीयमानस्य त्वाय

कथं ज्ञायते यत्कूटस्थेष्वविचालिषु भावेषु वर्तते तद्यथा सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति ननु च भोः कार्येष्वपि वर्तते तद्यथा सिद्ध ओदनः सिद्धः सूपः सिद्धा यवागूरिति
यावता कार्येष्वपि वर्तते तत्र कुत एतत् नित्यपर्यायवाचिनो ग्रहणमिति न पुनः कार्ये यः सिद्धशब्द इति संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमि
ति इहापि तदेव अथवा सन्ति एकपदान्यप्यवधारणानि तद्यथा अब्भक्षो वायुभक्ष इति अप एव भक्षयति वायुमेव भक्षयतीति गम्यते एवमिहापि सिद्ध एव न साध्य इति
अथवा पूर्वपदलोपोत्र द्रष्टव्यः अत्यन्तसिद्धः सिद्ध इति तद्यथा देवदत्तो दत्तः सत्यभामा भामेति अथवा व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति नित्यप
र्यायवाचिनो ग्रहणमिति व्याख्यास्यामः किं पुनरनेन वर्ण्येन किं न महता कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमाने संदेहः स्यात् माङ्गलार्थं माङ्गलिक आचार्यो म
हतः शास्त्रौघस्य मंगलार्थं सिद्धशब्दमादितः प्रयुंक्ते मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवंति आयुष्मत्पुरुषाणि च अध्येतारश्च सिद्धार्था यथा स्युरिति

कृत्वासंभवादुच्चार्यमाणस्यैव वाचकत्वात् एवं तर्हि अनुनिष्पादिन्योवयवरूपाः संज्ञाविनियोगकाले विनियुक्ता एव लोपस्तु वर्णानां साधुत्वं माभूदित्यन्वाख्यायते इहापि
नित्यानित्ययोर्भिव्यक्तताविशेषात् सिद्धश्रुतिरूपात्तामर्थं गमयति अत्यंतसिद्धः सिद्ध इति न्यायाद्ध्यानित्यत्वं शब्दादीनां स्थितमित्याह अथवेति न हि संदेहमात्रादलक्ष
णता भवति पुनः प्रमाणांतरेणानिश्चयोत्पादात् वर्ण्येनेति प्रयत्नव्याख्यातव्येनेत्यर्थः अगर्हिताभीष्टार्थसिद्धिर्मंगलं तत्प्रयोजन आचार्यो मांगलिकः प्रथंत इति अध्य
यनस्याविच्छेदात् वीरपुरुषाणीति श्रोतॄणां परैरपराजयात् आयुष्मत्पुरुषाणीति शास्त्रार्थानुष्ठाने धर्मोपचयादायुर्वर्धनात् सिद्धार्था इति अध्ययननिर्वृत्तिरेव तेषां सिद्धिः॥

भा॰ कै॰ २
६

किं पुनरिति आकृतिपक्षे केवल आम्नीयमानोसकृदवोपि प्रतिषेधद्व्यादिनोपपद्यते केवलेपि च व्यक्तिपक्षे पुनः प्रसंगविज्ञानादि न घटते तस्मादुभयसिद्ध्यै कश्चिदेकदेशैक
स्मिन्पक्षः परिगृह्यते तत्र जातिवादिन आहुः जातिरेव शब्देन प्रतिपाद्यते व्यक्तीनामानंत्यात्संबंधग्रहणासंभवात् सा च जातिः सर्वव्यक्तिष्वेकाकारप्रत्ययदर्शनादस्तीत्यव
सीयते तत्र गवादयः शब्दा भिन्नद्रव्यसमवेतां जातिमभिदधति तस्यां प्रतीतायां तदावेशात्तदवच्छिन्नं द्रव्यं प्रतीयते शुक्लादयः शब्दा गुणसमवेतां जातिमाचक्षते गु
णे तु तत्संबंधात् प्रत्ययः द्रव्ये संबंधिसंबंधात् संज्ञाशब्दानामपि उत्पत्तिप्रभृत्याविनाशात् पिंडस्य कौमारयौवनाद्यवस्थाभेदेपि स एवायमित्यभिन्नप्रत्ययानिमित्ता डित्थ
त्वादिका जातिर्वाच्या क्रियास्वपि जातिर्विद्यते सैव धातुवाच्या पठति पचतः पठतीत्यादिरभिन्नप्रत्ययस्य सद्भावात्तन्निमित्तजात्यभ्युपगमः व्यक्तिवादिनस्त्वाहुः शब्दस्य

किं पुनराकृतिः पदार्थः आहोस्विद्द्रव्यं उभयमित्याह कथं ज्ञायते उभयथा ह्याचार्येण सूत्राणि पठितानि आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचन
मन्यतरस्यामित्युच्यते द्रव्यं पदार्थं मत्वा सरूपाणामित्येकशेष आरभ्यते किं पुनर्नित्यः शब्द आहोस्वित्कार्यः संग्रह एतत् प्राधान्येन परीक्षितं नित्यो वा स्यात् कार्यो वे
ति तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि तत्र त्वेष निर्णयः यद्येव नित्यः अथापि कार्यः उभयथापि लक्षणं प्रवर्त्यमिति कथं पुनरिदं भगवतः पाणिनेरा
चार्यस्य लक्षणं प्रवृत्तम् सिद्धे शब्दार्थसंबंधे सिद्धे शब्देर्थे संबंधे चेति अथ सिद्धशब्दस्य कः पदार्थः नित्यपर्यायवाची सिद्धशब्दः॥ ७ ॥

व्यक्तिरेवाभिधेया जातेस्तु उपलक्षणभावेनाश्रयणात् आनंत्यादिदोषानवकाशः किं पुनरिति विप्रतिपत्त्या संशयः केचित्तु ध्वनिव्यंग्यं वर्णात्मकं नित्यं शब्दमाहुः अन्ये व
र्णव्यतिरिक्तं पदस्फोटमिच्छन्ति वाक्यस्फोटमपरे संगिरन्ते अन्ये तु ध्वनिरेव शब्दः स च कार्यस्तद्व्यतिरेकेणान्यस्यानुपलंभादित्याचक्षते संग्रह इति ग्रंथविशेषे कथं पुन
रिति किमाचार्य एवंरूपाः शब्दार्थसंबंधानामभ्युपगंतेति प्रश्नः सिद्ध इति तत्र नित्यः शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा कार्यशाब्दिकानामपि मतं प्रवा
हनित्यता अर्थस्यापि जातिलक्षणस्य नित्यत्वं द्रव्यपक्षेपि सर्वशब्दानां असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं वाच्यमिति नित्यता प्रवाहनित्यतया वा॥ संबंधस्यापि व्यव
हारपरंपरया अनादित्वान्नित्यता सिद्धशब्दस्यापि नित्यानित्ययोर्दर्शनात् पृच्छति अथेति नित्येति नित्यलक्षणस्यार्थस्य पर्यायेण वाचकः तमेवार्थं कदाचिन्नित्यशब्द आह कदा

अथवेति असत्स्वपि निन्नोत्तेलोकव्यवहाराश्रयणेन ज्ञानेर्नियतं साध्यते त्रिविधा चानित्यता संसर्गानित्यता यथा स्फटिकस्य लाक्षाद्युपधानात्स्वरूपतिरोधा
नेन परस्वरूपप्रतिभासः उपधानापगमे स्वरूपप्रतिभासात् परिणामाभावः परिणामानित्यता तथा बदरीफलस्य श्यामतातिरोभावेनाहितस्या विर्भावः प्र
ध्वंसानित्यता सर्वात्मना विनाशः एतत्रिविधानित्यताप्रतिषेधेन नित्यतां प्रतिपादयितुमुक्तं कूटस्थमित्यादि तत्र कूटस्थमिति संसर्गानित्यता परिहृता अवि
चालीति परिणामानित्यता अनपायेत्यादिना प्रध्वंसानित्यता यन्नित्यमिति बुद्धिप्रतिभासः शब्दार्थौ यदा यदा भावद्वचारितः तदा तदार्थाकारा बुद्धिरूपजा
यते इति प्रवाहनित्यत्वादर्थस्यानित्यत्वमित्यर्थः लोकतइति अन्यथाकार्येषु वस्तुषु लोकव्यवहारा यथानित्येषु शब्दव्यवहारो नादिद्रव्यवहारपरंपराप्युत

अथवा नेदमेव नित्यलक्षणं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति तदपि नित्यं यस्मिंस्तत्त्वं न विह-
न्यते किं पुनस्तत्त्वं तद्भावस्तत्त्वं आकृतावपि तत्त्वं न विहन्यते अथ वा किं न एतेनेदं नित्यमिति इदमनित्यमिति यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते
सिद्धे शब्देऽर्थे संबंधे चेति कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः संबंधश्चेति लोकतः यल्लोकेऽर्थमुपादाय शब्दान्प्रयुंजते नैषां निर्वृत्तौ यत्नं कुर्वंति ये पुनः
कार्या भावाः निर्वृत्तौ तावत्तेषां यत्नः क्रियते तद्यथा घटेन कार्यं करिष्यन् कुंभकारकुलं गत्वाह कुरु घटं कार्यमनेन करिष्यामीति न तद्वच्छ
ब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह कुरु शब्दान्प्रयोक्ष्य इति तावत्येवार्थमुपादाय शब्दान्प्रयुंजते यदि तर्हि लोक एषु प्रमाणं किं शास्त्रेण क्रि
यते लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते किमिदं धर्मनियम
इति धर्माय नियमो धर्मनियमः

त्रिपूर्वक इति शब्दादीनां नित्यत्वं घटादयस्तु अर्थक्रियार्थिभिरन्यत आनीयं ते उत्पादविनाशयुक्ताश्चोपलभ्यंते नैवं शब्दा येऽदः तावत्येवार्थमिति बुध्यावस्तु
निरूप्येत्यर्थः अत्र भाष्यकारेणासंभवंतीमप्येकवाक्यतामनाश्रित्य वाक्यत्रयं रूपितं सिद्धे शब्दार्थसंबंधे शास्त्रं प्रवृत्तमित्येकं वाक्यं कथं ज्ञायत इति द्वितीयं
लोकतो ज्ञायत इति द्वितीयं लोकत इत्यस्याद्यस्यालोकतोऽर्थप्रयुक्त इत्यादितृतीयं शब्दप्रयोग इति प्रयोगग्रहणेन प्रयोगाद्धर्मो न तु ज्ञानमात्रादित्युक्तं भ
वति अर्थेनाम प्रत्यायनाय प्रयुक्तोऽर्थप्रयुक्तः धर्माय नियम इति चतुर्थ्या तादर्थ्यं प्रतिपाद्यते संबंधसामान्ये षष्ठीं विधाय समासः कर्तव्यः चतुस
मासस्य प्रकृतिविकारभाव एव विधानात् श्रीः

नावश्यमिति ततश्चाभीक्ष्ण्येन ये शब्दाः प्रयुज्यंते आगोपालांगनं तेषामेवान्वाख्यानं स्यान्नत्वविरलप्रयोगाणां विनापि च क्रियापदप्रयोगेणाभीक्ष्ण्यवृत्तिर्नित्यशब्दः प्रयुज्यते यथा आ
श्चर्यमनित्येऽनित्यवीप्सयोरिति अर्थे संबंधे चेति द्रव्यपक्षे द्रव्यस्यानित्यत्वादर्थग्रहणं संबंधविशेषणार्थमुपात्तं अनित्येऽर्थे कथं संबंधस्य नित्यतेति चेत् योग्यतालक्षणत्वात्संबंधस्य

अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते किं तर्ह्याभीक्ष्ण्येऽपि वर्तते तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति यावता अभीक्ष्ण्येऽपि वर्तते तेनाप्यत्रैवार्थः स्या
त् व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति पश्यति त्वाचार्यो मंगलार्थश्चेव सिद्धशब्द आदितः प्रयुक्तो भविष्यति शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमि
ति अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते सिद्धे शब्दे अर्थे संबंधे चेति आकृतिमित्याह कुत एतत् आकृतिर्हि नित्या द्रव्यमनित्यं
अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः सिद्धे शब्दे अर्थे संबंधे चेति नित्यो ह्यर्थवतामर्थैरभिसंबंधः अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः सिद्धे शब्दे अर्थे संबंधे चे
ति द्रव्यं हि नित्यं आकृतिरनित्या कथं विज्ञायते एवं हि दृश्यते लोके मृत्कयाचिदाकृत्या युक्ता पिंडो भवति पिंडाकृतिमुपमृद्य घटिकाः क्रियंते घटिकाकृतिमुपमृद्य कुंडिकाः
क्रियंते तथा सुवर्णं कयाचिदाकृत्या युक्तं पिंडो भवति पिंडाकृतिमुपमृद्य रुचकाः क्रियंते रुचकाकृतिमुपमृद्य कटकाः क्रियंते कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियंते पुनरा
वृत्तः सुवर्णपिंडः पुनरपरया आकृत्या युक्तः खदिरांगारसवर्णे कुंडले भवतः आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव आकृत्युपमर्देन द्रव्यमेवावशिष्यते आकृतावपि
पदार्थ एष विग्रहो न्याय्यः सिद्धे शब्दे अर्थे संबंधे चेति ननु चोक्तमाकृतिरनित्येति नैतदस्ति नित्या आकृतिः कथं न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति द्रव्यांतरस्था तूपलभ्यते।

तस्याश्च शब्दाश्रयत्वाच्छब्दस्य च नित्यत्वाददोषः द्रव्यं हि नित्यमिति असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः आकृतिरिति संस्थानं ब्रह्मदर्शने त्वगोत्वा
दिनांतरप्यसत्यत्वादनित्यत्वमात्मैवेदं सर्वमिति श्रुतिवचनात् न क्वचिदुपरतेति अनभिव्यक्तेत्यर्थः अद्वैतेन लौकिकव्यवहाराभावात् व्यवहारे चाकृतेरेकाकारपरामर्शहेतुत्वा

अस्त्यप्रयुक्ता इति प्रयोगमूलत्वादस्याः स्मृतेरप्रयुक्तानामन्वाख्यानादप्रामाण्यमाशंकते यथा घटादीनां विनाप्यर्थक्रियया सत्त्वं गम्यते नैवं शब्दानां ते हि सर्वदा व्यव
हाराय प्रयुज्यमाना सन्तः सत्त्वेनावसीयंते इत्याह इदानीमिति कश्चिदानीमित्युपहासपरं उत्तरं तु शास्त्रदृष्ट्या प्रकृतिप्रत्ययादिसद्भावादनुमितसत्ताव्यवहारगम्य
श्यंत इत्यर्थः नत्वहं लोके इति यथा लोकोऽर्थावगमाय शब्दान्प्रयुंक्ते नैवं मयैते ऽर्थे प्रयुक्ताः अपि तु स्वरूपपदार्थका इत्यर्थः अर्थे शब्दप्रयोगादिति अर्थसंक्रा
श्यंत इत्यर्थः नतेनैषामनु
वः शब्दसद्भावे लिंगं न हि विना शब्देनार्थप्रत्यायनमुपपद्यते इतरोऽन्यथासिद्धतामाह अप्रयोग इति यतोऽन्यैतेषामर्थानां संतिवाचका इति यइदानीम्
अस्त्यप्रयुक्ताः संति वै शब्दा अप्रयुक्ताः तद्यथा ऊषतेरक्रपेचेति किमतो यत्संत्यप्रयुक्ताः प्रयोगाद्धि भवान्शब्दानां साधुत्वमध्यवस्यति य इदानीम्
प्रयुक्ता नामी साधवः स्युः इदं विप्रतिषिद्धं यदुच्यते संति वै शब्दा अप्रयुक्ता इति यदि संति नाप्रयुक्ताः अथाप्रयुक्ता न संति संति चाप्रयुक्ताश्चेति
विप्रतिषिद्धं प्रयुंजान एव खलु भवानाह संति शब्दा अप्रयुक्ता इति कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् नैत
द्विप्रतिषिद्धं संतीति तावद्ब्रूमः यदेतांश्छास्त्रविदः शास्त्रेणानुविदधते अप्रयुक्ता इति ब्रूमः यल्लोके अप्रयुक्ता इति यदप्युच्यते कश्चेदानीमन्यो भवत
ज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति न ब्रूमोऽस्माभिरप्रयुक्ता इति किं तर्हि लोके अप्रयुक्ता इति ननु च भवानप्यभ्यंतरो लोके अभ्यंतरो
ऽहं लोके न त्वहं लोकः अस्त्यप्रयुक्ता इति चेन्नार्थे शब्दप्रयोगात् अस्त्यप्रयुक्ता इति चेत्तन्न किं कारणं अर्थे शब्दप्रयोगात् अर्थे शब्दाः प्रयुज्यंते स
न्ति चैषां शब्दानामर्थाः येष्वर्थेषु प्रयुज्यंते अप्रयोगः प्रयोगान्यत्वात् अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः कुतः प्रयोगान्यत्वात् य
देतेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुंजते तद्यथा ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः तेरेत्यस्यार्थे क्व यूयं तीर्णाः चक्रेत्यस्यार्थे क्व यू
यं कृतवंतः पेचेत्यस्यार्थे क्व यूयं पक्ववंतः इति अप्रयुक्ते दीर्घसत्रवत् यद्यप्यप्रयुक्ताः अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः तद्य
था दीर्घसत्राणि वार्षशतिकानि वार्षसहस्राणि न चाद्यत्वे कश्चिदप्याहरति केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते ॥ ७ ॥
मानत्वानुपपद्यते यद्यप्येषस्याभिनाहृतिसमानार्थेनि भवति परोक्षत्वादेर्विशेषस्यानवगमात् तथापि तदसाधनायपदांतरसंहितः प्रयु
ज्यते संप्रत्यप्रयुज्यमानानामपि पूर्वं प्रयुक्तत्वात् अनुशासनं कर्तव्यमित्याह अप्रयुक्त इति ऋषिसंप्रदाय इति वेदाध्ययनमित्यर्थः ॥ १० ॥

भा॰ के॰ १ धर्मार्थ इति धर्मार्थत्वान्नियम एव धर्मशब्देनाभिधीयते इति कर्मधारयः समासः धर्मप्रयोजन इति लिङादिविषयेण नियोगात्मत्वेन धर्मेण प्रयुक्त इत्यर्थः
८ प्रियतद्धिता इति नायमपशब्दः किं तु ये लोके वेदयोर्भवा अव्ययवास्ते लोकवेदशब्दाभ्यामभिधातुं शक्यंते आधाराधेयभावकल्पनया तु तद्धितप्रयोगः
प्रियतद्धितत्वनिमित्तः यथा कश्चिद्धनस्य तृप्त इति प्रयुंक्ते कश्चिद्धानस्यात्यमिति सम्हृष्ट समयात् अथ वेति नात्रानयवावयविविभागः किं तर्हि वेदलोक
प्रियतद्धितत्वनिमित्तः यथा कश्चिद्धनस्य तृप्त इति प्रयुंक्ते कश्चिद्धानस्यात्यमिति समहस्तसमयात् अथ वेति नात्रानयवावयविविभागः किं तर्हि वेदलोक
व्यतिरिक्तः सिद्धांतः शब्दार्थाभिवरूप इत्यर्थः लौकिकः स्मृत्युपनिबद्धः वैदिकः श्रुत्युपनिबद्धः शक्यं चानेनेति शक्तेः कर्मसामान्ये लिंगसर्वनाम नपुंस
कयुक्ते कृत्यप्रत्ययः ततः शब्दांतरसंबंधादुपजायमानमपि स्त्रीत्वं बहिरंगत्वादंतरंगसंस्कारेण न बाध्यत इति शक्यं शुद्धस्त्वक्तं पदद्वयपूर्वमेव विशेषवि

धर्मार्थो वा नियमो धर्मनियमः धर्मप्रयोजनो वा नियमो धर्मनियमः यथा लौकिकवैदिकेषु प्रियतद्धिता दाक्षिणात्याः यथा लोके वेदे चेति
प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुंजते अथ वा युक्त एवात्र तद्धितार्थः यथा लौकिकेषु वैदिकेषु च कृतांतेषु लोके तावदभक्ष्यो ग्राम्यक
कुटः अभक्ष्यो ग्राम्यसूकर इत्युच्यते भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहंतुं तत्र नियमः
क्रियते इदं भक्ष्यमिदमभक्ष्यमिति तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति समानश्च खेदविगमो गम्यायां चागम्यायां च तत्र नियमः क्रि
यते इयं गम्येयमगम्येति वेदे खल्वपि पयोव्रतो ब्राह्मणः यवागूव्रतो राजन्यः आमिक्षाव्रतो वैश्य इत्युच्यते व्रतं च नाम अभ्यवहारार्थ
मुपादीयते शक्यं चानेन शालिमांसादीन्यपि व्रतयितुं तत्र नियमः क्रियते तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते यूपश्च नाम पश्व
नुबंधार्थमुपादीयते शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबंद्धुं तत्र नियमः क्रियते तथाग्नौ कपा
लान्यधिश्रित्याभिमंत्रयते भृगूणामंगिरसां घर्मस्य तपसा तप्यध्वमिति अंतरेणापि मंत्रमग्निर्दहनकर्मा कपालानि संतापयति तत्र
नियमः क्रियते एवं क्रियमाणमभ्युदयकारि भवतीति एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते श
ब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रियमाणमभ्युदयकारि भवतीति ॥ श्री ॥
वक्षात्तदाशक्याः क्षुदिति भवत्येव यत्क्षुत्प्रतिघातस्यैव भक्ष्यकर्म शक्तेः क्षुत्प्रतिघातः तदा क्षुत्प्रतिहंतुं शक्यमिति भवति खेदादिति खेदस्तीति खेदो रागः इंद्रियनियमासामर्थ्यं वा
वेदः पयोव्रत इति सत्यामर्थितायां पय एव व्रतयतीति सामर्थ्यान्नियमोऽयं न तु विधिः अर्थित्वाभावे कारणाभावात् समानायामिति यद्यपि सत्त्वादपभ्रंशानवाचकाः तथापि श
स्मर्यमाणसाधुशब्दव्यवधानेनार्थं प्रत्याययंति केचिच्चापभ्रंशाः परंपरया निरूढिमागताः साधुशब्दानस्मारयंत एवार्थं प्रत्याययंति अन्ये तु मन्यंते साधुशब्दवदपभ्रंशा अपि सा

भाष्यप्रदीपोद्द्योतः श्री

नत्र प्रयत्न इति यदि प्रयत्नेन विना फलं स्यात् प्रयत्नवैयर्थ्यमापद्येतेत्यर्थः तत्तुल्यमिति वेदः शब्दो यस्यार्थस्य स वेदशब्दः तस्य यथा ज्ञानानुष्ठानं तथा शब्दादीनामपि कलादिज्ञा
नविभागपूर्वकः अपर आहेति वेदश्चासौ शब्दश्चेति वेदशब्द इति कर्मधारयः अथवेति अपशब्दज्ञानं नांतरीयकत्वाच्छब्दज्ञानस्य पृथक् फलमपशब्दज्ञानस्य नास्तीत्यर्थः दोष इति उ
त्कृष्टधर्मफलावाप्तौ स्वल्पधर्मफलमुत्पन्नं कल्प्यं भवतीत्यर्थः प्रत्यक्षधर्माण इति योगप्रत्यक्षेण सर्वं विदितवंतः परापरज्ञा इति विद्याविद्याप्रविभागज्ञाः अथेति उक्तमिदं

नत्र प्रयत्नः फलाद्व्यतिरेच्यः ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यंते त एव साधीयोऽभ्युदयेन योक्ष्यंते व्यतिरेकोऽपि वै लक्ष्यते दृश्यंते हि कृतप्रयत्नाश्चा
प्रवीणाः अकृतप्रयत्नाश्च प्रवीणाः तत्र फलव्यतिरेकोऽपि स्यात् एवं तर्हि नापि ज्ञान एव धर्मो नापि प्रयोग एव किं तर्हि शास्त्रपूर्वके प्रयोगेऽभ्युदयः तत्तुल्यं वेदशब्दे
न शास्त्रपूर्वकं यः शब्दान्प्रयुंक्ते सोऽभ्युदयेन युज्यते तत्तुल्यं वेदशब्देन वेदशब्दा अप्येवमभिवदंति योऽग्निष्टोमेन यजते य उ चैनमेवं वेद योऽग्निं नाचिकेतं चिनुते य उ
चैनमेवं वेद अपर आह तत्तुल्यं वेदशब्देनेति यथा वेदशब्दा नियमपूर्वमधीताः फलवंतो भवंति एवं यः शास्त्रपूर्वकं शब्दान्प्रयुंक्ते सोऽभ्युदयेन युज्यत इति अ
थवा पुनरस्तु ज्ञान एव धर्म इति ननु चोक्तं ज्ञाने धर्म इति चेत्तथाऽधर्मः नैष दोषः शब्दप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणं शब्दश्च शब्दज्ञा
ने धर्ममाह नापशब्दज्ञानेऽधर्मं यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति नाभ्युदयाय तद्यथा हिक्कितहसितकंडूयितानि नैव दोषाय भवंति नाभ्युद
याय अथवाऽभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने योऽपशब्दाञ्जानाति शब्दानप्यसौ जानाति तदेवं ज्ञाने धर्म इति ब्रुवतोऽर्थादापन्नं भवति अपशब्दज्ञान
पूर्वके शब्दज्ञाने धर्म इति अथवा कूपखानकवदेतद्भविष्यति तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सोऽप्सु संजातासु
तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मः तथापि यस्त्वसौ शब्दज्ञाने ध
र्मः तेन स च दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति यदप्युच्यते आचारे नियम इति याज्ञे कर्मणि स नियमः एवं हि श्रूयते यर्वाणस्तर्वाणो
नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञाः विदितवेदितव्या अधिगतयाथातथ्याः ते तत्रभवंतः यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वा
ण इति प्रयुंजते याज्ञे पुनः कर्मणि नापभाषंते तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते पराभूताः अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः
सूत्रं सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते व्याकरणस्य सूत्रमिति किं हि तदन्यत्सूत्राद्व्याकरणं यस्यादः सूत्रं स्यात् शब्दाप्रतिपत्तिः शब्दानां चाप्रतिप
त्तिः प्राप्नोति ॥

न चांतरेण व्याकरणमित्यादि तत्र पक्षद्वयेऽपि दोषदर्शनात्पदार्थप्रश्नः षष्ठ्यर्थ इति द्वाभ्यामपि शब्दाभ्यामष्टाध्यायाः प्रतिपादनाद्व्यतिरेकाभावः सामान्यविशेष
शब्दतया द्वयोः प्रयोगो न विरुध्यते यदा त्वष्टाध्याय्येकदेशः सूत्रशब्देनोच्यते तदा षष्ठ्यर्थोऽप्युपपद्यते शब्दाप्रतिपत्तिरिति नहि व्याख्यानरहितसूत्रश्रवणाच्छब्दाः प्रतीयंते

सर्व इति इदमत्र तात्पर्यं यस्य कस्यचिद्वचनात्प्रयोगाप्रयोगौ न व्यवतिष्ठेते अपि तु शिष्टानामेव वचनात् वाकोवाक्यशब्देनोक्तिप्रत्युक्तिरूपो ग्रंथ उच्यते यथा किंस्वि
दावपनं महदित्यग्निरावपनं महदिति पूर्ववृत्तसंकीर्तनमितिहासः वंशाद्यनुकीर्तनं पुराणं विकार इति जीवतो मृतावस्था विकारः तत्रैनं सर्वः किं पुनरिति

सर्वे देशांतरे सर्वे खल्वप्येते शब्दा देशांतरेषु प्रयुज्यंते न चैवोपलभ्यंते उपलब्धौ यत्नः क्रियतां महान्हि शब्दस्य प्रयोगविषयः सप्तद्वीपा वसुमती त्रयो लो
काश्चत्वारो वेदाः सांगाः सरहस्याः बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वा
कोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः एतावंतं शब्दस्य प्रयोगविषयमननुनिशम्य संत्यप्रयुक्ता इति वचनं के
वलं साहसमेव एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यंते तद्यथा शवतिर्गतिकर्मा कंबोजेष्वेव भाषि
तो भवति विकार एनमार्या भाषंते शव इति हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु गमिमेव त्वार्याः प्रयुंजते दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु ये चाप्ये
ते भवतोऽप्रयुक्ता अभिमताः शब्दाः एतेषामपि प्रयोगो दृश्यते क्व वेदे तद्यथा यद्वो रेवती रेवत्यं तदूष यन्मे नरः श्रुत्यं ब्रह्म चक्र यत्रा नश्चक्रा जरसं त
नूनामिति किं पुनः शब्दस्य ज्ञाने धर्मः आहोस्वित्प्रयोगे कश्चात्र विशेषः ज्ञाने धर्म इति चेत्तथाऽधर्मः ज्ञाने धर्म इति चेत्तथाऽधर्मः प्राप्नोति यो हि श
ब्दाञ्जानाति अपशब्दानप्यसौ जानाति यथैव शब्दज्ञाने धर्मः एवमपशब्दज्ञानेऽप्यधर्मः प्राप्नोति अथवा भूयानधर्मः प्राप्नोति भूयांसोऽपशब्दाः
अल्पीयांसः शब्दाः एकैकस्य शब्दस्य बहवोऽपभ्रंशाः तद्यथा गौरित्यस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः आचारे नि
यमः आचारे पुनरृषिर्नियमं वेदयते तेऽसुरा हेलयो हेलय इति कुर्वंतः पराबभूवुरिति अस्तु तर्हि प्रयोगे प्रयोगे सर्वलोकस्य
यदि प्रयोगे धर्मः सर्वो लोकोऽभ्युदयेन युज्यते कश्चेदानीं भवतो मत्सरः यदि सर्वो लोकोऽभ्युदयेन युज्येत न खलु कश्चिन्मत्स
रः प्रयत्नानर्थक्यं तु भवति फलवता च नाम प्रयत्नेन भवितव्यम् कामधुग्भवतीति श्रुतिवाक्यं

एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके
सम्यग्ज्ञातः कामधुग्भवति सुप्रयोगात्तु सम्यग्ज्ञानत्वानुमानमित्यर्थः आहोस्वित्सुप्रयुक्तः कामधुग्भवति सुप्रयुक्तत्वस्य सम्यग्ज्ञानादिति प्र
श्नः ज्ञाने धर्म इति चेदिति यथा श्लेष्मणः प्रकोपनं स्नेहद्रव्यं रूक्षं तु वायोः तथेहापि प्राप्तमिति भावः आचार इति प्रयोगे ऋषिर्वेदः

आत इति निपातः अतश्च हेतोरित्यर्थः नाहइति नेतरेत्यर्थः अथवा नाद्योर्थः रहितत्वाद्दोषमात्रमेव गृह्यत इत्यर्थः किमर्थमिति निर्दिष्टोपदेशेनोनकस्य चिंता स्यादि
त्यनुशासनमिति भावः वृत्तिसमवायार्थ इति लाघवेन शास्त्रप्रवृत्त्यर्थ इत्यर्थः धर्मनियमवत्समानाः इत्यर्थ इति शास्त्रप्रवृत्तिप्रत्यासत्तिलक्षणसमवायस्य वर्णनीय
ति इत्यण इत्यादौ हि यथा सरव्याशास्त्रवर्णसन्निवेशमात्रे वा नतिष्ठते वृत्तिप्रयोजन इति पारंपर्येण शास्त्रप्रवृत्ताववस्थानं सति हि समवाय इत्याज्ञान
तआदिरंत्येन सहेता इत्यादिशास्त्रप्रवृत्तिः प्रत्याहारार्थमिति प्रत्याहारशब्देनाणादिकाः संज्ञा उच्यंते इष्टबुद्ध्यर्थश्चेति सतिप्रत्युपदेशे कला
दिदोषरहितावेव वर्णा निर्दिष्टास्ते तथैव प्रयोक्तव्या इत्युक्तं भवति एकश्रुत्यादि वर्णपाठात्ते विषमुदात्तादीनामुपदेशः कर्तव्य इत्याह इष्टबुद्ध्यर्थश्च

आतश्च सूत्र एव वर्णोपदेशस्तं कथयेन्नादोषेणेत अथ किमर्थो वर्णानामुपदेशः वृत्तिसमवायार्थ उपदेशः वृत्तिसमवायार्थो वर्णानामुपदेशः कर्तव्यः किमि
दं वृत्तिसमवायार्थ इति वृत्तये समवायो वृत्तिसमवायः वृत्त्यर्थो वा समवायो वृत्तिसमवायः वृत्तिप्रयोजनो वा समवायो वृत्तिसमवायः का पुनर्वृत्तिः शा
स्त्रप्रवृत्तिः अथ कः समवायः वर्णानामानुपूर्व्येण सन्निवेशः अथ क उपदेशः उच्चारणं कुत एतत् दिशिरुच्चारणक्रियः उच्चार्य हि वर्णानाह उपदिष्टा
इमे वर्णा इति अनुबंधकरणार्थश्च अनुबंधकरणार्थश्च वर्णानामुपदेशः कर्तव्यः अनुबंधानासंक्ष्यामीति नह्यनुपदिश्य वर्णाननुबंधाः शक्या आसं
क्तुं स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबंधकरणार्थश्च वृत्तिसमवायश्चानुबंधकरणं च प्रत्याहारार्थं प्रत्याहारार्थ इत्यर्थः इष्टबुद्ध्यर्थ
श्च वर्णानामुपदेशः इष्टान्वर्णान्भोत्स्यामह इति नह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुं इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासि
कदीर्घप्लुतानामप्युपदेशः इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः एवंगुणा अपि हि वर्णा इष्यंते
आकृत्युपदेशात्सिद्धं आकृत्युपदेशात्सिद्धमेतत् अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति तथेवर्णाकृतिस्तथोवर्णाकृतिः आकृत्युप
देशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधः आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधो वक्तव्यः के पुनः संवृतादयः संवृतः कलो ध्मा
तः एणीकृतोंबूकृतो र्धग्रस्तो निरस्तः प्रगीत उपगीतः क्ष्विण्णो रोमश इति ॥ ॥ श्रीसत्यकोटिव्यासायनमः ॥ ॥ ७
निरेषेति आकृत्युपदेशात्सिद्धमिति उपात्तोपि विशेषो नांतरीयकत्वान्नविवक्षितो धान्यविवक्षायामिव पलाल इत्यर्थः संवृतादीनामाकृतिग्राकारादीनां संवृतादे
र्योपकारः स्वसंबंधिगुणत्वात् तत्र संध्यक्षरेषु विवृतेषु नतत्र भेदेषु चार्थेषु संवृतत्वदोषः कलः स्थानांतरनिष्पन्नः काकलिकत्वेन प्रसिद्धः ध्मातः
श्वासभूयिष्ठतया ह्रस्वोपि दीर्घ इव लक्ष्यते एणीकृतो विशिष्टः किमयमोकारो औकार इति यत्र संदेहः अंबूकृतो यत्र कोष्ठ्यनतश्रुतिरिवाभूयते
अर्धको दीर्घोपि ह्रस्व इव ग्रस्तो जिह्वामूले निगृहीतः अव्यक्त इत्यपरे निरस्तो निष्ठुरः प्रगीतः सामवदुच्चारितः उपगीतः समीपवर्णांतरगी
त्यानुरक्तः क्ष्विण्णः कंपमान इव रोमशो गंभीरः अवलंबितो वर्णांतरसंभिन्नः निहतो मूकः संदष्टो वर्धित इव विकीर्णो वर्णांतरप्रसक्त एकोप्यने

भा·के·१

१०

समुदितेति समुदायादेवार्थावसायोत्पादादित्यर्थः शब्द इति करणे ल्युड्विधीयते शब्दश्च व्याक्रियमाणत्वात्कर्म न तु करणमिति भावः भवे चेति शब्देयन्ना स्याप
फलेन भवो योग इति चेन्न मीमांसादियोगस्यापि शब्दप्रतिविचारकत्वात् वैयाकरणत्वप्रसंगः नचेदानीमिति लक्षणप्रपंचाभ्यां सूत्रवद्वार्तिकाभावानुपपत्त्यादो
षाभावः प्रस्कंदनमिति यद्यप्ययं भीमादिः तथापि कृत्यल्युटो बहुलमित्यस्य भीमादयोपादनमित्ययं प्रपंच इति भावः गौरित्युक्त इति सास्नादिमतिप्रदाकंचित्स
त्ययं गौरित्युच्यते तदा तत्रवाचकांतराणां निवृत्तिः कृता भवति एवमेकस्मिन्नुदाहरणे उपन्यस्ते सर्वाणि तल्लक्षणानि शब्दांतराणि प्रतीयंते पूर्वपंचाला इति ज
नपदांतरनिवृत्तिविवक्षायामेकदेशेपि समुदायरूपारोपात् प्रयोगः तैलमिति यद्यपि सर्षपसंस्कृतघृतं तैलमात्रं भवति नदेतदुदाहरणं आकृतिवाचित्वेन

व्याकरणाच्छब्दान्प्रतिपद्यामह इति नहि सूत्रत एव शब्दान्प्रतिपद्यंते किं तर्हि व्याख्यानतश्च नमु चरेव सूत्रं विगृहीतं व्याख्यानं भवति नकेवलानि चर्चा
पदानि व्याख्यानं वृद्धिः आत् ऐजिति किं तर्ह्युदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति एवं तर्हि शब्दः शब्दे ल्युडर्थः यदि
शब्दो व्याकरणं ल्युडर्थो नोपपद्यते व्याक्रियंते शब्दा अनेनेति व्याकरणं नहि शब्देन किंचिद्व्याक्रियते केन तर्हि सूत्रेण भवे च तद्धितः भवे च तद्धितो नोपप
द्यते व्याकरणे भवो योगो वैयाकरण इति नहि शब्दे भवो योगः क्व तर्हि सूत्रे प्रोक्तादयश्च तद्धिताः प्रोक्तादयश्च तद्धिता नोपपद्यंते पाणिनिना प्रोक्तं पाणि
नीयं आपिशलं काशकृत्स्नमिति नहि पाणिनिना शब्दाः प्रोक्ताः किं तर्हि सूत्रं किमर्थमिदमुभयमुच्यते भवे प्रोक्तादयश्च तद्धिता इति न तदपि पठितं नचे
दानीमाचार्याः सूत्राणि कृत्वा निवर्तयंति अयं तावददोषः यदुच्यते शब्दे ल्युडर्थ इति नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते किं तर्हि अन्येष्वपि
कारकेषु कृत्यल्युटो बहुलमिति तद्यथा प्रस्कंदनं प्रपतनमिति अथवा शब्दैरपि शब्दा व्याक्रियंते तद्यथा गौरित्युक्ते सर्वे संदेहा निवर्तंते नाश्वो न ग
र्दभ इति अयं तर्हि दोषः भवे प्रोक्तादयश्च तद्धिता इति एवं तर्हि लक्ष्यलक्षणे व्याकरणं लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति किं पुनर्लक्ष्यं किं ल
क्षणं शब्दो लक्ष्यः सूत्रं लक्षणं एवमप्ययं दोषः समुदाये व्याकरणशब्दः प्रवृत्तोवयवे नोपपद्यते सूत्राणि चाप्यधीयान इष्यते वैयाकरण इति नैष दोषः
समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तंते तद्यथा पूर्वे पंचालाः उत्तरे पंचालाः तैलं भुक्तं घृतं भुक्तं शुक्लो नीलः कृष्ण इति एवमयं समुदाये व्याकरणशब्दः
प्रवृत्तोवयवेपि वर्तते अथवा पुनरस्तु सूत्रं ननु चोक्तं सूत्रे व्याकरणे षष्ठ्यर्थोनुपपन्न इति नैष दोषः व्यपदेशिवद्भावेन भविष्यति यदुच्यते शब्दाप्रति
पत्तिरिति नहि सूत्रत एव शब्दान्प्रतिपद्यंते किं तर्हि व्याख्यानतश्चेति परिहृतमेतत् तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति ननु चोक्तं न केवलानि च
र्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति किं तर्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवतीति अविजानत एतदेवं भवति सूत्रत एव हि शब्दा
न्तैलशब्दयोः संस्थानप्रमाणनिरपेक्षा सर्वत्र मुख्या वृत्तिः शक्ल इति अशक्लेप्यवयवे अवयवांतरस्य शौक्ल्यात्समुदायस्य शुक्लत्वारोपात्प्रयोगः व्यपदेशिवद्भावे
नेति यथा राहोः शिर इत्येकस्मिन्नपि वस्तुनि शब्दार्थभेदाद्भेदव्यवहारः एवमिहापि व्याकरणशब्देन शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्यते सूत्रशब्देन तु

१०

भा॰ कै॰ ११

स्वरदोषभावना इति स्वरदोषगोचराणि अनंतादिदोषा अशक्तिप्रमादकृताः अस्त्यन्यदिति गर्ग इत्यादिनैव सन्निवेशेन गर्गादीनां साधुत्वं यथा स्यात् गार्ग्य इत्यादीनां मध्ये तत्र न ज्ञातानामेवाकारादीनां दोषनिवृत्तिः कृता स्यान्न तु समुदायानां तेषां यद्यपि प्रत्ययविध्यर्थो गर्गादीनां पाठस्तथापि प्रसंगात्समुदायसाधुत्वार्थोपि भवति निवृत्तकलादिकामिति अकारस्य संवृतत्वानिवृत्तं तत्संवृतत्वादिकामिति नोक्तमकारस्य निदर्शनार्थत्वात् सर्ववर्णानां शास्त्रान्ते प्रत्यापत्तिसिद्धिः यदनुबंधैरिति यथा स्वरितत्वमधिकारार्थं स्वमात्मनेपदार्थं घकारादिकं प्रतिज्ञायकलादात्मनेपदमित्यादि करिष्यते न तु [illegible] इत्यादि ननु तथापि भाषावैकथमणादिका संज्ञा उपपद्यते आदिरंत्येनेत्यत्र आदिः कलेः सहेत्युक्ता अइउण् इत्यादिकाः संज्ञाः करिष्यंते स्वरसंध्यक्षरसंदेहार्थं न करिष्यते इत्यर्थः उभयमिति यथा

अपर आह ग्रस्तं निरस्तमविलंबितं निर्हतमंबूकृतं ध्मातमथो विकंपितं संदष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावना इति अतोन्ये व्यंजनदोषाः नैष दोषः गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति अस्त्यन्यद्गर्गादिबिदादिपाठे प्रयोजनं किं समुदायानां साधुत्वं यथा स्यादिति एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि सा तर्हि वक्तव्या लिंगार्था तु प्रत्यापत्तिः लिंगार्था तावन्न तर्हि वक्तव्यं यद्यप्येतदुच्यते अथवैतर्ह्यनेकमनुबंधशतं नोच्चार्यमित्संज्ञा च न वक्तव्या लोपश्च न वक्तव्यः यदनुबंधैः क्रियते तत्कलादिभिः करिष्यते सिध्यत्येवमपाणिनीयं तु भवति यथान्यासमेवास्तु ननु चोक्तमाकारस्य संवृतादीनां प्रतिषेधः इति परिहृतमेतत् गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति ननु चान्यद्गर्गादिबिदादिपाठे प्रयोजनमुक्तं किं समुदायानां साधुत्वं यथा स्यादित्येवं तर्ह्येतस्य मनेन क्रियते पाठश्चैव विशेष्यते कलादयश्च निवर्त्यंते कथं पुनरेकेन यत्नेनोभयं लभ्यमित्याह द्विगता अपि हेतवो भवंति तद्यथा आम्राश्च सिक्ताः पितरश्च प्रीणिता इति तथा वाक्यान्यपि द्विष्टानि भवंति श्वेतो धावति अलंबुसानां यातेति अथवा इदं तावदयं प्रष्टव्यः केमे संवृतादयः श्रूयेरन्निति आगमेषु आगमाः शुद्धाः पठ्यंते विकारेषु तर्हि विकाराः शुद्धाः पठ्यंते प्रत्ययेषु तर्हि प्रत्ययाः शुद्धाः पठ्यंते धातुषु तर्हि धातवोपि शुद्धाः पठ्यंते प्रातिपदिकेषु तर्हि प्रातिपदिकान्यपि शुद्धानि पठ्यंते यानि तर्ह्यग्रहणानि प्रातिपदिकानि एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः शशः षष इति मा भूत् पलाशः पलाष इति मा भूत् मंचकः मंजक इति मा भूत् आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः उच्चार्यंते ततस्तेषु नेमे प्राप्ताः कलादयः इति श्रीमत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्या

भूता गर्गादिस्था अकारादयस्तथाभूता एव सर्वत्र प्रयोक्तव्या इति प्रतिपाद्यत इत्यर्थः द्विगता इति द्वावर्थौ गताः प्रयोजनद्वयस्य संपादका इत्यर्थः तथा वाक्यान्यपीति शब्दस्याप्यर्थद्वयद्विगतत्वमित्यर्थः अथवेति केवलानां वर्णानां लोके प्रयोगाभावात् धात्वादीनां च शुद्धानां पाठात्तत्स्थानां वर्णानां न कश्चिद्दोषः यानि तर्हीति डित्थादीनि एतेषामपीति शिष्टप्रयुक्तत्वेनोणादीनां पृषोदरादित्वाच्च साधुत्वाभ्युपगमात् सिद्धः इत्युपाध्यायजैय्य

दीनां च टपुत्रकैय्यटकृते भाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् श्रीसांबः प्रसन्नोस्तु

११

भा॰ कै॰
१

श्रीगणपतये नमः श्रीसरस्वत्यै नमः श्रीसिद्धकोटीश्वराय नमः॰ अइउण् सर्ववर्णानामविशेषेण विवार्यविशेषेणात्र विवारः क्रियते॰ अकारस्येति॰ अत्राकारादीनां स्वरूपेणानुकार्येण वा सतोऽप्यर्थवत्त्वस्याविवक्षितत्वाद्विभक्त्यनुत्पत्तिः॰ स्वरसंधिस्तु न भवति॰ वर्णोपदेशकाले ऽनादिसंज्ञानामनिष्पादात्॰ तत्राकारस्य संवृतत्वाद्दीर्घप्लुतयोर्विवृतत्वात्प्रयत्नभेदात्सवर्णसंज्ञाया अप्रसङ्गात्प्रदेशेष्वकारेण दीर्घप्लुतयोर्ग्रहणं न प्राप्नोतीति विवृतत्वमस्योपदिश्यते॰ विवृतस्य गुणस्योपदेशो विवृतोपदेशः तत्र गुणस्य नित्यसापेक्षत्वादकारापेक्षित्वेऽपि समासः॰ यथा देवदत्तस्य गुरुकुलमिति॰ आकारग्रहणार्थ इति॰ विवृतोपदेश आकारग्रहणार्थ इति॰ सामानाधिकरण्येन निर्देशादाकारग्रहणं विवृतोपदेशस्य प्रयोजन

अइउण् अकारस्य विवृतोपदेश आकारग्रहणार्थः अकारस्य विवृतोपदेशः कर्तव्यः किं प्रयोजनं आकारग्रहणार्थः अकारः सवर्णग्रहणेन आकारमपि यथा गृह्णीयात्॰ किं च कारणं न गृह्णीयात् विवारभेदात्॰ किमुच्यते विवारभेदादिति॰ न पुनः कालभेदादपि यथैव ह्ययं विवारभिन्नः एवं कालभिन्नोऽपि॰ सत्यमेवतत् वक्ष्यति तुल्यास्यप्रयत्नं सवर्णमित्यत्रास्यग्रहणस्य प्रयोजनं आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति ॥

मिति सामर्थ्यादवगमात्प्रबोधानुरूपमुत्तरं भवतीति न चोदनीयं॰ सवर्णग्रहणेनेति॰ येन शास्त्रेणाणुदित्सवर्णस्येत्यनेन सवर्णा गृह्यन्ते तेन कारणेनेत्यर्थः॰ किं च कारणमिति॰ आकृतिपक्षाश्रयेण ग्रहणकशास्त्रस्य प्रत्याख्यानादाकारस्याप्यत्र जातिसद्भावात्सिद्धं ग्रहणमिति भावः॰ अत्र च निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति प्रथमा कृता॰ तेन कस्मात्कारणादित्यर्थः संपद्यते॰ विवारभेदादित्यत्र तु कारणशब्दप्रयोगाभावात्प्रायग्रहणात्सर्वनाम्नो वा प्रथमा द्वितीययोरभावाद्विभाषा गुणेऽस्त्रियामिति पञ्चमी विहिता॰ विवारयति विकासयत्यास्यमिति विवारः प्रयत्नः व्यक्तिपक्षे ग्रहणकशास्त्रारम्भाद्दोषापत्तिः॰ व्यक्तिपक्षे भेदान्तरसद्भावादाह किमुच्यत इति॰ ५

२

बाह्यत्वेति॰ प्रयत्नाभिनिर्वृत्तत्वात्कालस्य प्रयत्नमत्वमभ्युपगम्य बाह्यत्वेन परिहारः प्रसिद्धपरिमाणं वस्त्वन्तरगतपरिच्छेदकक्रियान्तरापेक्षणात्कालव्यवहारस्य बाह्यत्वं कालस्य यथा व्रीहिः प्रस्थादिव्यवहारः परिमाणद्रव्यकृतः एवं मात्रादिव्यपदेशा निमेषादिक्रियाकृतः॰ अथवा भागिप्रदेश एव विशिष्टप्रयत्नारम्भाद्दीर्घादिनिष्पत्तावाभ्यन्तरस्याबाह्यत्वात्कालस्य बाह्यत्वं॰ विवृतादीनां चास्यदेशे प्रयत्नानिष्पाद्यत्वादाभ्यन्तरत्वं॰ प्लुतादिषु तु यस्तु यथा न भेदिकास्तथा तत्परस्त्रे वक्ष्यति॰ किं पुनरिति॰ किं सूत्रकारेणैव विवृतोपदेशः कृतो वार्तिककारेण तु तस्य प्रयोजनमुक्तं अथवाऽकृत एव विवृतोपदेशो वार्तिककृता बोध्यत्वेनोपन्यस्य इति प्रश्नः उरवधारणाउपदिष्टोऽपि विवृतो व्याख्यानेन विना न शक्यते ज्ञा

बाह्यश्च पुनरास्यात्कालः तेन स्यादेव कालभिन्नस्य ग्रहणं न पुनर्विवारभिन्नस्य॰ किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते॰ आहोस्वित् संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते॰ विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते॰ कथं ज्ञायते॰ यदयम अ अ इत्यकारस्य विवृतस्य संवृततां प्रत्यापत्तिं शास्ति॰ नैतदस्ति ज्ञापकं अस्ति ह्यन्यदेतस्य वचने प्रयोजनं किं॰ अतिखट्वः अतिमाल इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति॰ संवृतः स्यादित्येवमर्थं प्रत्यापत्तिः॰ नैतदस्ति॰ न वै लोके नन्ववेदे अकारो विवृतोऽस्ति कस्तर्हि संवृतः योऽस्ति स भविष्यति॰ तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति॰

तुमिति प्रसक्तेऽप्युकारे प्रश्नो यं नासमञ्जसः॰ तत्र प्रत्यापत्तिपूर्वः पक्ष आश्रितः अन्यथा शास्त्रान्ते प्रत्यापत्तिवचनमनर्थकं स्यात् स्वरूपप्रत्ययाभावात्॰ अस्ति ह्यन्यदिति॰ प्रयोगे एव प्राप्ते विवृतत्वे संवृतप्रत्यापत्तिः स्यादित्सज्ञापकमेतदित्यर्थः॰ ननु विहाय सति विवृतोपदेशे सावर्ण्याभावादकारेणाकारस्याग्रहणाद्ध्रस्वाभावात्कथमतिखट्व इति ह्रस्वः॰ नैष दोषः॰ उदीचां मातेः स्थाने इति ज्ञापकाद्भवति आकारस्य ह्रस्वः॰ नैव लोके इति॰ प्रयुक्तानामनुशासनात्प्रयोगे च विवृतस्याकारस्याभावात्संवृत एव भविष्यतीति प्रत्यापत्तिर्ज्ञापिकैव॰

कएषयत्नइति · धात्वादयः पठिताः तत्राकारो विवृतः पठ्यतां नाम हि किं विवृतोपदेशे भवति तत्किमुच्यते अन्यत्रापि विवृतोपदेशः कर्तव्य इति प्रश्नः · यानीति प्रातिपदपाठ
स्याशक्यत्वात्तस्य विवृतोपदेशादित्यनेन सर्वस्याकारस्य विवृतोपदेशः कार्यतया बोध्यत इत्यर्थः · धात्वादिस्थइति · अन्यह पाठात्प्रातिपदिकार्थे विवृतत्वे
अवश्यंबोध्यनीये धात्वादिस्थस्यापि संवृतस्यैव पठितस्य कार्यार्थं विवृतत्वं ज्ञेयं · अन्यथा दोषरूपविवृतोच्चारणे प्रयत्नस्य गौरवं स्यात् विवृतत्वप्र
तिज्ञानप्रयोजनान्तरमाह · दीर्घेति · असति विवृतत्वप्रतिज्ञाने संवृतस्याकारस्य स्थानेसावर्ण्यात्संवृतयोरेव दीर्घप्लुतयोः प्रसंग इत्यर्थः ·

कएषयत्नश्चोद्यते विवृतोपदेशो नाम विवृतो वोपदिश्येत संवृतो वा कोन्वत्र विशेषः · स एष सर्व एवमर्थो यत्नः क्रियते यान्येतानि प्राति
पदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते तद्गुरु भवति · तस्माद्वक्तव्यं धात्वादिस्थश्च विवृत इति · दीर्घप्लुतवचनेन च संवृत
निवृत्त्यर्थः · दीर्घप्लुतवचनेन संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्तव्यः · दीर्घप्लुतौ संवृतौ मा भूतामिति · वृक्षाभ्यां देवदत्ता ३ इति · नैवलो
के न च वेदे दीर्घप्लुतौ संवृतौ स्तः कौ तर्हि विवृतौ यौ स्तस्तौ भविष्यतः · स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणं संवृतः स्थानी संवृतौ दी
र्घप्लुतौ प्रकल्पयेत् अनुस्वारो यथा यणं · तद्यथा संय्यन्ता संव्वत्सरः यँल्लोकं तँल्लोकमिति अनुस्वारः स्थानी यणमनुनासिकं प्रकल्पय
ति · विषम उपन्यासः युक्तं यत्सतस्तत्र प्रकृतिर्भवति · सन्ति हि यणः सानुनासिका निरनुनासिकाश्च दीर्घप्लुतौ पुनर्नैव लोके न च
वेदे संवृतौ स्तः कौ तर्हि विवृतौ यौ स्तस्तौ भविष्यतः · एवमपि कुत एतत्तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः न पुनस्तुल्यप्रयत्नौ स्था
नभिन्नौ स्यातामीकार ऊकारो वेति ·

नैवलोकइति · असत्यपि सावर्ण्ये लिंगादकारस्य संवृतस्य विवृतौ दीर्घप्लुतौ भविष्यतः · यदयमतो दीर्घो यञि अतो रोरप्लुतादप्लुत इत्याहेति भावः ·
स्तस्तत्रेति · अशक्यत्वाद्दीर्घप्लुतयोः संवृतयोरुच्चारणस्येत्यर्थः · एवमपीति · असति विवृतत्वप्रतिज्ञाने संवृतस्याकारस्य संवृता
ववीकारोकारौ प्राप्नुतः · यतः संवृता अन्यत्रापि सन्ति इति केचित् ईकारोकारयोः संवृतत्वस्याभ्युपगमात् · ५८

विषयेणेति वार्तिककारेणाकरणत्वेन सामान्यरूपतयाचाभेदेन विषयो निर्दिष्टः भाष्यकारस्त्वधिकरणत्वं व्यक्तिभेदाद्दीर्घांश्च प्रतिपा
दयति विषये विषय इति सर्वगुणमिति गुणा अनुबंधाः कार्यायाश्रितत्वादुपकारकत्वात्तत्र कर्मणि कण्टि तिष्ठ्यादित्यर्थः शल्यकवदिति
शल्यकश्वाविद्विशेषः सयथा कंटकतुल्यैः पक्षैर्व्याप्यते नैवं सर्वानुबंधयुक्तोऽकारः शक्यो निर्देष्टुं आद्यंतयोरेवेत्संज्ञाविधानान्मध्यपा
तिनां श्रवणप्रसंगादित्संज्ञेवायच्छेत्याप्रियतइत्येककर्तृकत्वाद्दायम्येत्युक्तं यद्ययमिति विषयेणेत्येतदन्यथाव्याचष्टे नानाशब्दमपनीय

विषयेणतु नानालिंगकरणात्सिद्धं यदयं विषये विषये नानालिंगमकारं करोति कर्मण्यण् आतोनुपसर्गे क इति तेन ज्ञाय
ते नानुबंधसंकरोस्तीति यदि हि स्यात् नानालिंगकरणमनर्थकं स्यात् एकमेवायं सर्वगुणमुच्चारयेत् नैतदस्ति न्यापकं इत्सं
ज्ञाप्रकॢप्त्यर्थमेतत्स्यात् नह्ययमनुबंधैः शल्यकवच्छक्यउपचेतुं इत्संज्ञायां हि दोषः स्यात् आयम्यहि द्वयोरित्संज्ञा स्यात् कयो
राद्यंतयोः एवं तर्हि विषयेणतु पुनर्लिंगकरणात्सिद्धं यदयं विषये विषये पुनर्लिंगमकारं करोति प्राङ्दीव्यतोण् शिवादिभ्यो
णिति तेन ज्ञायते नानुबंधसंकरोस्तीति यदि हि स्यात् पुनर्लिंगकरणमनर्थकं स्यात् अथवा पुनरस्तु विषयेणतु नानालिंग
करणात्सिद्धमित्येव ननु चोक्तं इत्संज्ञाप्रकॢप्त्यर्थमेतत्स्यादिति नैष दोषः लोकतएतत्सिद्धं

पुनः शब्दं पठित्वा यद्यनुबंधसंकरः स्यात् अकारमेव शिवादिभ्यो विदध्यात् अथो च्येतेणित्करणमेव यथा स्यात् जित्करणं माभूदिति नियमा
र्थमेतत्स्यात् तन्न नियमाद्धि विधेर्बलीयस्त्वात् अथवेति नक्रमः सर्वगुणमुच्चारयेदिति किंतु यथा लोके इहमुंगेभव इहनगेभवेति यद्गुण
कोयत्रोच्यते तद्गुणएव तत्र भवति एवमिहापि भाष्यः प्रकृतिभ्यो यदनुबंधविशिष्टो विधीयते तदनुबंधनिमित्तमेव कार्यं संपादयति

भा· के·
२

तत्रानुवृत्तिनिर्देशइति अकः सवर्णे दीर्घ इत्यादौ अयमेवाकारोऽनुकृतइति ककारादिना चिन्हेन साध्यते ततश्चाणत्वात्तस्य ग्राहकत्वमस्तु
अस्य त्वविद्यादौ त्वकारस्यानण्त्वात् ग्राहकत्वं न प्राप्नोतीत्यर्थः वृत्तिः शास्त्रस्य लक्ष्ये प्रवृत्तिः तदनुगतो निर्देशोऽनुवृत्तिनिर्देशः एकत्वादका
रस्येति एकैवाकारव्यक्तिः उदात्तादिभेदप्रतिभासस्तु व्यंजकध्वनिकृतः खड्गतैलादर्शादिभेदप्रतिबिंबप्रतिभासभेदवत् अकारस्य निर्देशना

पक्ष्यति स्थानेंतरतम इत्यत्र स्थानइति वर्तमाने पुनः स्थानिग्रहणस्य प्रयोजनं यत्रानेकविधमांतर्यं तत्र स्थानतएवांतर्यं बलीयो
भवतीति तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति अस्य च्वौ यस्येति च किं
कारणं अनण्त्वान्न ह्येतेऽणः ये नुवृत्तौ के तर्हि येक्षरसमाम्नाय उपदिश्यंते एकत्वादकारस्य सिद्धं एकोयमकारो यश्चाक्षरस
माम्नाये यश्चानुवृत्तौ यश्च धात्वादिस्थः अनुबंधसंकरस्तु अनुबंधसंकरस्तु प्राप्नोति कर्मण्यण् आतोनुपसर्गे क इति
तत्र को दोषः किरि
केपि णित्कृतं प्राप्नोति एकाजनेकाच्ग्रहणेषु चानुपपत्तिः एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भवति तत्र को दोषः किरि
णाशिणोरित्येकाज्ग्रहणं तोदात्तत्वं प्राप्नोति इह च घटेन तरतीति घटिक इति घल्लक्षणष्ठन् प्राप्नोति द्रव्यवच्चोपचाराः द्र
व्यवच्चोपचाराः प्राप्नुवंति तद्यथा द्रव्येषु नैकेन घटेनानेको युगपत्कार्यं करोति एवमिममकारं नानेको युगपदुच्चारयेत्

२

र्थत्वादिकारादीनामप्येकत्वं बोध्यं अनुबंधसंकरइति एकत्वेकाण्टकादीनाभेदाभावात् ओदात्तोऽनिवादि प्राप्नोति किरिणेति नगोश्च
न्साववर्णेति प्रतिषेधादकारो नोदाहृतः घटेनेति एकएवाकारो द्विरुच्चार्यतइति द्वित्वाभावः ठस्तु वाऽुकादिक्रतार्थः द्रव्यवदिति उपचारो
व्यवहारः यथैकेन घटेनोदकाहरणादिक्रियां युगपदनेको न करोति तथैवैकमकारं युगपदनेको नोच्चारयेदित्यर्थः

क्षं परिहृतेऽपि दोषे तत्रान्यायेनाकारस्य भेदं साधयति। आन्यभाव्यमिति। अन्यस्य भावोऽन्यभावः ततो ब्राह्मणादित्वात् स्वार्थे विधानार्थ
त्वं पाठात् स्वार्थे ष्यञ्। अथवा अन्योऽभावोऽन्यभावस्तस्य भाव इति भावे ष्यञ्। ह्रस्वकालशब्दाभ्यां व्यवधानं भिन्नत्वे दृष्टं। यथा असं
हितायां अ इ उ इत्यादीनां कालव्यवायः तितिरित्यादौ शब्दव्यवायः तत्र तकारेण इकारे कायोर्व्यवधानात्। एकत्वे तु व्यवधानं न दृष्टं
यथा अइति केवलोकार उच्चार्यते तस्य उदात्तादिषु गुणभेदात् कालशब्दव्यवायाभ्यां नानात्वं मकारस्य प्रसेभिज्ञानं चात्वादिसाम्यान्य
आन्यभाव्यं तु कालशब्दव्यवायात् आन्यभाव्यं अकारस्य कुतः कालशब्दव्यवायात् कालशब्दव्यवायाभ्यां व्यव
धात्। कालव्यवायात् दंड अग्रं शब्दव्यवायात् दंडः। न चैकस्यात्मनो व्यवाये न भवितव्यं भवति चेन्नत्वं च स्यान्यत्वा
व्यमकारस्य युगपच्च देशपृथक्त्वदर्शनात्। युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे आन्यभाव्यमकारस्येति यद्ययं
युगपच्च देशपृथक्त्वे उपलभ्यते अश्वः अर्कः अर्थ इति। नह्येको देवदत्तो युगपत् स्रुघ्ने च भवति मथुरायां च यदि
पुनरिमे वर्णाः शकुनिवत्स्युः। तद्यथा शकुनयः आशुगा भित्वात् पुरस्तात् उत्पतिताः पश्चाद् दृश्यन्ते एवमकारो दध्य
त्र दृष्टो ऽपर उदसत्र दृश्यते नैवं शक्यं।

निबंधनं। यद्यपि शब्दव्यवायेऽपि कालव्यवायोऽस्ति तथापि कालव्यवाय्यत्वविवक्षाधादर्शितः शब्दस्तु शब्दवांश्च। यदि पुनरि
ति। कालशब्दाभ्यां व्यञ्जकानामेव ध्वनीनां व्यवायो न व्यंग्यस्येति व्यक्तिस्फोटवादिनो भावः। यथा शकुनिः पंकेरादौ स्थितमाशु
संचारान्नदले भवति एवं व्यञ्जकध्वनिसंनिधानासंनिधानाभ्यामकारस्योपलम्भानुपलम्भाविति संप्रत्ययः जातिस्फोटवादी व्याच
स्फोटवादिनं पर्यनुयुंक्ते।

भा० कै० आवृत्तिसंख्यानादिति यथा विकृतियागे त्रयोदश सामिधेन्यः प्रथमोत्तमयोस्त्रिरावृत्त्या सप्तदश संपद्यन्ते तथा घटेन तरतीति ह्यल
क्षणं भवति ननु मुख्ये विषये बाधाच्च वचनस्य गौणं प्रत्यक्षं कथं कार्यनिमित्तं उच्यते गौणत्वं च इत्यत्राप्य शब्दप्रतिषेधाल्लिंगादावृत्तिभेदे
नापि भेदाश्रयकार्यप्रवृत्तिः भवेदिति गिरिणेत्यादावावृत्तिभेदेऽपि मुख्यमेकत्वं न निवर्तत इति भावः एतदपीति लोके पूर्वासंख्यास्

तद्यथा लोके कश्चिद् देवदेवतमाह इह मुंडो भव जटिलो भव इह शिखी भवेति यल्लिंगो यत्रोच्यते तल्लिंगस्तत्रोपतिष्ठते
एवमयमकारो यल्लिंगो यत्रोच्यते तल्लिंगस्तत्रोपस्थास्यते यदप्युच्यते एकाजनेकाज्ग्रहणेषु चानुपपत्तिरिति एका
जनेकाज्ग्रहणेषु आवृत्तेः संख्यानादनेकाच्त्वं भविष्यति तद्यथा सप्तदश सामिधेन्यो भवन्तीति त्रिः प्रथमामन्वा
ह त्रिरुत्तमामित्यावृत्तितः सप्तदशत्वं भवति एवमिहाप्यावृत्तितोऽनेकाच्त्वं भविष्यति भवेदावृत्तितः कार्यपरिहृतं इह तु ख
लु किरिणा गिरिणेत्येकाच्लक्षणमन्तोदात्तत्वं प्राप्नोत्येव एतदपि सिद्धं कथं लोकतः तद्यथा ऋषिसहस्रमेकां कपिलामेके
शः सहस्रकृत्वो दत्वा तया सर्वसहस्रदक्षिणाः संपन्ना एवमिहाप्यनेकाच्त्वं भविष्यति यदप्युच्यते द्रव्यवच्चोपचाराः प्राप्नुवं
ति भवेद्यत् संभविकार्यं तन्नानेको युगपत्कुर्यात् यत्तु खलु संभविकार्यमनेकोऽपि तद्युगपत्करोति तद्यथा घटस्य दर्शनस्प
र्शनं च संभविचेदं कार्यमकारस्योच्चारणं नामानेकोऽपि तद्युगपत्करिष्यति

तइत्यर्थः ऋषिसहस्रमिति वित्तेन क्रीत्वा क्रीत्वा प्रत्येकं दत्वा सहस्रदक्षिणा ऋषयः संपन्ना इत्यर्थः ऋषयः सहस्रमृषिसहस्रमिति कर्म
धारये संपन्ना इत्यस्य साक्षाद्दक्षिणाभिः संबंधः षष्ठीसमासे तु सामर्थ्यलक्षणः संबंधः यथा ब्राह्मणशतं भोज्यतामिति भुजिर्ब्राह्मणैः संभवि
येति एकस्यैवाकारस्य युगपत्स्थानकरणनिष्पन्नध्वनिव्यंग्यत्वात् सर्वैरित्यर्थः॥ ॥

तद्वच्चेति· स आकृतिपक्षो यत्रास्ति तत्र द्रष्टव्य अथवा व्यस्तमेतत्· तत्र न्यायेनाकृतिपक्षस्य स्थापितत्वात् परेष्वपि स एव पक्षः स्थित इत्यर्थः· ऌग्रहणे चेति· अवश्या श्रयणीयतामाकृतिपक्षस्य दर्शयति· व्यक्तिपक्षे ऌकारस्यैव तकारस्य उकरण एवं फ छठथ स्त्र इति ह्यपास्य कारयोः दीर्घत्वं न स्यात्· अपि तु एकस्यैव सवर्णाभिस न सिद्धे लोपो न स्यात् अभिसाइत्यादिवस्यात् रूपसामान्यादिति· व्यक्तिनिर्देशे विभेदापरामर्शेन लोकमध्ये व्यवहारा सीति सिद्धमिष्टं· व्यक्तिव्यतिरिक्तं का मान्यं भवतु मा वा सूत्रसर्वथा लोकवच्छास्त्रे व्यवहार इत्यर्थः· ऋऌक् अल्पीयानिति· ऋकारापेक्षः प्रकर्षः ऋकारस्य अल्पः प्रयोगः ततोप्यस्याल्पतर इत्यर्थः अल्पप्रयोगस्यापि कार्यार्थमुपदेशः कर्तव्य इत्याशंक्याह यच्चापीति· तत्र ऋकारावस्थायामेवोदात्तादिपुक्ते स्थानेन तरतमः स्थानि सदृश ऌकारो भविष्यति·

तद्वत्परकरणं एवं चक्लृप्तपरा इति यते· आकृतिग्रहणेनातिप्रसंग इति· ननु सवर्णग्रहणेनातिप्रसंग इति क्लृप्तपरा इति येन प्रसारण्याय ते तत्सवर्णग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्चेति· ऌग्रहणे चेति किं आकृतिग्रहणात्सिद्धमित्येव· झलो झलि अवानां अवात यत्र नास्ति अणः सवर्णान्गृह्णातीति· रूपसामान्याद्वा रूपसामान्यात्सिद्धमेतत् तद्यथा· तानेव शाटकान्नाच्छादयाम· येमथुरायां तानेव शालीन् भुंज्महे ये मगधेषु तदेवेदं भवत कार्षापणं· यन्मथुरायां गृहीतं अन्यस्मिंश्चान्यस्मिंश्च रूपसामान्यात्तदेवेदमिति भवति· एवमिहापि रूपसामा न्यात्सिद्धं· ऋऌक् अथ ऌकारस्योपदेशः किमर्थः किं विशेषेण ऌकारोपदेशश्चोद्यते न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते यदि किंचि दन्येषामपि वर्णानामुपदेशे प्रयोजनमस्ति ऌकारोपदेशस्यापि तद्भवितुमर्हति को वा विशेषः अयमस्ति विशेषः अस्य हि ऌकारस्याल्पीयांश्चै व प्रयोगविषयः यश्चापि प्रयोगविषयः सोपि क्लृपिस्थस्य क्लृपेश्च लत्वमसिद्धं तस्यासिद्धत्वादृकारस्यैवाच्काचार्याणि भविष्यंति· नार्थ ऌको पदेशेन अत उत्तरं पठति· ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुताद्यर्थः ऌकारोपदेशः क्रियते यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः प्लुताद्यर्थश्च· यदृच्छाशब्दार्थस्तावत् यदृच्छया कश्चिल्लृतको नाम तस्मिन्नृक्कार्याणि यथा स्युः दध्य्लृतकाय देहि उदङ्ल्लृतको गमद् मस्य ल्लृत को गमद् चतुष्टयी शब्दानां प्रवृत्तिः जातिशब्दा गुणशब्दाः यदृच्छाशब्दाश्चतुर्थाः अशक्तिजानुकरणार्थः·

यदृच्छेति· अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्त्रभिप्रायेणैव प्रवर्तते स यदृच्छाशब्दो डित्थादिः ऋकारऌकारयोः सवर्णविधिरित्यस्य वा निकिकारवा च्यत्वात्सूत्रकारेणानाश्रितत्वाच्च ऌकारोपदेशः कृतः अर्थवत्सूत्र एवाप्यस्य प्लुता यदृच्छाशब्दाः संतीत्येवगम्यते गाव्यादीनां तु गवादिनिवर्तितत्वात्सा धुत्वं ऋतकशब्दस्त्वर्थाश्रयेणैव विनियुक्त इति ऌतकशब्दस्यानिवर्तकः अशक्तिजेति· अशक्तिजानुकरणस्य जातिशब्दत्वमिच्छति· यस्माद्दुच्चार्यमाणे शब्दे या जातिः समवेता तत्संबद्धमनुकार्यमनुकरणं प्रत्याययति·

अनित्यत्वमिति भवता जातिस्तावन्नाभ्युपगम्यते व्यक्तेरेवैकत्वनित्यत्वप्रतिज्ञानात् चैकत्वं नित्यत्वं च नोपपद्यते दंडद्रुत्क इत्यत्रानुदात्तस्वरभेदेन भिन्नत्वान्नह्येकस्यैवोदात्तत्वपरित्यागेनानुदात्तत्वं युक्तं रूपांतरपरिग्रहादनित्यत्वप्रसंगात् तस्माद्भिन्नाएवानित्याः एवाकाराः प्रत्यभिज्ञात्वाकृ तिनिबंधनेति जातिस्फोटपक्षोवलंबितः व्यक्तिस्फोटवाद्याह अकारमपीति श्रोत्रोपलब्धिरिति श्रोत्रोपलब्ध्या आकाशादेशत्वं शब्दस्य प्रतिपाद यति आकाशप्रदेशविशेषस्य श्रोत्रत्वादिंद्रियाणामसंबद्धविषयाग्रहणाच्छ्रोत्रस्य च निष्क्रियत्वाद्गमनाभावादाकाशदेशत्वं शब्दस्यावश्यम्

अनित्यत्वमेवं स्यान्नित्याश्च शब्दाः नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः यदि चायं दृ श्यत्र दृष्टश्चेद्दृश्यते न नायं कूटस्थः स्यात् यदि पुनरिमे वर्णा आदित्यवत्स्युः तद्यथा एक आदित्योनेकाधिकरणस्थो युगपद्दे शपृथक्त्वेषूपलभ्यते विषम उपन्यासः नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेषूपलभते अकारं पुनरुपलभ न्ते अकारमपि नोपलभते किं कारणं श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः एकं च पुनरेका शमाकाशदेशा अपि बहवः यावंतो वा बहवः तस्मादन्यथाभाव्यमकारस्य आकृतिग्रहणात्सिद्धं· अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्र हीष्यति· तथेवर्णाकृतिः तथोवर्णाकृतिः·

श्रुत्येयं बुद्धिनिर्ग्राह्य इति पूर्वपूर्वध्वन्युत्पादितानभिव्यक्तिजनितसंस्कारपरंपराप्राप्तपरिपाकांत्यबुद्धिनिर्ग्राह्य इत्यर्थः प्रयोगेणेति प्रयुज्य त इति प्रयोगो ध्वनिः तेनाभिव्यक्तः देशभेदेन तु प्रतिभासो भिन्नदेशावस्थितपुरुषोद्दीपिताभिव्यंजकध्वनिकृतः भेदवाद्याह आकाशदेश इति· यथा पृथिव्या एकत्वेपि क्रमेण मथुरादिदेशव्यवहारः एवमाकाशस्यापि संयोगिघटादिपदार्थावच्छेदेन भेदव्यवहार इत्यर्थः· एवं व्यक्तिस्फोटपक्षे निराकृते जातिस्फोटपक्ष एवाश्रीयते· आकृतिग्रहणादिति· अकारजातिः सर्वप्रदेशेषु निर्दिश्यते नांतरीयकत्वाद्व्यक्तिनिर्देशः तत्र प्रत्याहारे अकारजातेर्निर्देशात्तस्याश्च विवृतत्वप्रतिज्ञानात् अस्यां तेषां तस्याश्च प्रत्यापत्तिविधानं तदेकजातिनिर्देशाद् वृत्तिनिर्देशस्थेनाकारेण ग्रहणमाका रस्य सिद्धं अष्टेन आक्षिप्तकार्यस्य तु सत्यपि जातिनिर्देशे दीर्घोच्चारणसामर्थ्यात् दीर्घत्वस्यापि ग्रहणं न भवति अन्यथा कृत्स्नमेवाकारं येत प्लुतश्चानप यस्मात् इति न्यायात् प्लुतस्याग्रहणं·

५

प्रयोजनांतरमपि वार्त्तिककारः प्रसाधयति · अनुकरणमिति · अनुकार्यस्य दुष्टत्वाद् अनुकरणस्यापि दुष्टत्वं मन्यते सुरापानानुकरणवत् · भाष्यकारस्त्वनुकर
णार्थत्वं समर्थयते · विषम इति · नह्यनुकार्यस्य दोषेणानुकरणस्य दुष्टत्वं विहितकरणाद्धर्मोत्पत्तिः प्रतिषिद्धाचरणाच्चाधर्मोत्पत्तिः नखलु नाते नधर्माध
र्मयोर्व्यवस्थेति मन्यते सुरापानादेस्तस्यापि क्रियाया अनुष्ठानात्प्रत्यवायो नास्ति अनुकरणत्वं दानादीनां तु स्मार्तत्वाल्लौकिकत्वमुच्यते · स्नातानु

अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु · अनुकरणं हि शिष्टस्य साधु भवति अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय भवति
नाभ्युदयाय · यथा लौकिकवैदिकेषु तद्यथा लौकिकवैदिकेषु कृतान्तेषु लोके तावत् · य एवमसौ ददाति य एवमसौ यजते य एवमसावधी
त इति तस्यानुकुर्वन् दद्याच्च यजेत चाधीयीत च सोऽप्यभ्युदयेन युज्यते · वेदेऽपि य एवं विश्वसृजः सत्राण्यध्यासत इति तेषामनुकुर्वन् तद्वत् सत्राण्य
ध्यासीत सोऽप्यभ्युदयेन युज्यते अशिष्टाप्रतिषिद्धे य एवमसौ हिक्कति य एवमसौ हसति य एवमसौ कण्डूयतीति तस्यानुकुर्वन् हिक्केद्धसेत्
कण्डूयेच्च नैव तद्दोषाय स्यान्नाभ्युदयाय · यस्तु खल्वेवमसौ ब्राह्मणं हन्ति एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात् सुरां वा पिबेत्
सोऽपि मन्ये पतितः स्यात् · विषम उपन्यासः यश्चैव हन्ति यश्चानुहन्ति उभौ तौ हतः · यश्चापि पिबति यश्चानुपिबति उभौ तौ पिबतः · यस्तु
खल्वेवमसौ ब्राह्मणं हन्ति एवमसौ सुरां पिबतीति तस्यानुकुर्वन् स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात् पयो वा पिबेत् न स म
न्ये पतितः स्यात् · एवमिहापि य एवमसावपशब्दं प्रयुङ्क्त इति तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत सोऽप्यपशब्दभाक् स्यात् अयं तु अन्योऽपशब्द
पदार्थकः शब्दो यस्यार्थ उपदेशः कर्तव्यः न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति · अवश्यं चैतदेवं विज्ञेयं यो हि मन्यते अपशब्दपदार्थकः
शब्दोऽपशब्दो भवतीति अपशब्द इत्येव तस्यापशब्दः स्यात् न चैषोऽपशब्दः ·

लिप्त इति · स्रक्चन्दनं दर्शयति · अस्रस्त्वेनाहि च्छिन्नेनाकार्यं क्रियते · माल्यगुणकण्ठ इति · लोकमध्ये प्रकाशत इत्यर्थः अकार्यं हि अप्रकाशं क्रियते · लृ
तकशब्दोऽपि यदा लृतकार्थे प्रयुज्यते तदाऽपशब्दः यदा त्वनुकार्यं प्रसाययति तदा साधुरेव अधर्मिहात् अस्वगोण्यादिवत् अपशब्द इत्येके
अस्याहि गाव्यादयोऽपभ्रंशा वाच्याः ·

न्याय्यभावादिति · ऋतकशब्दो न्याय्यः ऋदन्तं नाम कुर्यादिति स्मृतात्वकृत्त्वात् ऋतिः सौत्रो धातुः तत औणादिकः कन् शिल्पिसंज्ञयोरपूर्वस्यापीति क्वुन् प्रत्ययः सं
ज्ञादिष्विति · आदिशब्देन दर्शयति · जातिगुणक्रियानिमित्ता अपि शब्दा नित्यता एवं प्रयोक्तव्या इति · सर्वशब्दस्य व्युत्पत्तिपक्षे किमर्थं वस्तूच्यते नेति चेत्
शिष्टप्रयुक्तानामेवाव्युत्पत्तिपक्षोऽप्यस्तीति ज्ञापनायार्थवच्चोपादानं अनुकरणशब्दानामव्युत्पन्नत्वान्न दर्शनं · अपर आहेति पूर्वमुक्तं ऋतक एव न्याय्य
त्वान्नियोक्तव्यः न तु लृतकशब्द इति इदानीं तु ऋतकशब्दस्यैवायमपभ्रंशो शक्तिजत्वात् लृतकशब्द इत्युच्यते अयं तर्हीति ऋतकशब्दो न्याय्यत्वाल्लृतक
शब्दस्य निवर्तकः ऋफिड ऋफिड्ड इत्येतौ लृन्याय्यावितिकथं लृफिड लृफिड्ड इत्येतयोर्निवर्तकौ स्यातामिति भावः · एषोऽपीति उणादयो बहुलमित्येवान्याय्या
अशक्या कल्याचि ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्तं तस्यानुकरणं ब्राह्मण्यृतक इत्याह कुमार्यॢतक इत्याह ऋसाधर्म्येऽल्लृकारोप
देशः कर्तव्यः के पुनः ऋसादयः ऋतिश्चिर्न्वनस्वरिताः कृत शिरव कृशः प्रकृशः ऋसादिषु कार्यं पुके पर्लसिद्धं तस्य सिद्धत्वाद्वृकायोणि
न सिध्यन्ति · तस्माल्लृकारोपदेशः क्रियते नैतानि सन्ति प्रयोजनानि · न्याय्यभावात्कल्पनं संज्ञादिषु न्याय्यस्य ऋतकशब्दस्य भावात्क
ल्पनं संज्ञादिषु साधु मन्यन्ते ऋतक एवासौ न लृतक इति अपर आह न्याय्य ऋतकशब्दः शास्त्रान्वितोऽस्ति स कल्पयितव्यः साधुः संज्ञादिषु
ऋतक एवासौ न लृतकः अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः लृफिडः लृफिड्डश्चेति · एषोऽपि ऋफिडः ऋफिड्ड कथं अर्तिप्रवृत्तिश्चैव हि लोके
लक्ष्यते फिड फिड्डवौणादिको प्रत्ययो न यन्निवशब्दानां प्रवृत्तिः जातिशब्दा गुणशब्दाः क्रियाशब्दा इति · न सन्ति यदृच्छाशब्दाः अन्यथा कृत्वा प्र
योजनमुक्तं अन्यथाकृत्वा परिहारः सन्ति यदृच्छाशब्दाः इति कृत्वा प्रयोजनमुक्तं न सन्तीति परिहारः समानेऽर्थे शास्त्रान्वितोऽशास्त्रा
न्वितस्य निवर्तको भवति तद्यथा देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति न गाव्यादीन् नैष दोषः पक्षान्तरैरपि परिहारा भवन्ति ·
[illegible] तावति भावः अर्तिप्रवृत्तिरिति अर्तेः प्रकृतित्वेन प्रवृत्तिरि
त्यर्थः · न सन्तीति · अयं तु ऋतकशब्दः यदा नाम क्रियते तदा प्रशस्यत्वं नास्ति क्रियागुणाबाधयारोप्यत इति भावः · अन्यथाकृत्वेति · अव्युत्पत्तिपक्षाश्रयेणे
नाचार्येणोपदिष्टोऽलृकारः वार्त्तिककारस्तु व्युत्पत्तिपक्षाश्रयेण प्रसाधयति · समाने चेति · इह सामान्यार्थत्वं लृतकशब्दो हि यदा संज्ञात्वेन विहि
युज्यते कश्चिदपि तदा तस्य स्वरूपाध्यासः ऋतकतु विपर्ययः भिन्नत्वं यत्नेऽशब्दः पक्षान्तरैरपीति · यथा द्रव्यपक्षे सरूपाणामिति
रूपः जातिपक्षे तु प्रसङ्ख्यान एवमस्यापीत्यर्थः · अव्युत्पन्नसंज्ञाशब्दपक्षेऽपि मारम्भयोगता · शिष्टप्रयुक्ता एव संज्ञाः कर्तव्याः ·

एकदेशविकृतस्येति ऋकारे रेफभागस्य लृत्वे कृते स एव ऋकार इति प्रत्यभिज्ञानादिति भावः षष्ठीनिर्दिष्टस्येति· राज्ञः कचेत्यत्र राजन्शब्दः ष ष्ठीनिर्दिष्टः नत्वन्इतिलोपाभावः यद्येवं क्लृपो रो ल इत्यत्रापि ऋकारः षष्ठ्यानिर्दिष्टः किंतु रेफ इत्यनन्यत्वं न प्राप्नोतीत्यात्याह· यदीति· अथवेति· षष्ठीनिर्दिष्टस्येति नापेक्ष्यते· नकारान्तस्येति न च राजन्शब्दः कादेशे कृते नकारान्तो भवति श्ववेव पुच्छे छिन्ने न पुच्छवानिति भावः॥

एकदेशविकृतस्यानन्यत्वात् प्लुत्याद्यः· एकदेशविकृतमनन्यवद्भवतीति प्लुत्यादयोपि सविष्यंति· यद्येकदेशविकृतम न्यवद्भवतीत्युच्यते राज्ञः क च राजकीयं· अल्लोपोन इति प्राप्नोति· एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य· यदि षष्ठीनिर्दि ष्टस्येत्युच्यते· क्लृप्तशिख इति प्लुतो न प्राप्नोति· नह्यत्र ऋकारः षष्ठीनिर्दिष्टः कस्तर्हि रेफः ऋकारो यत्र षष्ठीनिर्दिष्टः क थं अविसक्तिको निर्देशः क्लृप उरः लः क्लृपो रो ल इति· अथवा पुनरस्त्वविशेषेण· ननु चोक्तं राज्ञः क च राजकीयं· अल्लोपोन इति प्राप्नोतीति· नैष दोषः वक्ष्यत्येतत् श्वादीनां संप्रसारणे नकारान्तग्रहणं नकारान्तप्रतिषेधाय मिति· तत्प्रकृतमुत्तरत्रानु वर्तिष्यते· अल्लोपोनः नकारान्तस्येति· इह तर्हि क्लृप्तशिख अन्त इति प्रतिषेधः प्राप्नोति· रचत्प्रतिषेधाच्च· रवत्प्रतिषे २२ धाच्चैतत्सिध्यति गुरोरनृत इति वक्ष्यामि· यद्यनृत इत्युच्यते· होतृ ऋकारः होतृकारः अत्र न प्राप्नोति· गुरोरनृतः आस्थ स्येति वक्ष्यामि· स एष सत्त्र भेदेन ऌकारोपदेशः प्लुत्याद्यर्थः सन्प्रत्याख्यायते सैषा महतो वंशस्तंबाल्लट्वानुकृष्यते ७॥

अनृत इति· रोस्यास्तीति नित्यमिति नित्ययोगे मतुप् मतुप्त्वेन ऋकार एव रवान् न तु वर्तक इत्यादावकारः नरवान् अरवान् इति समासः नि त्ययोगप्रतिपादनाय बहुव्रीहिर्नकृतः गुरोः अरस्येति तेन ह्रस्वस्यैवरवतः प्लुतनिषेधो न दीर्घस्य· वार्तिककारस्य ऌकारप्रत्याख्यानं नि कृ

ऋलक्येति १

अयमिति· असाधोरनुकरणमिति सेतदर्थं न नास्तीति भावः भवेदिति· अप्रयोगस्यस्येदमनुकरणं प्रयोगे न नास्तीत्यर्थः असिद्धमिति भावः प्रकृतिवदिति· तत्र यथा क्लृपेर्लत्वस्यासिद्धत्वादकारद्वारेण लृकारस्याच्कार्यं तथानुकरणस्यापीत्यर्थः द्विरिति भवंतु पचंतीति केनचित् उक्तेद्वि: पचंतीत्यनुकरणं एतच्च क्रियासाधनाद्यनभिधानात् तिङंतं न भवति· एवमग्नी इत्यनुकरणमर्थानभिधानात् द्विवचनांतं· न तु गन्तृ इत्यादिरूपस्य यदनुकरणं

अयं खल्वपि भूयो नुकरणशब्दोपरिहार्यः यदर्थ उपदेशः कर्तव्यः साधु ऌकारमधीते मधु ऌकारमधीत इति ऋक्रुरूपस्य पुनरे तदनुकरणं· क्लृपिरूपस्य यदि क्लृपिरूपस्य क्लृपेश्च लत्वमसिद्धं तस्यासिद्धत्वादकारे एवाच्कार्याणि भविष्यंति· भवेत्तस्थैनेनार्थः स्यात् अयं त्वन्यः क्लृपिस्थे पदार्थकः शब्द यदर्थ उपदेशः कर्तव्यः नकर्तव्यः इदमवश्यकर्तव्यं प्रकृ तिवदनुकरणं भवतीति किं प्रयोजनं द्विः पचंतीत्याह तिङ्तिङ् इति निघातो यथा स्यात् अग्नी इत्याह इदूदेद्द्विवचनं प्रगृह्यसंज्ञं भवतीति प्रगृह्यसंज्ञा यथा स्यात्· यदि प्रकृतिवदनुकरणं भवतीत्युच्यते अपश ब्दत्वासौ भवति कुमार्य्यृतक इत्याह ब्राह्मण्यृतक इत्याह अपशब्दो ह्यस्य प्रकृतिः· न त्वापशब्दः प्रकृतिः न ह्यपशब्दा उपदिश्यन्ते न चानुपदिष्टा प्रकृतिरस्ति·

तदा कथं प्रकृतिवद्भाव· युताद् ऋदित इति ऌकारे परतो यणादेशकरणात् इत्संज्ञानुवादाच्च धातनुबंधस्य ऌकारस्याच्कार्याण्यनुमी यंते तेन तस्यानुकरणस्य सिद्धः प्रकृतिवद्भावः न त्वापशब्द इति· सिद्धान्तवादी प्रकरणात् शास्त्रीयाप्रकृतिराश्रीयते· शास्त्रनि बंधनं च कार्यमतिदिश्यते अपशब्दश्च न शास्त्रीयाप्रकृतिरनुपदिष्टत्वात्· न त्वापशब्दस्य शास्त्रीयं कार्यं नापितदतिदेशश्शक्य नहि साधोरसाधुत्वातिदेशो युक्तिमान् एवं भाष्यकारेण शक्तिज्ञानुकरणार्थं ऌकारोपदेशस्य स्थापितम्

अतपरइति· असतीहतपरत्वेएकारौकाराभ्यांमात्रिकयोरर्धैकारार्धौकारयोर्ग्रहणादक्षाद्र्ध्वत्वाद्विधानंस्यादितितत्रंकर्तव्यं·तपरत्वेतुतयोरग्र
हणात्प्राप्त्यभावः· ननुचेति· सूत्रारंभप्रतिनकश्चिद्विशेषइत्यर्थः· अतपरत्वेएचइतिवक्तव्यंतपरत्वेत्वेचइति· ऐचोर्विश्लिष्टवर्णत्वात्सं
श्लिष्टावर्णावर्धैकारार्धौकारौनभवतः· एचोश्चेति अर्धमात्रावर्णस्यअध्यर्धमात्रिवर्णौवर्णयोःभूयसाचव्यपदेशोनह्रुयाम्नवदि

संवृतर्धैतपराणि· अतपरएचइग्घ्रस्वादेशे· यद्यतपराणिएचइग्घ्रस्वादेशाइतिवक्तव्यंकिंप्रयोजनं·एचोह्रस्वादेशशास
नेषुअर्धएकारःअर्धओकारोवामाभूदिति· ननुचयस्यापितपराणितेनौष्येतद्वक्तव्यं·इमावैचौसमाहारवर्णौमात्राऽव
र्णस्यमात्रिवर्णौवर्णयोःतयोह्रस्वादेशशासनेषुकदाचिदवर्णःस्यात्कदाचिदवर्णौवर्णौमाकदाचिदवर्णौभूदिति·प्र
त्याख्यायतएतत्· एचोश्चोत्तरभूयस्त्वादिति· यदिप्रत्याख्यानपक्षः·इदमपिप्रत्याख्यायते· सिद्धमेङः सस्थानत्वादि
ति· ननुचएङः सस्थानतरोअर्धएकारोऽर्धओकारः नतौस्तः· यदिहितौस्यातांतावेवायमुपदिशेत् ननुसौछन्दो
ओकारं गानांसात्यमुग्रिराणायनीयाअर्धमेकारंचाधीयते· सुजातेएश्वसूनृते· अध्वर्योओद्रिभिः सुतं·शुक्रंतेएन्यद्य
जतंतेएन्यदिति· पार्षदकृतिरेषा·तत्रभवतांनैवहिलोकेनकस्मिन्वेदेऽर्धएकारोऽर्धओकारोऽस्ति॥ ७॥ ॥ श्री०

तौकारौकारावेवप्रविश्यतः· सिद्धमेङ इतिभर्तृरेकारार्धओकारौनस्तःतत्रतालव्यएवएकार ओष्ठ्यओकारइतितयोःस्थानइकारौकारावेवप्र
विश्यतः· तावेवेति·ताभ्यामनुपदिष्टाभ्यांदीर्घप्लुतयोरपिग्रहणंसिध्यतीतिभावः गुणसंज्ञायांतुदीर्घावेकारौकारौनिर्देश्यौ·सुजातइति·अं
तःपादस्थस्याऽव्यपरस्याकारस्यार्धमेकारमर्धमोकारंचविदधति· पार्षदकृतिरिति·गीतिवशात्तथोच्चारणमित्यर्थः॥ ७॥ ॥

पा·कै· एओङ्·ऐऔच्·इदंविचार्यतइति· तपरातपरंसंध्यक्षरोपदेशोविचार्यतइत्यर्थः· तत्रोपदिश्येरन्नित्यत्रासत्वस्तायद्यपिक्रियाभिधीयते·
तथापिबुध्यापरामृष्टासत्वरूपतामायादिनाविचारक्रियायांकर्मभावमनुभवति· यथापश्यमृगोधावतीतिसरणंदर्शने· क्वात्रेति·कार्यकोवि
शेषइतिप्रश्नः· तपरोपदेशश्चेदिति· यद्यप्युपदेशउच्चारणंतथापितपरोपदेशफलंचेदस्तिततस्तपरोच्चारणंकर्तव्यमित्यर्थः सत्यंध्यक्षराणी

एओङ्·ऐऔच्·इदंविचार्यतेइतिमानिसंध्यक्षराणितपराणिवोपदिश्येरन्नएत्ओत्ऐत्औत्चइति· अतपराणिवायथान्यास
मिति· क्वात्रविशेषःसंध्यक्षरेषुतपरोपदेशश्चेत्तपरोच्चारणंसंध्यक्षरेषुतपरोपदेशश्चेत्तपरोच्चारणंकर्तव्यं·प्लुत्यादिषुज्वि
धिःप्लुत्यादिषुज्याश्रयोविधिर्नसिध्यति· गो३त्रातनो३त्रातइत्यत्रअनचिचअचउत्तरस्यपरोक्षेभवतइतिद्विर्वचनंप्राप्नोति·
इहचप्रत्यङ्ङ्३तिकायनउदङ्ङ्३पगवेतिअचीतिङमुएनप्राप्नोति· प्लुतसंज्ञाच· प्लुतसंज्ञाचनसिध्यति·ऐ३तिकायनऔ३प
गव·ऊकालोऽज्झ्रस्वदीर्घप्लुतसंज्ञोभवतीतिप्लुतसंज्ञानप्राप्नोति॥ ॥७॥ ॥७॥ ॥श्री०॥ ॥७

त्यन्वर्थापूर्वाचार्यसंज्ञा·संधीयमानावयवत्वात्· प्लुत्यादिष्विति प्लुतसंज्ञामभ्युपगम्यात्कार्याणिनसिध्यंतीत्युच्यते प्लुतएवनप्राप्नोती
तिदर्शयितुमाह· प्लुतसंज्ञाचेति त्रिमात्रस्याचः प्लुतसंज्ञाविधीयते· तपरत्वेचत्रिमात्रस्याग्रहणादत्वाभावः· तत्रैचांप्लुतोविधीयमा
नः·इकारोकाराभ्यांरहीतइकारउकारश्चस्यात्· ॥ ७॥ ॥ ७॥ श्री० ॥७॥

श्री

अथवेति· विधिनियमसंभवे च विधिरेव बलीयानिति विधेर्बलीयस्त्वान्नियमो न भवति हल एव दीर्घत्वं यथा स्यात् उत इत्यादौ मा भूदिति· तपर इति· तपर संज्ञि सह वर्तते गुणवृद्धिसंज्ञे इत्यर्थः तादपीति तत्र न्यायाश्रयणादेकस्यैव द्विशक्तित्वादेकशेषाश्रयणाद्वा अनेकार्थाभिधानमिति भावः बहु व्रीहिवादी चोदयति· किं दकार इति समासद्वयवादी तं प्रत्याह अथ किं तकार इति तवके वल बहुव्रीहिवादिनो निष्प्रयोजनं तपरत्वं तकारस्यानर्थक्या

का २

अथवा आचार्यप्रवृत्तिर्ज्ञापयति नानेन संप्रसारणस्य दीर्घो भवतीति यदयं हल उत्तरस्य दीर्घत्वं शास्ति पचंतीति अतो गुणे पर इतीय ता सिद्धं सोयमेवं सिद्धे सति यद्रूपग्रहणं करोति तस्यैतत्प्रयोजनं यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोर्यथा स्यादिति इह तर्हि खट्वर्श्यो मालर्श्य इति दीर्घवचनादकारेण अनांतर्याद् ऐकारौकारेण तत्र को दोषः विगृहीतस्य श्रवणं प्रसज्येत नन्वेमो यत्र क्रि यमाणे दोषस्तत्र कर्तव्यमिति किं तर्हि यत्र क्रियमाणे न दोषः तत्र कर्तव्यमिति क्वचित् क्रियमाणे न दोषः संज्ञाविधौ वृद्धिरादैच् दीर्घः अदेङ् गुण इति दीर्घ इति तत्र हि दीर्घग्रहणं कर्तव्यं न कर्तव्यं कस्माद् आंतर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आ देशा न भवंति तपरे गुणवृद्धी· ननु च तः परो यस्मात् सोयं तपरः नेत्याह तादपि परस्तपर इति यदि तादपि परस्तपरः ऋदोरबिती है व स्याद् यवस्तवः लवः पव इत्यत्र न स्यात् नैष तकारः कस्तर्हि दकारः किं दकारे प्रयोजनं अथ किं तकारे यद्यसंदेहार्थस्तकारः दकारोपि अथ सुखसुखार्थस्तकारस्तर्हि दकारोपि ॥ ७॥

ङिन्नकालानां ग्रहणाप्रसंगात् गुणानां चाभेदकत्वात्तत्प्राप्त्यर्थत्वाभावात् अथवा ऽ संदेहार्थो वा सुखसुखार्थो वा तकार एवं हकार इत्यर्थः तित्स्वरितमित्यत्र साध्येणास्य विरोधः तत्र हि ति दितिप्रत्ययग्रहणं चोदितं इह माभूत् दि व उत् द्युभ्यामिति ततो दित्वाश्रयेण प्रत्याख्यातं· तपरसूत्रे दकारश्चर्त्वभूतो निर्दिश्यते तेन च तत्कालस्य ग्राहको दकार इत्युक्तः इह च दकारोभ्यु पगमेन लवादिषु दोषः परिहृतः अत्राहुः थकारस्थानिको धकारस्थानिको वा दकारोत्र विवक्षितः कस्तर्हि दकार इति ॥ ७ ॥ ॥ श्री ॥

भा· कै·

आंतर्यत इति· अन्यस्यासंभवादिदमत्र नास्ति प्लुतश्च विषये स्मृत इति· अन्ये इति· प्रथमयोरिति सिद्धे एतदपि किमर्थमुच्यत इति

एकादेशे दीर्घग्रहणं· एकादेशे दीर्घग्रहणं कर्तव्यं· आद्गुणो दीर्घो वृद्धिरेचि दीर्घ इति· किं प्रयोजनं· आंतर्यतस्त्रिमात्रचतु र्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति· खट्वा इंद्रः खट्वेंद्रः खट्वा उदकं खट्वोदकं· खट्वा ईषा खट्वेषा· खट्वा ऊ ढा खट्वोढा खट्वा एलका खट्वैलका खट्वा ओदनः खट्वौदनः खट्वा ऐतिकायनः खट्वैतिकायनः खट्वा औपगवः खट्वौपगव इति· तत्र हि दीर्घग्रहणं कर्तव्यं न कर्तव्यं· उपरिष्टाद्योगविभागः करिष्यते· अकः सवर्णे एको भवति· ततो दीर्घः दीर्घश्च स भवति· यः स एकः पूर्वपरयोरित्येवं निर्दिष्ट इति· इहापि तर्हि प्राप्नोति पचंतु विधं पचंतीति· नैष दोषः इह तावत् पचंतु इति अन्ये क इतीयता सिद्धं सोयमेव सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनं यथाजातीयकः पूर्वः तथाजातीयक उभयोर्यथा स्या दिति· विध्यमिति पूर्वमित्येवानुवर्तते ॥ ७॥

चेद्वा छंदसीत्यत्रानुवृत्त्यर्थं तस्मात् पूर्वश्रुतिः पूर्वरूपार्था· सैवोत्तरत्रानुवर्तन इति विध्यमिति पूर्वरूपं भविष्यति ॥ ॥ ७ ॥ ॥ श्री ॥

समानाक्षरेति॰ समानशब्देन पूर्वाचार्यनिर्देशादकोऽभिधीयंते दशसमाना इतिवचनात् तेनसवर्णे कार्यं प्राप्नोतीत्यर्थः असिद्धत्वाच्चेति॰ असिद्धवदत्राभादित्यनेन यतर्हीति॰ नन्वसति क्वित्वे आकारस्य स्याकारस्यलोपे कृते द्वयोरकारयोः पररूपस्य धातुं प्रत्यंतवद्भावात् कंदोगायेत्य

वर्णैकदेशावर्णग्रहणेनचेत्संध्यक्षरे समानाक्षरविधिप्रतिषेधः वर्णैकदेशावर्णग्रहणेनचेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति सप्रतिषेध्यः अग्नेइंद्र वायोउदकं अकः सवर्णे दीर्घ इतिदीर्घत्वं प्राप्नोति दीर्घेह्रस्वविधिप्रतिषेधः दीर्घेह्रस्वाक्षराश्रयो विधिः प्राप्नोति सप्रतिषेध्यः आव्रश्चप्रव्रश्च ह्रस्वस्य पिति कृति तुग्भवतीति तुक्प्राप्नोतीति नैषदोषः आचार्यप्रवृत्तिर्ज्ञापयति न दीर्घे ह्रस्वाश्रयो विधिर्भवतीति यदयं दीर्घात् छे तुकं शास्ति॰ नैतदस्ति ज्ञापकं अस्ति ह्यन्यदेतस्यवचनप्रयोजनं किं पदांताद्वेति विभाषां वक्ष्यामीति यतर्हि योगविभागं करोति इतरथाहि दीर्घात्पदांताद्वेत्येव ब्रूयात् इहतर्हि खट्वाभिः अतो भिस ऐसित्यैस्भावः प्राप्नोति तपरकरणसामर्थ्यान्न भविष्यति इहतर्हि यालावाताऽतोलोप अर्धधातुक इत्यकारलोपः प्राप्नोति ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति अस्ति ह्यन्यत्तपरकरणे प्रयोजनं किं॰ सर्वस्यलोपो माभूदिति अथ क्रियमाणेतपरे परस्य लोपे कृते पूर्वस्यकस्मान्न भवति परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न आकारस्य स्य अकारस्य लोपो भवतीति॰ यदयमातोनुपसर्गे क इति ककारमनुबंधं करोति कथं कृत्वा ज्ञापकं कित्करणे एतत्प्रयोजनं किति व्याकारलोपो यथास्यादिति यद्याकारस्य स्यकेऽकारस्यलोपः स्यात् कित्करणमनर्थकं स्यात् परस्य अकारस्य लोपे कृते द्वयोरकारयोः पररूपेहि सिद्धं रूपं स्याद्गोदः कंबलद इति पश्यति त्वाचार्यः नाकारस्य स्य अकारस्य लोपः स्यादिति अतः ककारमनुबंधं करोति नैतदस्ति ज्ञापकं उत्तरार्थमेतत्स्यात् तुंदशोकयोः परिमृजापनुदोरिति यतर्हि गापोष्टगित्यनन्यार्थं ककारमनुबंधं करोति ॥ ७ ॥ ॥श्रीः॥ ॥४॥

त्रातो धातोरित्याकारलोपप्रसंगः नैषदोषः सन्निपातपरिभाषयालोपो न भविष्यति अकारं ह्याश्रित्ययशब्दः कृतो लोपस्यानिमित्तं॰ दीर्घत्वं तु कृष्यायेत्

भा॰कै॰

१०

वर्णांतरसमानाकृतय इति आकारादिषु काराद्दि सदशावयवा ऋकारऌकारयो रेफलकारसदृशावयवौ संध्यक्षरेषु कारेकारोकारसदृशाः तत्र केवलवर्णकार्यमवयवेषु भवति न वेति विचारः इहसमुदाया अपीति सन्त्येओऐऔ इति अवयवा अपीति अइउऋऌलानीति तत्र समुदायपरे निर्देशे सन्निहिता अप्यवयवा नांतरीयकत्वादजादिसंज्ञां न लभंते अवयवपरे च निर्देशे समुदायो न संज्ञां साधु यथाहयवरेत्यादावनच्कस्यहलोड्रेव नोच्चार्यत्वान्निर्दिष्टोऽप्यकारोऽन्यत्र प्राधान्येन निर्देशाद्धलादिसंज्ञां न प्रतिपद्यत इति दध्यत्रेत्यादावनच्क एवयणादेशः प्रवर्तते॰ तत्रासत्यामप्येतादिसंज्ञायामयादयः समुदायादेशा अपि नांतरीयकत्वादवयवान्निवर्तयंति एवं स्थिते अग्नइंद्र इत्यादौ यत्रावयवकार्यं प्राप्नोति समुदायकार्यं च तत्रांतरं

इदं विचार्यते यएते वर्णेषु वर्णैकदेशा वर्णांतरसमानाकृतयः एतेषामवयवग्रहणेन ग्रहणं स्याद्धानवेति कुतः पुनरियं विचारणा इह समुदाया अप्युपदिश्यंते अवयवा अपि अभ्यंतरश्च समुदायेवयवः तद्यथा वृक्षः प्रचलन्सहावयवैः प्रचलति॰ तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्धानवेति जायते विचारणा॰ कश्चात्र विशेषः ॥ ॥ ७ ॥ ॥श्रीः॥ ॥७॥

गत्वात्तत्र च साक्षाच्चोदितत्वात्स्वल्पत्वात्परत्वाच्चावयवकार्यप्रसंगः अवयवावगतिपूर्वकत्वाद्धि समुदायावगमस्य समुदायकार्यं बहिरंगं॥ अयादीनां त्ववकाशः अयआयाहीति नन्वत्रापि यणादेशोऽवयवस्य प्राप्नोति येन नाप्राप्त इति न्यायेऽपवादा इति यणएवायादयो बाधकाः स्युः तत्र यथा दधींद्र इत्यत्र दधिशब्दस्थ इकारः सवर्णदीर्घत्वं प्रतिपद्यते एवमेकारस्योऽपि प्रतिपद्येते प्रत्याहारे एओङ् ऐऔजित्यत्रावयवानां प्राधान्येना निर्देशादित्येवं ग्रहणपक्षशंकाबीजमुपन्यस्तं इदानीमग्रहणपक्षशंकाबीजमुपन्यस्यते अभ्यंतरश्चेति तिरोहितत्वादवयवानां समुदायकार्ये पारतंत्र्यात्स्वकार्यस्याप्रयोजकत्वान्नरसिंहवज्जात्यंतरयोगाद्वर्णांतरसादृश्यमात्रेणतत्कार्याप्रवर्तनादित्यर्थः ॥ ७ ॥

१०

यत्रतर्हीति॰ ऐऔइत्यत्रहिस्फुटोऽकारप्रतिभासोऽस्ति विवृतत्वादिति अकारस्य विवृतोपदेशादत्रप्रकर्षो विवक्षितः तदाह विवृततरमिति तत्रप्रय
त्नभेदादसावर्ण्यादकारेणसंध्यक्षरावयवस्यग्रहणंनास्तीत्यर्थः तदेवमाकारादिस्थस्यावयवस्यभेदेनाग्रहणादग्रहणं संध्यक्षरस्थस्यत्व
सावर्ण्यात् ऋकारस्थस्तुरेफोभेदेनप्रतिभासात्ग्रह्यतइतिनुडादिसिद्धः अथवेति नरसिंहवद्वर्णांतरत्वात्सादृश्याच्चात्रत्यभिज्ञानतत्वासि
द्ध्यापृथगुपलब्धानांवर्णानांसमुदायेनास्तिसत्वं समुदायवाचोयुक्तिरपितत्रवर्णांतरेनतात्विकिंभ्रांतिवशात्त्ववयवसद्भावाश्रयेणप्रवृत्ता॥

यत्रतर्हिव्यपवर्गोऽस्ति क्वचव्यपवर्गोऽस्तिसंध्याक्षरेषुसंध्यक्षरेषुविवृतत्वात् यदत्रावर्णंविवृततरंतदन्यस्मादवर्णाद्येपीवर्णो
वर्णे विवृततरेतेअन्याभ्यामिवर्णोवर्णाभ्यां अथवापुनर्गृह्यंते अग्रहणंचेन्नुड्विधिलादेशाविनामेषु सकारग्रहणं अग्रहणंचेन्नु
ड्विधिलादेशविनामेषु सकारस्यग्रहणंकर्तव्यं तस्मान्नुड्विहलः सकारस्येतिवक्तव्यं इहापियथास्यात् आनृधतुः आनृधुरि
ति यस्यपुनर्गृह्यंते द्विहलइत्येवतस्यसिद्धं यस्यापिनगृह्यंतेतस्याप्येषनदोषः द्विहलग्रहणंनकरिष्यते तस्मान्नुड्भवतीत्ये
व यदिन क्रियते आटतुः आटुरित्यत्रापिप्राप्नोति आश्नोतिग्रहणं नियमार्थंभविष्यति अत्रनोतेरेवावर्णोपधस्यनान्यस्या
वर्णोपधस्येति लादेशसकारग्रहणंकर्तव्यं क्लृपोरोलः सकारस्यचेतिवक्तव्यं इहापियथास्यात् क्लृप्तः क्लृप्तवानिति यस्यपुन
र्गृह्यंते रइत्येवतस्यसिद्धं यस्यापिनगृह्यंतेतस्याप्येषनदोषः सकारोप्यत्रनिर्दिश्यते कथंअविभक्तिकोनिर्देशः ल
१ रः ७३॥ लः कृपोरोलइति अथवाउभयतःस्फोटमात्रंनिर्दिश्यते रश्रुतेर्लश्रुतिर्भवतीति ॥७॥ ॥श्री०॥ ७:

अत्रनोतेरेवेति सामान्येनावर्णोपधो निवर्त्यते नत्वश्नातिरेव सामान्यापेक्षत्वांनियमज्ञापकस्य अविभक्तिक इति तत्र सकारनिर्दे
शसामर्थ्याद्विभागंप्रकल्प्यादेशो विधीयते स्फोटमात्रमिति जातस्फोटइत्यर्थः तनश्चांतर्भूतानंतर्भूतरेफलकारव्यक्तिव्यंग्ये

एकवर्णवदिति॰ अवयवसंख्याश्रयणेनवाद्ध्रन्हस्वहृस्वानिमित्तंकार्यंप्राप्नोतीतिएकवर्णवदित्यतिदेशः क्रियते गोनोग्रहणंज्ञापकमितिसामान्ये
नज्ञापकंवर्णावयवाश्रयकार्याभावस्येति अग्रहणादिवेदः पदांतदतीत्यपिनभवतीति नाव्ययवत्तस्येति व्यपवर्गोव्यपवृक्तस्भेदः तेनाव्ययवत्क

स्याभिन्नबुद्धिविषयस्यैकत्वात्संवत्ज्ञानाय हुस्वमुद यस्यावयवस्य भिन्नद्धिः पृथग्भूतवर्णाधिर्नभवतीत्यर्थः अव्यपवृक्तस्यावयव विर
स्येतिव्यधिकरणेषष्ठ्यौ अव्यपवृक्तस्यत्नुद यस्याऽवयवस्येत्यर्थः नहिसर्वमत्रेटकार्यादिक्रियंते अपितुयत्रतद्धितस्थितैवे

एकवर्णेति एकवर्णवद्दीर्घेभवतीतिवक्तव्यं किंप्रयोजनंवचनादतीतिद्धुडलक्षणप्रसक्तः दिति इहचवाचेनिमित्तं तस्यनि
मित्तं तस्यनिमित्तसंयोगात्तविद्धिजलक्षणेयत्नप्रदिति अत्रपिगोग्रहणंपदेदीर्घेद्धुडलक्षणोविधिर्नभवतीति अ
यंतुसर्वेषनिवर्तितः नाव्यपवृक्तस्यावयवस्य द्विविधेषुद्रव्येषुनाव्यपवृक्तस्यावयवस्यावयवाश्रयोविधिर्भवतियथाद्रव्ये
षु तद्यथा द्रव्येषुसप्तदशसन्निधेन्यो भवतीतिसप्तदशारत्निमात्रंदक्षुमात्रावध्याधीयतेविरमत्त्वपन्नास्तः प्रत्यवंचैवहितद
र्भ्यंचोद्यते असंभवश्च नैवेद्यांच यथातद्दिसप्तदशप्रादेशमात्रीरश्वत्थीः समिधोभ्यादधीतेतिसप्तदशप्रादेशमात्रंकाष्ठमभ्या
धीयते॰ अत्रापिप्रतिपणवचैतत्सर्वंचोद्यते तुल्यश्चासंभवो नैवेद्यांच यथातद्धिलंनविक्रेतव्यमितिव्यपवृक्तंचनविक्रीयते अव्ययवद्मांसंनविक्रेतव्यं
तंगावः सर्षपाश्चविक्रीयंते तयालोमनखंस्पृष्ट्वाशौचंकर्तव्यमितिव्यपवृक्तंस्पृष्ट्वानिर्दोषगतः कर्तव्यं अव्ययवल्लेकानचारः

त्यर्थः माषानसेत्कव्याइतिनिषेधस्तु मिश्रेषुपिप्रवर्ततेतत्रतद्धितद्रव्यादनसंभवात्सप्तदशेति समिधेनिरष्टमसचांवाच
कः साहचर्यात्काष्ठेषुवर्त्तते॰ तत्रसप्तदशहस्तैकाष्ठेसप्तदशकाष्ठानीतिबुद्धेभ्यवात्तत्स्याध्यानं असंभवइति अर्थाच्चतु
र्हस्ताहिवेदिः यथातर्हीति अत्यत्रमायत्वात्स्यात्संभवइतिभावः अव्ययवद्मिति व्यपवृक्तस्याभावेनेत्यर्थः॥७॥

तुल्यरूपइति तुल्यरूपावयवत्वात्संयोगस्तुल्यरूपः तस्यैकवर्णत्वंपूर्वपक्षे सिद्धांतेतुवर्णद्वयरूपता भास्तुच्चारणातुभ्रांतमेकत्वज्ञानमिति शि

तुल्यरूपेसंयोगे द्विव्यंजनविधिः तुल्यरूपेसंयोगे द्विव्यंजनाश्रयो विधिर्न सिध्यति कु२ कुटः पि२ प्पलीपि२ तमिति यस्यपु नर्गृह्यंतेतस्यैद्वौककारौद्वौपकारौद्वौतकारौ यस्यापिनगृह्यंतेतस्यापिद्वौककारौद्वौपकारौद्वौलकारौ कथंमात्राकालोत्रगम्यते॥ नचमात्रिकंव्यंजनमस्ति अनुपदिष्टंसत्कथंशक्यंविज्ञातुं यद्यपितावदत्रैतच्छक्यतेवक्तुंयत्रैतंनास्त्यण्सवर्णान्‌ गृह्णातीति इहतुकथंसंयंतासंवत्सरःयल्लोकंतल्लोकमिति यत्रैतदस्त्यण्सवर्णान्गृह्णातीति अत्रापिमात्राकालोगम्य ते नचमात्रिकंव्यंजनमस्ति अनुपदिष्टंसत्कथंशक्यंप्रतिपत्तुं॥ हयवरट्‌ सर्ववर्णाः सकृदुपदिष्टाः अयंहका रोद्विरुपदिश्यते पूर्वश्चैवपरश्च यदिपुनः पूर्वएवोपदिश्येत परएववा कश्चात्रविशेषः हकारस्यपरोपदेशे ऽ ५१ र्हणेषुहयहणं हकारस्यपरोपदेशेऽर्हणेषुहयहणंकर्त्तव्यं आतोटिनित्यं ॥ १ ॥ ॥श्री॥ १॥

विज्ञातुंअसत्कथंशक्यं३

चसमाचारः अत्रापीतिसानुनासिकनिरनुनासिकौद्वावत्रवर्णावित्यर्थः हयवरट्‌ पूर्वश्चेति पूर्वपरोच्चारणक्रियाभेदादेकस्यैवहकार

स्यपूर्वपरव्यपदेशः ५१

भा॰कै॰ यत्तदिति रेफाद्रूकेरितिसमानाधिकरणेपंचम्यौ अड्व्यवायइति सकारेणयथादीर्घोगृह्यतेएवमकारभेदोपीतिभावः नसिध्यतीति तितद्व्यागस्यस्फुटप्रतिपत्तिविषयत्वात्तल्लभिव्यक्तिहेतुत्वाभावाच्चेतिभावः एतैरेवेति आकारादयोप्यकारादिभिः प्रत्यायित

१२

श्र१ विनाभैमिकारग्रहणंकर्तव्यं रषाभ्यांनोणः समानपदेऋकाराच्चेतिवक्तव्यं इहापियथास्यात्‌ मातॄणांपितॄणामिति यस्यपुनर्गृह्यंतेरषाभ्यामित्येवतस्यसिद्धंनसिध्यति यत्तद्रेफात्परंभक्तेः तेनव्यवहितत्वान्नप्राप्नोति माभूदेवंअ ड्व्यवायइत्येवसिद्धं नसिध्यति वर्णैकदेशाः केवर्णग्रहणेनगृह्यंते येव्यपवृक्ताअपिवर्णाभवंति यच्चाविरेफात्परंभ क्तेः नतत्क्वचिदपिव्यपवृक्तंदृश्यते एवंतर्हियोगविभागः करिष्यते रषाभ्यांनोणः समानपदेततोव्यवायेव्यवाये चरषाभ्यांनोणोभवतीति ततो ऽ कुप्वाङ्नुमिरिति इदमिदानींकिमर्थंनियमार्थं एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति यस्यापिनगृह्यंतेतस्य दोषनदोषः आचार्यप्रवृत्तिर्ज्ञापयति भवत्यकारान्नोणत्वमिति यदयं क्षुभ्नादिषुनृनमनशब्दंपठति नैतदस्तिज्ञापकंवृध्यर्थमेतत्स्यात्‌ नार्नमनिः यत्तर्हितृप्नोतिशब्दंपठति यच्चापि नृनमनशब्दंपठति ननुचोक्तंवृध्यर्थमेतत्स्यात्‌ वहिरंगवृद्धिः अंतरंगणत्वंअसिद्धंवहिरंगमंतरंगे अथवाउपरि ष्टाद्योगविभागःकरिष्यते ततः नोणोभवति नतर्ह्युदयव्यवहारादसत्‌ इत्येवक्रुतावेचइदुतौ एतच्चवक्तव्यं यस्य पुनर्गृह्यंतेगुरोष्टेरित्येवलुप्यतस्य सिद्धंयस्यापिनगृह्यंतेतस्याप्येषनदोषः क्रियतएतन्न्यासएव॥ १॥ श्री

त्वादक्षरसमाम्नायिकाः भक्तिस्तुनप्रत्याय्यानप्रत्यायिकेतिनियमेनिननिवर्त्यते गुरोष्टेरिति रेफादेगुरुत्वस्यष्टेरितिसिद्धं तत्रन्याया श्रयणाच्चगुरोरपिप्लुतोभवतिदेवदत्तेति क्रियतएतन्न्यासएवेति अवश्यकर्तव्यतांदर्शयति वाक्यभेदेविभागयोर्विवक्षितस्व

पादावचनभेदादिकारोकारस्यंअग्रहणप्राप्तौभावार्थः

तुल्यरूपइति तुल्यरूपावयवत्वात्संयोगस्तुल्यरूपः तस्यैकवर्णत्वंपूर्वपक्षे सिद्धांतेतुवर्णद्वयरूपता भारस्वारणातुभ्रांतमेकत्वज्ञानमितिशि

तुल्यरूपेसंयोगेद्विव्यंजनविधिः तुल्यरूपेसंयोगेद्विव्यंजनाश्रयोविधिर्नसिध्यति कु२कुटः पि२प्पलीपि२तमिति यस्यपु
नर्ग्रहणंतेतस्यैद्वौककारौद्वौपकारौद्वौतकारौ यस्यापिनग्रहणंतेतस्यापिद्वौककारौद्वौपकारौद्वौतकारौ कथंमात्राकालेत्रगम्यते॥
नचमात्रिकंव्यंजनमस्ति अनुपदिष्टंसत्कथंशक्यंविज्ञातुं यद्यपितावदत्रैतच्छक्यतेवक्तुंयत्रैतंनास्त्यण्सवर्णान्
गृह्णातीति इहतुकथंसंय्यंतासंवत्सरः यल्लोकंतल्लोकमिति यत्रैतदस्त्यण्सवर्णान्गृह्णातीति अत्रापिमात्राकालोगम्य
ते नचमात्रिकंव्यंजनमस्ति अनुपदिष्टंसत्कथंशक्यंप्रतिपत्तुं॥ हयवरट् सर्वेवर्णाःसकृदुपदिष्टाः अयंहका
रोद्विरुपदिश्यते पूर्वश्चैवपरश्च यदिपुनः पूर्वएवोपदिश्येत परएववा कश्चात्रविशेषः हकारस्यपरोपदेशे ऽ११
र्हग्रहणेषुहयग्रहणं हकारस्यपरोपदेशेऽर्हग्रहणेषुहयग्रहणंकर्त्तव्यं आतोटिनित्यं॥ ॥ ॥श्री॥ ॥

विज्ञातुंअसत्कथंशक्यं२

श्चसमाचारः अत्रापीतिसानुनासिकनिरनुनासिकौद्वावत्रवर्णावित्यर्थः हयवरट् पूर्वश्चेति पूर्वपरोच्चारणक्रियाभेदादेकस्यैवहकार

यपूर्वपरश्चप्रदेशः

भा॰कै॰ यत्वदिति रेफाद्धकेरितिसमानाधिकरणेपंचम्यौ भव्यवायइति सकारेणयथादीर्घोगृह्यतेएवमकारभौगोपीतिभावः नसिध्यतीति
तितस्यभागस्यस्फुटप्रतिभासाविषयत्वाज्जात्यभिव्यक्तिहेतुत्वाभावाच्चेतिभावः रषाभ्यामेवेति आकारादयोयकारादिभिः प्रत्याय्येत

१२

ऋ१ विनामैकारग्रहणंकर्तव्यं रषाभ्यांनोणः समानपदेऋकाराच्चेतिवक्तव्यं इहापियथास्यात् मातृणांपितृणामिति
यस्यपुनर्ग्रहणंतेरषाभ्यामित्येवतस्यसिद्धंनसिध्यति यत्तद्रेफात्परंभक्तेः तेनव्यवहितत्वान्नप्राप्नोति माभूदेवंअ
ड्व्यवायइत्येवसिद्धं नसिध्यति वर्णैकदेशाःकेवर्णग्रहणेनगृह्यंते येव्यपवृक्ताअपिवर्णाभवंति यच्चात्ररेफात्परंभ
क्तेः नतत्क्वचिदपिव्यपवृक्तंदृश्यते एवंतर्हियोगविभागःकरिष्यते रषाभ्यांनोणः समानपदेततोव्यवायेव्यवाये
चरषाभ्यांनोणोभवतीति ततोऽकुप्वाङ्नुम्भिरिति इदमिदानींकिमर्थंनियमार्थं एतैरेवाक्षरसमाम्नायिकैर्व्यवाये
नान्यैरिति यस्यापिनग्रह्यंतेतस्याप्येषनदोषः आचार्यप्रवृत्तिर्ज्ञापयति भवत्यकारान्नोणत्वमिति यदयं
क्षुभ्नादिषुनृनमनशब्दंपठति नैतदस्तिज्ञापकं वृध्यर्थमेतत्स्यात् नार्नमनिः यत्तर्हितृप्नोतिशब्दंपठति यच्चापि
नृनमनशब्दंपठति ननुचोक्तंवृध्यर्थमेतत्स्यात् वहिरंगावृद्धिः अंतरंगंणत्वंअसिद्धंबहिरंगमंतरंगे अथवाउपरि
ष्टाद्योगविभागःकरिष्यते सतःनोणोभवति नतस्क्षुंदस्यवग्रहात् सतइत्येव क्षुतावेवइउतो एतच्चवक्तव्यं यस्य
पुनर्ग्रह्यंतेगुरोष्टेरित्येवक्षुल्पातस्यसिद्धंयस्यापिनग्रह्यंतेतस्याप्येनदोषः क्रियततन्न्यासएव॥ ॥ श्री

त्वादाक्षरसमाम्नायिकाःभक्तिस्तुनप्रत्याय्यानप्रत्यायिकेतिनियमेनेननिवर्त्यते गुरोष्टेरिति रेकारोगुरुस्तस्यटेरितिसिद्धं तंत्रन्याया
श्रयणाच्चगुरोरपिस्थानेप्लुतोभवतिदेवदत्तेति क्रियतएतन्न्यासएवेति अवश्यकर्त्तव्यतांदर्शयति व्यपवृक्तेपिभागयोर्विवृततर

१२

कुंडरथेनेति अनुनासिकेनैव परसवर्णेन भाव्यमिति नियमाभावाद्रेफः प्राप्नोति तस्य चासिद्धत्वाद्दोरीतिरेफलोपो नास्ति रेफोष्मणामिति अ
नुनासिकपरसवर्णविधाने हस्थानेऽन्तरतमपरिभाषोपस्थानाद्घोषाभावः न हि रेफस्य णकारोंऽतरतमः नाप्यनुस्वारस्य रेफः नैवोर
हाविति हकारवद्रेफोऽपि नकार्यीत्यर्थः तत्रैकवाक्यतायां सामान्यविशेषविध्योर्लौकिकव्यवहारादेव शब्दार्थसंबंधपरिज्ञानवत्

परोऽनुनासिकेऽनुनासिको वेत्यननुनासिकः प्राप्नोति द्विर्वचनस्य मद्रह्रदो मद्रह्रदः परइति द्विर्वचनं प्राप्नोति परसवर्णस्य
कुंडरथेन वनंरथेन अनुस्वारस्य ययीति परसवर्णः प्राप्नोति अस्तु तर्हि पूर्वोपदेशः पूर्वोपदेशे किल्त्वप्रतिषेधो
वलोपवचनं च यदि पूर्वोपदेशः किल्त्वं प्रतिषेध्यं देविला दिदेविषति रलो व्युपधादिति किल्त्वं प्राप्नोति नैष दोषः
नैवं विज्ञायते रलो व्युपधादिति किं तर्हि रलः अव्व्युपधादिति किमिदमव्व्युपधादिति अवकारांतात् व्युपधादि
ति वलोपवचनं च व्योश्च लोपो वक्तव्यः गोधेरः पचेरन् यजेरन् जीवेरदानुक जीरदानुः वलीति लोपो न प्राप्नोति
नैष दोषः रेफोऽप्यत्र निर्दिश्यते लोपो व्योर्वलीति रेफे च वलि चेति अथवा पुनरस्तु परोपदेशः ननु चोक्तं रेफस्य प
रोपदेशे अनुनासिकद्विर्वचनपरसवर्णप्रतिषेध इति अनुनासिकपरसवर्णयोस्तावत् प्रतिषेधो न वक्तव्यः
रेफोष्मणां सवर्णा न संतीति द्विर्वचनेऽपि नैवोभयहो कार्यिणो द्विर्वचनस्य किं तर्हि निमित्तभूतौ रहौ द्विर्वचनस्य ... मि२
घयाब्राह्मणभोज्यतां माठरकौंडिन्यौ परिवेविषातामिति नेदानीं तौ भुंजाते ॥ ३ ॥ ॥श्री॥ ॥ ३ ॥

सामान्यविधेर्विशेषविधिर्बाधकः यत्र क्वचन विशेषविधिः सामान्यविधिस्त्वनुमेय इति रेफस्य कार्यित्वं निमित्तत्वे
न बाध्यते दध्युदकादौ तुल्यस्थानित्वेन निमित्तत्वमिकः तस्मादिदुत्तरस्येत्यादेशोपकान्न बाध्यते लक्ष्यलक्षणापेक्षणाद्बा
ध्यबाधकभावेन क्वचिदपेक्षा नास्ति यथा चिचीषतीति दीर्घत्वद्विर्वचनयोः ॥ ३ ॥

भा·वै· शश्छोटीति हकारपरस्य शकारपरस्याभावात् प्रसंगो न्यायारितमेनत् ढलेचेति अशत्वार्थमपि वक्तव्यं सोहसतीति शैर्यत्वार्थं यदि किं चिदि
ति प्रयोजनार्थो हि वर्णानामुपदेशो न स्वरूपप्रतिपत्त्यर्थः इदमिति उभयत्रापि दोषप्रयोजनसद्भावात् यत्नः स्वरयतीति णकारो

१३

शश्छोटि दीर्घादटि समानपादे हकारे चेति वक्तव्यं इहापि यथा स्यात् महाँ हि सः ढलेच ढलेच हकारग्रहणं कर्तव्यं अ
तो रोरप्लुतादप्लुते हशि च हकारे चेति वक्तव्यम् इहापि यथा स्यात् पुरुषो हसति ब्राह्मणो हसतीति अस्तु तर्हि पूर्वोपदे
शः पूर्वोपदेशे किल्त्वक्त्वे इड्विधयो झल्ग्रहणानि च यदि पूर्वोपदेशः किल्त्वं विधेयं स्निहित्वा स्नेहित्वा सिस्निहि
ति सिस्नेहिषति रलो व्युपधाद्धलादेरिति किल्त्वं न प्राप्नोति क्त्वाविधिः क्त्वश्च विधेयः अधुक्षत् शल इगुपधा
दनिटः क्स इति क्सो न प्राप्नोति इड्विधिः इड्विधेयः रुदादिभ्यः स्वपिहि वलादिलक्षण इट् न प्राप्नोति झल्ग्रहणा
नि च किं अहकाराणि स्युः तत्र को दोषः झलो झलीति इह न स्यात् अदाग्धां अदाग्ध अदाग्ध्वं तस्मात् पूर्वश्चैवोपदेष्ट
व्यः परश्च यदि किंचिदन्यत्रापि उपदेशे प्रयोजनमस्ति तत्रापि उपदेशः कर्तव्यः इदं विचार्यते अयं रेफो यकारवकारा
भ्यां पूर्व एवोपदिश्येत हयवरडिति परएव वा यथान्यासमिति कश्चात्र विशेषः रेफस्य परोपदेशेऽनुनासिकद्विर्व
चनपरसवर्णप्रतिषेधः रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः अनुनासिकस्य

अयत्रिस्कत्यत्य्यातिति ॥ ३ ॥

अलिक्षत ४

१३

त्र प्राप्नोति न ह्यत्र सवर्णग्रहणमस्ति मद्रह्रदइति द्विर्वचनेऽलतेनस्यासिद्धत्वाद्दोरीति रेफलोपो नास्ति हलो यमामिति
लोपस्तु पाक्षिक इति पक्षे रेफद्वयस्य श्रवणप्रसंगः ॥ ३ ॥

अवश्यमिति अनुस्वारस्य शर्त्वात् तथावाये षत्वे सिद्धे नुम्ग्रहणं नियमार्थं नमो योऽनुस्वारस्तत्रैव यथा स्यात् अन्यत्र मा भूत् पुंस्विति अविशेषेणेति॥
प्रयोजनविशेषमनपेक्ष्य सकलप्रयोजनोद्देशेन यत्र यत्र प्रदेशे प्रयोजनसिद्धिस्तत्र तत्रोपदेशः कार्य इत्यर्थः उब्जक इति उपध्मानीयस्य जश्त्वे कृते
षत्वं च प्रयोजनं सर्पिः षु धनुःषु शर्व्यवाय इति षत्वं सिद्धं भवति नुम्विसर्जनीयशर्व्यवायेपीति विसर्जनीयग्रहणं न कर्तव्यं भवति नुमश्चापि
तर्हि ग्रहणं शक्यमकर्तुं कथं सर्पींषि धनूंषि अनुस्वारे कृते शर्व्यवाय इत्येव सिद्धं अवश्यं नुमो ग्रहणं कर्तव्यं अनुस्वारविशेषणं नुम्ग्रहणं नुमो यानु
स्वारस्तत्र यथा स्यात् इह मा भूत् पुंस्विति अथवा अविशेषेणोपदेशः कर्तव्यः किं प्रयोजनं अविशेषेण संयोगोपधासंज्ञा ऽचोऽन्त्य द्विर्वचनस्थानिवद्भा
व प्रतिषेधाः अविशेषेण संयोगसंज्ञा प्रयोजनं उब्जकः उब्जितुं हलोनंतराः संयोग इति संयोगसंज्ञा संयोगे गुरु इति गुरुसंज्ञा गुरोरिति प्लुतो भवति उप
धासंज्ञा च प्रयोजनं दुष्कृतं निष्कृतं निष्पीतं इदुदुपधस्य चाप्रत्ययस्येति षत्वं सिद्धं भवति नैतदस्ति प्रयोजनं न इदुदुपधग्रहणेन विसर्जनीयो विशेष्यते
किं तर्हि सकारो विशेष्यते इदुदुपधस्य सकारस्य यो विसर्जनीय इति अथवा उपधाग्रहणं न करिष्यते इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः॥
इदुद्भ्यामुत्तरस्य विसर्जनीयस्येति अलोऽन्त्यविधिश्च प्रयोजनं वृक्षस्तरति प्लक्षस्तरति अलोऽन्त्यस्य विधयो भवंतीत्यलोऽन्त्यस्य सत्वं
सिद्धं भवति स्थानिवदपि नास्ति प्रयोजनं निर्दिश्यमानस्यादेशा भवंतीति विसर्जनीयस्यैव भविष्यति द्विर्वचनं प्रयोजनं उरः कः पः अ
नचि च अच उत्तरस्य परो द्वे भवत इति द्विर्वचनं सिद्धं भवति स्थानिवद्भावप्रतिषेधश्च प्रयोजनं यथेह भवति उरः केण उरः पेणेत्यड्व्यवा
य इति णत्वं एवमिहापि स्थानिवद्भावात् प्राप्नोति व्यूढोरस्केन महोरस्केनेत्येतत्र नाल्विधावितिप्रतिषेधः सिद्धो भवति॥७॥
संयोगसंज्ञायां तस्यासिद्धत्वात् संयोगाभावाद्गुरुत्वाभावात् प्लुतो न स्यात् महोरस्केनेति पूर्वत्रासिद्धेन स्थानिवदिति निषेधः
अचः परस्मिन् पूर्वविधाविति स्थानिवद्भावादेशाद्यस्य॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

भा॰ कै॰

१४

इत्यादिविधानादेषां साधुत्वं स्यात् प्रत्याहारप्रतिबद्धं तु कार्यं न प्राप्नोति तत्र वस्तुप्रश्नः कथमिति प्रवृत्तिनिमित्तप्रश्नः अयुक्ता इ
त्यस्यैव हेतुकथनं अनुपदिष्टश्चेति अयुक्ताः प्रत्याहारलक्षणेन पाठाभावादसंबद्धा इत्यर्थः उपदेशो द्विविधः पाठो ग्रहणकशा
स्त्रेण प्रत्यायनं च सद्द्विविधोऽप्येषां नास्तीत्यर्थः चशब्दो हेतौ यतो नुपदिष्टास्ततोऽयुक्ता इत्यर्थः कश्चित्तु चशब्दोऽनपव्यते शर्षीति शर्
षु पाठे कल्त्वमिति कुलं जरन् शी तिजश्त्वं सिध्यति उपध्मानीयादेरिति यद्यपि द्विर्वचने पूर्वत्रासिद्धं अथापि पूर्वत्रासिद्धी
इत्यं च चार्यते इमे अयोगवाहा न क्वचिदुपदिश्यंते श्रूयंते च तेषां कार्यार्थ उपदेशः कर्तव्यः के पुनरयोगवाहाः विसर्ज
नीयजिह्वामूलीयोपध्मानीयानुस्वारानुनासिक्यमाः कथं पुनरयोगवाहाः यदयुक्ता वहंति अनुपदिष्टाश्च श्रूयंते क्व
पुनरेषामुपदेशः कर्तव्यः अयोगवाहानामट्सु णत्वं अयोगवाहानामट्सूपदेशः कर्तव्यः किं प्रयोजनं णत्वं उरः केण उरः
पेण उरः केण उरः पेण अड्व्यवाय इति णत्वं सिद्धं भवति शर्षु जश्भावषत्वे शर्षूपदेशः कर्तव्यः किं प्रयोजनं जश्भावषत्वे॥
उब्जिता ५ अयमुब्जिरुपध्मानीयोपधः पठ्यते तस्य जश्त्वे कृते उब्जितुमित्येतद्रूपं यथा स्यात् यद्युपध्मानीयोपधः पठ्यते उ
ब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति दकारोपधे पुनर्नन्द्राः संयोगादय इति प्रतिषेधः सिद्धो भवति य
द्वि दकारोपधः पठ्यते कारूप सिद्धिः उब्जिता उब्जितुमिति असिद्धे भ उदजे इदमस्ति स्तोः श्चुना श्चुरिति ततो वक्ष्यामि
भउद्जे उद्जे श्चुना सन्निपाते भोऽस्ति वतीति ततर्हि वक्तव्यं न वक्तव्यं निपातनादेव सिद्धं किं निपातनं भुजन्युब्जौ पाण्युप
तापयोरिति इहापि तर्हि प्राप्नोति अभ्युद्गः समुद्ग इति अनुक्त विषये निपातनं अथवा नैतदुब्जेस्तद्रूपं गमेरेतद
ड्युपसर्गो डो विधीयते अभ्युद्गतः अभ्युद्गः॥ समुद्गतः समुद्ग इति॥७॥
त्राभाति १
य मद्द्विर्वचन इति सिद्धं सर्वथो बिब्जिषतीति निपातनादिति द्विर्वचनं कथं निपातनाद्वाक्यशेषोऽनुमीयते असिद्धप्रकरणे स्तोः श्चुनेत्यत्र श्चु
रित्यत्रोद्जेर्भ इति तत्र नंद्रा इति दकारस्य द्विर्वचननिषेधः कर्तव्यो न तु द्विर्वचनमिति पूर्वत्रासिद्धीय न द्विर्वचन इत्यस्याप्रवृ
त्याभवस्यासिद्धत्वादिष्टद्विर्वचनसिद्धिः अथापि न वाक्यशेषानुमानं निपातनमेव प्रतिपादकं तथापि दकारोपदेशसामर्थ्या

न द्विर्वचने कृते दकारस्य बद्धं भवति उभुज विषय॥ सिद्धिरसाध्य विषय भवु मात सिद्ध्यर्थः॥७॥

१४

एवंतर्हीति· प्रकृतोर्थो न गम्यते अर्थांतरं तु गम्यत इत्यर्थः तस्यार्थ इति· तस्य वर्णस्य परं प्रति वर्णानामर्थवत्त्वमिति कथं तस्येति वर्णः परामृश्य मसि १
त इत्याह· सोर्थ इति· प्रकृतोर्थ इत्यर्थः उष्ट्रमुख इति· गतार्थत्वादप्रयोग एव द्वितीयस्य मुखशब्दस्य लोपोभिधीयते· अत्र हि उष्ट्रस्य मुखम्
स्येव विग्रहः नन्वत्रायी प्राण्यंतरस्य मुखं पश्यतीति विशिष्टावयववृत्तिः ऋष्ट्रशब्दः साद्दश्यान्मुखं विशिनष्टि समिहाप्यनर्थगते

एवंतर्हीदं पठितव्यं स्यात् वर्णानुपलब्धौ चातदर्थगतेरिति· किमिदमतदर्थगतेरिति· तस्यार्थस्तदर्थः तदर्थस्य गतिः तदर्थग
तिः न तदर्थगतिः अतदर्थगतिः अतदर्थगतेरिति अथ नान्नोत्तदर्थः तदर्थस्य गतिः तदर्थगतिः न तदर्थगतिः अतदर्थग
तिः अतदर्थगतेरिति सतर्हि तथा निर्देशः कर्तव्यः न कर्तव्यः उत्तरपदलोपोत्र द्रष्टव्यः तद्यथा उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः
खरमुखः एवमतदर्थगतेनर्थगतेरिति· संघातार्थवत्त्वाच्च मन्यामहे ऽर्थवंतो वर्णा इति येषां संघाता अर्थवंतः अवयवा
अपि तेषामर्थवंतः येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः एकश्च चक्षुष्मान् दर्शने समर्थः तत्समुदायश्च तद्यथा
शतमपि समर्थं एकश्च तिलः तैलदाने समर्थः तत्समुदायश्च खार्यपि समर्था· येषां पुनरवयवा अनर्थकाः तद्यथा एको
ऽन्धो दर्शने असमर्थः तत्समुदायश्च शतमप्यसमर्थं एका च सिकता तैलदाने असमर्था तत्समुदायश्च खारीशतमप्यसमर्थं·
यदि तर्हीमे वर्णा अर्थवंतः अर्थवत्कृतानि प्राप्नुवंति· कानि· अर्थवत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा· प्रातिपदि
कादिति स्वाद्युत्पत्तिः सुबंतं पदमिति पदसंज्ञा तत्र को दोषः पदस्येति नलोपादीनि प्राप्नुवंति· धनंवनमिति ॥ ७ ॥ ७ ॥

इत्यत्रार्थशब्देन प्रक्रांतोऽर्थ उच्यते नार्थमात्रमित्यर्थः नलोपादीनीति· श्रवणं तु विभक्तेर्न भवति यतो यदेव अवयवानां प्रातिप
दिकसंज्ञा प्रवर्तते· तदेव समुदायस्यापि· तत्र तदंतं गत्वाद्विभक्तेर्लुका भवितव्यं समासग्रहणेन च तुल्यजातीयस्य सुबंतावय
वसमुदायस्य प्रातिपदिकसंज्ञा निवार्यते नर्थवत्त्वेदसमुदायमात्रस्य· येनैव चार्थेन समुदायस्यार्थवत्त्वं तेनैव तदवयवानामपीति

समुदाया अपि तेषामनर्थकाः ४

किं पुनरमिति (?) प्रकाशोद्योत ॥ ४ ॥

भा· कै· इदानीमन्यदपि वर्णगतं वस्तु विचार्यते· किं पुनरिति पक्षद्वयेपि प्रतिवर्णं विभक्त्यनुत्पत्तिज्ञानं विचारस्य प्रयोजनं· वर्णव्यत्यय इति·
एकस्य वर्णस्यापगमो ऽन्यस्योपगमो व्यत्ययः सककारस्येति तस्यैनान्वयव्यतिरेकाव नुविधत्तोऽर्थावसाय इति भावः वर्णानुप

१५

किं पुनरिमे वर्णा अर्थवंतः आहोस्विदनर्थकाः अर्थवंतो वर्णाः धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्
धातव एकवर्णा अर्थवंतो दृश्यंते· एति अध्येति अधीत इति· प्रातिपदिकान्येकवर्णान्यर्थवंति· आभ्यामेभिः एषु· प्रत्य
या एकवर्णा अर्थवंतः औपगवः कापटवः निपाता एकवर्णा अर्थवंतः अ अपेहि· इ इंद्रं पश्य उ उत्तिष्ठ औ अपक्राम धातु
प्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे अर्थवंतो वर्णा इति· वर्णव्यत्यये चार्थांतरगमनात् वर्णव्यत्य त्य४
ये चार्थांतरगमनान्मन्यामहे अर्थवंतो वर्णा इति· कूपः सूपो यूप इति· कूप इति सककारेण कश्चिदर्थो गम्यते· सूप इति
ककारापाये सकारोपजने चार्थांतरं गम्यते यूप इति ककारसकारापाये यकारोपजने ऽर्थांतरं गम्यते· तेन मन्यामहे यः
कूपे कूपार्थः स ककारस्य यः सूपे सूपार्थः स सकारस्य यो यूपे यूपार्थः स यकारस्येति· वर्णानुपलब्धौ चान
र्थगतेः वर्णानुपलब्धौ चानर्थगतेर्मन्यामहे अर्थवंतो वर्णा इति· वृक्षः ऋक्षः काण्डीरः आण्डीरः वृक्ष इति सवकारे
ण कश्चिदर्थो गम्यते ऋक्ष इति वकारापाये सोर्थो न गम्यते काण्डीर इति सककारेण कश्चिदर्थो गम्यते आण्डीर इति·
ककारापाये सोर्थो न गम्यते· किं तर्ह्युच्यते अनर्थगतेरिति· न साधीयो ह्यत्रार्थस्य गतिर्भवति ॥ ७ ॥ ७ ॥ १५

लब्धौ चेति अर्थांतरावगमात् प्रकृतोर्थो न गम्यत इति विवक्षितं इत्यसत्यर्थावगत्यभावमात्रमनेनोक्तमिति म त्वा पृच्छति· किं तर्हि
उच्यत इति पर मतापेक्षया नकर्ष आरोप्यते यथा न किंचिदयं करोतीत्युक्ते कश्चिदाह स्तुतनामयं करोतीति ॥ ७ ॥ ७ ॥
साधीय इति १

यदुक्तं वर्णव्यत्यये चार्थांतरगमनाद्वर्णानुपलब्धौ चानर्थगतेरिति तस्यानैकांतिकत्वमुद्भाव्यते· उभयमित्याहेति· यत्रान्वयव्यतिरेकाभ्यां अ
र्थवत्ता शक्यते कल्पयितुं तत्रैवासावुपगंतव्या न सर्वत्रेत्यर्थः संघातांतराणीति· तदुक्तं· नकूपसूपयूपानामन्वयोर्थस्य विद्य

उभयमिदं वर्णेषूक्तं अर्थवंतोनर्थकाइति च किमत्र न्याय्यं· उभयमित्याह· कुतः स्वभावतः तद्यथा· समाम्नानमीहमानानां
चाधीयानानां च केचिदर्थैर्युज्यंते अपरे न न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरनर्थवद्भिः शक्यं भवितुं· कश्चिद्वानर्थ
कइति सर्वैरनर्थकैः तत्र किमस्माभिः· शक्यं कर्तुं· ये धातुप्रत्ययप्रातिपदिकनिपाता एकवर्णा अर्थवंतः अतोन्ये
नर्थकाइति· स्वाभाविकमेतत्· कथं यदेषस्ववता वर्णानामर्थवत्तायां हेतुरुपदिष्टः अर्थवंतो वर्णा धातुप्रातिपदिक
प्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थांतरगमनाद्वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वा
च्चेति· संघातांतराण्येवैतान्येवंजातीयकानि अर्थांतरेषु वर्तंते· कूपः सूपो यूपइति· यदि हि वर्णव्यत्ययकृतमर्थांतर
गमनं स्यात् भूयिष्ठः कूपार्थः सूपे स्यात् सूपार्थश्च कूपे कूपार्थश्च यूपे यूपार्थश्च कूपे यूपार्थश्च सूपे यतस्तु खलु न श्च
किंचित्कूपस्य वा यूपे यूपस्य वा कूपे कूपस्य वा यूपे सूपस्य वा सूपे· अतो मन्यामहे संघातांतराण्येवंजातीय
कान्यर्थांतरेषु वर्तंतइति· इदं खल्वपि भवता वर्णानामनर्थवत्तां ब्रुवता साधीयोनर्थकत्वं द्योतितं· यो हि मन्यते यः कू
पे कूपार्थः स ककारस्य यः सूपे सूपार्थः स सकारस्य यो यूपे यूपार्थः स यकारस्येति उपशब्दः स तस्यानर्थकः
स्यात्· तत्रेदमपरिहृतं संघातार्थवत्त्वाच्चेति· एतस्यापि प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति ॥ ॥७॥

ते· अतोर्थांतरवाचित्वं संघातस्यैव गम्यतइति· एतस्यापीति· दृष्टो ह्यतदर्थेन गुणेन गुणिनोर्थभावः सुरांग

भा. कै.

अत्र परिहारमाह· संघातस्येति· वृक्षइत्यत्रैकत्वं विवक्षितमर्थः तन्त्रैकमित्येकैव विभक्तिरुत्पद्यते यथा वहवो द्वारएकेनैव प्रदी
पेन दृश्यमर्थं पश्यंति साचोत्पद्यमाना समुदायादेव तंत्रेण सर्वाननुगृह्णात्युत्पद्यते· समुदायद्विर्वचनवत्तदसंज्ञा तु समुदाय

१५

संघातस्यैकार्थ्यात्सुबभावो वर्णात् संघातस्यैकत्वमर्थः तेन वर्णात्सुबुत्पत्तिर्न भविष्यति· अनर्थकास्तु प्रतिव
र्णमर्थानुपलब्धेः अनर्थकास्तु वर्णाः कुतः प्रतिवर्णमर्थानुपलब्धेः नाह्यत्र प्रतिवर्णमर्था उपलभ्यंते· किमिदं प्रति
वर्णमिति वर्णं वर्णं प्रति प्रतिवर्णं वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात् वर्णव्यत्ययापायोपजनविकारेषु
अर्थदर्शनान्मन्यामहे अनर्थका वर्णाइति· वर्णव्यत्यये कृते तर्कः कसेः सिकताः हिंसेः सिंहः वर्णव्य
त्ययो नार्थव्यत्ययः अपायो लोपः घ्नंति घ्नंतु अघ्नन् वर्णापायो नार्थापायः उपजन आगमः लविता
लवितुं वर्णोपजनो नार्थोपजनः विकारः आदेशः घातयति घातकः वर्णविकारो नार्थविकारः यथैव व
र्णव्यत्ययापायोपजनविकारा भवंति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यं· न चेह तद्वदतो म
न्यामहे· अनर्थका वर्णाइति ॥ ॥८॥

स्यैव भवति न प्रत्येकं यस्मात्प्रत्ययविधिरित्यनुवर्तनाद्दस्तुवंतत्वात् अनर्थकास्त्विति धात्वादिव्यतिरिक्ता
वर्णाः पक्षीक्रियंते अन्यथा शास्त्रविरोधः प्राप्नोति· किमिदमिति· असमासशंकया प्रश्नः समासे तूत्तरं तेनैव वीप्सा

१६

अथकिमर्थमिति अजुदित्सवर्णस्येतिकस्मान्नकृतमितिप्रश्नः इण्ग्रहणेनग्रहणार्थत्वंतस्थानामत्रावश्यंकर्तव्यउपदेशः गीर्विर्त्यादौमूर्ध

अथकिमर्थमंतस्थानामण्सूपदेशः क्रियते इहसँय्यंतासवँत्सरः यँल्लोकँल्लोकमितिपरसवर्णस्यासिद्धत्वादनुस्वारस्यैवद्विर्वचनंतत्रपरस्यपरसवर्णेकृतेतस्ययय्ग्रहणेनग्रहणात्पूर्वस्यापि परसवर्णोयथास्यात् नैतदस्तिप्रयोजनंवक्ष्यत्येतत् द्विर्वचनेपरसवर्णत्वंसिद्धंवक्तव्यमिति यावतासिद्धत्वमुच्यतेपरसवर्णएवतावद्भवति परसवर्णेतर्हिकृतेतस्ययग्रहणेनग्रहणात्द्विर्वचनंयथास्यात्नाभूद्द्विर्वचनं ननुभेदोभवतिसतिद्विर्वचनेत्रियकारंअसतिद्विर्वचनेद्वियकारंनास्तिभेदः सत्यपिद्विर्वचनेद्वियकारमेव कथंहलोयमांयमिलोपइत्येवमेकस्यलोपेनभवितव्यं एवमपिभेदः सतिद्विर्वचनेकदाचिद्द्वियकारंकदाचित्त्रियकारं असतिद्वियकारमेवसएवकथंभेदोनस्यात् यदिनित्योलोपःस्यात् विभाषाचसलोपःयथाऽभेदस्तथाअनुवर्ततेविभाषाशरोचियद्वारयत्ययंद्वित्वं यदयंशरोचीतिद्विर्वचनप्रतिषेधंशास्तितज्ज्ञापयत्याचार्याः॥७

न्योयथास्यादिति ननुचभेदइतिश्रुतिकृतोस्त्येवभेदः सूक्ष्मत्वात्तुदुर्लक्ष्यः तदेतदितिज्ञापकस्यस्मत्वमस्यविघटयति॥७॥

भा॰कै॥ आचारादिति आचारोव्यवहारःतस्मिन्निर्दिष्टेरितियन्नकृतः अप्रधानत्वादिति प्रधानाप्रधानसंनिधौप्रधानमेवकार्यसंप्रयोजकमितिपरार्थानामनुबंधानामसंज्ञानप्रवर्तलइत्यर्थः शैलीति शीलेभवाशैलीसम्बध्यानपूर्विकाप्रवृत्तिः यथालोकेब्राह्मणेःसहब्राह्मणाभोज्यंतेक्षत्रियेःसहक्षत्रियाइति एवमिहाप्यवर्णाआचार्येणानदिष्टाइत्यर्थः लोपश्चेति परत्वान्नित्यत्वाच्चआदिरंत्येनसहेतेत्यनेनइत्संज्ञाविधानकालेअनुबंधानांलोपादसंनिधानाच्चसंज्ञानप्रव

७७

अइउण्ऋऌक्एओङ्ऐऔच्प्रत्याहारेष्वनुबंधानांकथमज्ग्रहणेषुन यएतेअक्षुप्रत्याहारार्थाअनुबंधाःक्रियंतेएतेषामज्ग्रहणेनग्रहणंकस्मान्नभवति किंचस्यात् दधिणकारीयातिमधुणकारीयतीति इकोयणचीतियणादेशःप्रसज्येत आचारात् किमिदमाचारादिति आचार्याणामुपचारात् नैतेष्वाचार्याअच्कार्याणिकृतवंतः अप्रधानत्वात् अप्रधानत्वाच्च नखल्वप्येतेषामक्षुप्राधान्येनोपदेशःक्रियते कुतर्हिहल्षुकृतएतत् एषाह्याचार्यस्यशैलीलक्ष्यते यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति अचःअक्षुहलोहल्षुलोपश्चबलवत्तरः लोपःखल्वपितावद्भवति ऊकालोज्झ्रस्वदीर्घप्लुतइतिवायोगः तत्कालानांयथास्यात् अचांग्रहणमच्कार्यंतेनैषांनभविष्यति अथवायोगविभागःकरिष्यते ऊकालोच् उऊऊ३इत्येवंकालोज्भवति ततोह्रस्वदीर्घप्लुतसंज्ञश्चभवतिऊकालोच् एवमपिकुक्कुटइत्यत्रापिप्राप्नोति तस्मात्पूर्वोक्तएवपरिहारः एषएवार्थः अपरआह ह्रस्वादीनांवचनात्प्राग्यावत्तावदेवयोगोस्तु अच्कार्याणियथास्युः तत्कालेषुअक्षुकार्यंवर्ततेअनुबंधाक्षुच्चारणएवसंतिइत्संज्ञाप्रतिबद्धंचकार्यमसंतएवप्रतिपादयंति स्वतस्तुनकिंचित्कार्यंप्रतिपद्यंते ऊकालोज्झितिसिद्धेऽच्चेयोगविभागेनकालविशेषावच्छिन्नस्याच्संज्ञानियम्यते ततोऽनुबंधानामकालत्वाभावादच्त्वाभावः एवमपीति ककाराकृतेरुपदेशान्मात्रिकस्याप्यच्त्वंमन्यते अत्रचयद्यप्ययंपरिहरोस्तिद्वावेतौककारौनचवर्णद्वयेनैकाजानिर्व्यज्यतइतितथापि

…मेवमात्राकालेऽन्यस्तेनकमात्रिकं व्यञ्जनमस्मा…

…एकत्वाच्छन्दसुकरेऽनोतिः ॥७॥

कथं संदेहो भवतीति किंप्रत्यासत्तिराश्रीयते ऽथव्याप्तिरितिसंदेहः नहिकेपरइति नन्वल्लोपानदुपानत्के तिङ्स्वेकर्त्तव्ये नहोधइत्यसिद्धत्वाद सिद्धे परतो हकारः तथागोधित्यादौरेफः अत्राहैः ननुनइत्यत्र योगविभागेन धत्वादीनाम सिद्धत्वाभावात्तेषु चकलेषु हकारादीनामभावः नहिपदांताइतिन नुच भोभगोइत्यत्राश्ग्रहणस्य प्रयोजनं वक्ष्यते हलवृक्करोतीत्यत्र हलि सर्वेषामितिलोपो माभूदितितत्कथमुच्यते नहिपदांताइति उच्यते अप्रग्रह्यस्येति पर्युदासेनाच एवानुनासिकेन भाव्यं नतु हलइति कार्यभाग इत्यर्थः अचोप्रग्रह्यस्ये तिहलो हिनभाव्यमित्यत्राण्ग्रहणसामर्थ्यात्पूर्वेणेति स्थितं तत्र

कथं अयं णकारो द्विरनुबध्यते पूर्वश्चैव परश्च तत्राण्ग्रहणे ऽण्ग्रहणेषु च संदेहो भवति पूर्वेणवास्युः परेणवेति कतरस्मिंस्तावदण्ग्रहणे संदेहः ढ्लोपे पूर्वस्य दीर्घोणइति असंदिग्धं पूर्वेणनपरेण कुतः तत्र पराभावात् नहि ढ्रलोपे परे ऽणः संति ननुचायमस्ति आत्दइति एवं तर्हि सामर्थ्यात्पूर्वेण न परेण यदि हि परेणस्यात् अण्ग्रहणमनर्थकं स्यात् ढ्लोपे पूर्वस्य दीर्घोचइत्येव ब्रूयात् अथवेतदपि न ब्रूयात् अचो ह्येतद्भवति कस्य दीर्घः स्रुतइति अस्मिंस्तर्ह्यण्ग्रहणे संदेहः केणइति असंदिग्धं पूर्वेण न परेण कुत एतत्पराभावात् नहिके परेणः संति न नुच अयमस्ति गोकाने केति एवं तर्हि सामर्थ्यात्पूर्वेण न परेण यदि हि परेणस्यात् अण्ग्रहणमनर्थकं स्यात् केचइत्येव ब्रूयात् अथवेतदपि न ब्रूयात् अचो ह्येतद्भवति ह्रस्वो दीर्घः स्रुतइति अस्मिंस्तर्ह्यण्ग्रहणे संदेहः अणोप्रग्रह्यस्यानुनासिकइति असंदिग्धं पूर्वेण न परेण कुत एतत्पराभावात् नहि पदांताः परेणः संति ननुच अयमस्ति कर्त्तृहर्त्तृ एवं तर्हि सामर्थ्यात्पूर्वेण न परेण यदि हि परेणस्यात् अण्ग्रहणमनर्थकं स्यात् अचोप्रग्रह्यस्यानुनासिकइत्येव ब्रूयात्॥ ०॥ ॥श्री०॥

झसंभवतीति कि पिछतेऽक्षस्त्वमाचष्टइतिणिचि टिलोपे चछते ऽक्षवर्यतेर्वि चिछतेऽक्षवूद्रति किपितु कोलुसको विधिप्रतिचनस्थानिवदितिनिषे धात्संप्रसारणप्रसंगः लोपोव्यार्वलीतिलोपप्रसंगश्च वि चितुस्थानिवद्भावाद्वल्नि मिलोवलोपोनभवति हलिसर्वेषामित्यनेलुलोपे क्रियमाणे पूर्व त्रासिद्धेनस्थानिवद तिस्थानिवत्त्वनिषेधाद्वलोपः प्राप्नोतिअश्ग्रहणात्तत्त्या निवर्त्यते॥ ०॥ ॥श्री०॥

भा·कै· आचार्योपदेशपारंपर्यात्तु ज्ञायते अनुवर्तते विभाषेति· तस्मात्त्रिव्यंजनसंयोगश्रवणायाणुदित्ति एकारेणप्रत्याहारः अतोनचकारेणेतिस्थितं·

१८

अनुवर्तविभाषेति· कथं तत्वा ज्ञापकं· नित्येहितस्यलोपेप्रतिषेधार्थो न कश्चित्स्यात् यदिनित्योलोपः स्यात्प्रतिषेधवचनम नर्थकं स्यात्· अस्त्वत्र द्विर्वचनं झरोझरिसवर्णाइतिलोपोस विष्यति पश्यतित्वाचार्यः विभाषास लोपइ [illegible] ति· ततो द्विर्वचनप्र तिषेधनंरास्ति· नैतदस्ति ज्ञापकं नित्येपितस्य लोपे सप्रतिषेधोवश्यं वक्तव्यः यदेतदचोरहाभ्यामितिद्विर्वचनं लोपापवादः स विज्ञायते कथं पर इत्युच्यते· एतावंतश्च परः यद्यत्झरोवायमोवा यदि चा [illegible] त्रलोपः स्यात् द्विर्वचनमनर्थकं स्यात् किंतर्हि ते योर्योगयोरुदाहरणं यद्यकृते द्विर्वचने त्रिव्यंजनः संयोगः प्रत्तं अवत्तं आदित्यः इहेदानीं कर्त्ताहर्त्तेति द्विर्वचनसामर्थ्याल्लो पोनभवति [illegible] मिहापिलोपोनस्यात् कर्षतितिवर्षतीतितस्मान्नित्येपिलोपे ऽवश्यं सप्रतिषेधो वक्तव्यः तदेतदत्यंतसंदि ग्धमाचार्याणां वर्तते विभाषानुवर्ततेनवेति॥ ०॥ ॥श्री०॥

१८

अर्द्धचतस्रइति अर्द्धेनचतस्रः चतुर्थीहिमात्रार्द्धमिति किंपुनरिति वर्णोत्सतिवर्णोच्छेदः वर्णांतरमनुबंधः किंक्रियतइत्यर्थः व्याख्यानतइतिन्यायादाग
महाशक्तिरनुसरणीयेत्यर्थः नसज्जनकारेति भकारस्यपदांतस्यजश्त्वेनभाव्यमितिभावः उञ्ञ्कारः संयोगांतस्येतिलुप्यतइतितस्या

इण्ग्रहणेषुतर्हिसंदेहः असंदिग्धंपरेणानपूर्वेणेति कुतएतत् येोन्यपरेणेण्स्यात् यत्रछतिपूर्वेणसन्देह्य ग्रहणंतत्रकरोति ख्योरि
तिम्‌ तच्चगुरुभवति कथंकृत्वाज्ञापकंतत्र विभक्तिनिर्द्देशोसन्देह्य ग्रहणेऽर्द्धचतस्रोमात्राः प्रत्याहारग्रहणेपुनस्तिस्रोमात्राः सोयंभे
वंलघीयसान्यासेन सिद्धेसतियद्गरीयांसंयत्नमारभतेतज्ज्ञापयत्याचार्यः परेणानपूर्वेणेति किंपुनर्वर्णोत्सता विव अयंणकारोहिरनुब
ध्यते एतज्ज्ञापयत्याचार्यः भवत्येषापरिभाषाव्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणमिति अणुदित्सवर्णपरिहायपूर्वेणा
णूग्रहणंपरेणेण्ग्रहणमितिव्याख्यास्यामः अमङणनम् झभञ् किमर्थमिमेनुखमासिकावचनैवर्णाउभावश्चनुबध्येते नञ्कारएवा
नुबध्यते कथंयानिनकरेणग्रहणानिहलोयमांयमिलोपइति संतुभकारेण हलोयमांयमिलोपइति नैवंशक्यं झकारसकारयोरपि
नकारभकारयोर्लोपः प्रसज्येतनझकारसकारयोर्लोपः प्रसज्येत नझकारभकारोझकारसकारयोस्तः कथंपुनः खय्यम्परइति एतद
प्युत्तकारेण पुनःखय्यम्परइति नैवंशक्यंझकारसकारयोरपिहिखयिरुः प्रसज्येत नझकारस्सकारपरः खयस्ति कथंङमो
ह्रस्वादचिङमुण्नित्यमिति एतदप्युत्तुझकारेणङ ओह्रस्वादचिङमुण्नित्यमिति नैवंशक्यंझकारसकारयोरपिहिपदांतयोर्झ
कारसकारावागमौस्यातांनझकारभकारौपदांतौस्तः एवमपिपंचागमास्त्रयआगमिनः वैषम्यात्संख्यातानुदेशोनप्राप्नोति संतु
तावद्धेषानागमानामागमिनः संति झकारसकारौपदांतौनस्तइतिलक्षाआगमावपिनभविष्यतः २

च्छभावः संतुतावदिति उद्देशानुदेशाभ्यांसंख्यासाम्याथसंख्येलब्धेप्रयोगेयस्यागमस्यागमीविद्यतेसप्रवर्ततेनान्यइत्यर्थः॥ ● ॥ ॥श्री॰

भा॰के॰ अजर्घाइति गर्धेर्यङ्लुकि रुगागमिस्यासस्यलंतेलङि सिपिहल्ङ्यादिलोपः पूर्ववत्‌पलोपस्पषुभावजश्त्वर्त्वरलोपदीर्घत्वेषुरूपं इहापितर्हीति धातुग्रहणे॥
नलिंगेनाधातोरेवरपरत्वनिवर्तितं धातोस्तुरपरत्वेसत्यनंत्यत्वान्नप्राप्नोतीतिप्रश्नः इहापीति तस्माद्धातुग्रहणस्यसप्रयोजनत्वान्नज्ञापकत्वमित्यर्थः सव

१॰ अथैवतदपिनब्रूयात् अचएवहिप्रग्रह्याभवंति अस्मिंस्तर्ह्यण्ग्रहणेसंदेहः उरण्रपरइति असंदिग्धंपूर्वेणानपरेणकुतएतत् पराभावात्
न्नप्लुतछानिपरेण सेतिननुअयमस्ति कर्त्रर्यहत्र्यर्थमितिकिंचिस्यात् यद्यत्ररपरत्वंस्यात् द्वयोरेफयोः श्रवणंप्रसज्येतहलोयमांयमिलोपइत्ये
वमेकस्यात्रलोपेपिविष्यति विभाषासलोपः विभाषाश्रवणंप्रसज्येत अयंतर्हिनित्योलोपः रोरीति पदांतस्येत्येवसः नशक्यः सपदांत
स्येत्येवविज्ञातुं इहहिलोपोनस्यात् जर्घर्तेर्लङि अजर्घाइति इहतर्हिमातॄणांपितॄणामितिरपरत्वंप्रसज्येते आचार्यप्रवृत्तिर्ज्ञापयति ना
२ त्ररपरत्वंभवतीति यदयंऋतइद्धातोरितिधातुग्रहणंकरोति कथंकृत्वाज्ञापकं धातुग्रहणस्यैतत्प्रयोजनं इहमाभूत् मातॄणांपितॄणामि
ति यदिचात्ररपरत्वंस्यात् धातुग्रहणमनर्थकंस्यात् रपरत्वेकृते अनंत्यत्वादित्वंनभविष्यति पश्यतित्वाचार्यः नात्ररपरत्वंभवतीति त
तोधातुग्रहणंकरोति इहापितर्हिनप्राप्नोति चिकीर्षति जिहीर्षतीति माभूदेवं उपधायाश्चेत्येवंभविष्यति इहापितर्हिप्राप्नोति मातॄ
णामिति तस्मात्तत्र धातुग्रहणंकर्तव्यं एवंतर्हिसानर्थ्यात्पूर्वेणानपरेण यदिपरेणस्यात् अण्ग्रहणमनर्थकंस्यात् उरन्रपरइत्ये
वब्रूयात् अस्मिंस्तर्ह्यण्ग्रहणेसंदेहः अणुदित्सवर्णस्यचाप्रत्ययइति असंदिग्धंपरेणानपूर्वेणकुतएतत् सवर्णेऽणग्रहणंतपरंहु
कृतं यदयमुकृदित्करोतिपरकरणंकरोतितज्ज्ञापयत्याचार्यः परेणानपूर्वेणेति॥ ● ॥ ॥श्री॰॥ १॰

र्णइति अचीत्कृतदिति सकारस्य सकारएवयथास्यात् र्सकारोमाभूदित्येवमर्थंतपरत्वंक्रियते यदिपूर्वेणणकारेणाण्ग्रहणंस्यात् सकारोऽ
नण्त्वात् क्लिन्नकालस्ययाहकएवनभवतीतिर्ऋकारोनैवस्थानीनाप्यादेशः प्रसज्जतीति किंतपरत्वेन कृतंचतज्ज्ञापकंपरेणाण्ग्रहणस्य॥ ● ॥

किमिदमिति अक्षरसमाम्नायः इतिव्यवहाराद्योवाइमांस्वरशोक्षरइइतिचोक्तत्वात्प्रश्नः अक्षरंनक्षरमिति क्रियाशब्दोयंनित्यस्यार्थस्यवाच
कइतिदर्शयति अत्रक्षियःक्षरतेर्वाविनाशार्थस्यनञ्पूर्वस्यरूपं·तच्च ब्रह्मतत्वपरमार्थतोनित्यं·व्यवहारनित्यत्वपातुवर्णपदवाक्यस्फोटा
नांनित्यत्वंज्ञातिस्फोटस्यवा अश्नोतेर्वेति सरन्प्रत्ययस्यानुबंधलोपेकृते अनुकरणंसरइतितस्यार्थव्याप्नोतीत्यक्षरंपदंवाक्यंवा वर्णंवाकुरि
लि स्तुतिरियंवर्णस्येत्यर्थः पूर्वसूत्रइति व्याकरणांतरेवर्णाअक्षराणीतिवचनात् किमर्थमिति वर्णानांसाधुत्वस्याप्रतिपाद्यत्वात्तदस्यैव
साधुत्वान्वाख्यानात्प्रश्नः वर्णज्ञानमिति वर्णायेनशास्त्रेणज्ञायंतेतद्वाचोविषयःशास्त्रेणवाविधीयतेआबध्यते शास्त्रेणतस्याःपरिज्ञानादित्य

अथ किमिदमक्षरमिति अक्षरंनक्षरंविद्यात् नक्षयतेनक्षरतीतिवाऽक्षरं अश्नोतेर्वासरोक्षरं अश्नोतेर्वापुनरयमौणादिकःसरन्प्रत्ययः
अभ्युतइत्यक्षरं वर्णंवाहुःपूर्वसूत्रे अथवापूर्वसूत्रेवर्णस्याक्षरमितिसंज्ञाक्रियते किमर्थमुपदिश्यते अथ किमर्थमुपदेशःक्रिय
ते वर्णज्ञानंवाग्विषयोयत्रचब्रह्मवर्तते· तदर्थमिष्टबुद्ध्यर्थंलघ्वर्थंचोपदिश्यते सोयमक्षरसमाम्नायोवाक्समाम्नायः पुष्पितः
फलितश्चंद्रतारकवत्प्रतिमंडितोवेदितव्योब्रह्मराशिः सर्ववेदपुण्यफलावाप्तिश्चास्यज्ञानेभवतिमातापितरौचास्यस्वर्गेलोकेम
हीयते ॥ ७ ॥ इतिश्रीमद्भगवत्पतंजलिविरचितेव्याकरणमहाभाष्येप्रथमाध्यायस्यप्रथमेपादेद्वितीयमाह्निकम् ॥ ७ ॥

र्थः यत्रचेतिब्रह्मवेदःपदेवर्ततेतस्यचशास्त्रंविषयःलौकिकानांवैदिकानांचशास्त्रंविषयइत्यर्थः तदर्थमिति शास्त्रप्रवृत्त्यर्थमित्यर्थः इष्टबुध्यर्थमि
ति कलादिदोषरहितवर्णज्ञानार्थमित्यर्थः लघ्वर्थमिति अनुबंधकरणार्थमित्यर्थः वाक्समाम्नायइति एतावद्भिरेववर्णैर्वाग्व्यवहारइत्यर्थः पुष्पि
तः दृष्टादृष्टफलाभ्यामभ्युदयनिःश्रेयसाभ्यां चंद्रतारकवदिति अनादित्वान्नित्यत्वंवाग्व्यवहारस्यसूचयति ब्रह्मनाशिरिति ब्रह्मतत्वमेव
शब्दतत्त्वतयाप्रतिभातीत्यर्थः सर्ववेदेति· सर्ववेदाध्ययनकृतस्यपुण्यस्ययत्फलंतत्प्राप्नोति मातापितराविति महात्म्यातिशयःशास्त्रस्य
प्रत्याहारमात्रफलाख्यानद्वारेणअन्वाख्यायतेमहीयतेइति·पूजांप्राप्नुतइत्यर्थः महीयशब्दःकंड्वादिषुगतः इत्युपाध्यायजैयटपुत्रकैयटकृ
फलितइति २

तेमहाभाष्यप्रदीपेप्रथमस्याध्यायस्यप्रथमेपादेद्वितीय माह्निकं ॥ ७ ॥ २०

भा० कै० प्र० ३ शे २२

श्रीगणेशाय नमः वृद्धिरादैच् कुत्वं कस्मादिति अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोगान्नियतत्वाच्च सर्वसंज्ञानां लौकिकत्वादादैच्छब्दस्यानुकरणशब्दत्वाज्जातिशब्दत्वाच्च शास्त्रप्राप्तिरस्तीति प्रश्नः तत्र कुशब्दः पञ्चसु वर्णेषु आसक्तरूपो वाचकत्वेन विनियुक्त इति शब्दरूपे प्रवृत्तिनिमित्ते भावप्रत्ययः छन्दोवदिति नवैदिकादिसूत्राणि अपि तु गतार्थ्याकरणसूत्राण्येव इष्टिश्चेयं छन्दोवदिति किं पुनरिति

वृद्धिरादैच् कुत्वं कस्मान्न भवति चोः कुः पदस्येति भत्वात् कथं भसंज्ञा अयस्मयादीनि छन्दसीति छन्दसीत्युच्यते न चेदं छन्दः छन्दोवत्सूत्राणि भवन्ति यदि भसंज्ञा वृद्धिरादैजदेङ् गुण इति जश्त्वमपि न प्राप्नोति उभयसंज्ञान्यपि छन्दांसि दृश्यन्ते तद्यथा सुष्टुभा सऋक्वता गणेन पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति एवमिहापि पदत्वाज्जश्त्वं भत्वात्कुत्वं न भविष्यति किं पुनरिदं तद्भावितग्रहणं वृद्धिरित्येवं ये आकारैकारौकारा भाव्यन्ते तेषां ग्रहणमाहोस्विदादैज्मात्रस्य किं चातः यदि तद्भावितग्रहणं शालीयो मालीय इति वृद्धलक्षणश्छो न प्राप्नोति आम्रमयं शालमयं वृद्धलक्षणो मयण्न प्राप्नोति आम्रगुप्तायनिः शालगुप्तायनिः वृद्धलक्षणः फिञ्न प्राप्नोति अथादैज्मात्रस्य ग्रहणं सर्वो भासः सर्वभास इत्युत्तरपदवृद्धौ सर्वं चेत्येष विधिः प्राप्नोति इह च तावती भार्या यस्य तावद्भार्यः यावद्भार्यः वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोति अस्तु तर्ह्यादैज्मात्रस्य ग्रहणं ननु चोक्तं सर्वो भासः सर्वभास इत्युत्तरपदवृद्धौ सर्वं चेत्येष विधिः प्राप्नोतीति नैष दोषः नैवं विज्ञायते उत्तरपदस्य वृद्धिः उत्तरपदवृद्धिः उत्तरपदवृद्धाविति कथं तर्हि उत्तरपदस्येत्येवं प्रकृत्य या वृद्धिः तद्वत्युत्तरपदे इत्येवमेतद्विज्ञायते अवश्यं चैतदेवं विज्ञेयं तद्भावितग्रहणे सत्यपीह प्रसज्येत सर्वः कारकः सर्वकारक इति यदप्युच्यते इह च तावती भार्या यस्य तावद्भार्यः यावद्भार्य इति च वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोतीति नैष दोषः नैवं विज्ञायते वृद्धेर्निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तस्येति

उभयथा शास्त्रे दर्शनात् पक्षद्वयेऽपि दोषसद्भावात् प्रश्नः उत्तरपदस्येत्येवमिति तत्र हि वृद्धौ सर्वं चेत्यप्युच्यमाने वृद्धिमात्रस्योत्तरपदस्याभावात् सामर्थ्याद्वृद्धिमदुत्तरपदं ग्रहीष्यत इत्यसति क्रियमाणमुत्तरपदग्रहणं सामर्थ्यादुत्तरपदाधिकारमवगमयति ७

२२

वृद्धिनिमित्तं यस्मिन्निति निमित्तशब्दोपादानसामर्थ्याद्व्यधिकरणपदो बहुव्रीहिराश्रीयते अन्यथा वृद्धिमत्त्वं हि तस्यैव स्याद्वृद्धिनिमित्तत्वात्ततः वृद्धिर्भवतीति तेषामेव निमित्तत्वं अथवेति निमित्तशब्दोपादानादेवाश्रितबहुव्रीहिस्सम्बन्धो वृद्धिशब्दः समस्यते वृद्धेर्निमित्तं वृद्धिनिमित्त

किं तर्हि वृद्धेर्निमित्तं यस्मिन् सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तस्येति किं च वृद्धेर्निमित्तं यो सौ ककारो णकारो ञकारो वा अथवा यः कृत्स्नाया वृद्धेर्निमित्तं कश्च कृत्स्नाया वृद्धेर्निमित्तं यस्त्रयाणामाकारैकारौकाराणां संज्ञाधिकारः संज्ञासंप्रत्ययार्थः अथ संज्ञेति प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः किं प्रयोजनं संज्ञासंप्रत्ययार्थः वृद्ध्यादीनां शब्दानां संज्ञेत्येष संप्रत्ययो यथा स्यात् इतरथा ह्यसंप्रत्ययो यथा लोके अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां संज्ञेत्येष संप्रत्ययो न स्यात् इदं चेदानीं बहु सूत्रमनर्थकं स्यात् अनर्थकमित्याह कथं यथा लोके लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते अर्थवन्ति तावत् देवदत्त गामभ्याज शुक्लां दण्डेन देवदत्त गामभ्याज कृष्णामिति ७

मिति संज्ञाधिकार इति वार्त्तिकं तस्य व्याख्यानमथ संज्ञेत्येवमिति अथशब्दः संज्ञायाः प्रस्तावद्योतनार्थः वृद्ध्यादीनामिति संप्रत्यय इति तदपेक्षया कर्मणि षष्ठी वृद्ध्यादयः संज्ञात्वेन यथा प्रतीयेरन्नित्यर्थः यथा लोक इति कात्यायनेनासंप्रत्यये लोको दृष्टान्तत्वेनोपात्तः

अपरइति॰ प्रदेशाद्वा संज्ञासंज्ञिभिव्यक्तिः संज्ञासूत्राद्वा प्रदेशार्थस्य व्यवच्छेदार्थः॰ अनाकृतिरिति॰ आकृत्यासाहचर्याद्वृद्धिर्लक्ष्यते तेनायमर्थः वृद्धिशब्द ए
कत्वात्संज्ञा आदैचां तु बहुत्वात्संज्ञित्वं ऽग्रार्थसंज्ञाकरण यथा सर्वादीनि सर्वनामानीत्यनेकस्य एकासंज्ञा क्रियते न त्वेकस्यानेका प्रयोजनाभावात्।
आकृतिमंतइति। अवरुद्धा भेदेषु पिसएवायमिति प्रत्यभिज्ञानिमित्तकं देवदत्तत्वादिकं सामान्यमस्तीत्याकृतिमंतइत्युक्तं। लिंगेनवेति॰ कलादिनाव
र्णदीर्घेणेत्यर्थः॰ नमेवोपालभ्येति॰ योहि सूत्रकारमुपालभते अगमकं तेसूत्रमिति स कथं वृत्तिकारान्प्रामाण्येनाश्रयतइत्यर्थः॰ अपरित्व
अपरेपुनः सिचिवृद्धिरित्युक्त्वा आकारैकारौकारानुदाहरंति॰ तेनमन्यामहे यत्प्रत्याय्यंते सासंज्ञा॰ येप्रतीयंते ते संज्ञिनइति॰
यदप्युच्यते क्रियमाणेपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्यइति॰ संज्ञासंज्ञिसंदेहश्च॰ संज्ञासंज्ञिनोश्चासंदेहः सि
द्धः कुतः आचार्याचारादिवउक्त आचार्याचारः॰ अनाकृतिः अथवा अनाकृतिः संज्ञा आकृतिमंतः संज्ञिनः लोकेपि
ह्याकृतिमतो मांसपिंडस्य देवदत्तइति संज्ञा क्रियते॰ लिंगेनवा॰ अथवा किंचिल्लिंगमासज्य वक्ष्यामि इत्थंलिंगा संज्ञेति॰
वृद्धिशब्देच तल्लिंगं करिष्यते॰ नादेच्छदे। इदं तावदयुक्तं॰ यत्तावदुच्यते आचार्याचारादिति॰ किमत्रायुक्तं॰ तमेवोपाल
भ्यागमकं ते सूत्रमिति तस्यैव पुनः प्रमाणीकरणमेत्येतदयुक्तं॰ अपरितुष्यन्नल्पविभवानवेन परिहारेणानाकृतिलिं
गेनवेत्याह॰ नचापि वक्तव्यं॰ यद्यप्येतदुच्यते॥ अथवेतर्हि द्वित्संज्ञा न वक्तव्या। लोपश्च न वक्तव्यः। संज्ञालिंगमनुबं
धेषु करिष्यते॰ नच संज्ञाया निवृत्तिरुच्यते॰ स्वभावतः संज्ञासंज्ञिनं प्रत्याय्य निवर्तते तेनानुबंधानामपि निवृत्तिर्भवि
ष्यति॰ सिध्यत्येवं अपाणिनीयंतुभवति॰ यथान्यासमेवास्तु। ननु चोक्तं संज्ञाधिकारः संज्ञासंप्रत्ययार्थ इतरथाह्यसंप्र
त्ययो यथा लोकइति॰ न यथा लोके तथा व्याकरणे॥ ७ ॥
त्ययइति॰ तथापि परिहारांतरं युक्तता आचार्याचारो न प्रमाणत्वेनाश्रितइत्यर्थः॰ नचापीति॰ लिंगेन वेत्येतदुक्तव्यमित्यर्थः॰ अनाकृतिः संज्ञेत्येत
दुन्यायसिद्धत्वान्न वक्तव्यं॰ अथवेतर्हीति॰ एवं सतीत्यर्थः॰ उकारादिष्वनुबंधेषु कलादिकमासंज्ञ्यते॰ ततश्चैतेषां संज्ञात्वे सति ङादात्मनेपद
मिति करिष्यते॰ संज्ञाश्च संज्ञिनं प्रत्याय्य स्वयं निवर्ततइति इत्संज्ञा लोपश्च न वक्तव्यो भवतइत्यर्थः॰॥ ७ ॥

भा॰ कै॰
२२

भाष्यकारस्तु वाक्याध्याहारेणानर्थकं चेल्लोकं दृष्टांतत्वेन योजयति॰ बहुसूत्रमिति॰ बहुव्रीहिः प्रकरणं वान्यपदार्थः समाहारे द्विगु
र्वा॰ अर्थवंतिन्वेति॰ यथा लोकेर्थवंति प्रयुंक्ते एवमनर्थकान्यपीत्यर्थः॰ यावच्चाप्तत्वमाचार्यस्य न साधितं तावत्सूत्रानर्थकत्वशंकाड्ड

अनर्थकानि दशदाडिमानि षडपूपाः कुंडमजाजिनं पललपिंडः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता
प्रतिशीनइति॰ संज्ञासंज्ञ्यसंदेहश्च॰ क्रियमाणेपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्यः कुतो
ह्येतत् वृद्धिशब्दः संज्ञा आदैचः संज्ञिनइति॰ न पुनरादैचः संज्ञा वृद्धिशब्दः संज्ञीति यत्तावदुच्यते संज्ञा
धिकारः कर्तव्यः संज्ञासंप्रत्ययार्थइति न कर्तव्यः आचार्याचारात्संज्ञासिद्धिः॰ आचार्याचारात्संज्ञासि
द्धिर्भविष्यति॰ किमिदमाचार्याचारादिति आचार्याणामुपचारात् यथा लौकिकवैदिकेषु तद्यथा
लौकिकेषु वैदिकेषु कृतांतेषु लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देव
दत्तो यज्ञदत्त इति तयोरुपचारादन्येपि जानंति इयमस्य संज्ञेति वेदे याज्ञिकाः संज्ञां कुर्वंति स्फ्यो यूपश्चषालइ
ति तत्रभवतामुपचारादन्येपि जानंति इयमस्य संज्ञेति एवमिहापि॰ इहैव तावत्केचिद्व्याचक्षाणा आहुः
वृद्धिशब्दः संज्ञा आदैचः आत् ऐच् संज्ञिनइति

२२

इतिसमन्वयानवगमाद्वा दशदाडिमानीति॰ पदार्थानां समन्वयाभावात्सूत्रानर्थकत्वं आचार्याचारादिति आचार्याणां व्यवहारा
दित्यर्थः वृद्धिशब्दः संज्ञेति॰ वृद्धिशब्दस्य प्रत्यायनशक्तिर्व्याख्यानेनैव प्रकाश्यते॰ यथा देवानां वर्णानामितिवर्णत्वं॰

षष्ठीनिर्दिष्टस्येति स्थानशब्दोर्थवाची· तिष्ठत्यस्मिन्नित्यधिकरणे अधिकरणसाधनः स्थानशब्दः· न तु प्रसङ्गवाची· इतिशब्दार्थभावाद्वोबकुशङ्का· तेनात्र प्रयोजनस्य अर्थाभावादितितात्पर्यं· तथाहि षष्ठ्य
भावेपितदर्थसद्भावाकृदस्ये वस्तुन्यादेशाभावः यथानाभिन्नभवं परस्त्रीपरस्थुवेति· आगमाअपीति अत्राप्यर्थापेक्ष्यते अनागमकानामर्थ
सागमकाः प्रयोक्तव्याइत्यर्थः लिंगेनवेति देशविशेषप्रतिपत्तये टकारादिलिंगं तत्र क्रियतइत्यर्थः इदं खल्वपीति विशेषणविशेष्यभावनिरा
करणेन संज्ञापक्षं स्थापयति देवदत्तः पचतीत्यस्ति सामानाधिकरण्यं नत्वेकविभक्तिकत्वं गौरश्व इत्यस्त्येकविभक्तिकत्वं नतु सामानाधिकरण्यमि

षष्ठीनिर्दिष्टस्यादेशा उच्यंते नचात्र षष्ठीं पश्यामः आगमास्तर्हि नेस्युः वृद्धिशब्दस्यादैच आगमाः आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यं
ते लिंगेन च न चात्र षष्ठीं न च खल्वप्यागमलिंगं पश्यामः इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तिकत्वं च द्वयोश्चैतद्भवति
कयोः विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा तत्र तत्स्यात् विशेषणविशेष्ये इति तच्च न कयोर्हि प्रतीतपदार्थकयोर्लोके विशेषण

विशेष्यभावो भवति न चादैचः प्रतीतपदार्थकाः तस्मात्संज्ञासंज्ञिनावेव तत्रत्वेतावान् संदेहः कः संज्ञी का संज्ञेति स चापि क संदेहः
यत्रोभे समानाक्षरे यत्र त्वन्यतरल्लघु सा संज्ञा कुत एतत् लघ्वर्थं हि संज्ञाकरणं तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षयि
तुमर्हति किं तर्हि अनाकृतितामपि· अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः लोकेप्याकृतिमतो मांसपिंडस्य देवदत्त इति संज्ञा
क्रियते अथवा आवर्तिन्यः संज्ञा भवंति वृद्धिशब्दश्चावर्तते नादैच्छब्दः तद्यथा इतरत्रापि देवदत्तशब्द आवर्तते न मांसपिंडः·

तूभयोरुपादानं संज्ञासंज्ञिनोरप्यस्ति विशेषणविशेष्यत्वं प्रसिद्ध्यप्रसिद्धिवशात्तु भेदेनोपादानं तत्र सामानाधिकरण्यं शब्दयोरेकस्मिन्नर्थे
वृत्तिरिष्यते द्वाभ्यां शब्दाभ्यां भिन्नप्रवृत्तिनिमित्ताभ्यामेकस्याधिकरणस्याभिधेयस्य प्रतिपादनाद्विशेषणविशेष्यार्थं प्रतिपाद
नाच्च विशेषणविशेष्यत्वं· अन्ये तु नीलोत्पलमिति प्रवृत्तिनिमित्तयोर्जातिगुणयोरेकमधिकरणमाश्रय इति सामानाधिकरण्यं वि
शेषणविशेष्यभावं चार्थयोरेव मन्यंते न चादैच्छब्द इति न ह्यस्य कश्चिल्लौकिकोर्थः प्रसिद्ध इत्यर्थः आवर्तिन्य इति देवदत्तादिशब्दाहि दानादिप्र
तिपादनाय आवर्तंते·

भाष्यं॰ प्रमाणभूत इति ॥ प्रामाण्यं प्राप्त इत्यर्थः· भ्राजाभासेत्यस्याधिष्ठानादिति णिजभावपक्षे रूपं· इत्तिविषये प्रमाणशब्दः प्रामाण्ये वर्त
ते। दर्भपवित्रेति । प्रमादाभावं दर्शयति । प्राङ्मुख इति ॥ प्राच्या अभ्युदयहेतुत्वात् । महतेति । मनःप्रणिधानं दर्शयति·
एतच्च सर्वमागमाद्बोद्धव्यं । एवमानर्थक्ये परिहृते संज्ञासंप्रत्यायपक्षांतराणि प्रश्नमुखेन प्रतिक्षिपति· किमन्त इति· ५

प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म·
तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं । किं पुनरियता सूत्रेण किमतो यदशक्यं· अतः संज्ञासंज्ञिनावेव· कु
तो नु खल्वेतत्संज्ञासंज्ञिनावेवेति· न पुनः साध्वनुशासनेऽस्मिन् शास्त्रे साधुत्वमनेनाक्रियते । एतमनयोः
साधुत्वं· कथं वृधिरस्मा अविशेषेणोपदिष्टः प्रकृतिपाठे तस्मात्क्तिन् प्रत्ययः· आदैचोप्यक्षरसमाम्नाये उप
दिष्टाः प्रयोगनियमार्थं तर्हीदं स्यात्· वृद्धिशब्दात्परे । आदैचः प्रयोक्तव्या इति । नेह प्रयोगनियम आर
भ्यते· किं तर्हि संस्कृत्य संस्कृत्य पदान्युत्सृज्यंते· तेषां यथेष्टमभिसंबंधो भवति· तद्यथा· आहर पात्रं
पात्रमाहरेति· आदेशास्तर्हीमे स्युः वृद्धिशब्दस्यादैचः॥

एतमनयोरिति· आदैच्छब्दस्य द्वंद्वत्वादनयोरिति द्विवचननिर्देशः । आदैच इति· तेषां च द्वंद्वनिर्देश उपमादैच्छब्द
इत्यर्थः । प्रयोगनियमार्थमिति । आदैच वृद्धिरिति प्रयोगो मा भूदित्यर्थः । नेहेति· प्रयुज्यत इति प्रयोगः तस्य स्वतंत्रस्य पद
स्य प्रयुज्यमानस्य नियमो नाश्रयते अपि तु पदावयवस्य प्रकृतिप्रत्ययोपसर्जनागमादिरूपस्य लोके च केवल एव वृद्धिशब्दः प्रयुज्यते

ति· नतस्यानेन नियमः क्रियते लोके प्रयुज्यमानेऽपि तु मनुशासनं

सिद्धमिति नहि मृजेर्वृद्धिः परपूर्व आकारो भाव्यते किंतु मृजा उपदिष्टे मार्ष्टि इत्यादीनामसाधुत्वबुद्धिः प्राप्नोतीति तेषां साधुत्वमन्वाख्यानं क्रियते प्रत्येकमि
ति यद्यपि मिसशब्दस्तेनैतदपि व्यवतिष्ठते तथापि न्यायव्युत्पादनायोपन्यासः समुदाये मा भूदिति अन्यथा मृजेर्वृद्धिरित्यादौ समुदाय आदेशः प्रा
प्नोति समुदायावयवसन्निधौ कतात्पर्यं कस्य वचनान्तरीयकत्वमिति विचार्यते अन्यत्रेति यत्नसाध्या समुदायप्रतिपत्तिरिति यत्नाभावेन भवतीत्य
र्थः ननु सहग्रहणं नियमार्थं स्यात् समुदायस्यैव समाससंज्ञा यथा स्यात् नावयवानामिति नैतदस्ति उभयत्र तात्पर्याभावाद्युगपदुभयत्र प्रसंगाभावा
ल्लिंगत्वमेव सहग्रहणस्यान्यत्र समुदाये तात्पर्यं नास्तीत्यस्यार्थस्य उभे अभ्यस्तं सहेति अत्र सहग्रहणं वार्त्तिककारस्य कर्त्तव्यत्वेन स्थितं भाष्यकार
स्तु सहग्रहणस्यैतत्प्रयोजनं स्थापयिष्यति प्रत्यवयवं वेति अत्र वाक्यशब्देन वाक्यार्थफलमुच्यते तत्र देवदत्तादीनां भोजनात्तस्यैव तदेकरूपत्वात्प्रत्येकं

सिद्धं तु नित्यशब्दत्वात् सिद्धमेतत् कथं नित्यशब्दत्वात् नित्याः शब्दाः नित्येषु शब्देषु सतामात्वानां संज्ञा क्रियते न संज्ञया आदेशो भाव्यते यदि तर्हि नित्याः
शब्दाः किमर्थं शास्त्रं किमर्थं शास्त्रमिति चेन्निवर्त्तकत्वात्सिद्धं निवर्त्तकं शास्त्रं कथं मृजिरस्मायविशेषेणोपदिष्टः तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता
तत्रानेन निवृत्तिः क्रियते मृजेरक्ङित्सु प्रत्ययेषु मृजेः प्रसंगे मार्जिः साधुर्भवतीति प्रत्येकं वृद्धिगुणसंज्ञे भवत इत्येव कथ्यं किं प्रयोजनं समुदायमा
भूतामिति अन्यत्र सहवचनात्समुदायसंज्ञाप्रसंगः अन्यत्र सहवचनात्समुदाये वृद्धिगुणसंज्ञयोरप्रसंगः यत्रेच्छति सहभूतानां कार्यं करोति तत्र
सहग्रहणं तद्यथा सहसुपा उभे अभ्यस्तं सहेति प्रत्यवयवं च वाक्यपरिसमाप्तिः प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते तद्यथा देवदत्तयज्ञ
दत्तविष्णुमित्रा भोज्यंतामिति न चोच्यते प्रत्येकमिति प्रत्येकं च भुजिः परिसमाप्यते ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्ति
रिति तद्यथा गर्गाः शतं दण्ड्यन्तामिति अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति सत्येतस्मिन्दृष्टान्ते यदि तत्र सहग्रहणं क्रियते इहा
पि तर्हि प्रत्येकमिति वक्तव्यं अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवति इहापि नार्थः प्रत्येकमिति वचनेन.

परिसमाप्त्या संपद्यते अन्नादनादि रूपत्वात्तृप्तिफलत्वाच्च भोजनस्य नाद्यक्रिया तु समुदाये समाप्यते गीतादिक्रियासमुदायरूपत्वात्तस्याः संयोगसं
ज्ञा तु अन्वर्थत्वात्समुदाये प्रवर्त्तते वृद्धिसंज्ञा तु लक्ष्ये पृथगादेवां दर्शनान्मालादीनां चेति लिंगाच्च प्रत्येकं न वतिष्ठते गर्गा इति अत्र शतस्य ईप्सिततम
त्वात्प्राधान्यं अपादानस्थाने प्राप्ता गर्गा गुणकर्म न च गुणभेदे प्रधानस्य भेद इति शतं दण्डनं समूहे समाप्यते अर्थिनश्चेति शतस्य प्राधान्यं प्रति
पाद्यते दण्डनायां नोदनायां शतस्य प्राधान्यमतो वाक्यादवगम्यते अथ तत्रान्तरेणेति न्यायादन्वर्थत्वाच्च समाससंज्ञायाः समुदायपरिसमाप्तौ
सिद्धायां योगविभागार्थं तत्र सहग्रहणं स्थितमिति तेनान्तरेणेत्युक्तं.

अथवेति स सम्भावि वृद्धिसंज्ञिनि बुध्या विपरीतकृते शब्देन पूर्वं निर्दिष्टे हि संज्ञा प्रवर्त्तत इत्यर्थः ततश्चादेङ्गुण इत्यादावदेङादयः संज्ञिनो गुणादयः संज्ञाः इह तु मंगलार्थोऽन्य
था पाठक्रमः आर्थस्त्वन्यक्रमः अन्ये तु सिद्धिहेतवो भविष्यंतीति अष्टकं एकाल्प्रत्यय इति तु परिभाषा न संज्ञेति नास्ति व्यभिचारः अष्टकशब्देन हि प
का ककिध्यत इत्यनियमेन ग्रहणे प्राप्ते नियमः क्रियते अस्थान इति अंतरेणापि संज्ञाशब्दप्रयोगं लोकव्यवहारवदनु संज्ञासंज्ञिसंबंधः सिध्य
तीत्यर्थः मनोहत्यादिविति विधौ चायं दोषः नानुवादे वृद्धिर्यस्य स्यादौ तेन च संज्ञाविधानस्य चरितार्थत्वात् मृजेर्वृद्धिरित्यादौ वृद्धिशब्द एवादेशः प्राप्नोति

अथवा पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा कुत एतत् सतो हि कार्यिणः कार्येण भवितव्यं तद्यथा इतरत्रापि सतो मांसपिंडस्य देवदत्त
इति संज्ञा क्रियते कथं वृद्धिरादैजिति एतदेकमाचार्यस्य मंगलार्थं मृष्यतां मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं वृद्धि
हि शब्दमादितः प्रयुक्ते मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्ति आयुष्मत्पुरुषाणि च अध्येतारश्च वृद्धियुक्ता
यथा स्युरिति सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा अदेङ्गुण इति यथा दोषवान्खल्वपि संज्ञाधिकारः अष्ट
मेऽपि हि संज्ञाः क्रियन्ते तस्य परमाम्रेडितमिति तत्रापीदमनुवर्त्तिष्यते अथवा अस्थानेऽयं यत्नः क्रियते न हीदं लोकाद्भि
द्यते यदीदं लोकाद्भिद्येत ततो यत्नार्हं स्यात् तद्यथा अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशति अयं गौरिति न
चास्माया चष्टेऽयमस्य संज्ञेति भवति चास्य संप्रत्ययः तत्रैतत्स्यात् कृतस्तत्र पूर्वैरभिसंबंध इति इहापि कृतः पूर्वैरभिसंबं
धः कैः आचार्यैः तत्रैतत्स्यात् यस्मै तर्हि सप्रत्यक्षमुपदिशति तस्याकृतः अथ तस्य कृतः इहापि कृतो द्रष्टव्यः सतो वृद्ध्यादिषु
संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः सतः संज्ञिनः संज्ञाभावात्तदाश्रये संज्ञाश्रये संज्ञिनि वृद्ध्यादिष्वितरे
तराश्रयत्वादप्रसिद्धिः का इतरेतराश्रयता सतामादैचां संज्ञया भवितव्यं संज्ञया चादैचो भाव्यंते तदितरेतराश्रयं भवति इतरेतरा
श्रयाणि च कार्याणि न प्रकल्पंते तद्यथा नौर्नावि बद्धा नेतरत्राणाय भवति ननु च भोः इतरेतराश्रयाण्यपि कार्याणि दृश्यंते त
द्यथा नौः शकटं वहति शकटं च नावं वहति अन्यदपि तत्र किंचिद्भवति जलं स्थलं वा स्थले शकटं नावं वहति जले नौः शकटं वह
ति यथा तर्हि त्रिविष्टब्धकं तत्राप्यंततः सूत्रकं भवति इदं पुनरितरेतराश्रयमेव साव०

ननु च भो इति नौशकटस्य अभिमतदेशांतरप्राप्तिरितरेतराश्रयेति चोद्यं सामग्र्यंतरानुप्रवेशेनोत्तरं श्रीः

अनुदात्तादेरिति अजुपलक्षणार्था अनुदात्तश्रुतिः स्यादिति प्रश्नः उत्तरोत्तज्ग्रहणमेव कुर्यादित्यभिप्रायः व्याख्यानत इति प्रश्लेषइमित्याद्युदात्तत्वे सिद्धे
मालादीनां चेति मालाशब्दस्य घञर्थत्वादुपादानस्याकारप्रश्लेषनिर्णय इत्यर्थः इदं तर्हीति ननु भाव्यमानत्वात् आदेशोत्र ग्राहको न भविष्यतीति नै
तदस्ति नह्यत्र संज्ञाविधावादेशो भाव्यंते किं तु एङ्गिरणुत्वात् त्रिमात्रचतुर्मात्राणां ग्रहणात् संज्ञाप्रसंगात् वृद्धिगुणविधौ तेषामपि प्रसंगात् निषेधा
यतपरत्वं एवं स्थिते चोदयति यद्येअर्थस्तकारस्तेनाकारस्य संबंधाभावात् क

अनुदात्तादेरंतोदात्तात्वयदुच्यते तत्स्वरितादेः स्वरितांतात् प्राप्नोति नैष दोषः आश्रीयमाणो गुणो भेदको भवति तद्यथा शुक्लमालभेत कृ
ष्णमालभेत तत्र यः शुक्लं आलब्धव्ये कृष्णमालभते न हि तेन यथोक्तं कृतं भवति असंदेहार्थस्तर्हि तकारः ऐजित्युच्यमाने संदेहः स्यात् कि
मिमावैचावेव आहोस्विदाकारोप्यत्र निर्दिश्यते संदेहमात्रमेतद्भवति सर्वसंदेहेषु नेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहा
दलक्षणमिति वर्णग्रहणमिति व्याख्यास्यामः अन्यत्रापि ह्ययमेवंजातीयकेषु संदेहेषु वेदमुपतिष्ठते न किं चित् करोति तद्यथा
औतोम्शसोरिति इदं तर्हि प्रयोजनं आंतर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा माभूवन्निति खट्वैद्रः खट्वाउदकं ख
ट्वोपगव इति अथ क्रियमाणेपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां दकं खट्वाइषा खट्वैषा खट्वाउढा खट्वौढा खट्वा एलकारं खट्वैडु
का खट्वाओदनः खट्वौदनः खट्वा ऐतिकायनः खट्वैतिकायनः खट्वाओपगवः खट्वौपगवः त्रिमात्रचतुर्मात्रा आदेशा न भवंति तपरस्तत्कालस्ये
ति नियमात् ननु तः परो यस्मात् सोयं तपरः नेत्याह तादपि परस्तपरः यदि तादपि परस्तपरः ऋदोरप् इतीहैव स्यात् यवः स्तवः लवः पवः
त्यत्र न स्यात् नैष तकारः कस्तर्हि दकारः किमत्र दकारे प्रयोजनं अथ किं तकारे यद्यसंदेहार्थस्तकारः दकारोपि अयमुखसुखार्थस्तका

थमादित्येतत्पदमुच्यते तात्पर्येणेअर्थत्वं तकारस्योच्यते आनुषंगिकत्वाकारार्थत्वं तकारस्योच्यते ज्ञापकद्वारेण ह्याकारप्र रः दकारोपि ॥
श्लेषे विज्ञायमाने प्रतिपत्तिगौरवं भवति सति तु तकारे आकारस्वरूपप्रतीतिः स्पष्टा भवतीति तकारसहितस्याकारस्यासंदिग्धानुकार्यप्रति
पादनार्थत्वात् द्विभक्त्युत्पत्तौ सत्यामादित्येतत्पदं सिद्धम् ॥ ॥

भा कै
२५

अथ किमर्थमिति किमाकृतिपक्षे भिन्नकालनिवृत्त्यर्थमथवा व्यक्तिपक्षे गुणांतरयुक्तानां ग्रहणार्थमिति प्रश्नः आकारस्येति व्यक्तिः पदार्थो भेदकाश्च गुणा इति
दर्शने यद्गुणस्यैवोच्चारणं तद्गुणस्यैव संज्ञाप्रसंगे गुणांतरयुक्तानामपि संज्ञाप्रतिपत्यर्थं तपरत्वमित्यर्थः किं च कारणमिति अभेदका हि गुणाः मुंडेन हि कृतेन वा
ऐकुती त्वावस्थायामपि चैरोयमिति व्यपदिश्यत एवेति प्रश्नः भेदकत्वादिति सर्वगुणसंग्रहार्थं गुणग्रहणं कर्तव्यमित्यर्थः एकोयमिति उदकत्वजाति
योगात्त्वैकत्वं न विवक्षितं किं तर्हि विशिष्टभाजनस्थमेकमुदकद्रव्यं तदेव गुणांतरयोगादन्यत्वेन लोके व्यपदिश्यते उभयमिति आम्नायशब्दा नियतस्व
रा इति वेदे गुणानां भेदकत्वं लोके तूभयथा व्यवहारः गोपिंडावस्थाद्यवस्थाभेदात् क्रयविक्रयादिषु मूल्यादिभेदात् भेदेन व्यवह्रियते सप्तवायमिति प्रत्यभि

अथ किमर्थमाकारस्तपरः क्रियते आकारस्य तपरकरणं सवर्णार्थं आकारस्य तपरकरणं क्रियते किं प्रयोजनं सवर्णार्थं तपरस्तत्कालस्येति
तत्कालानां सवर्णानां ग्रहणं यथा स्यात् केषां उदात्तानुदात्तस्वरितानां किं च कारणं न स्यात् भेदकत्वात्स्वरस्य भेदका उदात्तादयः कथं पुनः
ज्ञायते भेदका उदात्तादय इति एवं हि दृश्यते लोके य उदात्ते कर्तव्ये अनुदात्तं करोति खंडिकोपाध्यायस्तस्मै चपेटां ददाति अन्यत्त्वं करोषी
ति अस्ति प्रयोजनमेतत् किं तर्हीति भेदकत्वाद्गुणस्येति वक्तव्यं किं प्रयोजनं आनुनासिक्यं नाम गुणः तद्भिन्नस्यापि ग्रहणं यथा
स्यात् किं च कारणं न स्यात् भेदकत्वाद्गुणस्य भेदका गुणाः कथं पुनर्ज्ञायते भेदका गुणा इति एवं हि दृश्यते लोके एकोयमात्मा उदकं नाम तस्य
गुणभेदादन्यत्वं भवति अन्यदिदं शीतं अन्यदिदमुष्णमिति ननु चाभेदका अपि गुणा दृश्यंते तद्यथा देवदत्तो मुंड्यपि जट्यपि शिख्य
पि स्वामाख्यां न जहाति तथा बालो युवा वृद्धः वत्सो दम्यो बलीवर्द इति उभयमिदं गुणेषूक्तं भेदका अभेदका इति किं पुनरत्र न्याय्यं अ
भेदका गुणा इत्येव न्याय्यम् कुत एतत् यदयमस्थिदधिसक्थ्यक्ष्णामनङुदात्त इति उदात्तग्रहणं करोति तज्ज्ञापयत्याचार्यो भेदका गु
णा इति यदि भेदका गुणाः स्युः उदात्तमेवोच्चारयेत् यदि त्वयं भेदका गुणाः
ज्ञानादभेदेनापीति प्रश्नः किं पुनरिति अत्रेति उदात्तमेवेति तस्मात् गुणरहितस्योच्चारणाभावान्नांतरीयकत्वादुच्चार्यमाणोपि
गुणः प्रयत्नमंतरेण न विवक्षित इत्यर्थः यद्येवं कथमन्यत्र ओमुदात्तनिपातनं करिष्यते इति यावता तत्राप्यविवक्षा प्राप्नोति नैष दोषः तत्रा
पि स्थानेंतरतम इति वचनादादेशस्य यः स्वरः प्राप्तस्तस्मिन्नुच्चारयितव्ये उदात्तोच्चारणं प्रयत्नेन विवक्षार्थं विज्ञायते एवमनुनासिकस्य प्र
यत्नाधिक्येनोच्चारणं विवक्षार्थमेव उञः ऊँ इति यथा अन्ये आकुः एकश्रुत्या सूत्राणि पठ्यंत इति किं चिदुदात्तोच्चारणं तद्विवक्षार्थमिति

२५

आपादयोपीति ऐकारोच्चारणस्याविकृतरूपश्रवणार्थत्वादिति भावः यं विधिमिति आयादेशस्य ऐकार एव निमित्तमित्यायादेशो न बाध्यते न हि ग्लायइत्येवं पाठः शक्यः कर्तुं तथा ग्लायत इत्यादि रूपासिद्धिप्रसंगात् न ध्यारव्येति निपातनादात्वं गुणवत्त्वं बाधिष्यते पररूपेणेति रूपग्रहणस्येदमेव प्रयोजनं यादृक्परस्य रूपं तादृगेव यथा स्यादिति गमेरप्ययमिति स म्यांजने ईइत्यतोन्येष्वपि दृश्यत इत्यत्र ऊं अनुवर्तमानो गमेरपि विधीयत इत्यज्ञापकं डित्वमिति व्यंजननिवृत्त्यर्थं सूत्रं स्थितं संज्ञयेति गुणवृद्ध्यनुवृत्त्यैव गुणवृद्धो रिकः सिद्धत्वात् द्वितीयं गुणवृद्धिग्रहणमाश्रित्य गुणवृद्धिशब्दव्यापारार्थं विज्ञायते तेन गुणइत्येवं यो गुणो वृद्धिरित्येवं वा

आपादयोपितर्हि न प्राप्नुवंति नैव दोषः यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते यस्य विधेर्निमित्तमेव नासौ बाध्यते गुणं च प्रत्युपदेशोनर्थकः आयादीनां पुनर्निमित्तं यदप्युच्यते जनेर्ड्वचनं ज्ञापकं न व्यंजनस्य गुणो भवतीति सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति न च जनेर्गुणेन सिध्यति कुतो ह्येतत् जनेर्गुण उच्यमानोऽकारो भविष्यति न पुनरेकारो वा स्यादोकारो वेति आंतर्यतोऽर्द्धमात्रिकस्य व्यंजनस्य मात्रिकोकारो भविष्यति एवमप्यनुनासिकः प्राप्नोति पररूपेण शुद्धो भविष्यति एवं तर्हि गमेरप्ययं डो वक्तव्यः गमेश्चैव गुण उच्यमान आंतर्यत ओकारः प्राप्नोति तस्मादिग्ग्रहणं कर्तव्यं यदीग्ग्रहणं क्रियते द्यौः पंथाः स इममिति एते पीकः प्राप्नुवंति संज्ञया विधाने नियमः संज्ञया ये विधीयंते तेषु नियमः किं वक्तव्यमेतत् न हि कथमनुच्यमानं गंस्यते गुणवृद्धिग्रहणसामर्थ्यात् कथं पुनरंतरेण गुणवृद्धिग्रहणमिको गुणवृद्धी स्यातां प्रकृतं गुणवृद्धिग्रहणमनुवर्तते क्व प्रकृतं वृद्धिरादैजदेङ्गुण इति यदि तदनुवर्तते अदेङ्गुणो वृद्धिश्चेत्यदेङां वृद्धिसंज्ञा प्राप्नोति संबंधमनुवर्तिष्यते वृद्धिरादैजदेङ्गुणः वृद्धिरादैच् तत इको गुणवृद्धी वृद्धिरिति गुणवृद्धिग्रहणमनुवर्तते आदैजदेङ्ग्रहणं निवृत्तं अथवा मंडूकगतयोधिकाराः यथा मंडूका उत्प्लुत्योत्प्लुत्य गच्छंति तद्वदधिकाराः ॥ ॥

वृद्धिरिति विज्ञायते अथवा गुणवृद्धिमात्रग्रहणे गुणवृद्ध्यधिकारादेव सिद्धे पुनर्गुणवृद्धिग्रहणं गुणवृद्धिशब्दव्यापाराश्रयणार्थं विज्ञायते अदेङामिति पूर्वसूत्रे संज्ञिसंबंधायोपात्तो यादृशो वृद्धिशब्दस्तादृश एवोत्तरत्रानुवर्तत इति अदेङामित्युक्तं तेनैतन्न चोदनीयं वृद्धिशब्दोनुवर्तमान आदैच्प्रत्यापयतीत्यादेशांगुणसंज्ञा प्राप्नोतीति संबंधमिति संबध्यत इति संबंधकर्मणि घञा नपुंसकस्याभिधेयत्वान्नपुंसकनिर्देशः अदेङ्ग्रहणसंबंधं वृद्धिग्रहणमदेङ्गुण इत्यत्रानुवर्तते तेनादेङ्नि संबध्यते इहत्वनुवृत्तमादैचं जहाति कांतारोत्तरणाय सार्थस्येव त्यागोपादाने अथवेति वृद्धिशब्दस्येह

भा० कै० २ इकोगुणवृद्धी इक्ग्रहणमिति वक्ष्यमाणज्ञापकवशादाकारादिनिरासादिक एव गुणवृद्धी भविष्यत इति प्रश्नः आत्संध्यक्षरेति आकारादीनां रूढानिलस्य निवृत्त्यर्थमित्यर्थः आकारस्यांगांत्यस्य वृद्धिविधानाभावाद्विशेषाभावाच्चाकारस्यातो लोप इति लोपविधानाच्चाकारस्य गुणप्रसंगमुदाहरति यातेति ग्लायतीति एचो द्विमात्रत्वाविशेषात्प्रयत्नाधिक्याभावादेकारोपदेशे ऐकारो गुणः स्यात् उंभितेति भकारस्यौष्ठ्यत्वादोकारो गुणः स्यात् पररूपेणेति अतो लोपस्तु न भवति आर्धधातुकोपदेशे यदकारांतं तस्य लोपविधानात् उपदेशसामर्थ्यादिति प्राप्ति

२६

इकोगुणवृद्धी इग्ग्रहणं किमर्थं इग्ग्रहणमात्संध्यक्षरव्यंजननिवृत्त्यर्थं इग्ग्रहणं क्रियते आकारनिवृत्त्यर्थं संध्यक्षरनिवृत्त्यर्थं व्यंजननिवृत्त्यर्थं च आकारनिवृत्त्यर्थं तावत् याता वाता आकारस्य गुणः प्राप्नोति इग्ग्रहणान्न भवति संध्यक्षरनिवृत्त्यर्थं ग्लायति म्लायति संध्यक्षरस्य गुणः प्राप्नोति इग्ग्रहणान्न भवति व्यंजननिवृत्त्यर्थं उंभिता उंभितं उंभितव्यं व्यंजनस्य गुणः प्राप्नोति इग्ग्रहणान्न भवति आकारनिवृत्त्यर्थेन तावन्नार्थः आचार्यप्रवृत्तिर्ज्ञापयति नाकारस्य गुणो न भवति यदयमातोनुपसर्गे क इति ककारमनुबंधं करोति कथं कृत्वा ज्ञापकं कित्करण एतत्प्रयोजनं कितीत्याकारलोपो यथा स्यात् यदि चाकारस्य गुणः स्यात्कित्करणमनर्थकं स्यात् गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्यात् गोदः कंबलद इति पश्यति त्वाचार्यः नाकारस्य गुणो भवतीति ततः ककारमनुबंधं करोति संध्यक्षरनिवृत्त्यर्थेनापि नार्थः उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो न भविष्यति व्यंजननिवृत्त्यर्थेनापि नार्थः आचार्यप्रवृत्तिर्ज्ञापयति न व्यंजनस्य गुणो भवतीति यदयं जनेर्डं शास्ति कथं कृत्वा ज्ञापकं डित्करण एतत्प्रयोजनं डितीति टिलोपो यथा स्यात् यदि व्यंजनस्य गुणः स्यात् डित्करणमनर्थकं स्यात् गुणे कृते त्रयाणामकाराणां पररूपेण सिद्धं रूपं स्यात् उपसरजो मंदुरज इति पश्यति त्वाचार्यः न व्यंजनस्य गुणो भवतीति ततो जनेर्डं शास्ति नैतानि संति ज्ञापकानि यत्तावदुच्यते नैकित्करणं ज्ञापकं आकारगुणो भवतीति उत्तरार्थमेतत्स्यात् तुंदशोकयोः परिमृजापनुदोरिति यत्तर्हि गापोष्टगिति अनन्यार्थं ककारमनुबंधं करोति यदप्युच्यते उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो न भवतीति यदि यत्संध्यक्षरस्य प्राप्नोति तत्तदुपदेशसामर्थ्याद्बाध्यते

प्रतिलाघवार्थमेकारमेवोपदिशेदित्यर्थः यदयं जनेरिति यद्येवमिदं गुणो विधीयमाणो ज्ञापकेन व्यंजनस्य निरस्तत्वादिग्ग्रहणाभावात्सर्वादेशः प्राप्नोति मिदेर्गुण इत्याश्रयणादिकारस्यैव स भविष्यतीत्यदोषः यत्तावदिति विशेषप्रतिपादनाय सकलज्ञापकाक्षेपः केचित्तु उकः टकः किलेन ज्ञापकेनाकारनिवृत्त्यर्थत्वे निराकृते यदप्युच्यत इति ज्ञापकाक्षेपो ग्रंथच्छायां न पुष्णाति तस्मात्स्वार्थेन क्रमेण सर्वज्ञापकभंगोपन्यासः कृतो यथा स

यथेकमिति · अनेकयोगव्यवहितयोरप्येकस्मिन्कार्यप्रदेशे स्वस्वनिमित्तसंनिधापितयोरंगांगिभावाद्विशेषणविशेष्यभावादेकवाक्यत्वोपपत्तिः अथनानेति · अंगस्येतीगपेक्षयावयवषष्ठ्याभिकः स्थानित्वात् द्विशेषणत्वादंगस्यानुपस्थानमलोंत्यस्येत्यस्य तत्रश्चानयोर्भिन्नविषयत्वान्नानावाक्यत्वं वृध्दिगुणावि ति · मिदादीनामनिगंतत्वादलोंत्यस्येत्येतदंगमिग्ग्रहणं न संनिपतीतितथुप्रदेशे मिग्ग्रहणं कर्तव्यं · दोषांतरमप्याह सर्वादेशप्रसंगश्चेति · अंगस्येति तत्भेदेन सर्वांगेषु व्याप्रियते तत्रेगंते चैवालोंत्यविधिरन्यत्र तु षष्ठ्या अंत्ये ऽल्यनुपसंहाराद्याताबातेति सर्वादेशो गुणः प्राप्नोति यथेवतहीति · अंग

यथैकवाक्यं तत्रेदंस्व अलोंत्यस्यविधयोभवंति इकोगुणवृध्दी अलोंत्यस्येति ततोयंत्रछेष: अथनानावाक्ये अलोंत्यस्यविधयोभवंति इकोगुणवृध्दी अंत्यस्यचानंत्यस्य चेति ततो यातदपवादः कश्चात्रविशेषः वृध्दिगुणावलोंत्यस्येति नो मिदिमृजिपुगंतलघूपधर्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं वृध्दिगुणावलोंत्यस्येति चेत् मिदिमृजिपुगंतलघूपधर्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं कर्तव्यं मिदेर्गुणः इक इति वक्तव्यं अनंत्यत्वाधिन प्राप्नो ति मृजेर्वृध्दिः इक इति वक्तव्यं अनंत्यत्वाद्धि न प्राप्नोति पुगंतलघूपधस्य गुणः इति इक एव कर्तव्यं अनंत्यत्वाधिन प्राप्नोति ऋच्छेर्लिटि गुणः इक इति वक्तव्यं अनंत्यत्वाद्धि न प्राप्नोति ऋदृशोङि गुणः इक इति वक्तव्यं अनंत्यत्वाधिन प्राप्नोति · क्षिप्रक्षुद्रयोर्गुणः इक इति वक्तव्यं अनं त्यत्वाधिन प्राप्नोति · सर्वादेशप्रसंगश्चानिगंतस्य सर्वादेशश्च गुणोनिगंतस्य प्राप्नोति याता वाता किं कारणं अलोंत्यस्येति षष्ठ्यं यमिकमुपसंक्रांता स्वमंगस्येत्यपि स्थानषष्ठी तथा दिदानीमनिगंतमंगं तत्र षष्ठ्येव नास्ति कुतो गुणः कुतः सर्वादेशः एवं तर्हि नायं दोषसमुच्चयः पूर्वपक्षोयं दोषः सूर्यैवायं च पठितः मिदिमृजिपुगंतलघूपधर्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेशप्रसं गोश्चानिगंतस्येति मिदेर्गुण इक इति वचनादस्य न अलोंत्यस्येति वचनादिको न उच्यते च गुणः स सर्वादेशः प्राप्नोति एवं सर्वत्र अस्तु तर्हि तदपवादः ॥ ॥

स्येति षष्ठ्युच्चारितैवास्य नलंनीतेति नास्या अपरं रूपमस्ती तिनास्ति सर्वादेश गुणप्रसंगः पूर्वापेक्षोयमिति · मिदादिष्विग्ग्रहणं क र्तव्यमित्यत्रैवार्थे हेतुत्वेनेदमुपात्तमित्यर्थः उच्यते चेति मिदेरिति चोदनया · ३०

३७

भा॰ कै॰
२७

अथवैकयोग इति एकोपवर्तिरध्याक्रियते वृध्दिरादैजदेङ्गुणो भवतीति एकवाक्यत्वं संपद्यते यद्यपि प्रतिपत्तिकाले भवति क्रियाभिप्रेततयाप्येककालप्रतिपत्ति रित्यादेश वृध्याद्यभिसंज्ञादेङ् संबंधागुणसंज्ञेतिनास्ति वृध्दिसंज्ञाया अदेङ्ः संबंधः · अथवान्यवचनादिति · यथाकप्रत्ययेनाण्बाध्यते असंदिग्धत्वादनव काशत्वात्तात्पर्याश्चकपि विधेः अणस्तु विपर्ययात् · इयमदेङ्गुण इत्यत्र वृध्दिग्रहणमनुवर्तते संदिह्यते किमुत्तरार्थं येतानुवर्तते · अथेहार्थापीति सावकाशा वृध्दि संज्ञा तात्पर्यं चनास्ति · गुणसंज्ञा तु तात्पर्यादसंदेहान्निरवकाशत्वाच्च वृध्दिसंबंधमदेङां बाधते · प्रत्ययसंज्ञा तु संतिविशेषेणा संयुक्ताधिकारेणैव विधीयमाना कृत्यादिसंज्ञा विषये विप्रवर्तते · अथवेति · विभाषा तितमापीयेत्यत्र हि उभाभंगयोरधान्यत्वात्तवत्रोभावोदितायां तत्र ग्रहणास्यानुवृत्तिराश्रिता अनु वर्तमानश्चरवश्यत्वाभावात् वृद्धिशाल्यादिभिर्न संबध्यते · अपितु विभाषासु त्याय त्वेनेति आदिभिरेव संबध्यते · तथेहापि वृध्दिग्रहणमदेङ्गुण इत्यत्रानु वर्तमानमपि यत्नाभावादरेङ्भिर्न संबध्यते · इह तु पुनर्गुणावृध्दिग्रहणं यत्नो भवति · अथवेति · अपेक्षालक्षणं औकिकमधिकारमाश्रयति · समुदायस्यवा पेक्षायां नास्त्येतदनंतरस्य विधिर्वा भवतीति विप्रतिषेधो वेति गुणस्येवापेक्षायुक्तेति समुदायस्य भेदाभावात् · किंपुनरिति · उभयथासंभवात् दोषदर्शना

अथवैकयोगः करिष्यते · वृध्दिरादैजदेङ्गुणाः ततइकोगुणवृध्दी इति न चैकयोगेनुवृत्तिर्भवति · अथवा अन्यवचनाच्चकाराकरणाच्च प्रकृता पवादो विज्ञायते · यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति · अन्यस्याः संज्ञायाः वचनाच्चकारस्यानुकर्षणार्थस्याकरणात्प्रकृता वाद्वृध्दिसंज्ञायागुणसंज्ञाया बाधिका भविष्यति · यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति अथवा वक्ष्यत्येतत् · अनुवर्तते च नाम वि धियोन चानुवर्तमानादेव भवंतीति किं तर्हि यत्नाद्भवंतीति · अथवा उभयं निवृत्तं तदपेक्षिष्यामहे · किंपुनरयमलोंत्यशेषः आहो स्विदलोंत्यापवादः · कथं चात्र शेषः स्यात् कथं वा तदपवादः ॥ ॥ ॥ ॥ ३१

यत्र प्रश्नः · तत्रांगस्य गुण इति षष्ठीनिर्देशाल्लिंगादलोंत्यस्येत्युपतिष्ठते गुणश्चात्यालि करोति · तत्रयदि पूर्वमिकांगं विशेष्यते इगंतस्यांगस्य गुणो भव तीति · स च यत्रालोंत्यस्येत्यस्य भवति तदा सो ऽस्य शेषो भवति · यदा त्वंगस्येति पूर्वमेवात्यमलं षष्ठी नीयते अंगात्यस्येको गुण इति पश्चादिकाल्लो ल्विशेष्यते तदा तस्यापि विशेषणत्वात् शेषो भवति · अथ वांगस्येति गुणवृध्दिविधौ न स्थानषष्ठी किं तर्हि इगपेक्षया वयवषष्ठी तदा स्थानषष्ठ्यभावादे कोंत्यस्येत्येतस्यानुपस्थानमिति तदपवादप्रसंगो भवति · अप्राप्त्यनुमानमेव हि बाधः · वचनेन प्राप्तस्य बाधायोगात् · तत्रश्चांगावयवस्य यत्र तत्रस्थि तस्येदेकोगुणवृध्दी इत्यर्थः संपद्यते · समुच्चयस्त्वसंभवान्नोपन्यस्तः · नहि युगपद्द्वे षष्ठ्यर्थौ संभवतः · स्थाने योगो यवयोगश्चेति · विकल्पोपिनस भवति · एकत्वात्षष्ठ्यर्थस्य · तस्मात्शेषतदपवादपक्षावेवाशंकितौ ॥ ॥ ॥ ॥ ३०

२७

एवमपीति· अनेनिजु: पर्यविवि पुस्वित्र लघूपधमेगंसार्वधातुकं वात्मीति जुसिचेति गुण: प्राप्नोति हि पिच्च्य रेकुरवेदे बुध्य इत्यादौ वाल घूपधत्वादनंत्यस्य गुणो परिहृत: एवंतर्हीति· परस्परानपेक्षयो: स्वस्वनिमित्तप्रयुक्तसंनिधानयो: द्वयो: परिभाषयो: प्रदेशेषु स्वस्वकार्यं प्रतिपादनं तत्र यदि कथंचिदेकस्मिन्विष येसंनिपातो भवति नैतावता परस्परापेक्षा भवतीत्यर्थ: अन्यदेवेति· अंतरशब्दो विशेषवाचीति अन्यांतरशब्दयो रविरूढ: सहप्रयोगो ऽपर्यायत्वात्· च्यन

मिति अलोंत्यपरिभाषाया: प्रयोजनाभावादत्रानुपस्थानमित्याशय: बाधक इति· कथमनेकपरिभाषोपतिष्ठते यावता ऽन्त इति स्थानी निर्दिष्ट: अत्राह:

अन्त इत्यस्यांगविशेषणतया उपयोगाद्व: स्थानित्वाभावाद्धि ग्रहणेन लिंगेन इक्परिभाषात्रोपतिष्ठत एव मेद्यतीति· इक इति वचनादिकारस्य प्राप्नो

एवमप्ययं जुसि गुणो नियत: सोनंत्यस्यापि प्राप्नोति· अनेनिजु: पर्यवेविषु रिति· एवंतर्हि नायं तच्छेष: नापि तदपवाद: अन्यदेवेदं परिभाषांतर

मसंबध्यमनया परिभाषया परिभाषांतरमिति च मत्वा कोऽशीया: पठति· नियमादिको गुणवृद्धी भवतो विप्रतिषेधेनेति· यदिनायं तच्छेष: त्या

तु तेनैव तस्यायुक्तो विप्रतिषेध: अथापि तदपवाद: उत्सर्गापवादयोरप्ययुक्तो विप्रतिषेध: तत्र नियमस्यावकाश: राज्ञ: क च राजकीयं इको गुण

वृद्धी इत्यस्यावकाश: च्यवनं चायक: लवनं लावक: इहोभयं प्राप्नोति मेद्यति मार्ष्टीति इको गुणवृद्धी इत्येतद्भवति विप्रतिषेधेन नैष युक्तो विप्र

तिषेध: विप्रतिषेधे हि परमित्युच्यते· पूर्वश्चायं योग: परो नियम: इष्टवाची परशब्द: विप्रतिषेधे परं यदिष्टं तद्भवतीति· एवमप्ययुक्तो

विप्रतिषेध: द्विकार्ययोगो हि विप्रतिषेध: न चात्रैकोद्विकार्ययुक्त: नावश्यं द्विकार्ययोग एव विप्रतिषेध: किं तर्ह्यसंभवोऽपि· सत्वा

स्यत्रासंभव: कोसावसंभव: इहतावद्वृक्षेभ्य: प्लक्षेभ्य इति एक: स्थानी द्वावादेशौ न चास्ति संभव: यदेकस्य स्थानिनो द्वावादेशौ स्यातां इद

दानीं मेद्यति मेद्यत: मेद्यंतीति द्वौ स्थानिनावेक आदेश: न चास्ति संभव: द्वयो: स्थानिनोरेक आदेश: स्यादित्येषो ऽसंभव: सत्येतस्मिन्न

संभवे युक्तो विप्रतिषेध:

ति अलोंत्यस्येति वचनादिकारस्य नैष युक्त इति· इष्टसिद्ध्यर्थ: यथोद्देशपक्षे परिभाषयो: पौर्वापर्यं न तु कार्यकालतायां द्विकार्ययोग इति· द्वाभ्यां

कार्याभ्यां योगो यस्य स्थानिन: स विप्रतिषेधविषयत्वाद्विप्रतिषेध: नावश्यमिति· द्विकार्ययोगत्वाभावे केवलोप्यसंभवो विप्रतिषेध इत्यर्थ: इह

तावदिति· दीर्घत्वं यात्रि अनंतरं विधीयते· एवं बहुत्वेऽनंतरं विधीयते एवं न संभवोऽस्ति यत् द्वयो: स्वेन निमित्तेनानंतर्यं स्यात्· इदानीमिति

निर्दिश्य एकाषष्ठी सावयवसंबंधे तदिकारस्य गुणेन भाव्यं अथ स्थानषष्ठी तदालोंत्यस्येति वचनादिकारस्य न चास्ति संभवो युगपदुभयोर्गुणस्येत्यर्थ:

भा॰कै॰

२८

इकोंतस्येति षष्ठ्यंगस्येति गम्यावयवषष्ठीति तदालोंत्यस्येत्यस्य निमित्ताभावादनुपस्थानं स्थानषष्ठी हि अस्योपस्थाने निमित्तं नतत्रांगावयवस्यांतस्या

नंत्यस्यानंत्यस्य चैको गुण: प्राप्नोतीति दोष: ह्रस्वस्य गुण इति समानन्यायत्वादेतदुक्तं· अंगस्यावयवो यो ह्रस्वस्तस्य गुण इति· न चानेकपरिभा

षोपतिष्ठते निर्दिष्टस्थानिकत्वात्· अन्ये त्वाहु: अत्रापि परिभाषोपस्थानेसति ह्रस्वेनांगं विशेष्यते ह्रस्वस्य को गुणो यथा स्यादीर्घस्य माभूदिति·

ओर्गुण इत्यत्रास्या उपस्थानमनंत्यस्याप्युकारस्य गुणार्थं· असति त्वस्या उपस्थाने गस्येति स्थानषष्ठी स्यात् अंगन्वोकारेण विशेष्येत तदुकारां

तस्यैवांगस्य गुण: स्यात् पुगंतेति· भिन्नत्यादौ गुण: सिद्ध: पुन: श्रुतिनियमार्थमिति पुगंतलघूपधस्येति तस्यादौ न प्राप्स्यतीति· नापि हे अग्निचित् इत्यादौ

इकोंतस्येति चेज्जुसि सार्वधातुकार्धधातुकह्रस्वाद्योर्गुणे घनंत्यस्य प्रतिषेध: इकोंतस्येति चेज्जुसि सार्वधातुकार्धधातुकह्रस्वाद्योर्गुणे

घनंत्यस्य प्रतिषेधो वक्तव्य: · जुसि गुण: स यथेह भवति अजुहवु रबिभयुरिति एवमनेनिजु: पर्यवेविषुरत्रापि प्राप्नोति· सार्वधा

तुकार्धधातुकयोर्गुण: स यथेह भवति कर्त्ता हर्त्ता नयति तरति· एवमीहिता ईहितुमित्यत्रापि प्राप्नोति· ह्रस्वस्य गुण: स यथेह

भवति हे अग्ने हे वायो इति एवं हे अग्निचित् हे सोमसुत् इत्यत्रापि प्राप्नोति जसि गुण: स यथेह भवति अग्नयो वायव इति एवमग्निचि

त: सोमसुत: इत्यत्रापि प्राप्नोति ऋतो ङिसर्वनामस्थानयोर्गुण: स यथेह भवति कर्त्तरि कर्त्तारौ कर्त्तार इति एवं सुकृति सुकृतौ सुकृत·

इत्यत्रापि प्राप्नोति घेर्ङिति गुण: स यथेह भवति अग्नये वायव इति एवमग्निचिते सोमसुते इत्यत्रापि प्राप्नोति· ओर्गुण: स यथेह भवति बा

भ्रव्य: मांडव्य इति एवं सुश्रुत सौश्रुत इत्यत्रापि प्राप्नोति· नैष दोष: पुगंतलघूपधग्रहणमनंत्यनियमार्थं· पुगंतलघूपधग्रहणमनंत्यनि

यमार्थं भविष्यति पुगंतलघूपधस्यैवानंत्यस्य नान्यस्यानंत्यस्येति प्रकृतस्य पुनर्नियम: स्यात् किं च प्रकृतं सार्वधातुकार्धधातुक

योरिति· तेन पूर्वोदितनियमान्नस्यात् ईहिता ईहितुं ईहितव्यमिति ह्रस्वाद्योर्गुणस्तु अनियत: सोनंत्यस्यापि प्राप्नोति· अथाप्येवं

नियम: स्यात् पुगंतलघूपधस्य सार्वधातुकार्धधातुकयोरेवेति एवमपि सार्वधातुकार्धधातुकयोर्गुणोऽनियत: सोनंत्यस्यापि

प्राप्नोति· ईहिता ईहितुं ईहितव्यमिति· अथाप्युभयतो नियम: स्यात् पुगंतलघूपधस्यैव सार्वधातुकार्धधातुकयो: सार्वधातुकार्ध

उभयनियमाश्रयणादितिभाव: ननु चभिनत्तीति दकारस्य कुप्यतीति पकारस्य यथा स्यादिति विध्यर्थमेतत्स्यात् नेत्यस्ति युक्ति: अत: पुगंत:

लघ्वी उपधा लघूपधा तत: समाहारद्वंद्वनिर्देश: इयत्यस्य गुणेन न भवितव्यं प्रकृतस्यैति एकेन वाक्येन नियमद्वयस्यालाभात् प्रकृतस्यैव गुण

स्य नियम: स्यात् पुगंतलघूपधस्यैव सार्वधातुकार्धधातुकयोरिति ननु सार्वधातुकार्धधातुकयोरेव पुगंतलघूपधस्येति· अथापीति·

अनंतस्य विधिर्वा तिर्यदिनाश्रीयेत इति भाव: अथापीति अभ्युपेत्यवादस्त्वेवोच्यते· आवृत्त्यादिन्यायाश्रयेण वा एकस्मिंस्तु वाक्ये नियमद्वयं न लभ्यते·

२८

गुणविधाविति। कश्चिन्नानिर्दिश्यत इति न त्रोव्यवहितेन संबंधः कश्चिन्निर्दिश्यत एव ओर्गुण इत्यादौ। मृजेर्वृद्धिरिति नत्राहिस्तत्रेऽभिमतस्यान्यनुपादानाद्दलो
सपरिभाषायास्तस्यैव स्यादित्यर्थः। अटोपीति। नन्वडागमात्पूर्वमेव परत्वाद्वृद्धिर्भविष्यति लक्षणस्य प्रवृत्तत्वादटि कृते पुनर्लक्षणेन न प्रवर्तिष्यते
सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनं स कोऽयथा स्यादनिकोमात्रादिति। अथ वृद्धिग्रहणं किमर्थं किं विशेषणाय वृद्धिग्रहणं चोद्यते
न पुनर्गुणग्रहणमिति यदि किंचिद्गुणग्रहणस्य प्रयोजनं अस्ति वृद्धिग्रहणस्यापि तद्भवितुमर्हति। को वा विशेषः। अयमस्ति विशेषः गुणविधौ न क्वचित्स्थानी
निर्दिश्यते तत्रावश्यं स्थानिनिर्देशार्थं गुणग्रहणं कर्तव्यं वृद्धिविधौ पुनः सर्वत्रैव स्थानी निर्दिश्यते अचो ञ्णिति अत उपधायाः तद्धितेष्वचामादेरिति अ
त उत्तरं पठति। वृद्धिग्रहणमुत्तरार्थं वृद्धिग्रहणं क्रियते किमर्थमुत्तरार्थं उत्तरार्थं क्ङिति चेति प्रतिषेधं वक्ष्यति। स वृद्धेरपि यथा स्यात् कथं चेदानीं क्ङित्प्रत्ययेषु
वृद्धेः प्रसंगः यावता ञ्णितीत्युच्यते तत्रेममर्थं। मृजेर्वृद्धिरविशेषेणोच्यते सा क्ङित्यपि प्राप्नोति मृष्टः मृष्टवानिति। एतदर्थं चापि मृज्यर्थं वृद्धिग्रहणं कर्तव्यं।
मृजेर्वृद्धिरविशेषेणोच्यते स कोऽयथा स्यादनिकोमात्रादिति। मृज्यर्थमिति चेद्योगविभागात्सिद्धं। मृज्यर्थमिति चेद्योगविभागः करिष्यते। मृजेर्वृद्धि
रचः ततो ञ्णिति ञिणिति च वृद्धिर्भवति। अच इत्येव यद्यचो वृद्धिरुच्यते। स्याद् अटोऽपि वृद्धिः प्राप्नोति। अट् चोक्तं किमुक्तं अनन्त्यविकारेऽन्त्य
सदेशस्य कार्यं भवतीति। वृद्धिप्रतिषेधानुपपत्तिस्त्विक्प्रकरणात् वृद्धेस्तु प्रतिषेधो नोपपद्यते किं कारणं इक्प्रकरणात् इग्लक्षणा
योर्गुणवृद्ध्योः प्रतिषेधः न चैषा सति मृजेरिग्लक्षणा वृद्धिर्भवति तस्मान्मृजेरिग्लक्षणा वृद्धिरेषितव्या। एवं तर्हि ह्यन्ये वैयाकरणा मृजेर
जादौ संक्रमे विभाषा वृद्धिमारभन्ते परिमृजन्ति परिमार्जन्ति परिमृजन्तु परिमार्जन्तु तत्सिद्धये तस्मिन्साध्ये योगवि
भागः करिष्यते। मृजेर्वृद्धिरचो भवति ततो क्ङिति अजादौ क्ङिति मृजेर्वृद्धिर्भवति परिमार्जन्ति परिमार्जन्तु किमर्थमिदं नियमार्थं
अजादावेव क्ङिति नान्यत्र क्वान्यत्र मा भूत् मृष्टः मृष्टवानिति। ततो वा चाचि क्ङिति। मृजेर्वृद्धिर्भवति परिमृजन्ति परिमार्जन्ति परि
मृजन्तु परिमार्जन्त्विति इहार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यं सिचि वृद्धिरविशेषेणोच्यते स कोऽयथा स्यादनिकोमात्रादिति।
कस्य पुनरनिकः प्राप्नोति अकारस्य। अचिकीर्षीत् अजिहीर्षीत् नैतदस्ति लोपोऽत्र बाधको भविष्यति अकारस्य तर्हि प्राप्नोति। २२
एवं तर्हि प्रतिषेधानर्थक्ये यावत्र चोद्यपरिहारावुक्तौ। अचिकीर्षीदिति पूर्वत्र प्रतिषेधादतो लोपो यथा चिकीर्षं करोति। २१ ७ ॥

भा॰कै॰
२९

एवमपीति। यदीदं नारभ्येत गुणवृद्धी कस्य स्यातां अलोऽन्त्यस्येति वृद्धेर्येन नाप्राप्तिन्यायेन तस्य स्यादपवादत्वात् क्ङिति प्रतिषेधानुपपत्तिरित्यर्थः एवं वृक्णोऽद्वीयमर्थो
असंबद्धपरिभाषान्तरपक्षश्च नोपपद्यते। एवं तर्हीति प्रदेशार्थत्वादनयोः परिभाषयोर्गुणत्वात्परस्परेण संबन्धाभावात्प्रदेशवाक्यपर्यालोचनया
वाक्यार्थव्यवस्थानमित्यर्थः। अथवेति। तत्रोपपत्त्यैव दोषपरिहारः क्षिप्रक्षुद्रयोरपीति अत्र योगविभागः क्रियते स्थूलादीनां यणादिपरं लुप्यते ततः पू
र्वस्य च गुण इति अत्र चस्वरितत्वात् क्षिप्रक्षुद्रावेवानुवर्तेते स्थूलादयो निवृत्ताः तेषां तु यणादिलोपे सति ओर्गुण इति गुणो भवति असिद्धवदत्राभादिति

एवमप्युक्तः द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति। अनवकाशश्चायं योगः ननु चेदानीमेवास्यावकाशः प्रक्षम्‌ः ष्य
नं चायकः लवनं लावक इति। अत्रापि नियमः प्राप्नोति नाप्राप्ते नियमे अयं योग आरभ्यते यावता चनाप्राप्ते नियमे अयं योग आरभ्यते अ
तस्तदपवादोऽयं योगो भवति उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः अथापि कथं चिदिको गुणवृद्धी इत्यस्यावकाशः स्यात् एवमपि यथे
ष्टविप्रतिषेधादिको गुणो भवति मेद्यति मेद्यतः मेद्यन्ति एवं मिदापि स्यात्। अनेनिजुः पर्यवेविषुरिति। एवं तर्हि वृद्धिर्भवति गुणोऽभ
वतीति यत्र ब्रूयादिकः स्थाने तत्रोपस्थितं द्रष्टव्यं किं कृतं भवति द्वितीया षष्ठी प्रादुर्भविष्यते तत्र कामचारः गृह्यमाणेन वा इकं विशेषयि
तुं इकं वा गृह्यमाणं यावता कामचारः इह तावन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु गृह्यमाणेन इकं विशेषयिष्यामः ए
तेषां य इगिति। इहेदानीं जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणोऽधिकारे गृह्यमाणं विशेषयिष्यामः एतेषां गुणो भवति इकः इगन्तानां
मिति अथवा सर्वत्रैवात्र स्थानी निर्दिश्यते इह तावन्मिदेरिति विभक्तिको निर्देशः। मिद एः मिदेः मिदेरिति। अथवा षष्ठीसमासो भ
विष्यति मिद इः मिदिः मिदेरिति पुगन्तलघूपधस्येति नैवं विज्ञायते पुगन्तस्याङ्गस्य लघूपधस्य चेति। कथं तर्हि पुकि अतः
पुगन्तः लघ्वी उपधा लघूपधा पुगन्तश्च लघूपधा च पुगन्तलघूपधं पुगन्तलघूपधस्येति अवश्यं चैतदेवं विज्ञेयं अङ्गविशेषणे
हि सति इह प्रसज्येत भिनत्ति छिनत्तीति। ऋच्छेरपि प्रश्लिष्टनिर्देशोऽयं ऋ ऋ ति ऋ ऋ ऋतां ऋच्छत्यॄतामिति। दृशेरपि योगविभागः
करिष्यते उरङ्गुणः उः ओङि गुणो भवति। ततो दृशेः दृशेश्चाङि गुणो भवति। उरित्येव क्षिप्रक्षुद्रयोरपि यणादिपरं गुण इति यत्तावत्सिद्ध
सिद्धत्वमनित्यत्वान्न भवति तत्र क्षिप्रक्षुद्रयोर्यणमादिः पकारादकारश्च तस्माद्यणादेः परं लुप्यते तस्माद्यणादेः पूर्वस्य च गुण इति सिद्धे पिच
क्षुद्रयोरिति यणादिपरमिति पञ्चमीसमासः यदि तर्हि पुगन्तलघूपधस्येति स्थानी निर्दिश्यते तच्छेषपक्षाश्रयणाच्चानेकपरिभाषानोपपत्ति
पूते तदास्य गुणस्यानिग्लक्षणत्वात् क्ङिन्नमित्यादौ क्ङिति चेति गुणप्रतिषेधो न प्राप्नोति यथा लैङ्गवायन इति नैष दोषः कुसनो क्ङिलविधाना

मार्गपेक्षाद्गुणपरिभाषयोरपि प्रयोजनं पर्याप्ति २९

अस्तीत्याहेति · नांतःपादमव्यपरइतिपाठमाश्रित्यैतदुक्तं यद्येवं कृष्णाश्वस्तत्रनास्तीत्यनेनपूर्वसवर्णदीर्घेनिषिद्धे एङःपदान्तादतिप्रतिषेधप्रसंगः नैषदोषः संघोत्प
त्त्यादिज्ञापकादनंतरस्यैवनादिनिवृत्ति प्रतिषेधात् अंतरंगत्वादिति · उवङादेशःसिचमेवापेक्षते बहिरंगत्वाद्वृद्धिस्तु सिच्यरस्मैपदेषु प्रतीक्षत इति · लोपाव्यवली
तिभावः किमत्रप्रमाणमितिवेदमियुक्तस्मरणमेव णिश्रिभ्यामिति · णिश्रिग्रहणमकृत्वा ओर्भवी प्रतिषेधार्थं कर्तव्यो एवं सतिगोरवाभावः

अस्तीत्याह सुजातेअश्वसूनृते अध्वर्यो अद्रिभिःसुतं शुक्रंतेअन्यदिति पूर्वरूपत्वेप्रतिषिद्धे अयाद्ययोपिनभवंति उत्तरार्थमेवतर्हि सिजर्थं
वृद्धिग्रहणंकर्तव्यं सिचिवृद्धिरविशेषेणोच्यते साकृतिमाश्रित् न्यनुवीत् न्यधुवीत् नैतदस्ति प्रयोजनं अंतरंगत्वादत्रोवङादेशेकृते
अनंत्यत्वाद्वृद्धिर्नभविष्यति · यदितर्हि सिच्यंतरंगंभवति अकार्षीत् अहार्षीत् गुणेकृतेरपरत्वेचानंत्यत्वाद्वृद्धिर्नप्राप्नोति मान्भूदेवं
लंतस्यैवंभविष्यति इहतर्हि न्यस्तारीत् न्यदारीत् गुणेरपरत्वेचानंत्यत्वाद्वृद्धिर्नप्राप्नोति हलंतलक्षणायाश्चनेटीतिप्रतिषेधः मा
भूदेवं ल्रांतस्यैवंभविष्यति · इहतर्हि अलावीत् अयावीत् गुणेकृतेअवादेशेचानंत्यत्वाद्वृद्धिर्नप्राप्नोति · हलंतलक्षणायाश्चनेटीति
प्रतिषेधः माभूदेवं ल्रांतस्यैवंभविष्यति ल्रांतस्येत्युच्यते नचेदंल्रांतं ल्रांतस्येत्यत्रवकारोपिनिर्दिश्यते किंवकारोनश्रूयते लुप्त
निर्दिष्टोवकारः यद्येवमाभवानवीत् माभवान्मवीत् अत्रापिप्राप्नोति अविमव्योर्नेतिवक्ष्यामि तद्वक्तव्यं नवक्तव्यं णिश्रिभ्यांतौनिमा
तव्यौ यद्यप्येतदुच्यते अथवैतर्हि णिश्र्योःप्रतिषेधोनवक्तव्योभवति गुणेकृतेअयादेशेचयांतानां नेत्येवप्रतिषेधोभविष्यति · एवंतर्ह्याचा
र्यप्रवृत्तिर्ज्ञापयति नसिच्यंतरंगंभवतीति · यदयमतोहलादेर्लघोरिति अकारग्रहणंकरोति कथंकृत्वाज्ञापकं अकारग्रहणस्यैतत्प्रयोजनं
इहमाभूत् अकोषीत् अमोषीत् यदिसिच्यंतरंगंस्यात् अकारग्रहणमनर्थकंस्यात् गुणेकृतेअलघुत्वाद्वृद्धिर्नभविष्यति · पश्य
तित्वाचार्यः नसिच्यंतरंगंभवतीति ततोकारग्रहणंकरोति नैतदस्तिज्ञापकं अस्त्यन्यदेतस्यवचनेप्रयोजनं किं यत्रगुणःप्रति
षिध्यते तदर्थमेतत्स्यात् न्यकुटीत् न्यपुटीदिति यत्तर्हिणिश्र्योःप्रतिषेधंशास्ति तेनननेहांतरंगमस्तीतिदर्शयति यत्त्वकरोत्यका
रस्यग्रहणंलघोरितिकृतेपि तस्मादिग्लक्षणावृद्धिःतस्मादिग्लक्षणावृद्धिरास्थेया ·
निमातव्याविति मेङोरूपं परिवर्तनीयाविस्यर्थः नसिचीति न्यायाद्यंतेतासिध्यति · येननाप्राप्तिन्यायेनांतरंगस्यद्वध्यावाधनात्प्रयो
जनंचास्ति चिरिजिर्योर्वद्धिगंतानांन्वनयत्यादीनांअनिरायीत्अननायीत्अववायीदित्यादौवृद्धिसिद्धिः अन्यथागुणायादेशयोःकृतयोर्वा
तत्वाद्वृद्धिप्रतिषेधःस्यात्

भा·कै·

अयासीदिति · परत्वादत्रसगिटोःकृतयोरनंत्यत्वादाकारस्यनास्तिवृद्धिप्रसंगइति यद्यपिपरिहारोस्तितथापिविशेषाभावेनपरिहृतत्वान्नाश्रयमाश्रितः
उदवोढामिति · ढलोपादीनामसिद्धत्वात्पूर्वहलंतलक्षणावृद्धिःततो ढलोपादिषुकृतेषु रलोपस्यासिद्धत्वादोकारस्यनभविष्यति गोशब्दादाचारक्विपि
अगवीदिति संध्यक्षरमंत्यमस्ति तस्यकस्माद्वृद्धिर्नभवति · उच्यते सिचिवृद्धिरित्यत्रधातुग्रहणमनुवर्ततेसिनताओपदेशिकधातुप्रतिपत्यर्थमनुवर्तते

अयासीत् अवासीत् नास्त्यत्रविशेषः सत्यांवृद्धावसत्यांवासंध्यक्षरस्यतर्हिप्राप्नोति नैवसंध्यक्षरमंत्यमस्ति ननुचेदमस्ति
ढलोपेकृते उदवोढाम् उदवोढं उदवोढेति नैतदस्ति असिद्धोढलोपस्तथासिद्धत्वान्नैतदंत्यंभवति व्यंजनस्यतर्हिप्राप्नोति अभैत्सीत् अ
छैत्सीत् हलंतलक्षणावृद्धिर्बाधिकाभविष्यति यत्रतर्हिसाप्रतिषिध्यते नेटीति अकोषीत् अमोषीत् सिचिवृद्धेरत्रैषःप्रतिषेधःकथं
लक्षणंहिनाभधनतिभ्रमति मुहूर्तमपिनावतिष्ठते अथवासिचिवृद्धिःपरस्मैपदेष्विति सिचिवृद्धिःप्राप्नोति तस्याहलंतलक्ष
णावृद्धिर्बाधिका तस्याअपिनेटीतिप्रतिषेधः अस्तिपुनःक्वचिदन्यत्रापिअपवादेप्रतिषिद्धेउत्सर्गोपिनभवति ॥ ॥

इत्यदोषः लक्षणंहीति नेटीतिलक्षणमविशेषेणवृद्धिमात्रस्यनिषेधंकथयतीतिधनतीत्युच्यते योह्यव्यक्तंकथयतिसधनतीत्युच्यते एव
मिहाप्यस्याएववृद्धेर्निषेधइतिनास्तिव्यक्तिःस्यादेतत् एकनिषेधेनचरितार्थत्वात्पुनःप्रतिषेध्यांतरे प्रवृत्तिर्नस्यादित्याह भ्रमतीतिसर्व
त्रव्याप्रियतइत्यर्थः स्यादेतत् यावदेकनिषेध्येस्यव्यापारस्तावदेवद्वितीयोविधिःप्रवृत्तःप्रवृत्तस्यचनिषेधोऽशक्यःकर्तुमित्याह मुहूर्तमि
ति उभयत्रापिव्यापारान्नैकत्रविश्राम्यतीत्यर्थः तस्याअपीति अपिशब्दात्सिचिवृद्धेरपि ॥ ॥ ७ श्रीः ॥ ॥

धा

श्री: नधातुलोपइति गुणवृध्योः प्राप्तौ न्यायत्वं निषेधोन तु लक्षणभावादिकं परिभाषायाः दीधीवेवीटामिति वा संबंधं परिभाषा निषेधस्यात् कृतस्य धातो लोपे गुणवृद्धि प्रसंगाभावादनर्थकोनिषेधः स्यादिति तत्सामर्थ्याद्धात्वेकदेशलोपोत्र धातुलोपोभिमतः अवयववत्क्रिययापि समुदायव्यपदेशदर्शनाद्यथापटोदग्धइति अथवासमुदायशब्दोऽवयवेनद्रूपारोपादवर्तते धातुग्रहणमिति उपसर्जनस्यापि यथापराम र्शस्तथा केषांशब्दानामित्यत्र प्रतिपादितं विनापि धातुग्रहणेन लोपविशेषणमार्धधातुकग्रहणं विज्ञास्यते अनुबंधलोपस्य चानेमित्ति कत्वात्लुविते ति गुणप्रतिषेधो नभविष्यतीति प्रश्नः सिद्धांते तु गुणवृद्धिविशेषणमार्धधातुकग्रहणं इत्यभिप्रायः अनुबंधोन धात्वेकदेशः य स्मादुपदेशएवेत्संज्ञा प्रयोगे तु लूशब्दएव धातुसंज्ञः केवलमसौ जित्कार्यं लभते लूशब्दस्यैव हि क्रियावाचित्वमिति तस्यैव युक्ता धातुसंज्ञा रेरवी

श्री: नधातुलोपआर्धधातुके धातुग्रहणं किमर्थं इहमाभूत् लूञ्लवितालवितुं पूञ्पवितापवितुं आर्धधातुकइति किमर्थं त्रिधा बद्धोवृषभोरोरवीति किंपुनरिदमार्धधातुकग्रहणं लोपविशेषणंआर्धधातुकनिमित्ते लोपेसति येगुणवृद्धी प्राप्नुतस्ते न भवतइति आ होस्विद्गुणवृद्धिविशेषणमार्धधातुकग्रहणंधातुलोपेसत्यार्धधातुकनिमित्ते येगुणवृद्धी प्राप्नुतस्तेनभवतइति किंचातः यदि लोपवि शेषणं उपेद्यः प्रेद्यः अत्रापि प्राप्नोति अथ गुणवृद्धिविशेषणं क्नोपयति अत्रापि प्राप्नोति मेथ कसिलथास्तु अस्तु लोपविशेषणं कथमुपेद्यः प्रेद्यइति बहिरंगोगुणोंतरंगः प्रतिषेधः असिद्धंबहिरंगमंतरंगे यद्येवंनार्धधातुग्रहणेन रुक्कस्मान्नभवति लूञ् लवितालवितुं लवितव्यमिति आर्धधातुकनिमित्ते लोपे प्रतिषेधः नचैष आर्धधातुकनिमित्तो लोपः

तीति सत्यार्धधातुकग्रहणे शब्दवलादन्यपदार्थस्य बहुव्रीहिरसंदिग्धोभवति नान्यथा क्रमेण सूत्रप्रत्याख्यानायार्धधातुकस्य च लोपवि शेषणत्वे धातुग्रहणानर्थक्यप्रतिपादनाय प्रत्युदाहरणोपन्यासः किंपुनरिति आर्धधातुकग्रहणं लोपविशेषणं वा गुणवृद्धिविशेषणं वा बहुव्रीहिपक्षे उभयविशेषणं वेति पक्षत्रयसंभवात्प्रश्नः प्रेद्यइति नन्वाद्गुणो निग्लक्षणइति तन्निषेधो न भविष्यति परिहारांतराभिधानादे तन्नाश्रितमित्यदोषः बहिरंगइति यादापूर्वप्रत्ययः पश्चादुपसर्गयोगस्तदाप्रतिषेधोंतरंगः गुणोबहिरंगः यदातुपूर्वमुपसर्गयोगस्तदागुणोंत रंगः पश्चात्प्रत्ययोत्पत्तौ निषेधो बहिरंगः सर्वथा बहिरंगस्यासिद्धत्वादिष्टसिद्धिः ननुनाजानंतर्यइति निषेधात्कथमंतरंगपरिभाषाप्रवृत्तिः य त्रकार्यविधावानंतर्येणाश्रयणं तत्र निषेधात्तु परत्वात् परिभाषायाः यथाक्षद्युरिति तत्र हीकोयणचीति वचनादिग्घोराश्रयणं अस्मिं स्तु प्रतिषेधसत्त्वे नास्त्यचोराश्रयणमित्यदोषः

भा॰

३९

षष्ठ्याइति स्वतंत्रमिदं गुणवृध्योर्विधायकमिति पूर्वःपक्षः अन्यतरार्थमिति नन्वनिकोपि यथा स्यादिति विध्यर्थं स्यान्न तु नियमार्थं नियमाद्धि पूर्वविप्रतिषेधे बलीयस्त्वात् एवंमन्यते द्वितीय गुणवृद्धिग्रहणमनुवर्तते तेन गुणवृद्धि प्रदेशेष्वपि कइत्यस्योपस्थानान्नात्यन्तिकः प्रसंगः प्रसारणेवेति तुल्यन्यायत्वादुपन्यासः इग्यणइत्यत्र यणइति स्थानषष्ठी तेन यणः स्थाने इग्भवतीति सन्देहप्रसारणसंज्ञेतिवाक्यार्थः स्यात् वाक्यभेदेन च कार्यद्वयं विधीयते कर्त्तृहृदइति अंतरतमस्याभावात् सर्वपर्यायेणाणः प्राप्नुवंति सिद्धमिति स्वातंत्र्यमेषां निवर्तयति तेन यत्र षष्ठी तत्रैषामुपस्थानं अंगस्येत्यादीनां न तद्धातोर स्यादौ इमावपीति स्वरितत्वादनयोरंतराले वर्णाभिधायोग्यत्वात्संबंधाभावः अथवेति षष्ठीस्थानेयोगेत्यत्र योगविभागः करिष्यते षष्ठीति य

षष्ठ्याः स्थानेयोगत्वादिग्लक्षणेति षष्ठ्याः स्थानेयोगत्वात्सर्वप्रतिपादिकां निवृत्तिः प्राप्नोति अस्यापि प्राप्नोति दधिमधु पुनर्वचनमिदानीं किमर्थं स्यात् अन्यतरार्थं पुनर्वचनं अन्यतरार्थमेतत्स्यात् सार्वधातुकार्धधातुकयोर्गुणएवेति प्रसारणेव प्रसारणे वसरयणां निवृत्तिः प्राप्नोति अस्यापि प्राप्नोति याता वाता पुनर्वचनमिदानीं किमर्थं स्यात् विपुवार्थं पुनर्वचनं विषयार्थमेतत्स्यात् वनि स्वपि यकादीनां कृत्स्वेवेति उरण्परस्तु उरण्परएव सर्वेषामकाराणां निवृत्तिः प्राप्नोति कर्तृ हर्तृ सिद्धं तु षष्ठ्यधिकारे वचनात् सिद्धमेतत् कथं षष्ठ्यधिकारे इमे योगाः कर्त व्याः एकस्तावत् क्रियते तत्रैव इमावपि योगौ षष्ठ्यधिकारमनुवर्तिष्यते अथवा षष्ठ्यधिकारे इमौ योगावपेक्षिष्यामहे अथ वा इकस्तावद्यं षष्ठ्यः सार्वधातुकार्धधातुकयोर्गुणोभवतीति इक स्थाने भवति याता वाता इकस्तत्रापेक्षिष्यते इकोगुणवृद्धीइति यथैव तर्हि इकस्तत्रापेक्ष्यते एवमिहापि तदपेक्षिष्यामहे सार्वधातुकार्धधातुकयोरिकोगुणवृद्धीइति श्री इतिश्रीमद्भगवत्

पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे तृतीयमाह्निकम् श्रीशिवो

अथवेति अन्यतरा देतदुक्तं तत्र यत्र षष्ठी तत्रोपतिष्ठते इत्यर्थः तत्र योग्यत्वादनयोरेवापेक्षा नान्येषां ततः स्थानेयोगेति षष्ठ्येतदुपतिष्ठते अन्यथा यता धं पुनरिति वदता अवश्यमेव संबंधः कर्तव्यः यत्र गुणवृद्धिशब्दोच्चारणेन गुणवृद्धी विधीयेते तत्रैवेक्परिभाषोपतिष्ठतइति एकवाक्यत्वं यथा पेक्षा तु तेनेक वातेस्यादिविध्यर्थत्वं संभवति कथमन्यतरार्थं पुनर्वचनमिति उच्यते अवश्यकर्तव्यायां वापेक्षायामेकवाक्यत्वं यथा पेक्षा तु तेनेकस्य यत्वास्यार्थो न तु वाक्यभेदेन स्वातंत्र्यं पारतंत्र्यं वा तदपेक्षिष्यामहे इति अस्य स्वातंत्र्यं निरसितुं मिसर्यः इति प्रथमस्य प्रथमे तृतीयमाह्निकम्

३९

दृहिरिति दृहदृहिदृहद्वादिति पाठात् मेघतद्रोत गुणाभावोलोपश्चार्द्धधातुकनिमित्त इति पक्षद्वयेपि दोषः अपवादविषयपरिहारेणोत्सर्गापि गुणोत्रन प्रवर्त्त
तत्युपन्यासः कथंतर्हीति बहुव्रीहिः सत्यार्धधातुकनिमित्तलोपस्य गुणवृद्ध्योराश्रितमिति मेघतइत्यादाभिन्ननिमित्तत्वाद्गुणो न निषिध्यते यत्रहलयोरि
ति दुकाहुक्लोपइ लुप्यतइत्याशयः अत्रापीति हृते यकारलोपएकदेशविकृतमनन्यवदिति यकारः प्रत्ययसंज्ञाभवत्येवेति भावः निपातलुगिति लुक्
कथमुपबर्हणं बृहिः प्रकृत्यंतरं कथं ज्ञायते बृहिः प्रकृत्यंतरमिति अचीति हिलोपकरिष्यते अनजादावपि दृश्यते निवृह्यते अनिदान्युरुते इजादावपि
दृश्यते निबर्हिता निबर्हितुमिति अनजादावपि न दृश्यते बृंहयति बृंहकः तस्मान्नाथः परिगणनेन यदि परिगणनं नक्रियते अपि तच्छपत अत्रापि न प्राप्नो
ति न षदोषः धातुलोपइति नैवं विज्ञायते धातोर्लोपोधातुलोपः धातुलोपइति कथं तर्हि धातोर्लोपो यस्मिन् तदिदं धातुलोपइति तस्मादिग्लक्षणाद्वृद्धि
यदि तत्रइग्लक्षणयोर्गुणवृध्योः प्रतिषेधः पापचकः पापठकः मगधकः दृषदकः अत्रनप्राप्नोति अतोलोपस्यस्थानिवत्वात् अकारलोपेकृते तस्य स्था
निवत्वाद्गुणवृद्धी न भविष्यतः अनारंभोवा अनारंभोवा पुनरस्य योगस्य न्याय्यः कथं बभिदिता मरीमृजकः कुषुभितामगधिताइति अत्रा
यकारलोपेकृते तस्य स्थानिवद्भावाद्गुणवृद्धी न भविष्यतः यत्रतर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः क्वस्थानिवद्भावो नास्ति
यत्रहलचोरादेशः लोलुवः पोपुवः मरीमृजः सरीसृपइति अत्राप्यकारलोपेकृते तस्य स्थानिवद्भावाद्गुणवृद्धी न भविष्यतः लुकिकृते न प्राप्नो
ति इदमिह संप्रधार्यं लुक्क्रियतामल्लोपइति किमत्रकर्तव्यं परत्वादल्लोपः नित्योलुक् कृतेप्यल्लोपे प्राप्नोत्यकृतेपि प्राप्नोति लुगप्यनित्यः
कथमन्यस्यकृतेल्लोपे प्राप्नोत्यन्यस्याकृते शब्दांतरस्य च प्राप्नुवन् विधिरनित्यो भवति अनवकाशस्तर्हि लुक् सावकाशोलुक् कोवकाशः
अवशिष्टः अथापि कथंचिदनवकाशोलुक् स्यात् एवमपि न दोषः अलुप्ययोगविभागः करिष्यते अतोलोपः ततो यस्य यस्य च लोपो भव
ति अतइत्येव किमर्थमिदं लुकं वक्ष्यति तद्बाधनार्थं ततो हलः हलउत्तरस्य यस्य लोपो भवतीति इदानीं तर्हि परत्वाद्योगविभागाद्
शास्त्रप्रवृत्तिर्नित्या अनवकाशादिति नाप्राप्तेल्लोपे लुगारभ्यते सावकाशइ॥ लोपोलुकं बाधते कृष्णोनोनावकृष्णवायदीदं नोनूयते नोनाव॥
ति भिन्नविषयौ लुल्लोपौ अकारस्य लोपो यकारस्य लुक् न तथ्य नास्ति यन न बाधाभिन्याय इत्यर्थः अथापीति यङो विवक्षित्वाद्यकाराकारसमु
दायस्य यङ् इति निर्दिष्टस्य विवक्षितत्वात् अवयवे न यङ् व्यपदेशस्य गौणत्वादिति भावः ॥ ॥ ॥

भा॰ कै॰ प्र॰

३१

यङ् यक्क्यच्वलोपइति वदरत्राकारोविवक्षितः तेन धातुपाठयोः कारांतः पठितस्यग्रहणं अन्यथा स्त्रिविः कथं निवार्यते बभिदिते
ति भाषायाः शब्दाः च यस्य हलइति यलोपः मरीमृजइति यलोपि चेति यङ्लुक् कुषुभमगधशब्दौ कंड्वादिगणपाठेनैधातू ताभ्यां यक् ण्वुल् लच्चोय
स्य हलइति यलोपः समिधदृषच्छब्दाभ्यां क्यच् ततोन्यप्रत्ययाण्वुल् न वा क्यस्य विभाषेति यलोपः नुम्लोपेति नुमितिनकारस्य पूर्वाचार्यसं
ज्ञा उपबर्हणमिति वृहिवृद्धावित्यस्मान्नुम् दृंहेरप्यनिदितिवार्तिकेननलोपः आस्त्रेमाणमिति अस्त्रेमाणमित्यपिवेदे पठ्यते तत्रन अपूर्वात्

अथवापुनरस्तु गुणवृद्धिविशेषणं ननु चोक्तं क्नोपयतीत्यत्रापि प्राप्नोतीति नैषदोषः निपातनात्सिद्धं किं निपातनं चेलेक्नोपेरिति
परिगणनं कर्तव्यं यङ्यक्क्यच्वलोपेप्रतिषेधः यङ्यक्क्यच्वलोपप्रतिषेधोवक्तव्यः यङ् बभिदिता मरीमृजः यक् कुषुभिता मगध
कः क्यसमिधिता दृषदकः वलोपेजीरदानुः किंप्रयोजनं नुम्लोपस्त्रिव्यनुबंधलोपेः प्रतिषेधार्थं नुम्लोपेस्त्रिव्यनुबंधलोपेच प्रति
षेधोमाभूदिति नुम्लोपे अभाजिरामः उपबर्हणं स्त्रिविः आस्त्रेमाणं अनुबंधलोपे लूञ् लविता लवितुं यदि परिगणनं क्रियते स्य
दः प्रश्रथः हिमश्रथइत्यत्रापि प्राप्नोति वक्ष्यत्येतत् निपातनात्स्यदादिष्विति न तर्हि परिगणनं कर्तव्यं न कर्तव्यं नुम्लोपे कस्मान्न
भवति इक्प्रकरणान्नुम्लोपे वृद्धिः इग्लक्षणयोर्गुणवृध्योः प्रतिषेधः नचैषेग्लक्षणा वृद्धिः यदीग्लक्षणयोर्गुणवृध्योः
प्रतिषेधः स्यदः प्रश्रथः हिमश्रथइत्यत्र न प्राप्नोति इहचप्राप्नोति अवोदः एधः ओप्रइति निपातनात्स्यदादिषु निपातना
त्स्यदादिषु प्रतिषेधो भविष्यति न भविष्यतीति च यदीग्लक्षणयोर्गुणवृध्योः प्रतिषेधः स्त्रिव्यनुबंधलोपेकथं स्त्रिविः आस्त्रे
माणं लूञ् लविता प्रत्ययाश्रयत्वादन्यत्र सिद्धं आर्धधातुकनिमित्तेलोपेप्रतिषेधः नचैषआर्धधातुकनिमित्तोलोपः य
द्यार्धधातुकनिमित्तेलोपेप्रतिषेधः जीरदानुरत्र न प्राप्नोति रक्िज्यः संप्रसारणं नेत ज्रीवेरूपं रकितज्यः संप्रसारणं भवति
यावताचेदानीं रक्िजीवेरपि सिद्धं भवति

स्त्रिवेर्मनिन्प्रत्ययः ऊठादेशः छांदसत्वाद्ध्रस्वनभवति परिगणने सति धातुग्रहणं न कर्तव्यं भवतीति अनुबंधलोपः प्रयोजनत्वेन पठितः
इक्प्रकरणादिति तेनयत्रेक्परिभाषास्थान्यंतरनिवृत्त्यर्थं या प्रियते तत्रायं निषेध इत्यर्थः प्रत्ययाश्रयत्वादिति लोपविशेषणमार्धधा
तुकग्रहणमित्यर्थः जीरदानुरिति वर्णनिमित्तोवलोपोत्र न प्रत्ययनिमित्तः रक्िज्यइति एवं च जीरेत्यवग्रहः सिध्यति न ऊवीहित्वाजजीरदानुरा

ऋकारउदाहः

३१

तन्निमित्तपक्षस्यापिदुष्टतामाह शचङंतइति सार्वधातुकनिमित्तस्यगुणस्यनिषेधेपिलघूपधलक्षणनिषेधाप्रसंगइत्यर्थः रियतिपियतिधिय
तीति रिपिगतौधिधारणइतितुदादौपाठः हथोहथइति यथैवादिप्रभृतिभ्यः शपइत्यनेनशपंनिवर्त्यते एवमकारोपिनिषेधेननिवर्त्यतेत्याशयः नन्वि
ग्लक्षणोयंनभवतीतिनिषेधाप्रसंगः सत्यं परिहारांतरस्यसद्भावादेतन्नाश्रितं प्रसक्तस्येति सामान्यलक्षणेनविशेषलक्षणापरामर्शेनियमात्
पुनर्विशेषलक्षणपरामर्शात् यत्स्वरूपेणानभिनिर्वृत्तंतस्यनिवृत्तिः क्रियते परमार्थतस्तुउत्सर्गापवादयोरेकवाक्यतायामशाप्यनुमानंबाधइति
सिद्धांतः चितमित्यादौचप्रसक्तानभिनिर्वृत्तगुणनिषेधवचनस्यचरितार्थत्वाद्धतोहथइतिभूताकारनिवृत्तावव्यापारः अदिप्रभृतिभ्यइत्यनेनलु

अवश्यंचैतदेवंविज्ञेयं अंगविशेषणेहिसतीहप्रसज्येत भिनत्तिछिनत्तीति रोरवीत्यर्थं त्रिधाबद्धोवृषभोरोरवीति यदितन्निमित्त
ग्रहणंक्रियते शचङंतेदोषः रियतिपियतिधियति जाडुडुवत् अत्रनप्राप्नोति शचङंतस्यांतरंगलक्षणलाभ्भवात्तसिद्धं अंतरंगलक्ष
णत्वाच्चेयङुवङोः कृतयोरलघूपधत्वाद्गुणानभविष्यति एवंचक्रियतेचेदंतन्निमित्तग्रहणंनचकश्चिद्दोषोभवति इमानिचभूयस्तन्निमित्त
ग्रहणस्यप्रयोजनानि हतोहथः उपोयते औयत लौयमानिः पौयमानिः नेनिक्तइति नैतानिसंतिप्रयोजनानि इहतावत् हतोहथइति
प्रसक्तस्यानभिनिर्वृत्तस्यप्रतिषेधेननिवृत्तिःशक्याकर्तुं अयंचधातूपदेशावस्थायामेवाकारः इहचोपोयते औयत लौयमानिः पौयमा
निरिति बहिरंगेगुणवृद्धीअंतरंगःप्रतिषेधः असिद्धंबहिरंगमंतरंगे नेनिक्तइतिपरेणरूपेणव्यवहितत्वान्नभविष्यति उपधार्थेनताव
न्नार्थः धातोरितिवर्तते धातुंक्विसरत्वेनविशेषयिष्यामः इ०

गत्यंतराभावात्तन्नेवप्रक्रियायांशप्निवर्त्यते इद्धेवभवतइत्यादौप्रसक्तोऽनभिनिर्वृत्तएवशबकारः कस्मादनेननिवर्त्यतेनैषदोषः शब्भवतीत्य
स्यांचोदनायांगुणरूपेणाच्चादनान्नायंगुणनिषेधविषयः उपोयतइति वेञोयकिसंप्रसारणेकृतेउभयपदाश्रयत्वाद्बहिरंगोगुणः औयत
इत्यादौबहिरंगाश्रयत्वाद्वृद्धिर्बहिरंगा नेनिक्तइति क्विसरत्वेनांगस्यविशेषणादंगस्यात्रकार्यित्वात्सर्वः पक्षः उत्तरस्त्वभ्यासस्यकार्यित्वात्त
स्यपुरेणरूपेणव्यवधानादिति धातुंक्विसरत्वेनेतिधातुलोपइत्यत्रोपसर्जनत्वेपिधौतोधातुशब्दमात्रस्यस्वरितत्वादिहानुवृत्तिरित्यर्थः

समानाश्रयइति तुल्यकालत्वादितिभावः नोनावेत्यत्रबहुलग्रहणानुवृत्त्या नैमित्तिकोंतरंगोलुक्प्रागेवप्रत्ययोत्पत्तेर्भवति निकुचितइति क्वित्वसन्नि
योगेननलोपेसातिउदुपधत्वमितिनिमित्तमाकित्वस्यनभवति यदितर्ह्यकारलोपःक्रियतेनदाजंगमइत्यत्रतस्यस्थानिवद्भावादुपधालोपःप्राप्नोति
नैषदोषः अनङितिप्रतिषेधात् अनर्थकोयमङितिचेदुपधालोपस्यापितर्ह्यप्राप्तिः अजादौप्रत्ययेतस्यविधानात् ननु लोलुवादिषुवङादयःस्थानि
वद्भावेननसिध्यंति नेषांस्थानिन्यदर्शनात् संभवमात्रेणाप्यतिदेशोभवतीत्यदोषः क्ङितिच क्ङितिप्रतिषेधेइति इकइत्यनुवर्ततेगुणवृद्धीति
च तत्रयदीकःक्ङितीत्यनेनविशेष्यते क्ङितिपरतोयइगितितदातस्मिन्नितिनिर्दिष्टेपूर्वस्येतिपरिभाषोपस्थानान्निर्दिष्टग्रहणस्यचानंतर्यार्थत्वाच्चि

समानाश्रयोलुग्लोपेनबाध्यते कश्चसमानाश्रयः यःप्रत्ययाश्रयः अत्रचप्रागेवप्रत्ययोत्पत्तेर्लुग्भवति कथंस्यद्ःप्रश्रथःहिमश्रथःजीरदा
नुः निकुचितइति उक्तंदोषेकिमुक्तंनिपातनात्स्यदादिषुरकिज्यःसंप्रसारणमिति निकुचितेप्युक्तंकिंसन्निपातलक्षणोविधिरनिमित्तंतद्वि
घातस्येति क्ङितिच क्ङितिप्रतिषेधेतन्निमित्तग्रहणंक्ङितिप्रतिषेधेतन्निमित्तग्रहणंकर्तव्यंक्ङिन्निमित्तेयेगुणवृद्धीप्राप्नुतस्तेनभवत इ
तिवक्तव्यंकिंप्रयोजनं उपधारोरवीत्यर्थं उपधार्थरोरवीत्यर्थंच उपधार्थंतावत्भिन्नःभिन्नवान्नेकिंपुनःकारणंनसिध्यतिक्ङितीलुच्य
तेनेनयत्राक्ङित्यनंतरोगुणभाक्त्तितत्रैवस्यात् चितस्तुनइहतुनस्यात्भिन्नःभिन्नवानिति ननुचयस्यगुणउच्यतेनच्क्ङित्परत्वेनवि
शेषयिष्यामिः पुगंतलघूपधस्यचांगस्ययुगणउच्यतेनचात्राक्ङित्परं पुगंतलघूपधस्येतिनैवंविज्ञायते पुगंतस्यांगस्यलघूपधस्यचेति क
थंतर्हि उच्यतः पुगंतः लघ्वीउपधालघूपधा पुगंतश्चलघूपधाचपुगंतलघूपधं पुगंतलघूपधस्येति

तंस्तुनमित्यादावेवनिषेधःस्यात् नतुभिन्नः भिन्नवानित्यादाविति तन्निमित्तग्रहणंकर्तव्यं यदातुक्ङिद्ग्रहणंगुणवृद्धिविशेषणंतदापरसप्तम्याऽ
प्रसंगएवनहिविहितयोर्निषेधः अपित्वनभिनिर्वृत्तयोरेवेतिपरिभाषानुपस्थानान्निमित्तसप्तम्येवाक्ङितीतिभवति तन्निमित्ताहितयोःप्र
वृत्तिः उपधारोरवीत्यर्थमिति उपधायामपीकःप्रतिषेधार्थंरोरवीतियङि तन्निमित्तप्रतिषेधानिवृत्त्यर्थमित्यर्थः अत्राहितिवेनिमित्तो
गुणोनयङ्निमित्तः ननुचेति आकांक्षयापुगंतलघूपधस्येतिसन्निधानमन्यते तथाहि क्ङितिगुणवृद्धीनभवतइत्युक्तेकस्येत्याकांक्षा
यांयस्यप्राप्तेइत्यात्तिपुगंतलघूपधस्यापेक्षा अथवाक्ङितीतिप्रत्ययग्रहणात्प्रत्ययेनांगंसन्निधाप्यतेतत्तश्चक्ङितीतिभिन्नमित्यादौ
लघूपधस्यांगस्यानंतर्याभावात्गुणनिषेधःलघूपधेति ननुचसमुदायस्यान्निर्देशादवयवस्यचेकोव्यवधानात्तदवस्थैवाप्राप्तिरित्यर्थः

३२

बहिरंगइति नतत्रासिद्धत्वादसत्त्वान्निषेधानुपपत्तिरित्यर्थः अथवेति ननु कुञ्जीयश्च सु भ य विशेषणानर्थधातुकग्रहणंस्यादितिकथमनवकाशत्वं उच्यते विनाप्यार्धधातुकग्रहणेनवकुञ्जीहि लेन्मते यथेकावाधेइत्यत्र रोरवीतीत्यत्रानैमित्तिकत्वाल्लोपस्यगुणानिषेधः प्रवर्तमानप्राप्नोतीत्यार्धधातुकग्रहणसामर्थ्यात्तत्रापि निषेधोवाध्यतइत्यर्थः यङ्लुमित्यस्यनिषेधांतरंगत्वाद्वाध्यतेनसार्वधातुकनिमित्तइतिगमनइत्याटोनिषेधाभवत्येव तस्मादसत्वमप्युपत्स्यपदुकानाध्यकारणोक्तं भाषाविषयत्वेनयङ्लुकोबहुलमिष्यतेननिआर्धधातुकग्रहणस्यसभवति नोतानिंदादीनिंदायतिआहार्गे

का॰ यथाकौलादिसंज्ञापरिभाषंयत्रकार्यंतत्रइएव्यंसार्वधातुकार्धधातुकयोर्गुणाभवतीत्यपोभवत्तर्मिटेभवति कुर्विंतीत अथवालांदसमतद्दृष्टात् विधिस्ठंदसि भवति अथवाबहिरंगगुणांतरंगःप्रतिषेधःप्रसंधंबहिरंगमंतरंगे अर्थेत्यस्मिन्योगेयदार्धधातुकग्रहणंतदनवकाशंस्यान वकाशत्वाद्गुणोभविष्यति इहकस्मान्नभवति लिगवाधनः कानर्थमतत्पिलकाम्योरिकपकरणात इग्लक्षणयोर्गुणवृध्योःप्रतिषेधः मंचैतदग्ल क्षणे लकारस्यादिः स्वादादेशश्रुत्यानिवद्भावसंगः लकारस्यादिः स्वादादेशेषु स्थानिवद्भावःप्राप्नोतिआचिनवंअकनवंअकवं लकारस्यादिः स्वादादेशेषु स्थानिवद्भावप्रसंगइतिवेद्यासकेरोतिः इत्वनादिमित्यंयदर्थयाक्रियाति इत्वनंप्राप्नोतिततज्ञापयत्याचार्यः नादिःदादेशादि तोभवतीतिपर्यत्नज्ञापयति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दुर्बोधुवस्यादिःयोयदुक्तिर्निषेधकारककार्योगार्होपदेतलोपेक्रते अस्यार्धधातुकग्रहणंबहुव्रीहावप्यार्श्रितनधातुलोपइतिगुणनिषेधःप्राप्नोति समानदिश्यैवमर्थमार्धधातुकग्रहणंस्यात अनन्तत्वान्निषेधान्माप्तप्रतिषेधइतिसनिपातनकथमनवकाशंस्यात इग्लक्षणयोरिति इकइत्यवंधंकु णत्वधातयोर्निषेधइत्यर्थः लकारस्येति अनुवंधइत्संज्ञकत्वाल्लकारान्निमित्तंसंनिधायतडस्यनत्वधात्विनिषेधानभवत्यंति पिलिः नभवति ङि स्यिन्नभवतीतिभाष्यकारस्यकल्पनोत्थनवार्तिककारस्येतिदोषापत्यासः ॥ ॥ ॥ ॥ ॥

×भोभोर्गार्निर्दुस्यादिषुनुवः ×४

भा॰ क्रै॰

३३

यदीति क्ङित्यनंतरस्यधातोर्गुणवृद्धीनभवतइतिवाक्यार्थंमत्वाप्रश्नः धातोरेवेति धातोर्विहितस्यक्ङित्यनंतरेनेतिमत्वाप्रश्नः धातोर्विहितइति धातोर्विहितेक्ङित्यनंतरायोधातुर्विकरणोवातस्यप्रतिषेधइत्यर्थः अथवेति यत्रगुणवृद्धीविधीयेते तत्रक्ङितीत्युपतिष्ठतेइत्येव मियंपरिभाषाभवति तत्रपुगंतलघूपधस्येत्यत्रास्याउपस्थानसतियननात्यवधानमितिभिन्नमित्यादौनिषेधोभविष्यति अथवेति माहलरिभा षातथापिप्रतिषेधस्यप्रतिषेध्यापेक्षायांयावंतोयादृशाःप्रतिषेध्याः तावंतिप्रतिषेधसूत्राणीतिपुगंतलघूपधगुणेप्रतिषेधः नवकाशःप्र

यदिधातुर्विशेष्यतेविकरणस्यनप्राप्नोतिचिनुतःसुनुतःमुनीतःइतिनैषदोषः विहितविशेषणंधातुग्रहणंधातोर्योविहितइतिधा तोरेवतर्हिनप्राप्नोति नचैवंविज्ञायतेधातोर्विहितस्यक्ङितीतिकथंतर्हिधातोर्विहितेक्ङितीति अनोथकार्यकालंहिसंज्ञापरिभाषंयत्र कार्यंतत्रद्रष्टव्यं पुगंतलघूपधस्यगुणोभवतीत्युपस्थितमिदंभवति क्ङितिचेति अथवायदेतस्मिन्योगेक्ङिद्ग्रहणंतदनवकाशंत स्यानवकाशत्वाद्गुणवृद्धीनभविष्यतः अथवाआचार्यप्रवृत्तिर्ज्ञापयति भवत्युपधालक्षणस्यगुणस्यनिषेधइति यदयंत्रसिगृधि धृषिक्षिपेःक्नुः इकोझल् हलंताच्चेतिक्नुसनौकितौकरोति कथंकृत्वाज्ञापकं किल्करणेएतत्प्रयोजनंगुणःकथंनस्यादिति यदि चात्रगुणप्रतिषेधोनस्यात किल्करणमनर्थकंस्यात पश्यतित्वाचार्योभवत्युपधालक्षणस्यप्रतिषेधइति ततःक्नुसनौकितौकरोति रोरवीत्यर्थेनापिनार्थः क्ङितीत्युच्यते नचात्रक्ङितंपश्यामः प्रत्ययलक्षणेनप्राप्नोति नलुमतातस्मिन्निति प्रत्ययलक्षणप्रतिषेधः अथापिनलुमतांगस्येत्युच्यते एवमपिनदोषः कथंनलुमताल्लुप्तेंगाधिकारः प्रतिनिर्दिश्यते किंतर्हियोसौलुमतालुप्यतेतस्मिन्य दंगंतस्ययत्कार्यंतन्नभवतीति अथाप्यंगाधिकारः प्रतिनिर्दिश्यते एवमपिनदोषः

तिषेधोव्यवहितेपिप्रवर्तते अथवायथोद्देशपक्षाश्रयणेभाष्यं तथाहिप्रधानान्यात्मसंस्कारायसंनिधीयमानानिगुणभेदंप्रयुंजत इतियदेतस्मिन्निलुक्तं अथवेति लिंगान्निर्दिष्टांगविकलातस्मिन्निति परिभाषोपतिष्ठतइत्यर्थः अनेकपरिहारोपन्यासोन्यायस्तुलास्त्रार्थः ३२

दीधी॰ छंदोविषयत्वादिति भाषायामेतयोः प्रयोगाभावात् दृष्टानुविधित्वाच्चेति॰ यद्यपि भाषायामपि दृष्टमेवानुविधीयते सिद्धे शब्दार्थसंबंधे इति न्यायात्
तथाप्यादीध्यनमित्यादि प्रयोगः छंदसि नास्ति दृष्टस्यैव छंदस्यनुविधानमित्यर्थो नु छंदस्येव दृष्टानुविधानमिति अथवा दृष्टानुविधिरित्यस्याय

॥ दीधीवेवीटाम् किमर्थमिदमुच्यते गुणवृद्धी मा भूतामिति आदीध्यनं आदीध्यकः आवेव्यनं आवेव्यक इति अयं योगः शक्योऽकर्तुं
कथं दीधीवेव्योश्छंदोविषयत्वात् दृष्टानुविधित्वाच्च छंदसः अदीधेदीधयुरिति च गुणदर्शनाद् प्रतिषेधः दीधीवेव्योश्छंदोविष
यो दृष्टानुविधिश्छंदसि भवति दीधीवेव्योश्छंदोविषयत्वात् दृष्टानुविधित्वाच्च छंदसः अदीधेदीधयुरिति च गुणस्य दर्शनाद् प्रति
षेधः अनर्थकः प्रतिषेधोऽप्रतिषेधः प्रजापतिर्वै यत्किंचिन्मनसादीधेत् होता यत्र नः कृपयन्नदीधेत् अदीधयुर्दाशराज्ञे वृता
सः भवेदिदं युक्तमुदाहरणं अदीधेदिति इदं त्वयुक्तमदीधयुरिति अयं जुसि गुणः प्रतिषेधविषय आरभ्यते सयथैव क्ङितीति
ऐतं प्रतिषेधं बाधते एवमिममपि बाधेत नैष दोषः जुसि गुणः प्रतिषेधविषय आरभ्यमाणस्तुल्यजातीयं प्रतिषेधं बाधते कश्च
तुल्यजातीयः प्रतिषेधः यः प्रत्ययाश्रयः प्रकृत्याश्रयश्चायं अथवा येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते क्ङितीत्येत
स्मिन् प्रतिषेधे जुसि गुण आरभ्यते अस्मिन्पुनः प्राप्ते चाप्राप्ते च ॥ श्रीः ॥ ॥

मर्थः गुणश्छंदसि दृश्यते न तु सर्वत्र गुणनिषेध इति अदीधेदिति लङ्व्यत्ययेन तिप् अदीधयुरिति जक्षित्यादयः षडित्यभ्यस्तत्वा
ज्जुसादेशो जुसि प्रकृत्याश्रयश्चायमिति न तस्यांतरंगत्वादनेनैव भाव्यमित्यर्थः येन नाप्राप्त इति कार्यविशेषचिंतापेक्षायामयं न्या
यो न तु कार्यसामान्यं बाध्यमित्यस्यामपेक्षायामेतन्न्यायावतारः ॥

भा॰ कै॰
२४

कथं निस्यं ङितइति ननु ङितो लकारस्यैव तिप आर्धः ङितो न तु ङित आदेशस्येति अन्यथा पचावः पचामः पचंतेरिति लोपः स्यात् एवंम
न्येत यास्कटोङित्वेन ज्ञापके न स्थानिन एव लकारस्य ङिद्व्यपदेश उक्तः किंच तिङ्कारोच्चारणं तु तुङ् सुङ् लुङ्स्वित्यादौ विशेषणार्थं स्यात् ङितोय
दित्स्थानिवद्भावेन सादेशो ङितिपत्कार्यं पूर्वस्य तन्न भवतीति ज्ञाप्यते न तु स्थानिन एव ङिद्व्यपदेश उक्तः स्यात् अन्यथा निस्यं ङितइ त्येन
निर्विषयं स्यादित्यर्थः यास्कट एवेति ङितो यत्कार्यं तत्प्रकरणे न किंचिद् निर्दिष्टमस्ति किंतु ङितिपत्कार्यं विधीयते संप्रसारणादिकं तदः
तिदिश्यते तच्च स्थानिवद्भावात् स्यादतिदेशो नर्थकः स्यादित्युतिदेशः क्रियमाणो ङितिपत्कार्यं तदभावस्येव ज्ञापकः अपर्याप्तश्चेति

कथं नित्यं ङित इत्यत्रेति ङितो यत्कार्यं तद्भवति ङितिपत्कार्यं तन्न भवतीति किं वक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते यासु
ट एव ङिद्वचनात् अपर्याप्तश्चेव हि यासुट् समुदायस्य ङित्वं ङितं चैव न करोति तस्यैतत्प्रयोजनं ङितो यत्कार्यं तद्यथा स्यात् ङि
तिपत्कार्यं तन्मा भूदिति

समुदायस्य ङिद्व्यपदेशे कर्तव्ये यासुट् असमर्थः यास्कट एव घनेन ङित्वं क्रियते न समुदायस्य क्ङिति चेत्यत्र तन्निमित्तग्रहणस्य प्रत्या
य्यालत्वाद् गुणनिमित्तेपि यास्कटि ङिति गुणनिषेधः सिध्यति यदि समुदाये स्थानिवद्भावेन ङित्कार्यमभविष्यत् यास्कटो ङित्वं न व्यर्थ
स्यात् किंचित्तं न ज्ञापयति ङितिपत्कार्यं तल्लुडादेशे न भवतीति केषांचित्पाठः अपर्याप्तश्चेव हीति तत्रावयवङित्वद्वारेण समुदायस्य
ङित्वं विधीयत इति व्याख्येयं एवं हि क्ङितीति निमित्तसप्तमीपक्षेपि गुणनिषेधः सिध्यति अस्मिन्पक्षे ङितं चैव न करोतीति समुदायः प
रामृश्यते

२४

अथवा

हलोनंतरा: कथमिदमिति किमंतरशब्दस्यनञावकुब्रीहि: अंतराशब्दस्येतिप्रश्न: अनंतरं विवरं वर्णशून्य: काल: अविद्यमानादिति मध्येयेषामन्येवर्णा अविद्यमानादूरव्यस्यनिषेधोनत्वाधारस्य अवग्रहइति अर्धमात्राकालो ऽवग्रहइष्यते अर्धमात्राकाले स्थित्वावर्णान्तरं समुच्चार्यते तन्नगुरोरनृतइतिप्लुतो नभवेत् नैषदोषइति दोषनिरूत्तये संज्ञाक्रियते प्रयोजनाभिनिर्वृत्त्येवा इत्युभयाभाव: अधिकरणत्वेनेदं राडूत संबंधाभावात् विवार्यमाणानामित्याहोतुवाक्यस्येरित्यनुवर्तते ननुगुरोरनृतइति अप्लुत्यशब्देदोषइति तन्नैवं विधेर्विषये प्रकृत्यव यवस्यावग्रहे पदकारा: कुर्वंति अप्सुयोनिरित्यादावपिसमासपदानामंतो ऽवग्रहइतिसुशब्दात्सुवस्यनास्त्यवग्रह: संयोगसंज्ञायामिति वधिसंज्ञावदाननं यव्यवस्थितानां हलां प्रत्येकं

हलोनंतरा: संयोग: अनंतराइतिकथमिदं विज्ञायते अविद्यमानमंतरमेषामिति आहोस्विद् विद्यमानाअंतराएषामिति किंतात: यदि विज्ञायते अविद्यमानमंतरमेषामिति अवग्रहे संयोगसंज्ञानप्राप्नोति अप्स्वित्यप्सु इति विग्रहेत्यत्रांतरं अथविज्ञायते अविद्यमानाअंतराएषामितिनदोषोभवति यथानदोषस्तथास्तु अथवापुनरस्त्वविद्यमानमंतरमेषामिति ननुत्वोक्तमवग्रहे संयोगसंज्ञानप्राप्नोतिअप्स्वित्यप्सु इति विग्रहेत्यत्रांतरमिति नैषदोषोनप्रयोजनं संयोगसंज्ञायां सहवचनं यथान्यत्र संयोगसंज्ञायां सहग्रहणं कर्तव्यं हलोनंतरा: संयोग: सहेति वक्तव्यं किंप्रयोजनं सहभूतानां संयोगसंज्ञायथास्यादेकैकस्यमाभूदिति यथान्यत्र तद्यथान्यत्रापियत्रेच्छति सहभूतानांकार्यंकरोतितत्रसहग्रहणं तद्यथा सहसुपा उभेअभ्यस्तंसहेति किंवस्याद्यद्येकैकस्य हल: संयोगसंज्ञास्यात् इहनिर्यायात् निर्वायात् वान्यस्यसंयोगादेरित्येत्वंप्रसज्येत इहच सहषीष्ठेतिषत्वंसंयोगादेरितीट्प्रसज्येत इहच संस्क्रियतइतिगुणोर्तिसंयोगाद्योरितिगुण: प्रसज्येत इहच दृषत्करोति समित्करोति इतिसंयोगांतस्यलोप: प्रसज्येत ७

संयोगसंज्ञाप्राप्नोति किंवस्यादिति द्वयोरानंतर्ये एकैकस्यापिसंयोगसंज्ञायांगुरुसंज्ञाप्रयुक्तकार्यसिद्धिरितिप्रश्न: निर्यायादिति सतिरेफे यकार: संयोगइतिएत्वप्राप्ति: ननुसमुदायस्यापिसंज्ञितेअवारहाभ्यामिति यकारस्यद्विर्वचनेकृतेकस्मादेत्वंनभवति यथा ग्लेयादिति एत्वेकर्तव्ये पूर्वत्रासिद्धमितिद्विर्वचनस्यासिद्धत्वान्नायंदोष:

भा.कै.
३५

कथंदिध्यदिति लेटइतिपूर्ववत्तस्यलोप: परस्मैपदेष्वितिकारलोप: लेटोऽडाटाविति अडागम: व्यत्ययेनेति श्यनोऽङित्वाद्गुणाभाव: यीवर्णयोर्दीधीवेव्योरितीकारलोप: क्वचित्तुव्यत्ययेनेतिपाठ: तत्रत्रास्यङित्वाद्गुणाभाव: एरनेकाचइतियणादेश: इङितिवर्तमानइतिनेदुक्तीत्यत: पिपठीरिति पिपठिषते: क्विप् अतोलोपइत्यकारलोप: षत्वस्यासिद्धत्वात्ससजुषोरुरितिरुत्वं पूर्वत्रासिद्धीयेनस्थानिवदितिअल्लोपस्यरुत्वेस्थानिवद्भाव: आंगमिति अंगस्येत्यनुवर्तनादंगाधिकारविहितंयद्रूपांतरमिट: तदेवनिवार्यते इडेवयथास्यादितिनियमेनेत्यर्थ: र्वोरुपधायाइतिचदीर्घत्वंनांगं यत्तु ग्रहोरितिदीर्घइतिदीर्घत्वंतद्भवनोऽङ्गवतिपिपठिषिब्राह्मणकुलानी:

यदि तर्ह्ययंयोगोनारभ्यतेकथंदीध्यदितिवेव्यदितिचदीध्यदितिवेव्यदितिचश्यन्व्यत्ययेनादीध्यदितिवेव्यदितिचश्यन्स्वत्येनभविष्यति इटश्चापिग्रहणंशक्यमकर्तुं कथमकणिषंअरणिषंकणिताश्वारणिताश्वइति आर्धधातुकस्येड्वलादेरिति त्रेडितिवर्तमानेपुनरिट्ग्रहणस्यप्रयोजनमिडेवयथास्यात् यदन्यत्प्राप्नोतितन्माभूदिति किंचान्यत्प्राप्नोतिगुण: मदिनियम: क्रियते पिपठिषतेरप्रत्यय: पिपठी: दीर्घत्वंनप्राप्नोतिनैषदोष: आंगंयत्कार्यंनियम्यतेनचैतदांगं अथवा असिद्धंदीर्घत्वंतस्यासिद्धत्वान्नियमोनभवति ॥ श्री: ॥ ॥ तत्र

यत्रसकारलोपस्यस्थानिवद्भावात्सलंतत्वाभावस्तेनपिपठीषीतिकथंसांतमहत: संयोगस्येतिदीर्घत्वमितिनचोदनीयंकोविधिंप्रतिनस्थानिवदित्यर्थोव्यवस्थापयिष्यते नतुकोलुप्तंनस्थानिवदिति अथवेति इडेवेत्यस्मिन्नियमेदीर्घत्वस्यासिद्धत्वान्नास्तिनियमेनव्यावृत्ति: ततश्चयत्रास्त्रदृष्ट्या अविकृतरूपएवेट्प्रयोगएवनुविकृत: अलावीदित्यत्रतुसिज्लोपएकादेशेसिद्धइत्यसिद्धत्वनिषेधवचनात्सवर्णदीर्घत्वंभवति ॥ ॥ श्री: ॥ ॥ श्रीसांबसदाशिवप्रसन्न: ॥ ७ ॥ ॥ ३५

आहोस्विदिति द्वयोर्बहूनामस्य विशेषस्यानाश्रयणाद्बहूनामेवेत्यर्थः अथापि [illegible] समुदायस्यैकत्वाद्द्विवचनं नावयवबहुत्वात् यथा तु द्वयोरेव हलोरानन्तर्यं तदा द्वयोर्भवत्येव हलइति जातावेकवचनात् निर्देशात् मंक्ष्यति [illegible] नशेर्झलीति नुम्[illegible] सजातीयानां संयोगसंज्ञा [illegible] सजातीयानामिति [illegible]
पाप्रसंगः निर्ग्लेयादिति यः संयोगो नासावेगादिः यश्चागादिर्गकारः स [illegible] समुदायेनानासंयोगः इदिदिधिषतीति अत्र द्वयोः संयोगो न [illegible]
न तत्र दकारस्य संयोगादित्वाद्द्विवचननिषेधप्रसंगः नवाक्त्विर्धेरिति अजाद्यन्तः प्रतिषेधविधिः अजादे [illegible] धार्यः तेन संवत्सः [illegible] परे [illegible]
न वक्ष्यत्येकदेशेऽनुमतिः संयोगस्मिन्नुदाहृते यदि तत्र प्रत्येकं [illegible] इहापि [illegible] णं कर्तव्यं अथ [illegible] तरेण प्रत्येकं [illegible] प्रत्येकं [illegible]
भवतः इहापि नार्थः [illegible] ग्रहणेन अथ यत्र [illegible] मानन्तर्यं किं [illegible] द्वयोः [illegible] संज्ञा [illegible] आहोस्विद्विशेषेण कश्चात्र विशेषः
समुदाये संयोगादिलोपः [illegible] समुदायसंयोगादि [illegible] लोपः न सिध्यति मंक्ता मंक्तुं [illegible] निर्ग्लेयात् निर्ग्लायात् निर्ग्लेयात्
निर्ग्लायात् वान्यस्य संयोगादेरित्येत्वं न प्राप्नोति इत्त्वसंस्व [illegible] कृतश्च संयोगादेरिति [illegible] प्राप्नोति इत्वं संस्वरवृ [illegible] गुणोऽर्तिसं
योगाद्योरिति गुणो न प्राप्नोति इत्त्वगो [illegible] करोति यवमानकरोतीति संयोगान्तस्य लोपः इति लोपो न प्राप्नोति इत्वं [illegible]
संयोगादेरातो [illegible] ण्वत इति [illegible] निष्ठानत्वं न प्राप्नोति अस्तु तर्हि द्वयोः [illegible] संयोगसंज्ञा द्वयोर्हलोः संयोग इति वा [illegible] द्वयोः [illegible]
गइति द्विर्वचनं न सिध्यति इन्द्रमिच्छति इन्द्रीयति इन्द्रीयते [illegible] इदिदिधिषति न [illegible] संयोगादयः [illegible] द्विर्वचनं न प्राप्नोति नवा [illegible]
नवाऽऽद्युदाहः किं कारणं आविधः [illegible] संयोगा [illegible] नाद्विरु [illegible] ते [illegible] अथ यत्र बहूनां संयोगसंज्ञा अथापि
द्वयोर्द्वयोः किं गतमेतदियता सूत्रेण [illegible] स्वि [illegible] तरा [illegible] यः सूत्रं कर्तव्यं [illegible] कथं यदा [illegible] बहूनां संयोग [illegible]
ज्ञा तदैव [illegible] ग्रहः करिष्यते आ [illegible] मानन्तरमेव मिति यदा [illegible] द्वयोस्तदा विग्रहः करिष्यते आ [illegible] मानानन्तरा [illegible] मिति
रानन्द्रा न द्विरुच्यते इन्द्रं [illegible] दकारनकार [illegible] व्यवहितत्वाद्द्विरु [illegible] त एव आ [illegible] मानानन्तर [illegible] समुदाये द्विर्वचनं [illegible]
मेव संयोगसंज्ञा न द्वयोर्द्वयोः अवि [illegible] मानादि मध्ये [illegible] आद्ययोः [illegible] अन्त्ययोः मध्ये भवतीति संसर्ग [illegible] द्वि [illegible] योगस्यापि विशिष्टं गतिरेतत्राद्य
[illegible] द्वयो [illegible] संयोगसंज्ञा भवतीति पक्षः

भा० कै० शक्नोतीति तकारः [illegible] परतः ककारः संयोगो भवत्यादिश्चेति लोपप्रसंगः संयोगादाविति कथं [illegible] उपसर्जनार्थस्याद्वित्वावगतिरिति चेद् आदिग्रहण
सामर्थ्यात् अन्यथा संयोगादिति [illegible] संयोगान्तस्य लोपः आकारस्त [illegible] स्यागस्यैत्वमित्यर्थलाभात् संयोगावंतावति अत्रापि संयोगस्य लोपइत्ये
३८ वं संयोगेन पदस्याविशेषणात् [illegible] तविधौ सिद्धे अन्तग्रहणमाश्रितसंख्याभेदः संयोगो यथा [illegible] मर्थो विज्ञायते संयोगयोरिति षष्ठीसमास
इहवृश्चकावस्तीति स्को संयोगाद्योरिति लोपः प्रसज्येत इत्वनियातो निर्वातः संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं प्रसज्येत नैष दोषः
यत्तावदुच्यते इहतावन्निर्यायात् निर्वायात् वान्यस्य संयोगादेरित्येत्वं प्रसज्येतेति नैवं विज्ञायते संयोगआदिर्यस्य सोऽयं संयोगादिः
संयोगादेरिति कथं तर्हि संयोगावादी यस्य सोऽयं संयोगादिः संयोगादेरिति एवं तावत्सर्वमागं परिहृतं यदप्युच्यते इहवृश्चकौ
तीतिसंयोगान्तस्य लोपः प्रसज्येतेति नैवं विज्ञायते संयोगो [illegible] यस्य तदिदं संयोगान्तं संयोगान्तस्येति कथं तर्हि संयोगावंतावस्य
तदिदं संयोगान्तं संयोगान्तस्येति यदप्युच्यते शक्नोवस्तीति स्कोः संयोगाद्योरन्ते चेति लोपः प्रसज्येतेति नैवं विज्ञायते संयोगावा
दी संयोगादी संयोगाद्योरिति कथं तर्हि संयोगयोरादी संयोगादी संयोगाद्योरिति यदप्युच्यते इत्वानियातो निर्वात इति संयो
गादेरातो धातोर्यण्वत इति निष्ठानत्वं प्रसज्येतेति नैवं विज्ञायते संयोगआदिर्यस्य सोऽयं संयोगादिः संयोगादेरिति क
थं तर्हि संयोगावादी यस्य सोऽयं संयोगादिः संयोगादेरिति कथं कृत्वा एकैकस्य संयोगसंज्ञा प्राप्नोति प्रत्येकं वाक्यपरि
समाप्तिर्दृष्टेति तद्यथा वृद्धिर्गुणसंज्ञे प्रत्येकं भवतः ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति तद्यथा ग
र्गाः शतं दण्ड्यन्तामिति अर्थिनश्च राजानो हिरण्येन भवन्ति ४

३८ आश्रीयत इत्यर्थः संयोगयोरिति द्विवचननिर्देशः स्कोर्द्वित्वान्नात्र सप्तमी पर्ययोरपि हलोर्द्वित्वात् तेनायमर्थः झलिपरतो यः संयोगः पदान्ते यः
संयोगः तस्यादिः संस्पर्शयः ककारः सकारश्च तयोर्लोपइति मन्वेवं सति शक्नोवस्तीत्यत्र लोपः प्राप्नोति संयोगादावित्येव संयोगान्तस्य आ
कारस्त [illegible] धातोर्न त्वमिति सिद्धे आदिग्रहणं द्वित्वसंख्याश्रयणार्थं कथं कृत्वेति संयोगसंज्ञाया अन्वर्थत्वात्समुच्यन्तेऽस्मिन्वर्णा
इति समुदायः संयोग इत्यर्थस्याश्रयणात् सहग्रहणं न कर्तव्यमित्यर्थः ७

पच्यति पनसमिति · हलइति वचनाद्व्यासहकारमकारयोर्मध्ये संज्ञा तयोरेव तु प्राप्नोति · ततश्च सलोपप्रसंगः · एकप्रतिषेधार्थमिति · अनंतराइत्यनेन संज्ञा या विषयो निर्दिश्यते · यत्रानंतरव्यवहारस्तत्रसंज्ञा न चैकाकिन्यनंतरव्यवहार इति भावः · एकप्रतिषेधस्य च प्रयोजनं इयेष इत्यादौ इजादेरित्याम्नो निषेधः । गुरुमद्वचनमियायेत्यादि निवर्त्यर्थं स्यात् · वृषलकुलमिति · यद्यपि ब्राह्मणकुलमपि तयोर्व्यवधायकं तथापि भिन्नजातीयमव्यवधायकमिति पर्युक्तं

यदप्युच्यते · इहच गोमान्करोति अवयवमान्करोतीति संयोगांतलोपेन प्राप्नोतीति · पदेन संयोगं विशेषयिष्यामः · पदस्य संयोगांतस्येति · यदप्युच्यते · इहच निर्ग्लानो निर्म्लानः संयोगादेरातो धातोर्यण्वतइति निष्ठानत्वं प्राप्नोतीति · धातुना संयोगादिं विशेषयिष्यामः · धातोः संयोगादेरिति · स्वरैरनंतर्हितवचनं स्वरैरनंतर्हिता हलः संयोगसंज्ञा भवंतीति वक्तव्यं किं प्रयोजनं व्यवहितानां माभूत् · पचति पनसं · ननु चानंतराइत्युच्यते · तेन व्यवहितानां न भविष्यति दृष्टमानंतर्यं व्यवहितेपि · व्यवहितेप्यनंतरशब्दो दृश्यते · तद्यथा · अनंतराविमौ ग्रामावित्युच्यते · तयोश्चैवांतरा नद्यश्च पर्वताश्च भवंतीति · यदि तर्हि व्यवहितेप्यनंतरशब्दो भवति आनंतर्यवचनमिदानीं किमर्थं स्यात् · आनंतर्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थं एकस्य हलः संयोगसंज्ञा माभूदिति · किं च स्यात् · यद्येकस्य हलः संयोगसंज्ञा स्यात् · इयेष उवोष इजादेश्च गुरुमतोनृछ इत्याम् प्रसज्येत · नवा तज्जातीयव्यवायात् · नवाएषदोषः किं कारणं · अतज्जातीयस्य व्यवायात् · अतज्जातीयकं हि लोके व्यवधायकं भवति · कथं पुनर्ज्ञायते · अतज्जातीयकं लोके व्यवधायकं भवतीति · एवं हि कंचित्कश्चित्पृच्छति · अनंतरएते ब्राह्मणकुले इति स आह नानंतरे वृषलकुलमनयोरंतरेति । किं पुनः कारणं · क्वचिदतज्जातीयकं व्यवधायकं भवति क्वचिन्न · सर्वत्रैव ह्यतज्जातीयकं व्यवधायकं भवति · कथमनंतराविमौ ग्रामाविति · ग्रामशब्दोयं बह्वर्थः · अस्त्येव शालासमुदाये वर्तते · तद्यथा ग्रामो दग्धइति · अस्तिवाटपरिक्षेपे वर्तते · ॥ ० ॥ ० ॥ ०

तदनेन निवर्त्यते · ग्रामशब्दोयमिति · केचिदर्थभेदेन शब्दभेदमिच्छंति · प्रत्यभिज्ञानं तु सामान्यनिबंधनं · अन्येत्वेकशब्दत्वं तत्र चानेकशक्तियोगः · एकशक्तित्वं वेतिद्दर्शनविकल्पः · अनयदाएकशब्दत्वपक्षस्तदा तद्यः सारण्यक इति भाष्यं शक्तिभेदादुपचरितभेदाश्रयं · भेदपक्षे तु ग्रामशब्दोयं बह्वर्थ इति भाष्यं · अभिन्नसामान्यनिमित्तैकत्वाध्यवसायाश्रयं ० ॥ ० श्रीः ·

भा·के·
३७

द्वयोश्चैवांतरेति अंतरांतरेण युक्ते इति द्वितीया कस्मादत्र न भवति उच्यते मध्यमध्यापेक्ष्या नियतावधिरूपता विवक्षिता यथा अंतरा कमंडलुः अग्नी अंतरा धवखदिरावंतरेति तदा द्वितीया यदा तु नियतावधित्वं न विवक्ष्यते अपि तु संबंधमात्रं तदा षष्ठ्येव भवति तदा हि न ज्ञायते किं तयोरेवावधित्वं उतान्यसहितयोरिति अवधिनियमाभावात् द्वितीयायां युक्तग्रहणान्नियतावधिविवक्षाविषयाया अभावः · यान्करोति एवं भिति वद्भवचनानिर्देशादिति नैवो द्वयं बहुत्वस्या विवक्षणात् अन्यथा शिक्षेत्यादौ द्वयोर्न स्यात् तस्मा द्योसावंतरेण सद्व्योर्भवति नवेति यदुक्तं तत्रोच्यते यदा द्वयोर्द्वयोरंतरा न भवति तदा बहूनामंतराइतितेषामेव प्राप्नोति यदा हि बहूनां मध्ये भिन्नजातीयो द्वयो भवति तदा माभूत् तदभावे तु भवतितव्यमेव बहूनां संज्ञया समुदाये द्विर्वचनवदित्यर्थः · अंत्यात्पूर्वइति · तच्चानुषंगलोपार्थमवश्यं वक्तव्यं अत्र सादेवः परनुमि सति अनुपधात्वान्न भइसत्वनलोपे न स्यात् कृतेपि संयोग द्वयोश्चैवांतराकश्चिद्विघते वा न वा एवमपि बहूनामेव प्राप्नोति यान्हि भवानत्र षष्ठ्या प्रति निर्दिशति एतेषामन्येन व्यवायेन भवितव्यं अस्तु तर्हि समुदाये संज्ञा ननु चोक्तं समुदाये संयोगादिलोपे मस्जेरिति नैषदोषः वक्ष्यत्येतत् अंत्यात्पूर्वो मस्जेर्मिदनुषंगसंयोगादिलोपार्थमिति · अथवा अविशेषेण संयोगसंज्ञा विज्ञास्यते द्वयोरपि बहूनामपि तत्र द्वयोर्या संयोगसंज्ञा तदाश्रयो लोपो भविष्यति · यदप्युच्यते इहवा निर्ग्लेयात् निर्म्लीयात् निर्ग्लेयात् निर्म्लायात् वान्यस्य संयोगादेरिति सत्वं न प्राप्नोतीति अंगेन संयोगादिं विशेषयिष्यामः अंगस्य संयोगादेरिति एवं तावत्सर्वमांगं परिहृतम्

दिलोपे तस्यासिद्धत्वादनुपधात्वमेव नकारस्य · अविशेषेणेति बहुवचनं तरे पुद्व्योर्द्वयोरपि भवति बहूनामपीत्ययमिदानीमविशेषः कार्यार्थता तं योगसंज्ञाया विरोधाभावादेकया संज्ञया सर्वेषामनुग्रहासिद्ध्यादि द्विर्वचनेनेवेयन्याद्विशेषेणोक्तं बहूनां सन्निधौ ३७ बहूनामेव संयोगसंज्ञेत्यस्मिन्पक्षे आश्रीयमाणे मस्जेर्दोषोन्यात्पूर्व इति परिहारः शेषान्दोषान्परिहर्तुमाह यदप्युच्यतइति पाठक्रमादर्थक्रमो बलीयानिति मस्जेरंत्यात्पूर्वइत्यस्यानंतरं द्रष्टव्यं निर्ग्लेयादित्यादिषु यद्यपि त्रयो हलः सन्निहितास्तथापि कार्यार्थत्वात्तं योगसंज्ञायास्त्रिषु च कार्याभावादंगपदधात्ववयवसंयोगस्य तेषु नेषु लक्षणेषु आश्रितत्वात्समुदायकार्याभावावयवानां स्वकार्यारंभात् द्वयोरेव संज्ञाप्रवर्ततइति भाष्यार्थः व्याख्यानांतरमत्र क्लिष्टत्वान्नोक्तम्

यमानुस्वाराणामेवेति प्रासादवासिन्यायानवतारपक्षइतिभावः तत्रविधिप्रदेशेषुयमानुस्वारएवादेशास्युः विद्वनोरनुनासिकस्यादित्यादिषुत्वनुवा
दप्रदेशेषुयमानुस्वाराणामसंभवास्प्रतिपत्तिःस्यात् कचटतपानामिति पक्षमितिचकारलोपप्रसंगः ओदनपगिल्यनुनासिकस्यक्विझलोःक्ङिति
तिदीर्घप्रसंगः प्रासादवासिन्यायेनेति अयंन्यायः क्रियाशब्देष्वेवनरूढिशब्देषु नैवदोषइति अनुवादेतावद्यमानुस्वाराणामसंभवएव विधाव

अथमुखग्रहणंकिमर्थं नासिकावचनोनुनासिकइतीयत्युच्यमानेयमानुस्वाराणामेवप्रसज्येत मुखग्रहणेपुनःक्रियमाणेनदो
षोभवति अथनासिकाग्रहणंकिमर्थं मुखवचनोनुनासिकइतीयत्युच्यमानेकचटतपानामेवप्रसज्येत नासिकाग्रहणेपुनः
क्रियमाणेनदोषोभवति मुखग्रहणंशक्यमकर्तुंकेनेदानीमुभयवचनानांभविष्यति प्रासादवासिन्यायेनतद्यथाकेचित्प्रा
सादवासिनःकेचिद्भूमिवासिनःकेचिदुभयवासिनः येप्रासादवासिनोगृह्यंतेतेप्रासादवासिग्रहणेनयेभूमिवासिनःगृह्यंते
तेभूमिवासिग्रहणेन येउभयवासिनोगृह्यंतेतेप्रासादवासिग्रहणेनभूमिवासिग्रहणेनच एवमिहापिकेचिन्मुखवचनाःकेचि
नासिकावचनाःकेचिदुभयवचनाः तत्रयेमुखवचनाःगृह्यंतेतेमुखग्रहणेन येनासिकावचनाःगृह्यंतेतेनासिकावचन
ग्रहणेन येउभयवचनागृह्यंतेएवतेमुखग्रहणेननासिकाग्रहणेनच भवेदुभयवचनानांसिद्धंयमानुस्वाराणामपिप्रा
प्नोति नैवदोषोनप्रयोजनंइतरेतराश्रयंतुभवति काइतरेतराश्रयता सतोनुनासिकस्यसंज्ञयाभवितव्यंसंज्ञयाचनामानुना
सिकोभाव्यते तदेतदितरेतराश्रयंभवति इतरेतराश्रयाणिचकार्याणिनप्रकल्पंते अनुनासिकसंज्ञायामितरेतराश्रयउक्तं
किमुक्तं सिद्धंतुनित्यशब्दत्वादिति नित्याःशब्दाः नित्येषुचशब्देषुसतोनुनासिकस्यसंज्ञाक्रियतेनसंज्ञयानुनासिकोभाव्य
तेयदितर्हिनित्याःशब्दाःकिमर्थंशास्त्रंकिमर्थंशास्त्रमितिचेत्निवर्तकंसिद्धंनिवर्तकंशास्त्रंकथंआङ्स्मायविशेषेणोपदिष्टेन
नुनासिकः तस्यसर्वत्राननुनासिकबुद्धिःप्रसक्तातस्यानेननिवृत्तिःक्रियतेछंदस्यविपरतःआङोनुनासिकस्यप्रसंगेनुनासि
कःसाधुर्भवतीति श्रीः

प्यांतर तम्यान्मुखवचनस्योभयवचनोभविष्यति नतुकेवलनासिकावचनः श्रीसांबाय श्रीभगवतेवासुदेवाय श्रीकालेशनमः श्री

भाष्य.
३८

तद्यःसारण्यकइति ततश्चग्रामशब्दार्थेनदीनांपर्वतानांचांतर्भावाद्व्यवधायकत्वाभावादानंतर्यंग्रामयोरुच्यते ग्रामेनाध्येयमित्यत्रतुग्रामशब्दोवास्त
विपरिवृत्तिःशब्दोदेशेध्ययनतात्पर्यात् ततःसीम्न्यप्यधीयतएव मुखप्राण्यंगत्वात्समाहारद्वंद्वैकत्वत्वेनभाव्यंअवचनमितिनञ्समासाश्रयणेधो
नसंगइतरइतिप्रश्नः किमिदमितिनिपातनादिति प्रसंगेनास्यलौकिकशब्दस्यसाधुत्वंक्रियते निपातनानांचबाधकत्वान्मुखनासिकवचनमितिसा
ध्वं अबाधकत्वपक्षेतुभाष्यमेव ईषद्वचनमिति भागस्यमुखेनोच्चारणाद्भागस्यचनासिकया अस्मिन्पक्षेमुखनासिकवचनइत्यपिभवति योहिरूप
उच्यतेसउच्यतएव यथेषुपुरूः शुक्लइव मुखद्वितीयेति मुखसहायेत्यर्थः तत्रनासिकामुखसाहचर्यान्मुखशब्देनोच्यते मुखंचतन्नासिकाचमु
खनासिकासावचनमस्येति मुखोपसंहितेति मुखस्यचनासिकायाश्चांतरालस्थानांतरमेवानुनासिकस्यदर्शयति नत्रसामीप्यान्मुखंचतन्ना
तद्यथाग्रामंप्रविष्टइति अस्तिमनुष्येषुवर्तते तद्यथाग्रामोगतोग्रामआगतइति अस्तिसारण्यकेससीमकेसस्थंडिलकेवर्तते तद्यथाग्रामो
लब्धइति तद्यःसारण्यकेससीमकेसस्थंडिलकेवर्ततेतमभिसमीक्ष्यैतत्प्रयुज्यते अनंतरावितौग्रामाविति सर्वत्रैवतज्जातीयकंव्यवधायकं
भवति मुखनासिकावचनोनुनासिकः किमिदंमुखनासिकावचनइति मुखंचनासिकाचमुखनासिकंमुखनासिकंवचनमस्यसोयंमु
खनासिकावचनः यद्येवंमुखनासिकावचनइतिप्राप्नोति निपातनाद्दीर्घत्वंभविष्यति अथवामुखनासिकमावचनमस्यसोयंमुखनासिका
वचनः अथकिमिदंआवचनमिति ईषद्वचनमावचनं किंचिन्मुखवचनंकिंचिन्नासिकावचनं मुखद्वितीयावानासिकावचनमस्यसो
यंमुखनासिकावचनः मुखोपसंहितावानासिकावचनमस्यसोयंमुखनासिकावचनः ॥ अः ॥ ९ ॥

सिकाचेतुभाष्यांअंतरालंव्यपदिश्यते पदसंस्कारपक्षेचमुखनासिकापदानपेक्षंवचनमित्येतत्पदंलिंगसर्वनामनपुंसकाश्रयेणसं
स्क्रियते पश्चात्स्त्रीत्वस्यपदांतरसान्निध्यानेप्रतीयमानत्वाद्गुहिरंगत्वान्ङीप्प्रत्ययोनभवति पदानुस्त्रीत्वाश्रयेणवचनीतिप्रतिपाद्य
ते तदामुखनासिकावचनीकइतिभवत्येव अत्रचानेकंदर्शनं अनुनासिकस्यपूर्वःपरोवाभागोमुखेनोच्चार्यतेभागोनासिकयातत्रना
सिकावचनभागानुरागवशात्मुखवचनोपिभागोनासिकावचनइवलक्ष्यतेयथासव्यंतेस्यचानुनासिकपकारानुरागात्तकारोनुनासिकइवप्र
प्रतिभाति अत्रचप्रासादवासिन्यायोनास्तिभागस्यैवमुखेननासिकयावोच्चारणात्ननुसमयस्य अन्येषांतुदर्शनंमुखनासिकांतरालस्था
नांतरमेवास्येति अत्रापिनास्तिप्रासादवासिन्यायःयदासर्ववर्णामुखेनोच्चार्यंतेनासिकयाचतदाप्रासादवासिन्यायेनभाष्यकारोमुखग्रहणंप्रत्याचष्टे

३८

सवर्णसंज्ञायामिति इहेप्रयत्नस्यास्येनाविशेषणान्मुखप्रयत्नयोस्तुल्यत्वमिह्वत्स्थानानामपिप्रसंगः भाष्येशकारःप्रत्याहारपाठवशात्प्रतिःअ
भ्रप्रत्याहारेजबगडदानांप्राप्नोतीत्यर्थः शकारस्यतुविवृतत्वात्स्पर्शानांस्पृष्टत्वादप्रसंगएव तत्रश्चकुर्यंत्रइत्यादौसरोऽसरीतिलोपप्रसंगः एवम
पीति आस्येयेषांतुल्योदेशइत्यास्येनदेशोविशेष्यते तत्रव्यभिचाराभावादास्येनदेशस्याविशेषणमयुक्तमित्यर्थः प्रयत्नविशेषणमिति तस्यसं
भवव्यभिचारसद्भावादित्यर्थः बाह्यप्रयत्नव्युदासाद्भवत्वाभ्यंतरग्रहणे स्पृष्टेषत्स्पृष्टताविवृततासंवृतताख्याः बाह्यंहास्यादिति काकल

सवर्णसंज्ञायांभिन्नदेशेष्वतिप्रसंगः प्रयत्नसामान्यात् सवर्णसंज्ञायांभिन्नदेशेष्वतिप्रसंगोभवति जबगडदशां किंकारणं प्रयत्नसामान्या
त् एतेषांहिसमानःप्रयत्नः सिद्धंत्वास्येतुल्यदेशप्रयत्नंसवर्णं सिद्धमेतत् कथं आस्येयेषांतुल्योदेशःप्रयत्नश्च तेसवर्णसंज्ञाभवंतीतिवक्तव्यं
एवमपिकिमास्योपादानेप्रयोजनं सर्वेषांहितत्तुल्यं प्रयत्नविशेषणमास्योपादानं संतिहिआस्याद्बाह्याःप्रयत्नाः तेषामपिताभवंति तेषुस
त्स्वसत्स्वपिसवर्णसंज्ञाभवति केपुनस्ते विवारसंवारौ श्वासनादौ घोषवदघोषता अल्पप्राणतामहाप्राणतेति तत्रवर्गाणांप्रथमद्वितीः
यावितृतकंठाःश्वासानुप्रदानाअघोषाः एकेअल्पप्राणाःअपरेमहाप्राणाः तृतीयाश्चतुर्थाः संवृतकंठानादानुप्रदानाघोषवंतः एकेल्पप्रा
णाःअपरेमहाप्राणाः यथातृतीयास्तथापंचमाःअनुनासिक्यवर्जंअनुनासिक्यमेषामधिकोगुणः एवमप्यवर्णस्यसवर्णसंज्ञानप्राप्नोति
किंकारणं बाह्यंह्यास्यात्स्थानमवर्णस्य सर्वमुखस्थानमवर्णमेकमिच्छंति एवमपिव्यपदेशोनप्रकल्पते आस्येयेषांतुल्योदेशइति व्यप
देशिवद्भावेनव्यपदेशोभविष्यति सिध्यतिसूत्रंतर्हिभिद्यते यथान्यासमेवास्तु ननुचोक्तं सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसंगःप्र
यत्नसामान्यादिति नैषदोषः नहिलौकिकमास्यं किंतर्हितद्धितांतमास्यं आस्येभवमास्यं शरीरावयवाद्यत् ॥ श्रीसांब ॥ ॥
कस्याधस्तादुपजनस्थानमवर्णस्यैकद्वंतिसौतिनेदेशोपिविशेष्यतइतिप्रश्नः सर्वमुखेति अवर्णनिष्पत्तौसर्वमेवमुखंव्याप्रियत
इतिनास्यबाह्यस्थानता एवमपीति अवर्णस्यास्यमेवदेशोनत्वास्येदेशः व्यपदेशिवद्भावेनेति सर्वावस्थायुक्तमास्यमास्यशब्देन
उच्यते देशशब्देनतुविशिष्टावस्थावर्णोत्पादनहेतुःतत्रबुद्धिकृतभेदाश्रयोव्यपदेशः नहीति प्राथमकल्पिकमित्यर्थः
यौगिकस्यलघ्वर्थस्यग्रहणं॥ ॥ + नबाह्यदेशसंभवेतत्सवर्णदायास्येन ३ ॥ ॥ ॥ ॥

श्री ८१

भा· के· तुल्यास्य चत्वारोत्रपक्षाः संभवंतिद्वंद्वगर्भोबहुव्रीहिः त्रिपदोबहुव्रीहिः तुल्यास्यशब्दयोस्तत्पुरुषस्ततोबहुव्रीहिः आस्यप्रयत्नशब्दयोस्तत्पुरुष
स्ततोबहुव्रीहिरिति तत्रद्वंद्वगर्भोबहुव्रीहिरितिपक्षेवार्तिकस्यावतारइतितमेवभाष्यकारःस्वयं दर्शयति तुलयासंमितमितिव्युत्पत्त्यर्थमेवतुलापाठी
यते रूढिशब्दस्त्वयंसदृशपर्यायः यथाप्रवीणः कुशलः प्रतिलोमेत्यनुलोमइत्यवयवार्थाभावः एवंतुल्यशब्देपि किंपुनरास्यमिति किंमुखंअथ

३९

तत्रभवंताल्वादिकंस्थानमितिप्रश्नः लौकिकमिति पशुरपत्यंदेवनेत्यादिवत्प्रसिद्धमित्यर्थः यद्यपिताल्वादिकमपिलौकिकमास्यंतथापितत्रयोग
वशादास्यशब्दोवर्ततइतिसृष्टितिनतत्प्रसिद्धमितिमुखमेवप्रसिद्धत्वाल्लौकिकमुक्तं तस्येवचप्राथम्याद्ग्रहणंयुक्तमित्यर्थः ओष्ठादितिकाकलकंनाम
ग्रीवायामुन्नतप्रदेशः कथंपुनरिति यदिनिमित्तवशात्प्रवर्ततेनतत्ताल्वादिष्वपिप्रवर्तिष्यतइतिप्रश्नः अस्यंत्यनेनेति सत्यपिनिमित्तेरूढिवशा

तुल्यास्यप्रयत्नंसवर्णं तुलयासंमितंतुल्यं आस्यंचप्रयत्नश्चास्यप्रयत्नं तुल्यास्यंतुल्यप्रयत्नंचसवर्णसंज्ञंभवति किंपुनरास्यं
लौकिकमास्यं ओष्ठात्प्रभृतिप्राक्काकलकात् कथंपुनरास्यं अस्यंत्यनेनवर्णानित्यास्यं अन्नमेतदास्यंदतइतिवास्यं अथकः

प्रयत्नः प्रयतनंप्रयत्नः प्रपूर्वाद्यततेर्भावसाधनोनङ्प्रत्ययः यदिलौकिकमास्यंकिमास्योपादानेप्रयोजनंसर्वेषांहितत्तुल्यंभ
वति वक्ष्यत्येतत् यत्नप्रयत्नविशेषणमास्योपादानमिति ॥ श्रीः ॥शिव ॥

मुखएववर्तते नताल्वादिष्वित्यर्थः कृत्यल्युटइतिकरणेण्यत् असनमत्रजातिस्फोटपक्षेऽभिव्यक्तिः व्यक्तिस्फोटपक्षेतूत्पत्तिः अन्नमेतदि
ति आङ्पूर्वात्स्यदतेःअन्येष्वपिदृश्यतइतिडः एतदास्यंकर्मअन्नंकर्तृआस्यंदतेद्रवीकरोति अन्नप्रक्षेपणेमुखस्यद्रवत्वोत्पादनात् अथकः
प्रयत्नइति किंप्रयतनंप्रयत्नः अथप्रारंभोयत्नस्येतिप्रश्नः भावसाधनइति भावविधेयेनङ्प्रत्ययः क्रियते तेननङः शब्दस्येत्यभावः साधनंभवति

३९

किमास्योपादानइति आस्यएवसर्ववर्णानांनिष्पादनादितिभावः नासिकापिनबाह्यावर्णाभिव्यक्तिनिमित्तंकिंतर्हि आस्यांतर्भूतमेवतत्तमस्तिप
णएवचर्मवत् तत्संबंधारेखानासिका तस्यांवायवभिघाताद्वर्णोत्पत्तिः विसर्जनीयस्यैकीयमतेनोरस्यत्वात्सावर्ण्याभावेपिनदोषः वक्ष्य
तीति नास्यपरिक्षावसंरइतिभावः श्रीः श्रीः शि व सां ब श्रीः ॐ नमोभगवतेवासुदेवाय छ श्रीः
२९

सल्वेवेति झरो झरीत्येवान्यथा ब्रूयात् यथासंख्यनिरासार्थं हि तत्र सवर्णग्रहणं कृतं शिण्ढीत्यत्र उकारस्य ढकारे परतो लोपार्थं यदि च यत्र सर्वं समानं तत्रैव सव
र्णसंज्ञा स्यात् उकारढकारयोर्भेदात् सवर्णत्वं नास्तीति सवर्णग्रहणमनर्थकं स्यात् सर्वमिति वर्गाणां प्रथमद्वितीयादयस्यां शिक्षायां पठितमघोषत्वादि करणं प २
तुभिन्नं वर्गाणां स्पृष्टत्वादूष्मणां च विवृतत्वात्तस्मात् सवर्णत्वे निशष्ठप्रनिष्ठ इति निस्थानमधुलिट्स्थानमिति झरो झरीति लोपः प्राप्नोतीति छकतानि
ध्मातमिति प्रादिसमासः अनेन विवेति शकारस्य द्विर्वचनं तुल्यआस्य इति तद्धितान्तमास्यशब्देन स्वांगवाच्येव त्यक्तर्धमस्तकादिति अलुक् भवति तद्धि
तान्तास्यशब्दाश्रयणसामर्थ्यादेवास्य इत्येकत्वं विवक्ष्यते तेनैकैकस्मिन्नेव स्थाने पृथक्तुल्यः प्रयत्न इत्याश्रीयते अथवेति मयूरव्यंसकादित्वात् समस्य
तो न परस्तत्पुरुषः तस्येति यत्रतोर्नित्याभिसंबंधात् द्वाह्यो यस्येति अन्यथा वर्णान्तरापेक्षया तुल्यास्यप्रयत्नत्वेन सवर्णत्वे लब्धे तदाश्रयमन्यस्यापिका

सत्येव हि भेदे सवर्णसंज्ञया भवितव्यं कुत एतत् भेदाधिष्ठाना हि सवर्णसंज्ञा यदि हि यत्र सर्वं समानं तत्र स्यात् सवर्णसंज्ञावचनमनर्थकं स्यात् यदि तर्हि
सति भेदे किंचित् समानमिति कृत्वा सवर्णसंज्ञा भविष्यति शकारछकारयोः षकारढकारयोः सकारथकारयोः सवर्णसंज्ञा प्राप्नोति एतेषां हि स
र्वमन्यत् समानं करणवर्जं एवं तर्हि प्रयतनं एव प्रयत्नस्तदेव हि तद्धितान्तमास्यं न लयं द्वंद्वः भास्यं च प्रयत्नश्चास्य प्रयत्नमिति किं तर्हि त्रिपदो बहु
व्रीहिः तुल्यआस्ये प्रयत्न एषामिति अथवा पूर्वस्तत्पुरुषस्ततो बहुव्रीहिः तुल्यमास्ये तुल्यास्यः तुल्यास्यः प्रयत्न एषामिति अथवा परस्तत्पु
रुषः ततो बहुव्रीहिः आस्ये प्रयत्नः आस्यप्रयत्नः तुल्य आस्यप्रयत्नो येषामिति तस्य तस्येति तु वक्तव्यं किं प्रयोजनं यो यस्य तुल्यास्यप्रयत्नः
स तस्य सवर्णसंज्ञो यथा स्यात् अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञो मा भूदिति तस्यावचनं वचनप्रामाण्यात् तस्येति न वक्तव्यं अन्यस्य
तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः कस्मान्न भवति वचनप्रामाण्यात् सवर्णसंज्ञावचनसामर्थ्यात् यदि ह्यन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्ण
संज्ञः स्यात् सवर्णसंज्ञावचनमनर्थकं स्यात् । संबंधिशब्दैर्वा तुल्यं संबंधिशब्दैर्वा पुनस्तुल्यमेतत् ॥ ॥ ॥

र्थं प्राप्नोति स्वराणांभस्तु रेफोष्मणां निवृत्त्यर्थः स्यात् तस्यावचनमिति तस्येत्ययमनुकरणशब्दः तस्येत्यस्यावचनमित्यर्थः सवर्णसंज्ञावचन
मिति न च रेफोष्मणां निवृत्त्यर्थं वचनं रेफस्यापि रेफः सवर्णो भवत्येव एवमष्वप्युदाहार्यं एवं वचनसामर्थ्याद्दोषं परिहृत्य शाब्दन्यायेन परिह
र्तुमाह संबंधिशब्दैरिति ॥ ॥ ॥

भा. कै. ४०

स्थानमिति तालव्यादिः करणमिति स्पृष्टतादि जिह्वाया अग्रोपाग्रमध्यमूलानि वा पृथक्संप्रयत्नग्रहणं न कर्तव्यं तस्याप्यास्ये भवत्वादास्य
ग्रहणेन ग्रहणात् सत्यमेतत् प्रत्येकं तु व्यापारनिरासार्थमुभयोरुपादानं तेन द्वयोस्तुल्यत्वे सवर्णसंज्ञा भवति अविशेषितमिति आस्ये
नेत्यर्थः द्वंद्वपक्ष एवात्र स्थित इति प्रश्नः ततश्च बाह्याः प्रयत्ना न स्युः प्रारंभो यत्नस्येति तत्र पूर्वं स्पृष्टतादयश्चत्वारः पश्चा
च्छ्वासनादघोषत्वादि स्थानप्राणात्यवायो विवारादयो बाह्या एकादश प्रयत्ना उत्पद्यन्ते एवमपीति संध्यक्षरेषु प्रथमभागस्याका
रेण सादृश्यात् सवर्णसंज्ञाप्राप्तिरिति प्रश्नः प्रश्लिष्टावर्णाविति नात्र भागविवेकोऽस्ति पांसूदकवदित्यर्थः अवर्णस्येति विभागो ॥

किं पुनरास्ये भवं स्थानं करणं च एवमपि प्रयत्नः अविशेषितो भवति प्रयत्नश्च विशेषितः कथं न हि प्रयतनं प्रयत्नः किं
तर्हि प्रारंभो यत्नस्य प्रयत्नः यदि प्रारंभो यत्नस्य प्रयत्नः एवमपि अवर्णस्य एङोश्च सवर्णसंज्ञा प्राप्नोति प्रश्लिष्टावर्णावे
तौ अवर्णस्य तर्हि ऐचोश्च सवर्णसंज्ञा प्राप्नोति विवृततरावर्णावेतौ एतयोरेव तर्हि मिथः सवर्णसंज्ञा प्राप्नोति नैतौ
तुल्यस्थानौ उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोति अभेदका उदात्तादयः अथवा किं न एतेन प्रारंभो य
त्नस्य प्रयत्न इति किं तर्हि प्रयतनमेव प्रयत्नः तदेव च तद्धितान्तमास्यं यत्समानं तदाश्रयिष्यामः किं सति भेदे सवर्णसंज्ञा [illegible]

त्रस्कलक्ष्य इति प्रश्नः ततनाथमित्यत्र यस्येति लोपप्रसंगः एतयोरपीति ततश्चेत ऐ इत्यौकारेऽपि स्यात् भाष्यमा
नस्यापि क्वचित् सवर्णग्रहणदर्शनात् अभेदका इति लिंगेन तत्प्रतिपादितं न शास्त्रे एतत्स्वशब्दोपादानमंतरेण का
र्येषु भिन्नत्वं इति तेन प्रारंभभेदेऽप्युदात्तादीनां मिथः सवर्णसंज्ञा भविष्यति यत्समानमिति स्पृष्टत्वस्य समानत्वात् अर्णो
बाह्यप्रयत्नस्य भेदेऽपि सवर्णसंज्ञा भविष्यति किं सतीति स्पृष्टत्वाद्यभेदाद्विवारादिभेदेऽपि यथा भवति तथा स्पृष्टतादिभेदेऽपि विवा

[illegible] ४०

जो के ३

तच्चावश्यमिति ऌत्यपि ऋवावचनं ऌवावचनमिति ब्रुवता समनयोर्वक्तव्यं अन्यथा विधानमात्रमनयोः स्यात् नान्यत्कार्यं प्लुतः सति तच्चेताभ्यां त्रि
मात्रयोरपि सावर्ण्याद्ग्रहणे सति प्लुतसंज्ञा भवतीति प्लुतसिद्धिः किंपुनरिति एकैकस्मिन्संहितायां शाकलाभावपक्षे रूपद्वयं साध्यं तच्चोभयथापि सि
ध्यति तत्र सवर्णसंज्ञायामसत्यां यथा सिध्यति तथा पूर्वमेवोक्तं सत्यां तु यथा सिध्यति तथोच्यते इह द्वयोर्ऋकारयो रेफद्वययुक्तत्वादिव तत्वाच्च कदा
चिद् रेफद्वययुक्त ऋकारो भवति कदाचिद्रहितऋकारः ऌकारेपि कदाचिट्टकारांतरतम ऋकारः कदाचित् ऌकारांतरतम ऌकार इति साम्यमुभयोः पक्ष
योर्लपरत्वमिति व्याख्यास्यामीत्यर्थः रपर इत्यत्र र इति लक्षणः ऌकाराकोऽपरो भवति ऌकारस्याण् ऌपर इति असत्यामिति असत्यां सवर्णसंज्ञा
×रेण प्रत्याहार आश्रीयते तत्रांतरतम्या ट्टकारस्याप्न×५

तच्चावश्यं वक्तव्यं प्लुतो यथा स्यात् होतॢकारः होतृकारः होतॢकार होतॢलकारः होतॢलकारः होतॢकार इति किंपुनरत्र ज्यायः सव
र्णसंज्ञावचनमेव ज्यायः दीर्घत्वं चैवं हि सिद्धं भवति अपि च ऋकारग्रहणे ऌकारग्रहणं संनिहितं भवति यथेह भवति ऋसकः खट्वऋश्यः
मालऋश्यः इदमपि सिद्धं भवति खट्वॢकारः मालॢकार इति वासुप्यापिशलेः उपकारीयति उपाकारीयति इदमपि सिद्धं भवति

उपल्कारीयति उपाल्कारीयतीति यदि तर्हि ऋकारग्रहणे ऌकारग्रहणं संनिहितं भवति उरण्रपरः ऌकारस्यापि रपरत्वं प्राप्नोति ऌ
कारस्य लपरत्वं वक्ष्यामि तच्चावश्यं वक्तव्यं असत्यां सवर्णसंज्ञायां विध्यर्थं तदेव सत्यां रेफबाधनार्थं भविष्यति इह तर्हि रषाभ्यां नो णः
समानपद इत्यत्र ऋकारग्रहणं चोदितं मातृणां पितृणामित्येवमर्थं तदिहापि प्राप्नोति क्लृप्यमानं पश्येति अथासत्यामपि सवर्णसंज्ञायां
हैकस्मान्न भवति क्लृप्यमानं पश्येति चुटुतुलशर्व्यवाये नेति वक्ष्यामि अपर आह त्रिभिश्च मध्यमैर्वर्गैर्लशसैश्च व्यवाये नेति वक्ष्या
मीति वर्णैकदेशाश्च वर्णग्रहणेन गृह्यंत इति योसौ ऌकारे लकारः तदाश्रयः प्रतिषेधो भविष्यति यद्येवं नार्थो रषाभ्यां णत्वे ऋकार
ग्रहणेन वर्णैकदेशा वर्णग्रहणेन गृह्यंत इति योसावृकारे रेफस्तदाश्रयं णत्वं भविष्यति
यां उरण्रपर इत्यत्र ऌकारग्रहणं कर्तव्यमिति क्लृप्यमानमिति कृत्यचः इति णत्वप्रसंगः त्रिभिश्चेति पूर्वस्मादयं विशेषः पूर्वत्र शरंतर्भूतोपि
षकारः साक्षाण्णत्वनिमित्तत्वाद्व्यवधायकत्वेन नाश्रीयते इह तु तस्यानुपादानमेव वर्णैकदेश इति अवयवस्य स्वव्यापारानिवर्तनात् अग्र
हणपक्षे तु क्षुभ्नादिष्वाकृतिगणत्वाण्णत्वाभावः ऋदितां ऌदितां च भेदेनानुबंधनिर्देशाद्भेदेन चोपादानादनुबंधकार्येषु परस्परग्रहणा

भा॰के॰ संबंधिशब्दावेति तुल्यास्यप्रयत्नशब्दस्य संबंधिशब्दत्वात्समानार्थोपि प्रदेशवाक्येष्वपात्तः सवर्णशब्दः संबंधिशब्दः यथा तुल्यायकन्यादानं तथैकस्केन

४१ शब्देन तुल्यायप्रालेणः कन्यां ददाति अपि त्वात्मना तथेदापीत्यर्थः ऋकारऌकारयोरिति स्थानभेदान्न प्राप्नोतीत्यारंभः अत्र चानयोरेवमुक्तत्वान्मिथः सवर्णसंज्ञा
विज्ञायते न तु तयोरन्येन सहेति बोध्यं वक्ष्यत्येतदिति तुल्यलवावचनमित्यत्र दीर्घह्रस्वमनुवर्तते तत्र ऌ ति ऌ शब्दे विकल्पिते अप्राप्त एव पक्षे दीर्घो भविष्यति
सवभवन ऌवर्णस्य दीर्घाभावादवर्णस्यांतरतमो दीर्घ ऋकारो भविष्यति तवावर्ण इति यथाविधायसवर्णसंज्ञा न स्यात अग्मानस्य ऌ ति ऌकार स्यात्
यथा दध्नृकार इति तस्माद्विधेया सवर्णसंज्ञा ऋत इति वक्ष्यामीति ऋकारस्य ऋकार एव सवर्ण इति ऋत्वेव भविष्यति ततः ऌ ति ऋत इत्येव इदं वा सवर्णार्थं तेन ऌ मि
रूपद्वयं सिद्धं तत्रासंहितायां ऋकारे होतृकार इति रूपं संहितायामपि ऋत्यक इति शाकलप्रकृतिभावे एतदेव रूपं शाकलाभावे होतृकारः होतॢकार
इति रूपद्वयं ऌकारे संहितायां संहितायां च शाकले होतॢकार इति रूपं शाकलाभावे तु होतॢकारो होतृकार इति रूपद्वयं तच्चावक्तव्यमिति द्वावप्येतौ दीर्घौ ऌ

तद्यथा संबंधिशब्दाः मातरि वर्तितव्यं पितरि शुश्रूषितव्यमिति न चोच्यते स्वस्यां मातरि स्वस्मिन्वा पितरीति संबंधाच्चैतद्गम्यते या यस्य माता यश्च यस्य
पितेति एवमिहापि तुल्यास्यप्रयत्नं सवर्णमित्यत्र संबंधिशब्दावेतौ तत्र संबंधादेतद्गंतव्यं प्रत्यासत्तिर्यत्तुल्यास्यप्रयत्नं तत्प्रति तत्सवर्णसंज्ञं भवतीति
ऋकारऌकारयोः सवर्णविधिः ऋकारऌकारयोः सवर्णसंज्ञा विधेया होतॢकारः होतृकारः किं प्रयोजनं अकः सवर्णे दीर्घ इति दीर्घत्वं यथा स्यात् नै
तदस्ति प्रयोजनं वक्ष्यत्येतत् सवर्णदीर्घत्वे ऋति ऋवावचनं ऌति ऌवावचनमिति तत्सवर्णे यथा स्यात् इहमा भूत् दध्नृकारः मध्वृकार इति यदेतत्सव
र्णदीर्घत्वे ऋतीति एतदृत इति वक्ष्यामि ततः ऌति ऌकारे परतः ऌकारो भवतीति ऋत इत्येव तन्न वक्तव्यं भवति अवश्यं तदकृव्यं उँकालोऽज्झस्व
दीर्घप्लुतसंज्ञो भवतीत्युच्यते न च ऋकारऌकारौ वा अज्झस्ति ऋकारस्य ऌकारस्य वा ह्रस्वं वक्ष्यामि ॥ ॥

इति तत्र ऋकारे कदाचिद् ऋ इति दीर्घः कदाचित् ऋ इति ऌकारेपि ऋ ऌ इत्येतौ भविष्यतः सत्यां सवर्णसंज्ञायामिति भावः नवेति अर्धतृतीयमात्रत्वादि
ति केचिदाहुः अन्ये तु ईषत्स्पृष्टकरणत्वादनयोः ऋकारऌकारयोश्च विवृतत्वात्ताभ्यां तयोरग्रहणादनच्त्वमाहुः अच्त्वं वक्ष्यामीति सत्यच्त्वे दीर्घसंज्ञा त
योर्भविष्यति येषां तु मतमर्धतृतीयमात्रावेताविति तेषां मते सत्यप्यच्त्वे द्विमात्रत्वाभावादेतयोर्दीर्घसंज्ञा न प्राप्नोति तस्माद्द्विमात्रावेतावभ्युप
गंतव्यौ ॥ ॥ ४१

यथैव तर्हीति। इकारस्य ग्रहणाद्वा यापकत्वं दृष्टमित्यर्थः। सवर्णे दीर्घत्वमपि प्राप्नोतीति प्रश्नः। अनच्त्वमेव वाक्यापरिसमाप्त्या साध्यते ननु प्रयत्नभेदेनेत्याह। अपर आहेति। अस्मिन्पक्ष इति। एकत्र हि साध्ये हेतुविकल्पो भवति। इह तु साध्यभेदः। सिद्धमनच्त्वं हेतुरनच्त्वस्य वाक्यापरिसमाप्तिः। एवं त्विति। अस्तु वा ग्रहणाधिकारेण शकारस्येति वाक्यशेषाध्याहारात्प्रतिज्ञाविकल्पो वा वाशब्द इत्यर्थः। ननु चोक्तमिति। श्रुतिकृतं भेदमभ्युपगम्योच्यते। स एष कथं भेदो न स्यादित्यत्र वक्ष्यति भेद एवेत्यर्थः। इतर आह। स्याद्भेदो यदि नित्यो लोपः स्यात्। विभाषा तु स लोप इति। ततो नास्ति भेद इत्यर्थः। द्विर्वचनमपि विभाषा परो नु नास्ति केनुना

किं पुनरिदं वाक्यापरिसमाप्तेरिति वर्णानामुपदेशस्तावत् उपदेशोत्तरकाला इत्संज्ञा इत्संज्ञोत्तरकाल आदिरन्त्येन सहेतेति प्रत्याहारः प्रत्याहारोत्तरकाला सवर्णसंज्ञा सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्य चाप्रत्यय इति सवर्णग्रहणं। एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति नत्वत्र। इकारः शकारं गृह्णाति यथैव तर्हि इकारः शकारं न गृह्णाति एवमीकारमपि न गृह्णीयात् तत्र को दोषः कुमारी ईहते कुमारीहते अकः सवर्णे दीर्घत्वं न प्राप्नोति। नैष दोषः यदेतदकः सवर्णे दीर्घ इति प्रत्याहारग्रहणं तत्र इकार ईकारं गृह्णाति शकारं न गृह्णाति। अपर आह। अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्। अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधो न प्राप्नोति। किं कारणं अज्झल्त्वात्। अच्चैव हि शकारो हल् च कथं तावदच्त्वं इकारः सवर्णग्रहणे न शकारमपि गृह्णातीत्येवमच्त्वं हल्त्वं चोपदेशाद्धल्त्वं तत्र को दोषः तत्र सवर्णलोपे दोषः तत्र सवर्णलोपे दोषो भवति परश्शतानि कार्याणि झरो झरि सवर्णे इति लोपो न प्राप्नोतीति। सिद्धमनच्त्वात् सिद्धमेतत् कथं अनच्त्वात् कथमनच्त्वं वाक्यापरिसमाप्तेर्वा। उक्ता वाक्यापरिसमाप्तिः। अस्मिन्पक्षे य एते तदसमर्थितं भवति। एतच्च समर्थितं कथं अस्तु वा शकारस्य शकारेण सवर्णसंज्ञा या मा भूत्। ननु चोक्तं परःशतानि कार्याणि झरो झरि सवर्णे इति लोपो न प्राप्नोतीति मा भूल्लोपः। ननु च भेदो भवति सति लोपे द्विशकारं असति लोपे त्रिशकारं नास्ति भेदः। असत्यपि लोपे द्विशकारमेव कथं विभाषा द्विर्वचनं। एवमपि भेदः असति लोपे कदाचिद्द्विशकारं कदाचित्त्रिशकारं सति लोपे द्विशकारमेव। स एष कथं भेदो न स्यात्। यदि नित्यो लोपः स्यात्। विभाषा तु स लोपः। यथा अभेदस्तथास्तु। इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणम०

सिकोविस्तलोपेत्यनुवर्तनात्। लोपो विभाषा झयो होऽन्यतरस्यामित्यतोऽन्यतरस्यामित्यनुवर्तनादित्यर्थः। इति महोपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥ श्रीसांबसदाशिवार्पणमस्तु॥ ७ ॥ ७

भा० के० ४२

नाज्झलौ। अकारहकारयोरिकारशकारयोश्च तुल्यस्थानप्रयत्नत्वात्सवर्णसंज्ञा प्राप्ता निषिध्यते अत एव च निर्देशाद्वा चाम्भिर्दलां हल्भिः सवर्णत्वनिषेधः। अज्झलाविति प्रकृतत्वात्सवर्णसंज्ञाया इति बोध्यम्। शकारप्रतिषेध इति द्विवचनान्तस्य समासभेदाधिष्ठानत्वात्सवर्णसंज्ञायाः इकार इति अत्र हि सूत्रे इतीकारो गृह्यमाणः सवर्णं गृह्णातीति शकारस्यापि ग्रहणमस्ति स्वात्मनि क्रियाविरोधात् सूत्रेणैतत्सूत्रे इदं न व्याप्रियत इति सवर्णत्वनिषेधः शकारशकारयोर्नास्ति यस्येति चेत्यादौ तु शकार इकारेण गृह्यते अनेन सवर्णत्वनिषेधात् इह तु स्वात्मनि व्यापारो नास्ति अस्ति च परेण सवर्णत्वमिकारशकारयोरिति भावः। प्रकल्प्य चापवादविषयमिति न्यायोऽत्र नास्ति अपवादत्वस्यैवासंपत्त्या। परश्शतानीति शतात्पराणि शताधिकानीत्यर्थः। कर्तृकरणे कृता बहुलमिति बहुलवचनात्समासः। पारस्करादित्वात्सुडागमः। सकारस्य श्चुत्वं। अनचि चेति द्विर्वचनं। झरो झरीति लोपाप्रसंगात्त्रिशकारसंयोगश्रवणप्रसंगः। शरोऽचि न चेति तत्र त्विकारेण शकारो न गृह्यते अनेन सवर्णत्वनिषेधादित्यस्ति शकारस्य द्विर्वचनं सिद्धमनच्त्वादिति सूत्रप्रत्याख्यानसाधारणमुक्तं प्रयत्नभेदादज्झलोः सवर्णसंज्ञायाः प्राप्तिरेव नास्तीत्यर्थः। वाक्या

नाज्झलौ। अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्। अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति किं कारणं अज्झल्त्वात् अच्चैव हि शकारो हल् च कथं तावदच्त्वं इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वं हल्त्वं चोपदेशाद्धल्त्वं तत्र को दोषः तत्र सवर्णलोपे दोषः तत्र सवर्णलोपे दोषो भवति परःश्शतानि कार्याणि झरो झरि सवर्णे इति लोपो न प्राप्नोति सिद्धमनच्त्वात् सिद्धमेतत् कथं अनच्त्वात् कथमनच्त्वं स्पृष्टं स्पर्शानां करणम् ईषत्स्पृष्टमन्तस्थानां विवृतमूष्मणाम् ईषदित्यनुवर्तते स्वराणां च विवृतम् ईषदिति निवृत्तम् वाक्यापरिसमाप्तेर्वा वाक्यापरिसमाप्तेर्वा पुनः सिद्धमेतत् — क२पं ३

परिसमाप्तेरिति भवतु वा तुल्यास्यप्रयत्नत्वं तथापीकारेण शकारो न गृह्यते सवर्णसंज्ञाया अस्मिन्सूत्रे अनिष्पत्तेः अस्मिंश्च सूत्रे निष्पन्ने सत्यपवादविषयपरिहारेणेष्टविषये सवर्णसंज्ञा प्रवर्तते न त्वेतत्सूत्रानिष्पत्त्यवस्थायां ततश्चाङ्गोपदेशो संज्ञा प्रत्याहारसवर्णत्वेषु निष्पन्नेष्वणुदित्सवर्णस्य चेत्येतत्सूत्रं वाक्यादिषु प्रवर्तते न त्वङ्गोपदेशादिषु नापि स्वात्मनि ततश्चात्र सूत्रे गानिष्पत्त्या अणुदित्सूत्रस्याप्रवर्तनादिकारेण शकारस्याग्रहणात्सवर्णत्वं शकारयोः सिद्धम्। एवमीकारोऽप्यत्र इकारेण न गृह्यत इतीकारशकारयोः सवर्णत्वमस्तीति कुमारी शेते इत्यत्र सवर्णदीर्घत्वं प्राप्तमचीत्यनुवृत्त्या निवार्यते तच्च ग्रहणकशास्त्रं प्रवर्तते केनेति विषयविभागप्रदर्शनाय चोद्यं करोति श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीसांबसदाशिवाय नमः जयति॰ ४२

उपस्थित अनार्षइतिकरणः अग्नीइत्यत्र प्लुताश्रये प्रकृतिभावे प्रतिषिद्धे प्रगृह्याश्रयः प्रकृतिभाव इष्यते तत्र तदुपतिष्ठतीति यत्र प्रगृह्यसं
ज्ञानास्ति स प्लुताश्रयप्रकृतिभावप्रतिषेधविषयः देवदत्त३ इति देवदत्तेति यदि पुनरिति ननु व्यक्तिपक्षाश्रयणात्प्लुतानां नासि
द्धतिन पुनस्तत्परत्वात् अयमत्राशयः आकृतिपक्षे आश्रीयते दीर्घोच्चारणाच्च प्रयत्नाधिक्यात् ह्रस्वानां न भविष्यति प्लुतानां तु प्रवृ
त्तिष्यतइति एवमपीति अयंभावः आकृतिपक्षे यथा ह्रस्वानां प्रयत्नाधिक्यान्न भवति तथा दीर्घोच्चारणसामर्थ्याद्धि प्लुतस्यैकस्य
वाकृतिग्रहणात इति प्लुतानां न स्यात् यथास्य लंगामानं न येत्युक्ते न कृष्णस्यानयनं भवतीत्याकृतिपक्षेपि विशिष्टस्यैव दीर्घव्यक्ति

किंपुनः प्लुतस्य प्रगृह्यसंज्ञावचने प्रयोजनं प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात् माभूदेवं प्लुतः प्रकृत्येत्येवं भविष्यति नैवं शक्यं उप
स्थिते हि दोषस्स्यात् अप्लुतवदुपस्थित इत्यत्र पठिष्यतीत्याचार्यः वद्वचनं प्लुतकार्यप्रतिषेधार्थं प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषे
धप्रसंगोन्येन विहितत्वादिति तस्मात्प्लुतस्य प्रगृह्यसंज्ञोच्यते या प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात् यदि पुनर्दीर्घाणामत
परत्वात्प्रगृह्यसंज्ञोच्यते एवमप्येकार एवैकः सवर्णान् गृह्णीयात् ईकारऊकारौ न गृह्णीयातां किंकारणं अनण्त्वात् यदि पु
नर्ह्रस्वाणामतपराणां प्रगृह्यसंज्ञोच्यते नैवं शक्यं इत्यपि प्रसज्येत अकुर्वहि अत्र अकुर्वह्यत्रेति तस्माद्दीर्घाणामेवतप
राणां प्रगृह्यसंज्ञावक्तव्या दीर्घाणां चोच्यमाना प्लुतानां न प्राप्नोति एवं तर्हि किन्न एतेन यत्नेन यत्सिद्धः प्लुतः स्वरसंधि
ष्विति असिद्धः प्लुतः तस्यासिद्धत्वात्तत्काला एव भवति कथं यत्तज्ज्ञापकमुक्तं प्लुतप्रगृह्या अचीति प्लुतभावी प्रकृत्ये
त्येवमेतद्विज्ञायते कथं यत्तत्प्रयोजनमुक्तं क्रियते न्यास एव अप्लुतवदुपस्थिते इति ॥ ॥ ॥ ॥

गृह्यते तथा चानएत्वाद्दीर्घाणां ह्रस्वानां न स्यातां यदि पुनरिति ह्रस्वस्य चयदिकारोपि ह्रस्वशब्देनाभिधीयत इति ह्रस्वा
नामिति गुरुवचनं तत्र ह्रस्वनिर्देशो एत्वादाकृतिपक्षे वा प्रयत्नाधिक्याभावाद्भिन्नकालानां ग्रहणं स्तीत्यर्थः प्लुतभा
वीति प्लुतो भावी यस्य स प्लुतभावी स्थानी प्रकृतः तस्यैव प्रकृतिभावः ननु प्लुतस्यासिद्धत्वात्तस्याप्यप्लुतभावित्वात् प्लुतत्वं यदि शंक
यं न भवते नैष दोषः प्लुतो स्य भावीति बुद्ध्या प्रकल्पनमेतत् न च तत्र प्लुतस्यासिद्धत्वं अपवादप्लुतोपि इत्यस्य यमपि विषयत्वे नस्या
त् ॥ ॥

ईदूदेद्द्विवचनं प्रगृह्यं किमर्थमिति ईदूतोरनण्त्वाद्भिन्नकालनिवृत्त्यर्थं नोपपद्यते तपरत्वं उदात्तादीनामभेदकत्वाद्गुणान्तरयुक्तानां सवर्णानां ग्रहणार्थमपि
नोपपद्यते अतिप्रसक्तिपरिहारोच्चारणात्प्रयत्नाधिक्याद्ध्रस्वानां न भविष्यति प्लुतानां चैष्यत एवेति व्याख्यातं प्लुतं तत्परत्वं करोतीति प्रश्नः तपर इति व्य
क्तिपक्षे भिन्नकालत्वगुणा इति भावः केषामिति प्लुतानामग्रहणप्रसंगात्प्रश्नः उदात्तेति क्वचिदनुनासिकग्रहणमप्यस्ति तद्गुणप्रसंगे नोच्चारितं न हि प्र
गृह्योनुनासिकः संभवति अणोप्रगृह्यस्यानुनासिक इति निषेधात् प्लुतानां चेति व्यक्तिपक्षाश्रयणाद्यं दोषो न तु तत्परत्वात् असिद्ध इति शा
स्त्रासिद्धत्वाश्रयणात्प्लुतत्वबुद्ध्या यस्मात्प्रगृह्यत्वे विधीयमाने द्विमात्रविषयात्बुद्धिः प्रवर्तते तथा हि वक्ष्यति असिद्धवचनं उत्सर्गलक्षणभावार्थ

ईदूदेद्द्विवचनं प्रगृह्यं किमर्थमीदादीनां तपराणां प्रगृह्यसंज्ञोच्यते तपरत्वात्तत्कालस्येति तत्कालानां सवर्णानां ग्रहणं यथा स्यात् केषां
उदात्तानुदात्तस्वरितानां अस्ति प्रयोजनमेतत् किं तर्हीति प्लुतानां तु प्रगृह्यसंज्ञा न प्राप्नोति किं कारणं अतत्कालत्वात् न हि प्लुता
स्तत्कालाः असिद्धः प्लुतः तस्यासिद्धत्वात्तत्काला एव भवंति असिद्धः प्लुतः स्वरसंधिषु कथं ज्ञायते सिद्धः प्लुतः स्वरसंधिष्विति य
दयं प्लुतः प्रकृत्येति प्लुतस्य प्रकृतिभावं शास्ति कथं कृत्वा ज्ञापकं सतो हि कार्यिणः कार्येण भवितव्यं किमेतस्य ज्ञापने प्रयोजनं
अप्लुतवदुपस्थितेत्येतन्न वक्तव्यं भवति किमतो यत्सिद्धः प्लुतः स्वरसंधिषु संज्ञाविधावसिद्धः तस्यासिद्धत्वात्तत्कालाएव भवं
ति संज्ञाविधौ चासिद्धः कथं कार्यकालं हि संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यं प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भ
वति ईदूदेद्द्विवचनं प्रगृह्यमिति ॥ ॥ ॥ ॥ श्रीसांबसदाशिव ॥ ॥

मादेशलक्षणप्रतिषेधार्थं चेति यदयमिति असिद्धश्चेत्प्लुतः प्रकृत्येत्येव माश्रयणायोगात्कार्यित्वेनाश्रयणादसिद्धत्वाभावोनुमीयते सामान्येन स्वरसं
धिप्रकरणविषयं सिद्धत्वं ज्ञाप्यते न तु प्रकृतिभाव एव यथा रोरुत्वे एवं सोत्सर्गं सापवादं च प्रकरणमिति प्रकृतिभावविधिग्रहणं हेतुके सिद्धत्वमुच्यते किमे
तस्येति प्रकृतिभाव एवाश्रयात्सिद्धत्वमस्त्विति प्रश्नः इतरो लाघवं दर्शयति अप्लुतादिति सिद्धे हि प्लुते अतो नीति तपरत्वादेवोक्तप्रसंगः किमतइति
यथोद्देशे संज्ञापरिभाषं प्रगृह्यसंज्ञा स्वरसंधिप्रकरणमध्यपतिता न भवतीति प्रश्नः कार्यकालमिति कार्यार्थत्वाद्गुणानां कार्यस्यैव प्रधानत्वात्प्र
धानदेशत्वस्य न्याय्यत्वादित्यर्थः ॥ ॥ श्रीजदेवु ॥ ॥ श्रीसांबु ॥ ॥ श्रीहरंबु ॥ ॥ ॥ ७ ॥ ॥

दोषान्तरं दर्शयति पक्षान्तरं निराकर्तुमाह ... इत्यादि ...

इदन्तं द्विवचनमीवेचेनान्तमिति चेत् कुप्रतिषेधः इदन्तं तद्विवचनान्तमिति चेत् ...

वतीत्यर्थः ईदूदेदिति ... कुमार्यगारमित्यत्र ...

यम

कार्यकालपक्षमाश्रित्य एवमपीति ततश्चाणादेरस्य ... नास्ति कृ प्रतिषेधः ...

एवमपि यस्मिन् ... प्रगृह्यसंज्ञा ... इति ...

मेव

... इति तस्य विधिः ... द्विवचनमिति ...

... भवतीत्येवमेकस्यापि भविष्यति अथ वेव वक्ष्यामि ईदूदेत् द्विवचनान्तमिति ॥ ॥

... इति द्विवचनं न भवति ... द्विवचनान्तमिति ...

वक्ष्यते वेत्याद्याह इति नैतद्दूषणं बोध्यं ॥

विप्रतिषेधाद्धि अयावेकादेशप्रतिषेधो वाच्यः विप्रतिषेधाद्धि प्रगृह्यसंज्ञेति विकल्पार्थो वाशब्दः नैकप्रयोजनमिसादिस्तु परिहारो भाष्यकारेणोक्तो न वा
निर्दिकारणे तिनतरपक्षो विकल्पः नैष युक्त इति दृष्टसिद्धयइतिभावः कश्चिदिति आश्रयिष्यत इत्यर्थः इतरस्तु गृहीताभिप्रायः आह सूत्रविषयास इति
अभिप्रायं प्रकाशयितुमाह एवं तर्हीति द्विकार्ययोगो हीति द्वाभ्यां कार्याभ्यां यो युज्यते स विप्रतिषेधविषयस्त्वाद्धि प्रतिषेधः असंभवापीति असंभ
व एव विप्रतिषेधः स तु कदाचित् द्विकार्ययोगो भवति कदाचित् केवलोपि तथा हि सति संभवे द्विकार्ययोगान्नु विप्रतिषेधः यथा एकस्य एधातेरडागम
द्विर्वचनभवतः अरधादिति क्वचिदेकस्य द्विकार्ययोगाभावेप्यसंभवो भवति यथा नपुणामित्यत्र नुम्नुटोः प्रकृतिप्रत्ययभक्तयोः परस्परनिमित्त

विप्रतिषेधाद्धि अथवा प्रगृह्यसंज्ञा क्रियतां अयादयो वेति प्रगृह्यसंज्ञा भविष्यति विप्रतिषेधेन नैष युक्तो विप्रतिषेधः विप्रतिषेधपरमि
ष्यते पूर्वा च प्रगृह्यसंज्ञा परे अयादयः परा प्रगृह्यसंज्ञा क्रियते सूत्रविपर्यासः कृतो भवति एवं तर्हि परत्वात् प्रगृह्यसंज्ञा कथं कार्य
कालसंज्ञा परिभाषं यत्र कार्यं तत्रोपस्थितं दृष्टं प्रगृह्य नकुर्यसकपस्थितमिदं भवति असंसानादिति एवमप्ययुक्तो विप्रतिषेधः कथं
द्विकार्ययोगो हि विप्रतिषेधः न चात्रैकोद्विकार्ययुक्तः एवाम्याद्य इद्धलो प्रगृह्यसंज्ञा न कश्चिद्विकार्ययोग एव विप्रतिषेधः किं
त्वसंभवोपि स चात्रास्य संभवः कोसावत्रासंभवः प्रगृह्यसंज्ञाभिनिर्वर्तमाना अयादीन्न बाधते अयादयोभिनिर्वर्तमानाः प्रगृह्यसंज्ञायानि
मित्तं विघ्नंति एवोसंभवः सत्यसंभवे युक्तो विप्रतिषेधः एवमप्ययुक्तः सतो हि विप्रतिषेधो भवति न चात्रेतावस्ति नापि मकारः
उभयमसिद्धं आश्रयात्सिद्धत्वं यथा रोरुत्वे आश्रयात्सिद्धत्वं भविष्यति तथाप्यारुत्वे आश्रयात्सिद्धो भवति किं पुनः कारणं रु
रुत्वे आश्रयात्सिद्धो भवति

व्याघातात् अयादीन्बाधत इति प्रकृतिभावविधानात् निमित्तमिति इत्व मूत्वं च आश्रयात्सिद्धत्वमिति प्रगृह्यसंज्ञायां कार्यित्वेनाश्रयणात्
असिद्धत्वाभावादीत्वादीनां तेषामयादीनां च विप्रतिषेधो निरूप्यते तथा हि सतो हि विप्रतिषेधो भवतीति पूर्वपक्ष इत्वादीनामेव
विप्रतिषेध आक्षिप्तः तत्रायादीनां चयनं चायकः लवनं लावकः अग्ने अत्रेत्यत्रावकाशः इत्वादीनां तु यत्रायादीनामप्रसंगः सोवका
शः अमी इक्षिता अमूरिक्षितो अमीभ्य इति अमी अत्रेत्यादावुभयप्रसंगे परत्वादीत्वादय एव भवंति अत्र व्याख्यानान्तरं क्लिष्टत्वा
न्नोपन्यस्तम्

अथापि किंचिदितिस्थानिविशेषानपेक्षायां कृताकृतप्रसंगित्वेन कुत्रशास्त्रस्य प्रवर्त्तनादित्यर्थः अथवा नित्यत्वेन बाधकत्वं लक्षते नेनांतरंग
नपीति श्रीभावस्यापि बाधकत्वं एवमपि दोष इति पक्षस्योत्थानमेवेनास्तीत्यितस्पक्षासंभव एव दोषः अवश्यमिति यदाश्रयणभयादयं पक्षोंगी
कृतः तस्याष्टतवद्भावस्यासिद्धपक्षे वश्यमाश्रयणमंगीकर्तव्यं अग्नी इत्यत्रेकार एव ह्रस्वनं नं दीर्घकारांतं तस्माद्विदितीय एव पक्षो श्लिष्ट इत्यर्थः मन
णीवादानीं प्रतिषेधो वक्तव्य इति भाष्यकारवार्तिककाराभ्यामपठितत्वादप्रमाणमेतत् मणीवोष्ट्रस्येति तु प्रयोगो वाशब्दस्योपमानार्थस्य शर्दसीवेसुरादि
रूढ छांदसः प्रयोगः छंदसि तु सर्वे विधयो विकल्प्यंते अदसोमात् मात्प्रगृह्यस्येति अस्मिन्सत्यभ्यास इत्यर्थः कृतस्यं चेति बशब्दान्मत्वस्य च शास्त्रस्यासिद्ध
त्वाद्रूपानिलक्षणमेव कार्यं प्राप्नोति निर्दिश्य लक्षणमित्यत्यादिप्रसंगः अमी आसत इत्यत्रायादेशः प्राप्नोति अमू आसाते इत्यत्रावादेशः अमी अत्रे

अथापि कथं चिल्लिसोलुकस्यात् एवमपि दोषः वक्ष्यसे नत पदसंज्ञायामंतवचनमन्यत्र संज्ञाविधो प्रत्ययग्रहणे तदंतविधिप्रतिषेधार्थमिति
इदं चापि प्रत्ययग्रहणभयं च्वापि संज्ञाविधिः अवश्यं चवल्यप्यस्मिन्नपि पक्षे आस्यंतवद्भाव एषितव्यः तस्मादस्कः स एव मध्यमः पक्षः अदसोमात्
मात्प्रगृह्यसंज्ञायांतस्यासिद्धत्वात् स्थानिवेकादेशप्रतिषेधः मात्प्रगृह्यसंज्ञायां तस्येदं तस्य कृतस्य चासिद्धत्वादयावेकादेशाः प्राप्नुवंति तेषां प्रतिषे
धो वक्तव्यः अमी अत्र अमी आसते अमू अत्र अमू आसाते ननु च प्रगृह्यसंज्ञावचनसामर्थ्याद्यादयो न भविष्यंति वचनार्थो हि सिद्धे नेदं वचना
लुप्तं अस्ति ह्यन्यदेतस्य वचने प्रयोजनं किं पररिद्धे प्रगृह्यसंज्ञा कार्यं तदर्थमेतत्स्यात् अणो प्रगृह्यस्यानुनासिक इति नैकं प्रयोजनं यो गारंभप्रयोज
यति यच्चैतावत्प्रयोजनं न स्यात्तत्रैवायं ब्रूयात् अणोप्रगृह्यस्यानुनासिको दसेरिति ॥ ॥ श्रीसांबसदाशिवाय नमः ॥ ॥ ॥

स्यैकादेशः ननु च ईदूत्पदाश्रयत्वाद्बहिरंगा आदायांतरंगत्वीत्वादिष्वसिद्धा इति पूर्वमेव कथं पूर्वत्रासिद्धमिति त्वादीनामसिद्धत्वं स्यात् नैष दोषः
नाजानंतर्य इति बहिरंगपरिभाषाया निषेधात् ननु चेति यथोद्देश पक्षे आश्रयात्सिद्धत्वं भविष्यतीत्यर्थः कार्यकालपक्षमाश्रित्याह वचनार्थं हीति
वचनस्य प्रयोजनमित्यर्थः नैकमिति अनेककार्यसिध्यर्थं संज्ञा सूत्रं नैकेन प्रयुज्यत इत्यर्थः अन्यत्तु सूत्रं भेके नापि प्रयुज्यते कुत्रादणि याहि तत्रै
वायमिति ननु तत्रैव इदं करणं कर्तव्यं मादित्वाद्यस्मादणोवसाने नुनासिको विधीयते पूर्वेणाच्चैकारेणाण्ग्रहणमिति असोअमुके अमुकाभ्यामित्या
दावनुनासिकस्याप्रसंग एव तदेवं कार्यकालेपि संज्ञापरिभाषप्रकरणात्कृष्य विधीयमाना प्रगृह्यसंज्ञा सर्वप्रगृह्यसंज्ञाकार्यार्था सतोसिद्धि
त्वं बाधिष्यत इत्यर्थः ॥ ॥ श्रीराम ॥ ॥ जयराम ॥ ॥ जयजयराम ॥ ॥ श्रीसांब ॥ ॥

शे इहकस्मादिति अत्रारिप्रत्यक्षमेव शेइति रूपं मुनो अस्मेइत्यत्र तु शकारस्यानुबंधस्यस्मरणादनुमेयमिति प्रश्नः शेःअर्थवद्ग्रहणादिति स्वंशब्द
स्येसेनांतरंगत्वादहेयत्वादसाधारणत्वाच्च रूपपरिग्रहे सिद्धरूपवदर्थस्याप्यंगीकरणात्स्वरूपग्रहणात् अत्रच शेशब्दोनर्थकः सप्तम्येकवचनमर्थव
त्तयोः समुदायोर्थांतराप्रादुर्भावादनर्थकः एवमपीति अत्रादिमत्वधूश्यसप्तम्येकवचनयोरर्थवतोः समुदायोर्थवानेव अवयवधर्मानुवि
धानात्समुदायस्येति प्रश्नः लक्षणेति प्रतिपदोक्तहिग्रहणेति प्रतिपत्तिर्भवति लक्षणिकं तु लक्षणानुसंधानद्वारेण बहिरंगमितिन तस्य ग्रहणं अथवे
ति अर्थवत्समुदायस्यापि कस्यचिदानर्थक्यं यथादशदाडिमादिवाक्यस्य पदार्थानं परस्परसमन्वयाभावात् इत्यपिवशिशब्दव्याख्यार्थगतसंख्या

शे इहकस्मान्नभवति काशेकुशेवंशेतिहे ७ शेःअर्थवद्ग्रहणात् अर्थवतः शेशब्दस्यग्रहणं नचपार्थवान् एवमपिपरिशिवभ्रुशइत्य
त्रप्राप्नोति एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति अथवा पुनरस्त्वर्थवद्ग्रहणेनानर्थकस्येत्येवं कथंहरि
शेवभ्रुशइति एकोत्रविभक्त्यर्थेनार्थवान् अपरस्तद्धितार्थेन समुदायोनर्थकः निपातएकाजनाङ् निपातइतिकिमर्थं चकारो
त्रजहारात्र एकाजितिकिमर्थं प्रेदंब्रह्म प्रदक्षत्रं एकाजित्युच्यमाने अत्रापि प्राप्नोति एषापिह्येकाच् एकाजितिनायंबहुव्रीहिः एका
चुयस्मिन्सोयमेकाच् एकाजिति किंतर्हि तत्पुरुषोयंसमानाधिकरणः एकश्चासावच् एकाजिति यदितत्पुरुषोयंसमानाधिकरणोना
र्थएकग्रहणेन इहकस्मान्नभवति प्रेदंब्रह्म प्रदक्षत्रं अनेनवा निपातस्यैवविज्ञायते किंवक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते
अज्ग्रहणसामर्थ्यात् यदिहि अत्रान्यच्च तत्रस्यात् अज्ग्रहणमनर्थकं स्यात् अस्तिह्यन्यदज्ग्रहणस्यप्रयोजनं किं अनंतस्यमायथा
स्यात् हलंतस्यमाभूत् नैवदोषानप्रयोजनं

धिकरणशक्तिप्रतिपादनाय प्रवृत्तास्सप्तमीनशत्रस्ययमात्रप्रतिपाद्यनार्थेनान्वेतीतिशेशब्दस्यानर्थक्यं निपातनिपातइतिकिमर्थमिति नि
पातस्यैवैकाचार्थवत्वात् प्रत्ययस्यकेवलस्यप्रयोगाभावात् आनर्थक्यात् कल्पितत्वात्कल्पनायाश्चानियमाभावात्प्रश्नः चकारात्रति अन्व
यव्यतिरेकाभ्यांप्रत्ययस्याप्यर्थवत्वेनैर्मितिभावः निपातोपिकेवलोनप्रयुज्यतइत्यनुकल्पादिति सांप्रमेवनिपातप्रश्नः अततइः अः अआगच्छआ
गच्छत्यपि प्रत्युदाहरणं एकाजितिकिमर्थमिति एकग्रहणसामर्थ्यात्बहुव्रीहिर्मन्यते ततश्च प्रदंब्रह्मेत्यनिष्टनिवृत्तिर्नेत्युक्तानि प्रश्नः तत्पुरुषोयमिति
अंतरंगत्वाद्वर्तिपदार्थप्राधान्यादितिभावः नैवदोषइति ननु प्रशस्तीति हलंतस्यप्रकृतिभावात् तत्त्वंनस्यात् नैषदोषः प्रगृह्यसंज्ञायांतत्वस्यासिद्ध
त्वात्ककारस्यचकार्यांतराप्रसंगात् तत्त्वंतुत्वमाश्रयातिधं श्रीः ॐ श्रीगणेशायनमः ॐ

भा॰के॰

४६

नपुनर्यत्रेति आभ्यपीयस्यानंतरमतउर्ता वक्तव्यं एवंवा सिद्धंनुबाधितंभवति अत्रपादुकासिद्धत्वस्याश्रयभावाश्रु तस्यचेत्तेलि
द्धत्वात्तत्कालत्वाभाव दकुतादकुतप्रतिनवक्तव्यंभवति अथवेति यथादेशपक्षाश्रयणतदुच्यते कार्यकालतायामप्याह अथवेति अदस
इतिसंबंधसामान्येषष्ठी अदसः संबंधिनईदूतइति इहापीति अदस्यदः अदस्त्र आम्न अत्रटाप्सवर्णदीर्घत्वं आत्वापइत्येतं अदे
आअदेआम इति स्थितेअदसइत्यत्रनादिविशेषणाभावात्प्रगृह्यसंज्ञायां सत्यां अयोस्त्राप्रसंगः अमुकेत्रेति अदसइत्यनेनप्राप्नोति
एदंतमिति ईदूतारेवस्वादित्यप्रतिज्ञानादितिभावः अननुवृत्तेरेवचनिवृत्तिः यद्यमाङ्ग्रहणनक्रियते एद्ग्रहणनिवृत्तिरेवामुकेत्रेत्यत्रप्रसंगा
त्तनैतदस्ति सेतिमाङ्ग्रहणयोगविभागोभवतितन्तथा एकयोगेपरिहारांतरमाह अथवेत्याह मार्थादिति मार्थएवेत्तनीनशब्देनोक्तः इद्
दर्थेइदूदेदिति नवास्यांकल्पनायामसिद्धत्वंभवति बाद्धपरिकल्पनायामसिद्धत्वाभावस्योक्तत्वात् उक्तंचेति असिद्धत्वमेवात्र प्रतिसिद्धमिये
षः स्वरेइति अचीत्यर्थः बहिष्पदलक्षणेन द्वितीयपदव्यवस्थितेइत्यर्थः तेनेकपदव्यवस्थितेऽचिअसिद्धत्वात् तेनामुयामुयोरित्यत्रा
नपुनर्यत्रवक्तः सिद्धं तत्रैवोत्वमयुच्यते नैकाक्य असिद्धत्वत्वआङ्णस्याप्रसिद्धिः स्यात् दृक्षोत्र प्लक्षोत्र तस्मात्तत्राश्रयासिद्धत्वे
भाषितव्यं यथातत्राश्रयात्सिद्धत्वंभवति एवमिहाप्याश्रयात्सिद्धत्वंभविष्यति अथवाप्रगृह्यसंज्ञावचनसामर्थ्यात्स्यादयोनभवि
ष्यति अथवायोगविभागःकरिष्यते अदसः अदसईदादयः प्रगृह्यसंज्ञाभवंतीति ततोमात् मात्परेईदादयः प्रगृह्यसंज्ञाभवंती
ति अदसइत्येवकिमर्थोयोगविभागः एकोयत्नसिद्धप्रगृह्यकार्यंतदर्थः अपरोयदसिद्धेइहापितर्हिप्राप्नोति अमुया अमुयोरि
ति किंवस्यात् यद्यत्रप्रगृह्यसंज्ञास्यात् प्रगृह्याश्रयः प्रकृतिभावःप्रसज्येत नैषदोषः पदांतप्रकरणेप्रकृतिभावः नचैषपदां
तः एवमप्यमुकेत्र अत्रापिप्राप्नोति द्विवचनमितिवर्तते यदिद्विवचनमितिवर्तते अमीअत्र अत्रनप्राप्नोति एवंतर्हिदंतमितिनिवृत्तं
अथवाआहायमस्तोमादिति नवेत्यत्रोक्तः नापिमकारः तत्रएवविज्ञास्यामः मार्थादीद्वाद्युधानामिति उक्तंवा किंमुक्तं अदसई
तोत्वे स्वरेबहिष्पदलक्षणेसिद्धवक्तव्यं प्रगृह्यसंज्ञायांचेति तत्रसाकिदोषः तत्रसककारेदोषोभवति अमुकेत्र नवाग्रहणविशेष
णत्वात् नवाएषदोषः किंकारणं ग्रहणविशेषणत्वात् नमाङ्ग्रहणेन ईदादयोविशेष्यते किंतर्हि अदसोविशेष्यते मात्परेयेईदादयइति ५९
यादेशोभवत्येव प्रगृह्यसंज्ञायांचेति प्रगृह्यसंज्ञायामेवसिद्धत्वेन सिद्धलक्ष्यप्रपंचार्थः पूर्ववाक्योपन्यासः तत्रसकिदोषइति मात्परेयदीदा
द्यंतमितिदोषोपन्यासः पूर्वसूत्रेहितदंतग्रहीतमितिदृहापितदंतस्यैवानुवृत्तिरितिभावः स्वरितत्वेनशब्दमात्रमनुमीयतइत्येतन्नराभिप्रायः तत्र
माङ्ग्रहणेनगृह्यमाणमीदूदेद्विशेष्यते तेनामुकेत्रेत्यत्रव्यवधानाद्दोषाभावः योगविभागदोषप्रसंगाद्देदंतमितिनिवृत्तमुक्तं एकयोगेतुतन्निवृ त्तमि
त्तानप्रयोजनमितिनवाग्रहणविशेषणत्वादिस्तत्रमुक्तम्

४६

ओत् निपातसमाहारोयमिति· अनर्थकानामिति निपातानां कर्मादिवृत्सारीनां दर्शनादर्थभेदाभावेपि निपातसमाहारत्वमुक्तं· एवं तर्हि इति· चादिषु तत्
पाठादिति भावः· ओपुपातमिति· अपु ओ इत्यत्रांतवड्राधाइवत्वयमति इति प्रतिषेधः प्राप्नोति· पर्युदासेतुनदोषः तत्राङ् सदृशस्योकारस्यांगासहेषादे
शे आदिवद्भावादुकारग्रहणेन ग्रहणतरति सिद्धत्वेयमग्रेग्रहसंता· तस्याश्वप्रयोजनं धूपि च्छारवा यामो आपानमितिपाठे प्रकृतिभावः· अदोभवदिति· चांतत्वेना
त्रनिपातत्वं कुर्यादिचीत्यत्रनिपाताधिकारात् प्रतिषिद्धार्थत्वाद्दौस्य कथमत्रप्राप्तिरिति चेदुभयार्थत्वाददोषः· तथा प्रोदंत निपातस्य ग्रग्रहसंज्ञाविधीयमाना
प्रतिबंधाभावाद्दोषवदिसत्रापि भवति· ओपुपातमित्यत्रापि परत्वादनाङिति प्रतिषेधं बाधतइतप्रतिषिद्धार्थत्वमपि स्यादितिको विरोधः· ओकारस्यत्रनिप
दोक्तस्य ग्रहणमित्युत्तरं· एवमपीति· ओकारस्यात्र प्रतिपदोक्तत्वमस्ति गमेगौरिति साक्षादुच्चारणात्· यस्य हि साक्षादुच्चारणं नास्ति आङुणइत्यादिसामान्यत्

ओत् किमुदाहरणं आहोइति उताहोइति· नैतदस्ति प्रयोजनं· निपातसमाहारोयं· आहउ आहोइति· उत आह उ उताहोइति· तत्र निपातत्वाज्जना
दिरित्येव सिद्धं· एवं तर्हि एकनिपाताइमे· अथवा प्रतिषिद्धार्थोयमारंभः· ओपुपातं मकत इत्योपुपातं हतीचरा करी ओचित्स्वरायं सरव्याचव
त्यां ओनञ्श्च प्रतिषेधः ओदंतो निपात इत्यत्रघांतस्य प्रतिषेधो वक्तव्यः अनद्· अद्· अभवत्· अदोभवत्· तिरिष्यत्· न वक्तव्यः लक्ष
णप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेवं नभविष्यति· एवमपि अगौगौः समपद्यत गोभवत्· अत्रप्राप्नोति· एवं तर्हि गौणमुख्ययोर्मुख्ये कार्य
संप्रत्ययइति· न यथा गौरनुबंध्यो अग्नीषोमीयइति न वाहीको नुबध्यते· कथं तर्हि वाहीके स्यात्वेभवत·· गौस्तिष्ठति· गामानयेति·
अर्थाश्रयएतदेवं भवति· यद्धि शब्दाश्रयं शब्दमात्रेतद्भवति· शब्दाश्रयेचस्यात्वे· उञ्ङ्· इहकस्मान्नभवति· आहोइति· उञ इत्युच्यते·

श्लेनयद्रूपंनिष्पाद्यतेतल्लाक्षणिकमुच्यते· एवं तर्हि इति· गुणादागतोगौणः यथा गोशब्दस्यजाड्यादिगुणनिमित्तोर्थो वाहीकः मुखमिव प्रधानत्वा
न्मुख्यः तत्रस्वं रूपमित्यत्र रूपग्रहणेनार्थपरिग्रहस्य ज्ञापितत्वादर्थवतः कार्येणभवितव्यं· सचार्थः प्राथम्यान्मुख्यएव ग्रह्यते· गौणोह्यर्थेश
ब्दः प्रवर्तमानो मुख्यार्थारोपेणैव प्रवर्तते· अनियतश्च गौणोर्थः तस्मात्तु किं कोपं न्यायो गौणमुख्ययोरिति गोभवदित्यत्रजाड्यादिना
धर्मेणगोत्वमारोपितमिति गौणत्वमर्थस्य गोभवदित्यत्र च च्वौ प्रकृतेः फलत्वं संपद्यते इति आह्मणादिति धकृवचननिर्देशनात्· प्र
कृतौ च गोत्वमारोपितं न मुख्यमिति प्रत्यग्रहणत्वाभावः· शब्दाश्चेयेचोति· स्वार्थैकतोत्यानिपदिकाद्भिक्त्वा वृत्त्यन्वाये कार्येषु क्लृप्तेषु श
ब्दांतरसन्निधानाद्गौणत्वं प्रतीयते तस्य च स्वार्थस्य मुख्यव्यपदेशोनास्ति· गौणापेक्षया संबंधिशब्दत्वान्मुख्यव्यपदेशस्य

भा·कै·प्र·

४७

एवमपीति अन्यतरनिवृत्त्या अञ्ग्रहणस्यार्थवत्त्वात्समात्रं गृह्यते तदंतं निरस्यते विपर्ययस्तु न भवतीति विशेषाभावाल्लभ्यः· पारार्थ्यसाम्यात्संज्ञातिदेशोपपरिभा
षाशब्देनोक्तो सावश्यकाशयोरिति निरवकाशस्य बाधकत्वादेवमुक्तं तत्र तदंतविधेरवकाशः ओरावश्यके शाव्यंपाव्यमिति आद्यंतवद्भावस्यावकाशः भिद
चोत्सामरः तानियानीति अत्रहिसाक्षात्तदंतग्रहणमस्तीति तदंतविधिअभावः समवस्थितयोरिति इहप्राप्तयोः आचार्यप्रवृत्तिरिति यदिर्ताहिलिंगेनतदंतवि
धिर्निराक्रियते तदा तन्मूलाद्यंतवत्परिभाषा कथं प्रवर्तेत नैष दोषः आद्यंतवदित्यस्योपस्थानायतदंतविधिः प्रथमं सन्निधीयते पश्चात्तु लिंगात्स निरस्यते
अथवा लिंगाद्ग्रहणं निपातेन विशिष्यतइति विशेष्येण तदंतविधेरभावादतिदेशस्यापि नाभप्रवृत्तिः तत्फलसंपत्तात्कं परिभाषाभविष्यतीति एवं तर्हीति
संज्ञायां विधीयमानत्वात्प्राधान्यात्संज्ञिनो गुणत्वात्स्तुनायनेतीतिवत्तत्स्वार्थाया विवक्षायांसिद्धायां एकग्रहणमन्यत्र जातिसंप्रत्ययार्थं अञ्समुदायग्रह
णशंकानिरासार्थं ह्येकग्रहणं ज्ञापनफलं संपद्यते किं पुनः स्याद्यद्यत्र अञ्समुदायग्रहणं स्यात् उच्यते इह अइउ अपेहीति समुदायस्यैकासंज्ञा स्यान्नावयव

एवमपि कृतद्वयोः परिभाषयोः सावकाशयोः समवस्थितयोराद्यंतवदेकस्मिन्नेय न विधिस्तदंतस्येति च इयमिह परिभाषाभविष्यति अद्यंतवदे
कस्मिन्निति इयं च न भविष्यति येन विधिस्तदंतस्येति आचार्यप्रवृत्तिर्ज्ञापयति इयमिह परिभाषाभवति आद्यंतवदेकस्मिन्निति इयं न भवि
ष्यति येन विधिस्तदंतस्येति यदयमनाङिति प्रतिषेधं शास्ति एवं तर्हि सिद्धे सति यदञ्ग्रहणे क्रियमाणे एकग्रहणं करोति तज्ज्ञापयत्याचार्यः
अन्यत्रवर्णग्रहणे जातिग्रहणं भवतीति किमेतस्य ज्ञापने प्रयोजनं दंभेर्हल्ग्रहणस्य जातिवाचकत्वात्किमित्ययुक्तं तदुपपन्नं भवति अ
नाङिति किमर्थं आउदकांतात् इहकस्मान्न भवति आ एवं मन्यसे आ एवं किल तत् इति सानुबंधकस्येदमाकारस्य ग्रहणं अनुबंधक
श्चात्राकारः कः पुनरयं सानुबंधकः कनिरनुबंधकः ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्

वानां समुदायैकाज्झ्ढिर्वचनवदित्यस्यैव प्रकृतिभावाद्ययादेशो न स्यात् पूर्वयोस्तु स्वरसंधिः स्यात् अञ्समुदायपरिग्रहानुरोधाच्च निपातसमुदायो
गृह्यते एकनिपातस्याञ्समुदायस्याभावात् अनाङिति किमर्थमिति ङिदङितोराकारयोर्विषयविभागप्रदर्शनाय प्रश्नः इहकस्मादिति अनुबंध
निवृत्तौ विशेषापरिज्ञानात्प्रश्नः अर्थवशाद्विशेषावसायइत्युत्तरं ईषदर्थे आउष्णं ओष्णमिति आङीषदर्थइति चोक्तं क्रियायोगे आइतः एतः मा
र्यादायां आ ङित्यर्थे अभिविधौ एरितिच समासविधौ ङि निर्दिष्टः आउदकांतात् आअहिछत्रात् आहिछत्रात्इति विनातेनेति मर्यादास
हतेनेत्यभिविधिः पूर्वप्रक्रांतस्य वाक्यार्थस्यान्यथात्वद्योतनायाकारः प्रयुज्यते आ एवं नु मन्यसे नैवं पूर्वममंस्थाः संप्रतिमन्यसइति वाक्यारंभ
सूचनायाकारइत्यपरे तथा स्मृतेः स्मृचक आकारः प्रयुज्यते ततः स्मृतार्थो निर्दिश्यते आ एवं किल तदिति श्रीः श्रीः श्रीः

४७

इदूतोच ईदूतौ सप्तमी त्येवेति सप्तमी सहचरितं यदीदूदन्तं सप्तम्यां वा परतस्तत्प्रगृह्यसंज्ञं भवतीत्येवं प्रत्ययलक्षणेन लुप्तायामपि सप्तम्यां सोमो गौरी अधिश्रितः दृत्यादौ भविष्यति प्रगृह्यसंज्ञेति प्रश्नः लुप्त इति संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधादसत्यर्थग्रहणे सप्तम्या एव संज्ञिनीत्वादस्या श्च कार्याभावात् प्रत्ययनिमित्तं यत्रान्यस्य कार्यं विधीयते तत्रैव प्रत्ययलक्षणस्य सद्भावात् गौरीत्यत्राप्रसंगादर्थग्रहणं कृतं अर्थग्रहणे सत्यर्थनिमित्तासंज्ञेयं भवति न प्रत्ययश्रवणनिमित्ते तिलोपे धि सिध्यति पूर्वसवर्णइति सति च पूर्वसवर्णे एकादेशेत्याद्यि वाडाव इतीकारः सप्तमीति धि सिद्धा। आडाम्भावइति एकादेशं बाधित्वा डामोः स्यातां वचनादिति सर्वत्रैव सप्तमी लुप्यते इति वचनसामर्थ्यात् सप्तमीशब्देन सप्तमीसहचरितस्य ग्रहणान्मुख्य कल्पना संभवे गौणी कल्पना गृह्यत इत्याश्रयणात् सिध्यतीति भावे मुख्य कल्पनासंभवत्येवेत्याह यथेति सरसी त्यत्र सरः शब्दात्स्यडि-त्रं

ईदूतौ च सप्तम्यर्थे इदूतौ सप्तमीत्येव ईदूतौ सप्तमीत्येवसिद्धेर्नार्थोर्थग्रहणेन लुप्तेर्थग्रहणाद्भवेत् लुप्तायां सप्तम्यां प्रगृह्यसंज्ञा न प्राप्नोति सोमो गौरी अधिश्रितः इष्यते चात्रापि स्यादिति न चान्तरेण यत्नं न सिध्यतीत्येवमर्थमर्थग्रहणं नात्र सप्तमी लुप्यते किं तर्हि पूर्वसवर्णोत्र भवति इ वस्य चेत्सवर्णा सा वाडाम्भावः प्रसज्यते यदि पूर्वसवर्णः आट् आम्भावश्च प्राप्नोति एवं तर्हि आहायं मीदूतौ सप्तमीति न चास्ति सप्तमी ईदूतौ तत्र वचनाद्भविष्यति वचनाद्यत्र दीर्घत्वं नेदं वचनाल्लभ्यं अस्ति ह्यन्यदेतस्य वचने प्रयोजनं किं यत्र सप्तम्या दीर्घत्वमुच्यते॥ दृतिं न शुष्कं सरसी शयानमिति सति प्रयोजने इह न प्राप्नोति सोमो गौरी अधिश्रित इति नत्रापि सरसी यदि नत्रापि सिद्धं कथं यदि सरसीत्राद्वृत्स्य प्रवृत्तिरस्ति अस्ति च लोके सरसीत्राद्वृत्स्य प्रवृत्तिः कथं दक्षिणायथोहिमहान्ति सरांसि सरस्य इत्युच्यते ज्ञापकं स्यात्तदन्तत्वे एवं तर्हि ज्ञापयत्याचार्यः न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति किमेतस्य ज्ञापने प्रयोजनं कुमार्योरगारं कुमार्यगारं वध्वो रगारं वध्वगारं प्रत्ययलक्षणेन प्रगृह्यसंज्ञा न भवति

ङ्स्येयाड्याजीकाराणामुपसंख्यानमितीकारे कृते भवतीकारः सप्तमीति तत्रैव स्यान्ननु गौरी यत्रेति भावः सरसी यदीति यदीति सं भावनायां तस्मान्नु स्थितमेतद्वचनात्सर्वत्र लुप्तायामपि सप्तम्यां भविष्यतीति नार्थोर्थग्रहणेन ज्ञापकमिति ईदूदेदित्यत्र तृतीयचतुर्थपक्षयोरित्यर्थः इह प्रगृह्यसंज्ञाप्रकरणे यदि प्रत्ययलक्षणं स्यात् ईदूतौ च सप्तमीत्येव सप्तमी सहचरितं सप्तम्यां च परतो यदीदूदन्तं तत्प्रगृह्यसंज्ञमिति प्रत्ययलक्षणेन लुप्तायामपि सप्तम्यां संज्ञा भविष्यतीति किमर्थग्रहणेन क्रियमाणं प्रत्ययलक्षणाभावं सूचयति॥ श्रीः

भा॰ कै॰ प्र॰

गौणाभावे भावात्तु दाश्रये चेत्युक्तं नत्वत्रार्थो नापेक्ष्यते तत्र यथा श्वेतं छागमालभेतेति गुणद्रव्ययोः श्रौतः क्रियासंबंधः वाक्यीयात्तु न्यायात्पश्चात्स्वरूपेण एवं गांवाहीक मानयेति पूर्वं क्रियासंबंधापेक्षया विभक्त्या चेत्यत्रायां वाक्यी यात्तु न्यायात्सामानाधिकरण्याद्गौणार्थ प्रादुर्भावोपि भवतीति पदकार्येषु यायं न्यायो न प्रातिपदिककार्येष्वित्युक्तं शब्दाश्रयं चेत्युक्तं उ॰ ऊँ॰ इह कस्मादिति निपातसमाहारमत्वा प्रश्नः पदद्वयमिति एकादेशे कृते आदिवद्भावात्संज्ञा सिद्धिः ऊँ रूपत्रयं साध्यं उ इति विति ऊँ इति न चैकयोगेन सिध्यति एकयोगे ह्युञ इति श्रुतिरादेशेन न श्रुतत्वात्संबध्यते न प्रगृह्यसंज्ञया सानुनिपात एकाजनाङिति नित्यैवास्य भवति शाकल्यश्च सानुस्वाराचादेशो विकल्पिते रूपद्वयं स्यात् उ इति

न चाओं यं पश्यामः उञो पमन्येन सहैकादेशः उञ्ग्रहणेन गृह्यते आचार्यप्रवृत्तिर्ज्ञापयति नोञ एकादेश उञ्ग्रहणेन गृह्यत इति यदयमोदित्योदन्तस्य निपातस्य प्रगृह्यसंज्ञां शास्ति नैतदस्ति ज्ञापकं उक्तमेतत् प्रतिपत्त्यर्थोयमारंभ इति दोषः खल्वपि स्यात् यद्युञेकादेश उञ्ग्रहणेन गृह्येत आनुज अस्य रुञ्जत्त्वात् अस्य रुञ्जति आन्यस्य रुञ्जति मय उञो वो वेति वत्वं न स्यात् एवं तर्ह्येकनिपातारम्भे अथवा द्वावुकाराविमौ एकोननुबंधकः अपरः सानुबंधकः तद्योननुबंधकः तस्यैवैकादेशः उञ इति योगविभागः उञ इति योगविभागः कर्तव्यः उञः शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञा भवति उ इति विति ततः ऊँ उञ ऊँ इत्ययमादेशो भवति शाकल्यस्याचार्यस्य मतेन दीर्घोनुनासिकः प्रगृह्यसंज्ञकश्च ऊँ इति किमर्थो योगविभागः ऊँ वा शाकल्यस्य शाकल्यस्याचार्यस्य मतेन ऊँ विभाषा यथा स्यात् ऊँ इति उ इति अन्येषामाचार्याणां मते न विति॥

ननु ऊँ इति उँ इति विति तदर्थमाह उञ इति योगविभाग इति उञ इत्यत्र शाकल्यस्येतौ प्रगृह्यमिति चानुवर्तते तत्र प्रगृह्यसंज्ञैव शाकल्यस्य मतेन विधीयते नान्येषामिति स्पष्टतरानुसंधानद्वारेण विभाषा संपद्यते उ इति विति ऊँ इत्यत्र च यदि शाकल्यस्येति नापेक्ष्येत तदा प्रगृह्यस्योञो नित्यमादेशः स्यात् तथा चेति ऊँ इत्येतदेकरूपं स्यात् तस्माच्छाकल्यग्रहणानुवृत्त्यादेशविकल्पे सति त्रीणि रूपाणीति फलं वाक्यभेदेन प्रतिपादयति तद्व्याचष्टे शाकल्यस्य विभाषा यथा स्यादिति प्रगृह्यसंज्ञादेशश्च तत्रयमपि पूर्वसत्रेषु फलरूपतया निर्दिष्टः

लक्षणेति आक्षणिके हि लक्षणानुसंधानद्वारेण प्रतिपत्तिर्बहिरंगा प्रतिपदोक्ते त्वंतरंगा कथमिति दाधा प्रकृतय इति षष्ठीसमासः कर्मधारयो वा उभयथा प्ययमिति प्रश्नः दाधा प्रकृतय इति दीयतइत्यादावीत्वादेः आत्वभूतानामिति दाणदाञ् धाश्च आं प्रकृतयश्चैषामिति प्रयासस्तेषामितिलभ्यते अर्थइति एतद्धि

किं पुनः कारणं न सिध्यति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपद्यते आत्वभूतास्तेषामेव स्यात् लक्षणे नये आत्वभूतास्तेषां न स्यात् अथ क्रियमाणेपि प्रतिग्रहणे कथमिदं विज्ञायते दाधाः प्रकृतय इति आहोस्विद्दाधा प्रकृतय इति किं चातः यदि विज्ञायते दाधाः प्रकृतय इति स एव दोषः आत्वभूतानामेव स्यात् अनात्वभूतानां न स्यात् अथ विज्ञायते दाधा प्रकृतय इति अनात्वभूतानामेव स्यात् आत्वभूतानां न स्यात् एवं तर्हि नैवं विज्ञायते दाधाः प्रकृतय इति नापि दाधा प्रकृतय इति कथं तर्हि दाधा घुसंज्ञा भवंति प्रकृतयश्चैषामिति तर्हि प्रकृतिग्रहणं कर्तव्यं न कर्तव्यं इदं प्रकृतमर्थ ग्रहणमनुवर्तते क्व प्रकृतं ईदूतौ च सप्तम्यर्थ इति ततो वक्ष्यामि दाधाघ्वदाप् अर्थ इति नैवं शक्यं ददातिना समानार्थान् एति एसतिरशतिमंहति प्रीणाति प्रभृतीनां तु तेषामपि घुसंज्ञा प्राप्नोति तस्मान्नैवं शक्यं न चेदेवं प्रकृतिग्रहणं कर्तव्यमेव शिष्टार्थेन तावदर्थः अवश्यं तत्र मार्थ प्रकृ तिग्रहणं कर्तव्यं प्रणिमयते प्रण्यमयत इत्येवमर्थं तत्पुरस्तादपकृष्यते घुप्रकृतौ माप्रकृतौ चेति यदि प्रकृतिग्रहणं क्रियते प्रनिमिनोति प्रनिमीनाः ति अत्रापि प्राप्नोति अथाक्रियमाणेपि प्रकृतिग्रहणे इह कस्मान्न भवति प्रनिमाता प्रनिमातुं प्रनिमातव्यमिति आकारांतस्य ङितो ग्रहणं वि ज्ञास्यते यथैव तर्हि क्रियमाणे प्रकृतिग्रहणे आकारांतस्य ङितो ग्रहणं विज्ञायते एवं क्रियमाणेपि प्रकृतिग्रहणे आकारांतस्य ङितो ग्रहणं विज्ञास्यते

तीयं वाक्यं सर्वत्र सामान्यं दाधामर्थेयः प्रवर्तते स घुसंज्ञ इति प्रकृतीनामपि सिध्यति तत्पुरस्तादिति नेर्गदेति सूत्रे घुमाशब्दयोर्मध्ये प्रकृतिग्रहणं कर्तव्यं तदुभाभ्यामपि संभंत्स्यते प्रनिमिनोतीति मिनातिमिनोतीति दीङां ल्यपि चेति आत्वविधानाद्भवति माप्रकृतित्वं समनयोः ॥ शिवसांब ॥

संज्ञाविधौ प्रत्ययग्रहणे तदंतविधेरभावात्तदंत पक्षस्तत्र नैवास्ति न इति ज्ञापनफलाभावादाह भावेति वाप्यश्वेनयातीति संज्ञायामिति समासे कृते सप्तमी सह च विनमाकारांतं पूर्वपदमिति स्यात्प्रग्रह्यसंज्ञेति तदर्थमर्थग्रहणं अर्थेति अस्येवात्र सप्तम्यर्थ इति प्रश्नः जहत्स्वार्थेति स मासस्यैवार्थवत्त्वात्पूर्वोत्तरपदयोर्वर्णवदानर्थक्यात्सप्तम्यर्थो नास्तीत्यर्थः समुदायार्थ इति एतौ हि पूर्वपदं स्वार्थमप्यभिधत्ते प्रधानार्थमु पैति स्वार्थसंसृष्टस्य प्रधानार्थस्याभिधानात् उदकं च स्वार्थस्याविवेकान्न गम्यते समुदायार्थो एतौ संसृष्टरूपेणेवाभिधीयते सप्तम्यर्थ ग्रहणेन यथा वाने वार्थो वाक्ये सप्तम्यंते नाभिधीयते केवलोऽसंसृष्ट इति तस्यैवेह ग्रहणमिति समासेन भवति प्रगृह्यसंज्ञा दाधाघ्वदाप्

भावापूर्वपदस्य भूत् अथवा पूर्वपदस्य माभूदित्येवमर्थमर्थग्रहणं वाप्यामश्वो वाप्यश्वः नद्यां मातिर्नद्यातिः अथ क्रियमाणेप्यर्थग्रह णे कस्मादेवात्र न भवति जहत्स्वार्था वृत्तिरिति अथाजहत्स्वार्थायां वृत्तौ दोष एव अजहत्स्वार्थायां च न दोषः समुदायार्थोभिधीय ते ईदूतौ सप्तमीत्येव लुप्तेर्थग्रहणाद्भवेत् पूर्वस्य चेत्सवर्णोसावाडाम्भावः प्रसज्यते वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ज्ञापकं स्यात्तदंतत्वे भावापूर्वपदस्य भूत् दाधाघ्वदाप् घुसंज्ञायां प्रकृतिग्रहणं शिदर्थं घुसंज्ञायां प्रकृतिग्रहणं कर्तव्यं दाधा प्रकृतयो घुसंज्ञा भवंतीति वक्तव्यं किं प्रयोजनं आत्वभूतानामियं संज्ञा क्रियते सा आत्वभूतानामेव स्यात् अनात्वभूतानां न स्यात् ननु च भूयिष्ठानि घुसंज्ञाकार्याणि आर्धधातुके तत्र चैते आत्वभूता दृश्यंते शिदर्थं शिदर्थं प्रकृतिग्रहणं कर्तव्यं शित्या त्वं प्रतिषिध्यते तदर्थं प्रणिदयते प्रणिधयतीति भारद्वाजीयाः पठंति घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थं घुसंज्ञायां प्रकृति ग्रहणं क्रियते किं प्रयोजनं शिदर्थं विकृतार्थं च शित्युदाहृतं विकृतार्थं स्वल्वपि प्रणिदाता प्रणिधाता ॥ ॥ ॥

दाधाशब्दयोर्घुसंज्ञा विधीयमाना रूपांतरयुक्तानां दोदेङ्धेटां न प्राप्नोतीत्याह घुसंज्ञायामिति किं प्रयोजनमिति दोदेङ्धेटां एजंतानामनुक रणानि व्यवस्थाप्यात्वे कृते दृश्यंते तिर्यद्धातिरधात्यनुकरणानां चैकत्वे कृते द्वंद्वनिर्देशात् सिद्धा दोदेङ्धेटामपि घुसंज्ञा कृतात्वानां चैषां स्था निवद्भावेन सिद्धिरिति प्रश्नः आत्वभूतानामिति भवतेः प्राप्यर्थाद्दाधाद्धेति विभाषितणिचः कर्तरि कर्मणि वा क्त प्रत्ययः तेन आत्व भूताः आत्वेन वा भूताः आकारांता इत्यर्थः न तु प्रत्ययलक्षणेन कृतात्वा इति विज्ञेयं अस्यायमभिप्रायः एजंतानुकरणत्वे प्रमाणा भावात्प्रक्रियागौरवाच्च प्रयोग एव ये आकारांताः प्रयुज्यंते तदनुकरणानामयमेकशेषनिर्देशः सामान्यानुकरणं वा दाप इति धाप्इति पृथक्रूप दं निर्दिष्टमिति प्रणिदयत इति घुसंज्ञायां सत्यां नेर्गदेति णत्वं भवति प्रणिदातेति धेतेर्देङो वा रूपं प्रणि

तद्गुणीभूतइति प्रयोगसंपादनेउपकारकइत्यर्थः युक्तंपुनरिति नतत्रनित्येष्वागमविरोधात्तद्धेयादेशविधानाद्वाग्रहणात्वार्थवान्नदाशब्दइतिनन्व
स्थादेशइतिभावः अयुक्तमिति तत्रापिस्थानिनमपनीयादेशाःक्रियतइत्येवंनित्यत्वप्रसंगःयत्रोभयोर्दोषोनतमेकस्योद्यः वाढंयुक्तमिति प्रसंगवाचीस्थानशब्दो
ननिवृत्तिवाची ततश्चसंतएवप्रयोगेनित्याःशब्दाबुद्ध्युन्मज्जननिमज्जनद्वारेणप्रतिपाद्यंते आगमस्त्ववस्थितस्यापूर्वःक्रियमाणोनित्यत्वंविरुणद्धि आदेशास्त
र्हीति इद्दवतीत्यनेनेद्वारेयातव्यस्येतव्यादेशःक्रियते सर्वइति आगमाअपीत्यर्थः सर्वपदादेशाइति पदशब्देनसुप्तिङंतंगृह्यते अपितुकार्यं प्रतिपद्यमानं

अर्थवतआगमस्तद्गुणीभूतोर्थवद्ग्रहणेनगृह्यतेयथान्यत्रनयथान्यत्राप्यर्थवतआगमोर्थवद्ग्रहणेनगृह्यतेक्वान्यत्रलविताचिकीर्षितेति युक्तंपुनर्य
न्नित्येषुनामशब्देष्वागमशासनंस्यात् ननित्येषुनामशब्देषुकूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः आगमश्चनामापूर्वःशब्दोप
जनः अथयुक्तंयन्नित्येषुशब्देष्वादेशाःस्युः बाढंयुक्तं शब्दांतरैरिहभवितव्यंतत्रशब्दांतराच्छब्दांतरस्यप्रतिपत्तिर्युक्ता आदेशास्तर्हीमेभविष्यंति
अनागमकानांसागमकाः तत्कथंसर्वेसर्वपदादेशाःदाक्षीपुत्रस्यपाणिनेः एकदेशविकारेहिनित्यत्वंनोपपद्यतेदीङः प्रतिषेधःस्थाघ्वोरित्वे दीङःप्रति
षेधः स्थाघ्वोरित्वेवक्तव्यः उपादास्तास्यस्वरःशिक्षकस्येति आत्वेकृतेस्थाघ्वोरिच्चेतीत्वंप्राप्नोति कुतःपुनरयंदोषोजायते किंप्रकृतिग्रहणा
दाहोस्विद्रूपग्रहणात् रूपग्रहणादित्याह इहखलुप्रकृतिग्रहणाद्दोषोजायते उपदिदीषते सनिमीमाघुरभलभेति नैषदोषः दाप्रकृति
रित्युच्यते नचेयंदाप्रकृतिः आकारांतानामेजंताःप्रकृतयः एजंतानामीकारांताः नचप्रकृतिः प्रकृतिग्रहणेनगृह्येत सतर्हिप्रतिषेधो
वक्तव्यः नवक्तव्यः

प्रतीयमानंप्रकृतिप्रत्ययादितत्सर्वंपदं एकदेश~~[illegible]~~विकारेहीति यद्यपिसर्वविकारेप्यनित्यत्वं यथापीठरस्थस्यपयसःपाकादिषुतथापि
विकाराभावमात्रप्रतिपादनपरमेतत् बुद्धिविपरिणाममात्रेस्थान्यादेशागमागमिभावइत्येवंरूपेणक्रियतइत्यर्थः यद्येवंदाशब्दस्यदापशब्दआदेशः
क्रियतइति दाशब्दस्यानर्थक्यप्रसंगः नैषदोषः नित्यतासमर्थनायादेशपक्षआश्रितः प्रक्रियायांतुकल्पितायांआगमागमिभावएवान्य
थागमादेशयोर्भेदेनव्यवहारोनस्यात् दीङ इति उपादीसूतइतिस्थितेमीनातिमिनोति~~[illegible]~~यातेकृतेदारूपतार्थवत्वाद्धुसंज्ञाप्रसंगः इह
खल्विति एवंविषयआत्वविधानाद्दीशब्दएवदाप्रकृतिरितिदोषः नचेयमिति एवंएकस्थानेआत्वविधानादित्यर्थः ६ ६ ६

भा०कै०प्र०
५०

ग्रामादाग्रहणेविशिष्ट अस्यचार्थस्यदीपः पित्त्वमदाविति प्रतिषेधसामान्यग्रहणार्थं लिंगं अन्यथास्याअक्षणिकत्वात्तत्रग्रहणंनभविष्यतीतिकिंप्रतिषेधार्थे
नपित्वेन सामान्यापेक्षयादानिरनुबंधकइति लक्षणप्रतिपदोक्तयोरितिनिषेधपरिभाषाद्वात्तुपस्थानमिहस्थापयतीतिविधेयोपिसिध्यतिदीदोदेसितत्वादइत्यतो
दूनिरित्यर्थःसतयोर्घुसंज्ञाज्ञापयति नहिदधातिनिरित्यर्थंहस्वेतत्रअस्यधातेर्दीर्घइतिघादेशविधानात्तदङ्गोपप्रसंगातिसमानशब्दानामिति समान
श्रुतीनामित्यर्थः प्रणिदापयतिप्रणिधारयतीति दङः परिणामेनिवृत्याकारेकृते दाधाशब्दौसंपद्येते तौचार्थवंतौ पश्चात्तुरपत्त्वंक्रियमाणमाग
मत्वात्तदन्यत्वंनकरोतीतिप्राप्तिः अर्थवद्ग्रहणादिति अर्थवद्ग्रहणेनानर्थकस्येत्यस्यार्थस्यस्वरूपमित्यनेनज्ञापितत्वाद्दुरणपरइतिवाणविधीयमा
नएवरपरोभवतीतिविधिःक्रियमाणाआर्भवतीतिदारधाविरवार्थवत्त्वंनवनतदवयवयोरनिनाभिघुसंज्ञा अनुपसर्गाद्वितिअभ्युपगम्यघुसं

ज्ञिकनार्थेनचापिनार्थः दोषएवएतस्याः परिभाषायालक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेतिगामादाग्रहणेष्वविशेषइति समानशब्दप्रति
षेधःसमानशब्दानांप्रतिषेधोवक्तव्यः प्रणिदापयतिप्रणिधारयति दाधाघुसंज्ञाभवंतीतिघुसंज्ञाप्राप्नोति समानशब्दाप्रतिषेधोर्थवद्ग्रहणात् समा
नशब्दानामप्रतिषेधः अनर्थकः प्रतिषेधोप्रतिषेधःघुसंज्ञाकस्मान्नभवति अर्थवद्ग्रहणात् अर्थवतोर्दाधोर्ग्रहणंनचैतावर्थवंतौ अनुपसर्गाद्वा
अथवायक्रियायुक्ताःप्रादयस्तंप्रतिगत्युपसर्गसंज्ञाभवतिनचैतौदाधोप्रतिक्रियायोगः यस्येवंदाप्युपितरेहिनप्राप्नोतिप्रणिदापयतिप्रणिधाप
यतीति अत्रापिनैतौदाधोअर्थवंतौनवायेतौदाधोप्रतिक्रियायोगः नवार्थवतोह्यागमस्तद्गुणीभूतस्तद्ग्रहणेनगृह्यतेयथान्यत्र नवाएषदोषः किंका

रणंदोषंपरिहरतिघुसंज्ञापेक्षयायस्योपसर्गत्वंतस्मात्परस्यनेर्घोपरतोणत्वंविधीयते अत्रदाधापेक्षयानास्तिप्रशब्दस्योपसर्गत्वंकिंतुदारधात्व
द्वापेक्षयेत्यदोषः इत्यावितहरति अत्रापिपुकिकृतपकारांतोर्थवान्नकेवलोदाशब्दःपुगंतमेवप्रत्युपसर्गत्वंनदाशब्दंप्रतीतिभावः नवार्थवतइति ल
क्ष्यात्मकस्यभावस्यनिमित्तवशाद्दुपनयापत्तयोव्यपदेशहानिंनकुरुतः यथादेवदत्तस्यांगाधिक्यांगच्छेदौइहाप्यंतरंगत्वात्कृतायांदाधोर्घुसंज्ञायां
पश्चादुत्पन्नःपुगागमोघुव्यपदेशंननिवर्तयति नाप्यर्थवत्वंभस्यदोषः अनर्थकस्याप्यागमोव्यपदेशहानिंनकरोति यथास्यपरिरफेआका
राकारयोर्वृद्धिगुणव्यपदेशाहानिः इहलव्धवतोग्रहणादर्थवतइत्युक्तेयदाचप्रकृत्यर्थःप्रेरणविशेष्यतेतदायंपरिहारः ण्यर्थविशेषणत्वेनुप्र
स्यदाधोप्रत्यनुपसर्गत्वाण्णत्वंनभवत्येव ॥ ॥ ॥ ॥ ॥ ७ ॥ श्रीसांब ॥ ॥

शिव
५०

आद्यंत एकशब्दो॰ सहायवाचीनसंख्यावाची बहुष्वपि व्यवस्थितस्य एकत्वसंख्यास्तीति किमेकस्मिन्नित्यनेनकृतं स्यात्। एकस्मिन्नित्युपमेये सप्तमी निर्देशादाद्यंतवदित्युपमानात्सप्तम्यंताद्वतिर्विज्ञायते यथामथुरावत्पाटलिपुत्रे प्राकार इति द्वयोरुपमानोपमेययोराधाराधेयसंबंधप्रतिपादनाय वाक्यं प्रयुज्यते यश्चिन्तयोर्भिन्नविभक्तिकत्वं स्यात् उपमानोपमेयभावएवनगम्येत। सर्वातिदेशानां कार्यातिदेशस्य प्राधान्यात्तस्यैवेहाश्रयणं किमर्थमिति व्यपदेशिवद्भावेन सिद्धत्वान्नकर्तव्यमित्यर्थः। इतएमुच्यते संभवतिगौणेनस्यादित्याह सत्यन्यस्मिन्निति आद्यंतौ विद्येते यस्मिन् शास्त्रे तदाद्यंतवत्तस्यभावात्प्रवर्तनादित्यर्थः। केचिदाद्यंतभावादितिपाठः। तत्रव्यपदेशिवद्वचनमिति सर्वकार्यसिद्ध्यर्थं व्यापकं कर्तव्यमित्यर्थः। तत्रनिमित्तस्य सद्भावान्मुख्यो व्यपदेशोअस्यास्तीति सव्यपदेशी यस्तुव्यपदेश हलभावाद्विद्यमानव्यपदेशः सतेनतुल्यं वर्तते कार्यं प्रतीति व्यपदेशिवद्भवतीत्युच्यते वक्षादिति वक्तव्ये

आद्यंतवदेकस्मिन् किमर्थमिदमुच्यते सत्यन्यस्मिन्नाद्यंतवद्भावादेकस्मिन्नाद्यंतवद्वचनं सत्यन्यस्मिन्यस्मात्पूर्वं नास्ति परमस्ति सआदिरित्युच्यते सत्यन्यस्मिन्यस्मात्परं नास्ति पूर्वमस्ति सोंत इत्युच्यते सत्यन्यस्मिन्नाद्यंतवद्भावे तस्मात्कारणादेकस्मिन्नाद्यंतोपदिष्टानि कार्याणि नसिध्यंतीति इष्यं तेचस्युरितितान्यंतरेणयत्नं नसिध्यंतीत्येकस्मिन्नाद्यंतवद्वचनं एवमर्थमिदमुच्यते अस्तिप्रयोजनमेतत् किंतर्हीति तत्र व्यपदेशिवद्वचनं तत्रव्यपदेशिवद्भावोवक्तव्यः व्यपदेशिवदेकस्मिन्कार्यं भवतीतिवक्तव्यं किंप्रयोजनं एकाचोद्वे प्रथमार्थं वृक्षस्येकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशइति तस्मिन्क्रियमाणे इहैवस्यात् पपाचपपाठ इयायआरेत्यत्रनस्यात् व्यपदेशिवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धंभवति षत्वेचादेशसंप्रत्ययार्थं वक्ष्यतिआदेशप्रत्ययोरित्यवयवषष्ठ्येवेति एतस्मिन्क्रियमाणे इहैवस्यात् करिष्यामि हरिष्यतीति इहनस्यात् इंद्रोमाबक्षत् सदेवान्यक्षत् व्यपदेशिवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धंभवति सतर्हि व्यपदेशिवद्भावोवक्तव्यः नवक्तव्यः अवचनाल्लोकविज्ञानात्सिद्धं अंतरेणैववचनं लोकविज्ञानात्सिद्धमेतत् ॥

तिप् इतश्चलोप इतीकारलोपः लेटोडाटावित्यडागमः सिप्कृतं अत्रसकारमात्रं प्रत्ययोनतुप्रत्ययावयवः सकार इति षत्वंनस्यात् अवचनादिति अवचनेवचनरहितं यल्लोकविज्ञानं तस्माल्लोकव्यवहारादित्यर्थः। इहतावदियायेति इण्धातुः प्रयोगभेदाद्रूपः एतिइतः यंतिअयनंआयकः अगात् गमयतीति तस्यापमकोवयवइवलक्ष्यते अथवा अर्थवतोधातोरयंवर्णरूपएकोऽजिति अर्थस्यत्यागोपादानाभ्यां भवति व्यपदेशश्चकाजितिएवं शिलापुत्रकस्य शरीरमित्यनेकक्रियाविषयस्यावस्थान्तरे रमेकावस्थायुक्तं शरीरमित्यस्तिव्यपदेशः एवंहि सिप्रत्ययस्ये सहितोपिदृष्टः ओषिषदित्यादौ केवलोपीतिनस्यायं सकार इति व्यपदिश्यते॥ ॥

संनिपातेति अक्रियमाणे सन्निपातेनार्थं कियते यदि पात्रघुसंज्ञास्यात् ष्ठाघ्वोरिच्चेति किलस्यादि लकिलस्यविधानं स्यादितिघुसंज्ञा प्रतिनैषआकार आतामंदर्शयति इतिघुसंज्ञानप्रवर्तते अत्रकेचिदाहुः दीङः स्थानादावालेकृते घुसंज्ञाभवत्येवेतिघिमेदातीतिणत्वंभवति अतएववार्तिककारेणस्थाघ्वोरिल्वेइतिविशेषविशेषोनिर्दिष्टः अन्येत्वाहुः निर्देशएवैजंतानामनुकरणानामालेकृतेदाण्दाभ्धाञ्ओंचेकरोपेईदेचदाधादितिनिर्देशाद्दीङोनास्ति प्राप्तिः नहितत्वकरणस्यालमस्ति अगुणविषयत्वात् दाप्प्रतिषेधइतिदाप्लवनइत्यस्यवनिषेधः स्यादित्यर्थः अवदातमितितत्वमत्रप्राप्नोति शक्यंतावदिति दाप्दैपोधातुघुसंज्ञाकस्मान्नभवति संनिपातलक्षणोविधिरनिमित्तंतद्विघातस्येत्येवंनतद्भविष्यति दाप्प्रतिषेधेनदैप्यनेजंतत्वात् दाप्प्रतिषेधे दैपप्रतिषेधोनप्राप्नोति अवदातंमुखं ननुचात्वेकृतेभविष्यतितत्कृतात्वंनप्राप्नोति किंकारणं अनेजंतत्वात् सिद्धमनुबंधस्यानेकांतत्वात् सिद्धमेतत्कथं अनुबंधस्यानेकांतत्वात् अनेकांताह्यनुबंधाः पित्प्रतिषेधाकृत् अथवादाधाघ्वदापिदितिवक्ष्यामि तच्चावश्यं वक्तव्यं आदाबितिहि अमानेइहापिप्रसज्येत प्रणिदापयतीति शक्यंतावदनेनाद्यविनिर्मुक्तनावातस्यप्रतिषेधोविज्ञातुंसर्वांतर्हिभिद्यते यथान्यासमेवास्तु ननुचोक्तंदाप्प्रतिषेधेदैपीतिपरिहृतमेतत् सिद्धमनुबंधस्यानेकांतत्वात् अथैकांतेषुदोषएव एकांतेषुचनदोषः आत्वेकृतेभविष्यति ननुचोक्तंतत्कृतात्वंनप्राप्नोति किंकारणं अनेजंतत्वादिति पकारलोपेकृतेभविष्यति नह्ययंतदाघुर्भवति भूतपूर्वगत्याभविष्यति एतच्चात्रयुक्तं यत्सर्वेष्वेवसानुबंधकग्रहणेषुभूतपूर्वगतिर्विज्ञायते अनैमित्तिकोह्यनुबंधलोपस्तावत्येवभवति अथवाचार्यप्रवृत्तिर्ज्ञापयति नानुबंधकृतमनेजंतत्वमिति यदयमुदीचांमाङोव्यतिहारइतिमेङःसानुबंधकस्यात्वभूतस्यग्रहणंकरोति अथवादाबितायं नदेवस्ति कथमवदायतीतिष्यन्तिकरणोभविष्यति

वांतोपठितव्यो तात्वलेवेति इत्संज्ञायांसत्यामेवप्रयोगेदायद्दएवार्थं पित्कार्यं तुलभत इत्यर्थः अथवेति अनुबंधानामेकांतत्वपक्षेउपदेशेएजंतानामात्वमुच्यमानं देपोनप्राप्नोतीति ज्ञापकोपन्यासः माङ्इति मेङोनेग्रहणंनमाङः मेङोव्यतिहारेणनित्ययोगान्माङःसुखेवक्तुत्वात् व्यतिमिमीत इति कादाचित्कत्वाद्व्यतिहारयोगस्यप्रणिदानंव्यतिहार इत्येकोर्थः उदीचांमेङ इतितुनकृतं एवंहि नानुबंधकृतमनेजंतत्वमितिनज्ञापितं स्यात्

अथवेति दिवादिषु दाप् शोपनइतिपठिष्यत इत्यर्थः ८ ८ ८ ८ ८ ८ ८ ८ ८ ८

इदानीं योगं प्रत्याख्यातुमाह अपर इति । यद्यपि बहुष्वक्षरेषु आद्यन्तशब्दौ प्रयुज्येते तथाप्यपूर्वानुत्तरलक्षणमेतयोः प्रवृत्तिनिमित्तं तच्चैकस्मिन्नप्यस्तीति नार्थः सूत्रेण । आ
द्यकारस्त्वाह सति त्वन्यस्मिन्निति । नह्यनपेक्षितप्रतियोगिनोराद्यन्तयोः प्रवृत्तिरित्यर्थः । तस्मादेकस्मिन्मुख्य आद्यन्तव्यपदेशो नास्तीति कर्तव्यो योगः । यद्यपि
लौकिकेन व्यपदेशिवद्भावेनाद्यन्तव्यपदेश एकस्मिन्नपि सिद्ध्यति तथापि गौणत्वात् कार्येण न भवितव्यमिति यस्य च भावात् स्यात् न भाति योगोऽयमारब्धः ।
प्रत्ययस्त्रिदाद्युदात्तत्वमिति प्रत्ययस्याद्युदात्तत्वं त्रित इति वाद्युदात्तत्वमित्यर्थः । कथं पुनर्भिन्नविभक्त्योर्द्वन्द्वः । उच्यते प्रत्ययस्य यदाद्युदात्तत्वं तस्य प्रत्ययो
ऽपि विषय इति प्रत्ययेऽपि तदुच्यते यदा त्रिविषयदाद्युदात्तत्वं तद् त्रितोऽपि संबन्धि भवतीति नास्ति भिन्नविभक्तित्वं कर्णेराद्युदात्तत्वं निवृत्तस्थाने पित्वा
ल्लिङ्गादेकारोऽपि प्रत्ययस्याद्युदात्तत्वं भविष्यतीति निदकारविषयमेव लिङ्गं स्यादितीकारोकारयोः प्रत्यययोराद्युदात्तत्वं न स्यात् विशेषणार्थं वा पित्करणं
स्यात् तथा चास्य ज्ञापकं स्यात् गार्ग्य इति अत्र परत्वाद्यस्येति लोपे कृते आदित्वाभावात् प्रत्ययस्याद्युदात्तत्वं न प्राप्नोति स्वरविधौ स्थानिवद्भावप्रतिषेधा

अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन् अपूर्वलक्षण आदिरनुत्तरलक्षणोऽन्तः एतच्चैकस्मिन्नपि संभवति अपूर्वानुत्तरलक्षणत्वात् एतस्मात् कार
णादेकस्मिन्नपि आद्यन्तापदिष्टानि कार्याणि भविष्यन्ति नार्थ आद्यन्तवद्भावेन गौणमुख्यत्वात् सत्यमेतत् सति त्वन्यस्मिन्निति कानि पुनरस्य यो
गस्य प्रयोजनानि आदित्वे प्रयोजनं प्रत्ययस्त्रिदाद्युदात्तत्वे प्रत्ययस्यादिरुदात्तो भवतीति इहैव स्यात् कर्तव्यं तैत्तिरीय औपगवः काप
टवः इत्यत्र न स्यात् त्रिरादिर्नियमितिः इहैव स्यात् आहिभुवकायनिः आग्निवेश्यः गार्ग्यः कृतिरित्यत्र न स्यात् वलादेरार्धधातुकस्येट्
प्रयोजनं आर्धधातुकस्येड्वलादेरिति इहैव स्यात् करिष्यति हरिष्यति जोषिषत् मन्दिषत् इत्यत्र न स्यात् यस्मिन्विधिस्तदादावल्ग्रहणे प्रयोजनं
ष्यति यस्मिन्विधिस्तदादावल्ग्रहण इति तस्मिन् क्रियमाणे अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इहैव स्यात् श्रियः भ्रुवः श्रियौ भ्रुवौ इत्यत्र न स्यात्
अजाद्यत्वे प्रयोजनं आडजादीनां इहैव स्यात् ऐक्षिष्ट ऐहिष्ट अध्यैष्ट इत्यत्र न स्यात् ~~आर्धधातुकस्येट्...प्रयोजनं...~~
~~...इत्यत्र न स्यात्...~~ ...इहैव स्यात् कुण्डानि वनानि यानि तानि

...नास्ति ... स्वरविधौ व्यञ्जनस्याविद्यमानत्वात् नास्ति हलपेक्षमप्यादित्वं कतिरिति क्तिनो नित्वं नादौ दोषः नित्यकृता विलेवमर्थं स्यात् सौवर्यः सप्तम्यस्त्वदन्त
सप्तम्य इत्यनाश्रितेऽतदुक्तं जोषिषदिति लेट इडदौ इति ज्ञापकं सिञ्विषयमेव स्यादिति सिपः इणस्यात् यस्मिन्विधिरिति स्वस्य च रूपस्येति नानुवर्तत इति प्रयो
जनत्वेनोपन्यासः अजाद्यात्वे इति सकारापेक्षया प्रयोजनोपन्यासः वार्तिककारस्तु अजादीनामयासिद्धमित्याह श्रीः श्रीः

भा॰ कै॰
५२

लोकानिरूढ्याऽयं व्यवहार इति लोकवत् कल्पेऽपि व्यवहारो गौणमुख्यन्यायोऽत्र नावतरति पदसमुदाय इति पादपर्यायः पदशब्दः तथानेक
पदात्मिकेति पादस्येव विवक्षितः न तु ऋक् ऋक्स्यापि द्व्येकमेव पदं भवति अत्राप्यर्थेमेति पदादीनामर्थः सोऽन्यपदार्थस्त्वर्थः अपदे प्रवा
राद्यार्थे एव पदादिभिरभिधीयते अयमेव मज्येष्ठ इति प्रथमरूपतयाध्यवसायात् मध्यमकार्यकरणात् मध्यम इति व्यपदिश्यते अन्योन
जनितेति कनीयानिति व्यपदिश्यते असूता यामिति बहुकृत्वा प्रसूता प्रथमपुत्रेण कानिष्ठ्यते तथापि प्रसोष्यते सापि
तद्यथा लोके शालासमुदायो ग्राम इत्युच्यते भवति चैतदेकस्मिन्नप्येकशालो ग्राम इति विषम उपन्यासः ग्रामशब्दोऽयं बह्वर्थः अस्त्येव शा
लासमुदाये वर्तते तद्यथा ग्रामो दग्ध इति अस्ति वाटपरिक्षेपे वर्तते तद्यथा ग्रामं प्रविष्ट इति अस्ति मनुष्येषु वर्तते ग्रामो गतो ग्राम आगत
अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते तद्यथा ग्रामो लब्ध इति तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्
प्रयुज्यते एकशालो ग्राम इति यथा तर्हि वर्णसमुदायः पदं पदसमुदायो ऋक् ऋक्समुदायः सूक्तमिमुच्यते भवति चैतदेकस्मिन्
पि एकवर्णं पदं एकपदा ऋक् एकर्चं सूक्तमिति अत्रापि यथेन मुक्तो व्यपदेशः पदेन मार्थः ऋचा नार्थः सूक्तेनार्थः यथा तर्हि बहुषु

भा ३

पुत्रेषु एतदुपपन्नं भवति अयं मे ज्येष्ठः अयं मे मध्यमः अयं मे कनीयानिति भवति चैतदेकस्मिन्नपि अयमेव मे ज्येष्ठः अयमेव मध्य
मः अयमेव कनीयानिति तथाऽसूतायामसोष्यमाणायां च भवति प्रथमगर्भेण हतेति तथा नेत्या नाजिगमिषुराह इदं मे प्रथममागम
नमिति आद्यन्तवद्भावश्च शक्यो वक्तुं कथं
कश्चित् पूर्वोत्पन्नेन उत्तरेण हन्यते तत्र मध्यमो नापि प्रसूता नापि प्रसोष्यते कुक्षिस्थेनैव गर्भेण हतेत्युच्यते अपत्यपर्यायो गर्भशब्दः
तत्र तस्यापत्ययोग्यताध्यवसायेन भाविगर्भापेक्षया प्रथमगर्भेण हतेति व्यपदिश्यते स्यन्तरपुत्रवाक्पुत्रत्वे सति आद्यगर्भस्य प्रथम
व्यपदेशात् नात्र यथाविधस्य प्रथमव्यपदेशः अनत्ये इति बहुकृत्व आगतः पूर्वमागमनं तस्य प्रथमव्यपदेशात् तत्र मुख्यकरोत्येव आजि

५२

गमिषुश्च भावीन्यागमनानि बुद्ध्याऽवरुध्य यदि प्रथमव्यवहारं यत्तु सकृदेवागतः सोऽपि करोति प्रथमव्यवहारमिति भाति
पादनार्थमेनं सानाजिगमिषुरेकपात्र तत्रान्यस्य बधेषु बहुधागमनेषु आद्यस्य प्रथमव्यवहारदर्शनात्तथाविधत्वादेकस्मिन्नप्याग
मने प्रथमव्यवहारः

तौ १

यस्तर्हीति ननु नीधिरिति भवितव्यं एवं तर्हि ... तेन इति नद्‌ इति सामान्येन पदं संक्रियते पश्चान्न धादिशेष्यन्त इति न दोषः स्त्रीलिंगे चितिस्वा
र्थिकः प्रकृतिलिंगानुविधानात्स्त्रीलिंगः माहवीरूपमिवेति इवशब्दो भिन्नक्रमः तेनायमर्थः महव्यादिमाकृतिरिति तेसु सुपेति समासे कृते हस्व
त्वं स्यात् बहुगणसंख्या संप्रत्ययार्थमिति संख्यायाएकादिकायाः संख्याप्रदेशेषु संप्रत्ययार्थमित्यर्थः ननु चैव यथयपश्च रपत्यंदेवनेतिलो
किकार्थग्रहणेतत्थेकादिकापि संख्याग्रहीष्यत इत्यर्थः कृत्रिमाकृत्रिमयोरिति न्यायोयं तथाहि सर्वार्थाभिधानशक्तियुक्तः शब्दो यदा

यदा तर्हि सैव नदी सएवतरं तदा प्राप्नोति स्त्रीलिंगेषु घादिष्वेवंतत् अवश्यं चैतदेवं विज्ञेयं समानाधिकरणेषु घादिषु लुप्यमाने
इहप्रसज्येत महेवी रूपमिव ब्राह्मणी रूपमिवेति बहुगणवतु डतिसंख्या संख्यासंज्ञायां संख्याग्रहणं संख्यासंज्ञायां संख्याग्रहणं
कर्तव्यं बहुगणवतु डतयः संख्यासंज्ञा भवंति संख्या च संख्यासंज्ञा भवति इति वक्तव्यं किं प्रयोजनं संख्यासंप्रत्ययार्थ एकादिका
याः संख्यायाः संख्याप्रदेशेषु संख्येत्येष संप्रत्ययो यथा स्यात् ननु चैकादिका संख्या लोके संख्येति प्रतीतेति नास्याः संख्याप्र
देशेषु संख्यासंप्रत्ययो भविष्यति एवमपि कर्तव्यं इतरथा ह्यसंप्रत्ययो कृत्रिमत्वाद्यथा लोके अकृत्रिमयोर्हि संख्याग्रहणे एका
दिकायाः संख्यायाः संख्येत्येष संप्रत्ययो न स्यात् किं कारणं अकृत्रिमत्वात् बह्वादीनां कृत्रिमा संज्ञा कृत्रिमाकृत्रिमयोः कृत्रि
मे कार्यसंप्रत्ययो भवति यथा लोके तद्यथा गोपालकमानय कटजकमानयेति यस्यैषा संज्ञा भवति स आनीयते न यो गां पालय
ति यो वा कटे जातः यदि तर्हि कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति नदी पौर्णमास्याग्रहायणीभ्यः अजाद्यप्रसंग्येत पौ
र्णमास्याग्रहायणीग्रहणसामर्थ्याद्भविष्यति तद्विशेषेभ्यस्तर्हि प्राप्नोति गंगा यमुनेति अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति द्विशेषेभ्यो न भवतीति
विशिष्टे ... व्यवहाराय नियम्यते तत्प्रातःत्रैव प्रतीतिं जनयति नात्र नदीपौर्णमासीति पूर्वत्वात्स्त्री नदीति संज्ञाविधानात्संज्ञिनो ग्रहणं प्राप्तं नन्वस्य
स्य अशब्दसंज्ञेति निषेधात् पौर्णमासीति नियमार्थं पौर्णमास्याग्रहायणीग्रहणं इकारांतानां स्यादिति चेत् एवमप्यपौर्णमास्याग्र
हायणीभ्य इति न कर्तव्यं स्यात् ऊकारग्रहणेन च नदीसंज्ञकेभ्यो व कारांतं पौर्णमास्याग्रहायणीशब्द साहचर्याद्‌ गृह्यते तद्विशेषेभ्य इति गंगा
दिभ्यः

भा॰ कै॰ प्र॰ अंतवदिति येन विधिस्तदंतस्येत्यनेनैव गतार्थे प्रपंचार्थोयमुपन्यासः कृत्तद्रित अर्थवतो व्यपदेशिवद्भावात्‌ न शब्दाकारस्यानर्थकत्वादिह प्रयोजनं तेनो
पन्यासः आभ्यामिति अत्र हेत्वंतवत्वेउपयुज्यते अकारांतस्याल्लोपस्य दीर्घो भवतीति एवं कृतप्रयोजनोपन्यासः एयमिति इणोरूपं इणस्तु इयमिति
५२ कृ भवति तरतमपौ घः आतिशायनिकप्रकरणएव तादीघः पिति घइति कृत्यप्रकरणे कर्मणसंज्ञाकरणं स्वार्थे पितरवत्तीति सूचनार्थं तेनाल्पाद्यतरम्
तादिसिद्धं भवतीत्याहुः नदीतरइति तरतेकर्तोदारविसर्जनं चानुबंधाः स्मर्यमाणा एव कार्यं प्रतिहेतुत्वं लभंत इति घसंज्ञा प्राप्तिः साहचर्येण च
हृस्वतरशब्दः सर्वत्रनाश्रीयते तथाहि द्विविष्कलुरिति कृत्वोर्थे इति कृत्वोर्थग्रहणं चतुरश्च विशेषणार्थं कृतं अथवा आदिभिः शब्दसारूप्येणैव

अंतवद्विवचनांतप्रगृह्यत्वे प्रयोजनं इदुदेद्विवचनं प्रगृह्यं इहैव स्यात् पचेते इति पचेथे इति खट्वे इति मालेइतीत्यत्र न स्यात् भिन्दवीमात्परः प्रयो
जनं इहैव स्यात् कुंडानि वनानि यानि तानीत्यत्र न स्यात् अचोंत्यादिटिप्रयोजनं टित आत्मनेपदानां टेरे इति इहैव स्यात् कुर्वाते कुर्वाथे कुरुते कु
र्व इत्यत्र न स्यात् अलोंत्यस्य प्रयोजनं अतो दीर्घो यञि सुपि च इहैव स्यात् घटाभ्यां पटाभ्यां आभ्यामित्यत्र न स्यात् येन विधिस्तदंतस्ये

प्रयोजनं अचो यत् इहैव स्यात् चेयं जेयं एयं अध्येयमित्यत्र न स्यात् आद्यंतवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धं भवति तरतमपौ घः
घसंज्ञायां नदीतरे प्रतिषेधः संज्ञायां नदीतरे प्रतिषेधो वक्तव्यः नद्यास्तरो नदीतर इति घसंज्ञायां नदीतरे प्रतिषेधः घसंज्ञायां नदीतरे अ
प्रतिषेधः अनर्थकः प्रतिषेधोप्रतिषेधः घसंज्ञाकस्मान्न भवति तरप्ग्रहणं ह्यौपदेशिकं औपदेशिकस्य तरपो ग्रहणं न चैष उपदेशे
तरप्शब्दः किं वक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते इह हि व्याकरणे सर्वेष्वेव सानुबंधकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमि
ति रूपनिर्ग्रहश्च शब्दस्य नांतरेण लौकिकं प्रयोगं तस्मिंश्च लौकिके प्रयोगे सानुबंधकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपा
स्यते कोसौ उपदेशो नाम न चैष उपदेशे तरप्शब्दः अथवा अस्त्वस्य घसंज्ञा को दोषः घादिषु नद्या ऋस्वो भवतीति ह्रस्वत्वं प्रसज्येत समाना
धिकरणेषु घादिष्विष्यते तत्
रशब्दोपि कृत्वोर्थ एव गृह्यत इति किं कृत्वोर्थग्रहणेन अप्रतिषेध इति न प्रतिषेध इति प्रतिषेधे न क्रियानत्वानिषिध्यते भाष्यकारस्तु ... व्याचष्टे
अनर्थकः प्रतिषेध इति औपदेशिकमिति उपदेशः प्रयोजनमस्य तत्र भवात्स्वभौपदेशिकं यत्रास्येति अनुबंधरहितरूपमित्यर्थः नचैव इति कल्पनिक
मस्य तरपं नतु साक्षान्निर्दिष्टं समानाधिकरणेष्विति आतिशायनिकस्य स्वार्थिकत्वात्समानाधिकरणः श्रीः

अप्रभवति

घ ४

५३

कर्मणि द्वितीयेति प्रातिपदिकात् अनभिहिते कर्मणि संख्यायां द्वितीया विधीयते न च क्रियायाः संख्या संभवतीति सामर्थ्यात्कारकग्रहणं कर्तरि
कर्मव्यतिहार इत्यत्र धातोः साक्षात्क्रियायां दृष्टा क्रियाया एव ग्रहणं कण्वमेघेभ्यः करण इति तत आदिप्रत्ययोत्पत्यर्थं धातुसंज्ञा क्रियते क्रियावाचिनश्च
तव्यादयः साधने उत्पद्यंते इति सामर्थ्यात् क्रियाग्रहणं विप्रतिषिद्धमिति हृद्यावयवानां शकुनभिधायित्वादधिकरणं द्रव्यं गृह्यते तद्वदतिदेशोयमिति
संख्याकार्यातिदेशोयमित्यर्थः यदि हि संज्ञा स्यात् टिघुभादिसंज्ञावदेकाक्षरा क्रियेत तेन तस्माल्लौकिकार्थाभिधायी संख्याशब्द उपादीयमानोतिदे

तद्यथा कतुरीकृतमम कर्मेति कृत्रिमा कर्मसंज्ञा कर्मप्रदेशेषु चोभयगतिर्भवति कर्मणि द्वितीयेति कृत्रिमस्य ग्रहणं कर्तरि कर्मव्य
तिहार इत्य कृत्रिमस्य तथा साधकतमं करणमिति कृत्रिमा करणसंज्ञा करणप्रदेशेषु चोभयगतिर्भवति कर्तृकरणयोस्तृतीयेति कृत्रि
मस्य ग्रहणं शब्दवैरकलहाभ्रकण्वमेघेभ्यः करण इत्यत्रा कृत्रिमस्य यथा आधारोधिकरणमिति कृत्रिमाधिकरणसंज्ञा अधि
करणप्रदेशेषु चोभयगतिर्भवति सप्तम्यधिकरणे चेति कृत्रिमस्य ग्रहणं विप्रतिषिद्धं चानधिकरणवाचीत्य कृत्रिमस्य अथ
वान्वर्थसंज्ञाकरणं तद्वदिति देशोयं बहुगणवतुडतिसंख्येति संख्यावद्भवतीति सतर्हि वतिनिर्देशः कर्तव्यः न कर्तव्यः नह्यंतरेण
वतिमतिदेशो गम्यते अंतरेणापि वतिमतिदेशो गम्यते तद्यथा एष ब्रह्मदत्तः अब्रह्मदत्तं ब्रह्मदत्त इत्याह तेन मन्यामहे ब्रह्मदत्तवद
यं भवतीति एवमिहाप्यसंख्यां संख्येत्याह संख्यावदिति गम्यते अथवा आचार्यप्रवृत्तिर्ज्ञापयति भवत्येकादिकायाः संख्या
याः संख्याप्रदेशेषु संप्रत्यय इति यदयं संख्याया अतिशदंतायाः कन्निति शदंतायाः प्रतिषेधं शास्ति कथं कृत्वा ज्ञापकं न हि
कृत्रिमा संज्ञा शदंता वा संख्यास्ति न तु चेयमस्ति डतिः तर्हि शदंतायाः प्रतिषेधं शास्ति यच्चापि संज्ञायाः प्रतिषेधं शास्ति
ननु चोक्तं उत्त्वर्थमेतत्स्यादिति अर्थवद्ग्रहणे नानर्थकस्येत्यर्थवतस्तिशब्दस्य ग्रहणं न च उतेस्तिशब्दोर्थवान्

शार्थत्वमस्य बोधयति अथवेति एकसंज्ञाकरणादेकादेयः संख्याशब्देन प्रदेशेषु न सज्जेत इति लिंगे नाप्यनुमीयत इत्यर्थः अर्थवत
इति ननूभयसंभवे इदं परिभाषा प्रतिष्ठते उत्संतान कृत्रिमास्ति उतेश्चातिशब्दो नर्थक एवेति तस्येव निषेधस्यादित्य ज्ञापकस्य तायाः प्र
तिषेधः नैष दोषः अतिशदंताया इत्युच्चारणकाल एवार्थवतस्तिशब्दस्य ग्रहणमिति प्रतीतिरिति ज्ञापकत्वमेव प्रतिषेधस्य ॥ ॥

भा॰कै॰प्र॰

५४

यद्दयमिति नित्यार्थं पाठः स्यादिति चेत् अवस्थितविभाषया विपाट्शब्दस्य नित्यत्वं भविष्यतीत्यदोषः बहुवचनेति अन्यथा आपन्न द्वाड्
लादेशः यथैकवचननिर्देशस्तथेहापि कर्तव्यः स्यात् न वेदमिति अनाश्रितमित्यर्थः उत्तरार्थं चेति अयं हि सूत्रोपात्तः संख्याशब्दः स्वरूपपदार्थकः उत्तरत्र से
ति निर्देशेन प्रयोजनं इत्यर्थेनेति इह अर्थो यस्येति सामान्यविशेषभावान्नपौनरुक्त्यं आनश्चेति इत्यत्रेत्यर्थः अर्थः सामर्थ्यं यथा गोपालकमानयमाण
वकमध्यापयिष्यतीति यच्छिहस्तस्याध्यापनासंभवात्संज्ञिनो ग्रहणं प्रकरणं प्रस्तावो यथा भोजनप्रकरणे सैंधवमानयेति लवणप्रतीतिः गमनप्रकर

यद्दयं विपाट्शब्दं शरत्प्रभृतिषु पठति इह तर्हि प्राप्नोति नदीभिश्चेति बहुवचननिर्देशान्न भविष्यति स्वरूपविधिस्तर्हि प्राप्नोति बहुवचन
निर्देशादेव न भविष्यति एवं च सति कृतं भवति कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय इति न च कश्चिद्दोषो भवति उत्तरार्थं च उत्तरार्थं च
संख्याग्रहणं कर्तव्यं ष्णांता षट् षकारनकारांतायाः संख्यायाः षट्संज्ञा यथा स्यात् इह मा भूत् पामानो विप्रुष इति इहार्थेन तावत्ता
र्थः संख्याग्रहणेन ननु चोक्तं इतरथा ह्यसंप्रत्ययोकृत्रिमत्वाद्यथा लोक इति नैष दोषः अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः
कृत्रिमे संप्रत्ययो भवति अर्थाद्वा स्यैवं संज्ञकेन भवतिप्रकृतं वा तत्र भवति इदमेवं संज्ञकेन कर्तव्यमिति आतश्चार्थात्प्रकरणाद्वा अं
गहिमवान् ग्राम्यं पांसुरपादमप्रकरणज्ञमाह वितं ब्रवीतु गोपालकमानय कटजकमानयेति उभयगतिस्तस्य भवति साधी
यो वा यच्छिह संगमिष्यति यथैव तर्ह्यर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति एवमिहापि प्राप्नोति ज्ञा
पयति ह्यसौ बह्वादीनामियं संज्ञा कृतेति न यथा लोके तथा व्याकरणे उभयगतिः पुनरिह भवति अन्यत्रापि नावश्यमिहैव

गोपालकमानयेत्युक्ते ग्राम्यमिति उहितमसमर्थं पांसुरपादमिति अपि विशेषितं अत एवाप्रकरणज्ञं उभयगतिरिति किंसंज्ञोयं यस्य कस्यचिन्निर्दिष्टा
स्यादुत यच्छिह सौ स्वविवक्षितः स्यादिति संदेहवान् भवतीत्यर्थः साधीयो वेति यो मम प्रसिद्धः सोनेन चोदितः न च ममैवं संज्ञकः प्र
सिद्ध इति एवं मन्यते लोके गोपालकशब्दः संज्ञिनि यम्यमानः संज्ञ्यंतरं निवर्तयति क्रियानिमित्तत्वर्थं न तिरस्यति तुल्यजाती
यविषय एव हि नियमो भवति एवमिहापीति बह्वादय एवात्र संख्यात्वेन प्रकृता इति भावः न यथा लोक इति संख्याशब्दो
बह्वादिप्रतिपादनाय संज्ञात्वेन विनियुक्तो न त्वेकादिसंख्यानिरासाय आधिक्यार्थं प्रतिपत्त्यर्थत्वादिह संज्ञाकरणस्य ---

अध्यर्धशूर्पमिति । अध्यर्धेन शूर्पेण क्रीतमिति द्विकसंख्येयस्यानुवर्तमानेत ध्वितार्थे समासः । ततः शूर्पादञन्यतरस्यामित्यञ् ठञ् वा अध्यर्धशूर्पम् । अध्यर्धकमिति । संख्यायाअतिशदन्तायाः कन्निति कन् । द्विगोरित्येव सिद्धमिति । समासकन्विध्यर्थमिति संबंधसामान्ये षष्ठी तेन समासे विधीयमाने समासनिमित्तेऽन्यस्मिन् कार्ये विधीयमान इत्यर्थः । तेन द्विगुलुगपि लभ्यते अन्येत्वाहुः । अध्यर्धशब्दः संख्यावाच्येव तथाहि गण्यते एकोऽध्यर्धो द्वौ अध्यर्धतृतीयाः तितन्मते नियमार्थम् अध्यर्धशब्दस्यैव संख्यात्वेन ग्रहणं यथा स्यात् अर्धादीनां माभूदिति वा कापि दनवद्वितीयो नियमः । तस्यैव समासकन्विध्यर्थं सं

समासविध्यर्थं कन्विध्यर्थं च समासविध्यर्थं तावत् अध्यर्धशूर्पं कन्विध्यर्थम् अध्यर्धकं लुकि चाग्रहणं । लुकि चाध्यर्धग्रहणं न कर्तव्यं भवति अध्यर्धपूर्वद्विगोर्लुगसंज्ञायामिति द्विगोरित्येव सिद्धम् अर्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वक्तव्यं किं प्रयोजनं समासकन्विध्यर्थमेव समासविध्यर्थं कन्विध्यर्थं च समासविध्यर्थं तावत् अर्धपञ्चमशूर्पं कन्विध्यर्थम् अर्धपञ्चमकम् अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थं । अधिकग्रहणं चालुकि कर्तव्यं किं प्रयोजनं समासोत्तरपदवृद्ध्यर्थं । समासविध्यर्थम् उत्तरपदवृद्ध्यर्थं च समासार्थं तावत् अधिकषाष्टिकः अधिकसाप्ततिकः उत्तरपदवृद्ध्यर्थम् अधिकषाष्टिकः अधिकसाप्ततिकः अलुकीति किमर्थं । अधिकषाष्टिकः अधिकसाप्ततिकः बहुव्रीहौ चाग्रहणं बहुव्रीहौ चाधिकशब्दस्य ग्रहणं न कर्तव्यं भवति संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये इत्येव सिद्धं बह्वादीनामग्रहणं बह्वादीनां ग्रहणं शक्यमकर्तुं केनेदानीं संख्यासंज्ञा भविष्यति संख्यासंप्रत्ययो भविष्यति

ख्यात्वं न कार्यान्तरार्थमिति अधिकषाष्टिक इति अधिकया षष्ट्या क्रीत इति संख्याविशेषणमधिकशब्दो न संख्येति वचनं तद्धितार्थेति समासः प्राग्वतेष्ठञ् अलुकीति वचनाल्लुकि कर्तव्ये संख्या नास्तीत्यध्यर्धपूर्वेति लुग्न भवति । ततः संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः ननूत्तरपदवृद्ध्यर्थमिति वचनाल्लुकि न भविष्यतीति किमलुकीत्यनेन । नैतदस्ति अर्हत्यर्थात् परेण षष्ठ्यर्थे यः प्रत्ययस्तस्य लुगभावात् तत्रैवोत्तरपदवृद्धिः स्यात् ज्ञापकात् सिद्धमिति । एकादिवत् नियतसंख्यावाचित्वं बह्वादीनां नास्तीति ज्ञापकाश्रयः ।

अन्वर्थेति ननु महत्याः संज्ञायाः करणात् संख्यानुगतानामुपात्तानामेव संज्ञिनां भवतु संज्ञा यथा सर्वादीनामेव सर्वनामसंज्ञा न त्वधिकानां तेन बहुगणशब्दयोः संघे वैपुल्ये च वर्तमानयोः संज्ञा मा भूदेकादीनां तु कथं स्यात् नैष दोषः इहान्वर्थसंज्ञाकरणेन तावदनुरूपाः संज्ञाः सर्वा आक्षिप्यन्ते तेनैकादीनां तावद्ग्रहणं भवति यस्माद्बहुगणवतुडतीति भूर्यादिनिवृत्त्यर्थं नियमार्थं व्याख्यायते अत एव संघे वैपुल्ये च वर्तमानयोर्बहुगणशब्दयोः संज्ञा न भवति तद्धितदेशप्रत्ययेऽपि परस्परसाहचर्यात् संख्यावाचिनोरेव भूर्यादिनिवृत्तये नियमार्थोऽतिदेशः क्रियत इत्यतिप्रसंगो न भवति संज्ञिविशेषणेनार्थ इति स्फोटेनानेन विशिष्टं संज्ञिनं प्रतिपादयितुमुपयोग इत्यर्थः नचान्यार्थमिति एकशब्दत्वदर्शनाद्विभावः भवतु तर्हि प्रतियोगशब्द इत्याह भेद

अथवा महतीयं संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः कुत एतत् लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनम् अन्वर्थसंज्ञा यथा विज्ञायेत संख्यायतेऽनया संख्येति एकादिकया चापि संख्यायते उत्तरार्थेन चापि नार्थः संख्याग्रहणेन इदं प्रकृतमुत्तरत्रानुवर्तिष्यते इदं वै संज्ञार्थमुत्तरत्र च संज्ञिविशेषणेनार्थः न चान्यार्थं प्रकृतमन्यार्थं भवति न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति नहि गोधा सर्पन्ती सर्पणादहिर्भवति यत्तावदुच्यते न चान्यार्थं प्रकृतमन्यार्थं भवतीति अन्यार्थमपि प्रकृतमन्यार्थं भवति तद्यथा शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यते च शालयश्च भाव्यन्ते यदप्युच्यते न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवतीति नहि गोधा सर्पन्ती सर्पणादहिर्भवतीति भवेद्द्रव्येषु एतदेवं स्यात् शब्दस्तु खलु येन येन विशेषेणाभिसंबध्यते तस्य तस्य विशेषको भवति अथवा सापेक्षोऽयं निर्देशः क्रियते न चास्त्यन्यत् किंचिदपेक्ष्यमस्ति संख्यामेवापेक्षिष्यामहे अध्यर्धग्रहणं च समासकन्विध्यर्थं अध्यर्धग्रहणं च कर्तव्यं किं प्रयोजनं समासकन्विध्यर्थं

न खल्वपीति यथा गोधा देशान्तरगमनमात्रेण गोधात्वं न जहाति एवं शब्दोऽपि रूपान्तरं न गच्छतीत्यर्थः अन्यार्थमपीति पदार्थानां शक्तिवैचित्र्यात् शब्दस्त्विति स्वरितत्वेन वाक्यान्तरे शब्दान्तरे कार्यानुग्राहि वस्तु प्रतिपादनयोग्यमनुमीयते सादृश्यानुगतत्वाध्यवसाय इत्यर्थः सापेक्षोऽयमिति स्त्रीलिंगेन निर्देशः कृतः तत्र प्रकृतत्वादन्यपदार्थत्वे न संख्यास्वरितत्वेन विनाप्यपेक्ष्यत इत्यर्थः अध्यर्धग्रहणं चेति वार्तिके संख्याग्रहणं कर्तव्यत्वेन स्थितं तदपेक्षया समुच्चयार्थश्चशब्दः विध्यर्थं चेदं अध्यर्धशब्दस्य त्रिभाग त्रिभाग चतुर्भागादिशब्दवत् संख्यावाचित्वात् अर्धशब्दश्चैकदेशवाचीन संख्यावाची एकदेशादिशब्दवत् तस्याधिशब्देन समासे कृते योगिकोऽर्थः प्रतीयते न संख्या॥ ॥

इतरथा हीति ह्वाभ्यामिति षट्स्वरः स्यात् सप्तमीति अष्टाभ्य इति कृतात्वस्य करणं औशो विधानसामर्थ्यात् लुङ् न विधीयते हलीति · ततश्चाष्टनामिति नुटि कृते आत्वं भव
ति अष्टशसोस्त्वष्टाभ्य इति कृतात्वनिर्देशात् ज्ञापकादात्वं भवति · कृतात्वस्य हि निर्देशस्य प्रयोजनं यत्रात्वं तत्रौशत्वं यथा स्यादिति यदि स्यान्न कृतात्वस्य नि
र्देशस्य प्रयोजनं स्याल्लाघवार्थमष्टभ्य औशिति ब्रूयात् अष्टनमिति हलादावुच्यमानमात्वं ओजसोर्न प्राप्नोति · यत्राष्टनस्य प्राधान्यं तत्रौशत्वेन भ
वितव्यं तत्रैव चौशत्वेनात्वमनुमीयत इति जस्य चात्वमत्रात्वज्ञापकान्न प्राप्नोति विभक्तिमात्रे त्वात्वे विधीयमाने ओजसोः सिध्यति · अष्टन आ विभक्ता
वित्यत्र पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति तदन्तविधिसद्भावात् कृतवचनानिर्देशात् गुणभूतेप्यष्टन्शब्दे आत्वेन भाव्यमिति औशि सिध्यतीति प्रश्नः · यथाल
क्षणामिति यस्य विशिष्टः प्रयोगो न स्मर्यते नापि प्रयोगनिषेधः स्मृतिः तथा लक्षणमनुगन्तव्यं तस्त्रमा भूदात्वमित्यर्थः नैवं लक्षणमप्रयुक्ते चनैव प्रयु
क्तानाम्बलक्षणेनान्वाख्यानात् डतिच बहुलवादिति · तत्र वस्तुसाध्यन्वयो न लक्षितपदे डतिर्गृह्यते न तु पतेडति : अथेति अत्र संख्यासंज्ञाया अनुवर्तनात्

इतरथा हि प्राप्नोति ह्वाभ्यामिष्यते विंशत्यादिवेति एवं तर्हि सप्तमे योगविभागः करिष्यते अष्टाभ्य औश् ततः षड्भ्यः षड्भ्यश्च यदुक्तं अष्टाभ्योपि तद्भवति
ततो लुक् लुक् च भवति षड्भ्य इति · अथवा उपदिष्टा योगविभागः करिष्यते अष्टन आ विभक्तौ ततो रायः रायश्च विभक्तावाकारादेशो भवति हलीति
भयोः शेषः यद्येवं प्रियाष्टौ प्रियाष्टा इति न सिध्यति प्रियाष्टानौ प्रियाष्टान इति प्राप्नोति यथालक्षणमप्रयुक्ते डतिच इदं डतिग्रहणं क्रियते
संख्यासंज्ञायां षट्संज्ञायां च एकैकशक्यमकर्तुं कथं यदि तावत् संख्यासंज्ञायां क्रियते षट्संज्ञायां न करिष्यते कथं ष्णान्ता षट् इत्यत्र डतीत्यनुवर्ति
ष्यते अथ षट्संज्ञायां क्रियते संख्यासंज्ञायां न करिष्यते डति च सत्र संख्यासंज्ञाप्यनुवर्तिष्यते · क्तक्तवतू निष्ठा · निष्ठासंज्ञायां समानशब्द
प्रतिषेधः निष्ठासंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः लोनो गत इति ७

तस्याः न्यर्थलात्संज्ञायां संख्याप्रश्नविषय एव डतिर्गृह्यते न तोण्यादिको डतिः · क्तक्तवतू इत्यनुबन्धाः कार्यार्थं भूपादी यते प्रयोगतस्तेषां लुप्तत्वान्नास्ति चैनु थ
चसारूप्यं तत्र संदेहः कथमस्यानुबन्धकार्यं कृतमस्तु न कृतमिति पूर्वपक्षाभिप्रायः सिद्धान्तवादी तु मन्यते · अकृतेणानुबन्धेन नियंतृसन्नि
धानस्यार्था कारककालादयो लक्ष्यन्ते तद्दर्शनादनुबन्धस्मृतेस्तल्लक्षितानां कार्याणां साधुत्वं विज्ञायते · तत्र यद्यपि स्वदतेन लूनः शालिरिति
काश्चित्प्रयुक्ते तदा लक्षणज्ञः कर्मभूतकालाववगमात् क्तप्रत्ययं मन्यते · यदा तु लोतमालपो तीति प्रयोगस्तदा नेपवाची लोतशब्दः तत्र यत्नः प्र
युक्त इति मन्यते ७

भा·कै·प्र· ५६

ज्ञापकं किं योगापेक्षमिति अस्य योगस्य प्रत्याख्यानादेतद्योगापेक्षमिति न बोद्धव्यं किं तु योगानपेक्षमिति योगापेक्षं यदयं बहुगणसंघस्य तिथुक्
वतोरिथुक् षट्कतिकतिपय इति डटि परत आगमं शास्ति तज्ज्ञापयति भवति संख्याकार्यमिति · ष्णान्ता षट् · षट्संज्ञायामिति प्रकृतिप्रत्ययविभागेन प्रति
पादनं गुणैः प्रापणमुपदेशः तेन प्रकृतिप्रत्ययाद्युपदेशे षकारनकारान्ता या संख्या सा षट्संज्ञा इत्यर्थः · नुम्नुडर्थमिति अर्थशब्दः प्रयोजन
वाची तत्र नु मिशतानीत्यत्र षट्संज्ञा निवृत्तिः प्रयोजनं नुटि तु विधीयमाने षट्संज्ञाप्रवृत्तिः प्रयोजनं अष्टानामिति परत्वान्नित्यत्वाच्च

ज्ञापकं किं यदयं वतोरिड्वेति संख्याया विहितस्य कनो वस्तंतादिंशाल्निवतोरेव तज्ज्ञापकं स्यात् नेत्याह योगापेक्षं ज्ञापकं · ष्णां
ता षट् षट्संज्ञायामुपदेशवचनं षट्संज्ञायामुपदेशग्रहणं कर्तव्यं उपदेशे षकारनकारान्ता संख्या षट्संज्ञा भवतीति वक्त
व्यं किं प्रयोजनं शतानि सहस्राणि नुमि कृते ष्णान्ता षडिति षट्संज्ञा प्राप्नोति उपदेशग्रहणान्न भवति अष्टाना
मित्यत्रात्वे कृते षट्संज्ञा न प्राप्नोति उपदेशग्रहणाद्भवति उक्तं वा किमुक्तं इतरथा ह्यशतानि सहस्राणीति सन्निपातल
क्षणो विधिरनिमित्तं तद्विघातस्येति अष्टनो दीर्घात् किमुक्तं अष्टनो दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारान्तस्य नुडर्थमिति
अथवा आकारोप्यत्र निर्दिश्यते षकारान्ता नकारान्ता आकारान्ता च संख्या षट्संज्ञा भवतीति इहापि तर्हि प्राप्नोति · सधमा
दो द्युम्न एकास्ता एका इति नैष दोषः एकशब्दोयं बह्वर्थः अस्त्येव संख्यापदं तद्यथा एको द्वौ बहव इति अस्त्यसहायवाची
एकाग्नयः एकहलानि एकाकिभिः क्षुद्रैर्जितमिति असहायैरित्यर्थः अस्त्यन्यार्थे वर्तते तद्यथा प्रजामेकाद्रक्षत्यूर्जमेकोति
अन्ये इत्यर्थः सधमादो द्युम्न एकास्ताः अन्या इत्यर्थः तथान्यार्थे वर्तते तस्यैष प्रयोगः ७ ५६

सेद्धत्वेनुटो प्राप्तिः कार्यकालत्वात् संज्ञायाः कृते नास्त्यन्तरङ्गत्व · अष्टनो दीर्घात् तत्र हि दीर्घग्रहणं अष्टास्विति सुप्रदानान्तनिवृत्यर्थं
क्रियते यदि न कृतात्वस्य षट्संज्ञा न स्यात्तदा अष्टास्विति परत्वात् षट्स्वरः झल्युपोत्तममिति भविष्यतीति किं दीर्घग्रहणेन कृतेनात्व
कृतात्वस्यापि षट्संज्ञां ज्ञापयति · ततश्चापवादत्वात् षट्स्वरो नेन बाध्यत इति दीर्घपक्षवादी दीर्घपक्षोपि विभक्तेः स्वरः स्यादिति
कर्तव्यं दीर्घग्रहणं · एकास्ता इति · संख्यावाचितानभ्युपगमवादी व्यत्ययेन बहुवचनं मन्यते अन्यवाचिताश्रयेण तु तरम् ७

सर्वादीनि सर्वनामानि · कोयमितिः नन्नपुंसकबहुवचननिर्देशादेव बहुव्रीहिनिश्चयात्समासांतराशंकानैवास्तीति प्रश्नानुपपत्तिः एवं तर्हि किमयं बहुव्रीहिरेवाहोस्विद्बहुव्रीहितत्पुरुषयोरेकशेषः यथाक्तं तेभ्यः वृद्ध्वादिभ्यश्चेति प्रश्नः · तत्र सारूप्यार्थं सर्वेभ्य इत्याह · सर्वादिरित्य आदिशब्द उपादीयते नत्व स्य प्रयोजनांतरमस्ति · तत्र नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति विधिः स शिष्यत इति यावत् बहुव्रीहिः शेषः · वक्ष्यमाणेन न्यायेन विनाप्येकशेषेण सर्वशब्दस्य संज्ञा सिध्यतीति मत्वाह · बहुव्रीहिरिति · एवमपि संदेहः किं प्राथमकल्पिको यं बहुव्रीहिः · अथ बहुव्रीहितत्पुरुषयोरेकशेषे बहुव्रीहिरिति पृच्छति · कोस्येति · तानीमानीति · अन्यपदार्थस्य प्राधान्यं प्रदर्श्यते · अन्यथा यथा चित्रगावो यस्येति गोविशेष्यत्वेन हुतस्य विशेषणत्वमवगम्यते तथेहाप्यवगम्येत · अत्र बाधेयं बहुव्रीहिर्नेष्यते · यदा तु स्वामिनः प्राधान्यं गवां विशेषणभावः तदा बहुव्रीहिः · अनपत्यस्य सर्वचित्रगुरिति स्वामिनः प्राधान्यं प्रदर्श्यते · तानीमानीति सर्वनाम द्वयोपादानेन प्रत्यक्षविषयत्वादिदंशब्दस्य गणपठितेषु सर्वशब्दस्यांतर्भावात् नगुणसंविज्ञानं सूचयति ·

श्री० सर्वादीनि सर्वनामानि · सर्वादीनि वृत्तिः कोयं समासः · बहुव्रीहिरित्याह · कोस्य विग्रहः सर्वशब्द आदिर्येषां तानीमानीति · यद्ययं सर्वशब्दस्य सर्वनामसंज्ञा न प्राप्नोति · किं कारणं · अन्यपदार्थत्वाद्बहुव्रीहेः · बहुव्रीहिरयमन्यपदार्थे वर्तते तेन यदन्यत्सर्वशब्दात्तस्य सर्वनामसंज्ञा प्राप्नोति · यद्यथा चित्रगुरानीयतामित्युक्ते यस्य ता गावो भवंति स आनीयते न गावः · नैष दोषः · भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि · तद्यथा चित्रवाससमानीय लोहितोष्णीषाः ऋत्विजः प्रचरंति तद्गुण आनीयते तद्गुणाश्च प्रचरंति · इह सर्वनामानीति प्रधानपदात्संज्ञायामगृहीतायां प्राप्नोति तस्य प्रतिषेधो वक्तव्यः ·

तस्यान्यपदार्थस्य गुणा उपलक्षणानि तेषामपि कार्ये संविज्ञानं तद्गुणसंविज्ञानं · तत्र चित्रगुरानीयतामिति स्वस्वामिभावसंबंधः षष्ठ्यर्थ इति स्वविशेषोपलक्षितस्य स्वामिन एवानयनं न तु गवां · दंडी विषाणी च आनीयतामित्यत्र तु संयोगसमवायलक्षणेन संबंधेन संबंधिनि कार्ये विधीयमाने उपलक्षणस्याप्यंतर्भावो भवति · इहाप्यादिशब्दस्यावयववाचित्वात् तद्गुणावयवभेदः समुदायः समासार्थः · तस्य च समुदायस्य प्रयोगाभावात्तदंतर्भूतानामवयवानां पृथक्प्रयोगसत्त्वात्कार्यार्थयासंज्ञा प्रवर्तितव्यं इति सर्वशब्दस्यापि संज्ञा सिध्यति · यथा देवदत्तशालायां ब्राह्मणा आनीयंतामित्युक्ते देवदत्तोपि यदि ब्राह्मणो भवति स्वशालास्थश्च तदा सोप्यानीयते एव · पालवं प्राप्नोतीति · राजपुरुषादिवत्संज्ञाशब्दा अविशास्त्रप्रक्रियायां संज्ञानं संज्ञा चाय यथार्थमाश्रित्य व्युत्पाद्यंत इति णत्वप्रसंगः · प्रयोगे च सणत्वा अव्युत्पन्नास्त्वप्रवशब्दाः · तत्र संज्ञायां सणत्वाए वसाधयो संज्ञायां णत्वाप्रवृत्तिः शास्त्रव्यापारात्णत्वं प्राप्नोत्येव · सर्वार्थाभिधानयोग्यस्य च शब्दस्य च शक्तिनियमनमात्रं संज्ञाकरणं

भा० कै० सिद्धविपर्यास इति · सिद्धो विपर्यासः संशयस्त्वर्थः इदं तद्गुहमिति बुद्धेरनवस्थितत्वमनेन प्रतिपाद्यते नत्वेतद्विवक्षितं भ्रमा भावात् भाष्ये इति अत्र अत्र भूतकालोस्तीति भावः दृश्यते चेति सिजादीत्यादिशब्दः प्रकीर्तनेषा भिन्नपदे देवदत्त इति प्रयोगे कर्तृक ... अवगमात् लुङ् तस्यायं प्रयोगः नमिष्यांतस्येति प्रतिपद्यते · अत्रैषामिभ्यः क्त इत्यस्य निष्ठासंज्ञा न भवति उणादीनामव्युत्पन्नत्वात् बाहुलकाद्वा अन्यथा निष्ठात्वे हलुजनादित्वात् प्रदातेः स्यात् ॥ ॥

५१ इति

निष्ठासंज्ञायां समानशब्दाप्रतिषेधः · निष्ठासंज्ञायां समानशब्दानां प्रतिषेधः · अनर्थकः प्रतिषेधोऽप्रतिषेधः · निष्ठासंज्ञा कस्मान्न भवति अनुबंधोन्यत्वकरः · अनुबंधः क्रियते सोन्यत्वं करिष्यति अनुबंधोन्यत्वकर इति वेल्लोपात् अनुबंधोन्यत्वकर इति चेन्न · किं कारणं लोपात् लुप्यते तत्रानुबंधः · लुप्ते चानुबंधे नान्यत्वं भविष्यति · तद्यथा कतरद्देवदत्तस्य गृहं अदोयत्रासौ काक इति · उत्पतिते काके नष्टं तद्गृहं भवति · एवमिहापि लुप्तेनुबंधे नष्टः प्रत्ययो भवति यद्यपि लुप्यते जानाति तु सोसानुबंधस्य यस्य संज्ञा को नेति तद्यथा इतरत्रापि कतरद्देवदत्तस्य गृहं अदोयत्रासौ काक इति · उत्पतिते काके यद्यपि नष्टं तद्गृहं भवति अंततस्तमुद्देशं जानाति · सिद्धविपर्यासश्च · सिद्धश्च विपर्यासः यद्यपि जानाति संदेहस्तस्य भवति अयं स तशब्दः लूनो गत इति · अयं स तशब्दो लूनः गीर्ण इति तद्यथा इतरत्रापि कतरद्देवदत्तस्य गृहं अदोयत्रासौ काक इति · उत्पतिते पि काके यद्यपि तमुद्देशं जानाति संदेहस्तु तस्य भवति · इदं तद्गृहमिदं तद्गृहमिति · एवं तर्हि कारककालविशेषात्सिद्धं · कारककालविशेषावुपादेयौ · भूते यस्तशब्दः कर्तरि कर्मणि भावे चेति तद्यथा इतरत्रापि य एव मनुष्यः प्रेक्षापूर्वकारी भवति · सोनुभवेणानिमित्तेन ध्रुवं निमित्तमुपादत्ते वेदिकां पुंडरीकं वा · एवमपि प्राक् सिद्धेस्तत्र प्राप्नोति लुङि सिजादिदर्शनात् लुङि सिजादिदर्शनान्न भविष्यति यत्र तर्हि सिजादयो न दृश्यंते प्राप्नोतीति दृश्यते तत्रापि सिजादयः किं वक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते यथैवाय मनुपदिष्टान्कारककालविशेषानवगच्छति · एवमेतदप्यवगंतुमर्हति यत्र सिजादयो नेति इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे पंचममाह्निकं ५

इति उपाध्यायजय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य प्रथमे पादे पंचममाह्निकं श्रीः श्रीसांबो विजयते

कर्तव्योत्रयत्नइति॥ पदैरेवश्रमइत्यर्थः ॥ लोकोन्यार्थमवश्यंपठितव्यः तेनैवसततंसंततमितिवसिध्यतिनतुनिपातनेनेत्यर्थः सांतत्यमितिचानभिधानादेव
अंतस्यप्रयोगाभावः पुराणशब्देनपुरातनशब्दस्यबाधः प्राप्तः इष्टोऽतरादित्वान्नभवति संज्ञोपसर्जनीभूतानामिति येविषयांतरेदृष्टाः तएवेमामवस्थांप्राप्ता
इतिविवक्षयाक्तिप्रत्ययनिर्देशः सर्वायदेहीति पदकार्यंगौणमुख्यन्यायेनतुप्रातिपदिककार्येष्वितिशब्दाश्रयेवरस्यात्वेइत्यर्थः ॥ इतिप्रसिध्यप्रसि
द्धिवशात्संभवन्नपीहसनोक्तः समासकृत्तद्धिताव्ययसर्वनामासर्वलिंगाजातिरेकद्रव्योपनिवेशिनीसंज्ञेत्येतदनपेक्ष्यसंज्ञाप्रतिषेधः तत्रह्यपेक्षितेप
रत्वात्पूर्वसंज्ञाबाध्यतइतिसंज्ञासंज्ञयासर्वनामसंज्ञाबाधनात्प्रसंगाभावः अतिसर्वायेति प्रादिसमासोयंबहुव्रीहौसंज्ञाप्रतिषेधात् प्रयोजनंस

कर्तव्योत्रयत्नः बाधकान्येवहिनिपातनानिभवंति संज्ञोपसर्जनप्रतिषेधः संज्ञोपसर्जनीभूतानांसर्वादीनांप्रतिषेधोवक्तव्यः सर्वोनामकश्चि
त्तस्मैसर्वायदेहि अतिसर्वायदेहिसकथंकर्तव्यः पाठात्पर्युदासः पठितानांसंज्ञाकरणंपाठादेवपर्युदासः कर्तव्यः शुद्धानांपठितानांसंज्ञाकर्तव्यास
र्वादीनिसर्वनामसंज्ञानिभवंति संज्ञोपसर्जनीभूतानिनसर्वादीनि किमविशेषेणनेत्याह विशेषेणकिंप्रयोजनंसर्वाद्यानंतर्यकार्यार्थंसर्वादी
नामानंतर्येणयदुच्यतेकार्यंतदपिसंज्ञोपसर्जनीभूतानांमाभूदिति किंप्रयोजनंप्रयोजनंडतरादीनामद्भावेडतरादीनामद्भावेप्रयोजनंभ
तिक्रांतमिदंब्राह्मणकुलंकतरदतिकतरंब्राह्मणकुलमिति त्यदादिविधौत्यदादिविधौप्रयोजनंअतिक्रांतोब्राह्मणस्तम्अतितत्
१६ ब्राह्मणाविति संज्ञाप्रतिषेधस्तावन्नवक्तव्यः उपरिष्टाद्योगविभागः करिष्यते पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायांततोऽसं
ज्ञायांइतिसर्वादीनीत्येवंयान्यनुक्रांतानिअसंज्ञायांतानिदृष्टव्यानि उपसर्जनप्रतिषेधश्चापिनवक्तव्यः ॥ ॥ ॥

र्वनामाव्ययसंज्ञायामितितदंतविधिः परमसः परमसर्वस्मा इत्याद्यर्थआश्रितः पाठादिति यथातिङोगोत्रादीनीत्यत्रकुत्सनाभीक्ष्ण्यग्रहणंगोत्रादि
पाठविशेषणंतथेहापिसर्वादिसन्निवेशोविशेष्यतेअसंज्ञोपसर्जनीभूतानिसर्वादीनिगणेसन्निविष्टानिनान्यानीत्यर्थः किमविशेषेणेति कियत्सर्व
पांसर्वादीनांसर्वनामकार्यंतदर्थमेवेतिप्रश्नः विशेषेणवेति यशब्दारविशेषणवेत्यर्थः यत्गणपाठोपलक्षितंविशिष्टकार्यंत्यदादीनामः अ
डुतरादिभ्यइत्यादितदर्थमपिपाठविशेषणमित्यर्थः यत्तुकार्यंयुष्मदस्मभ्यांङसोशित्यादिस्वरूपमात्राश्रयंनसन्निवेशापेक्षंतद्विशेषेण
भवति तत्राहिनगणपठितयोर्युष्मदस्मदोर्निर्देशोपित्वोणादिकयोः ॥ ॥

भा० कै० प्र०
५८

निपातनादिति ओकंपयंणत्वरहितएवप्रयुज्यतेतस्यात्रप्रसंगेनसाधुत्वंप्रतिपाद्यते किमेतदिति भवत्वस्यसाधुत्वंणत्वप्रतिषेधेतस्यतात्पर्या
भावाद्दूरत्वप्राप्नोतीतिभावः इतरः प्रतिषेधेनसाम्यंप्रतिपादयन्पर्यनुयुंक्ते अथकइति सर्वत्रैवाप्राप्त्यनुमानंबाधः निपातनंचापिणत्वा
प्राप्त्यनुमानमितिभावः ननुचेति प्रतिषेधस्यापिनियमार्थतात्पर्यंनिपातनस्यानभ्युपसाधुत्वप्रतिपादनेनतुरूपांतरनियमाभावः इकोयणचीति
यणोरिसाधुत्वंप्रतिपाद्यतेनत्विकः पतिरित्यर्थः षष्ठ्याश्चेति नतथ्यसंहितायांविषयेस्याभाविकोप्रयोगइकः षष्ठीनिर्देशेनप्रतिपाद्यतेयथादर्भो
णांस्थानेशरेः प्रस्तरितव्यमितिनतत्रदर्भाः प्रस्तीर्यंते इहतर्हीति किंकृत्य प्राप्नोतीतिभावः समुच्चयस्तुनभवति एकेनपरदेशस्यावष्टब्धत्वा

सर्वनामसंज्ञायांनिपातनाण्णत्वाभावः सर्वनामसंज्ञायांनिपातनाण्णत्वंनभविष्यति किमेतन्निपातनंनाम अथकप्रतिषेधोनाम अविशे
षेणकिंचिदुक्तंविशेषेणनेत्युच्यते तत्रब्यक्तमाचार्यस्याभिप्रायोगम्यत इदंनभवतीति निपातनमप्येवंजातीयकमेव अविशेषेणणत्वमुक्तं
विशेषेणनिपातनंक्रियते तत्रव्यक्तमाचार्यस्याभिप्रायोगम्यते इदंनभवतीति ननुचनिपातनाच्छाणत्वंस्यात् यथाप्राप्तंचणत्वंकिमन्येष्वेवं
विषयोभवंति इहेकोयणचीतिवचनाद्यणस्यात्यथाप्राप्तंचेकश्श्रूयेत नैषदोषः अस्त्यत्रविशेषः षष्ठ्यात्रनिर्देशः क्रियते षष्ठीचपुनश्च
स्थानिनंनिवर्तयति इहतर्हिकर्तरिशप् दिवादिभ्यःश्यनितिवचनाच्छ्यनस्यात्यथाप्राप्तंचशप्श्रूयेत नैषदोषः शबादेशाःश्यनादि
यःकरिष्यंते तत्तर्हिशपाग्रहणंकर्तव्यं नकर्तव्यं प्रकृतमनुवर्तते कप्रकृतं कर्तरिशबिति तद्वैप्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेनचेहार्थः दि
वादिभ्यइत्येषापंचमीशबितिप्रथमायाः षष्ठीप्रकल्पयिष्यति नस्मादित्युत्तरस्येति प्रत्ययविधिरयं नचप्रत्ययविधौपंचम्यःप्र
कल्पिकाभवंति नायंप्रत्ययविधिः विहितःप्रत्ययः प्रकृतश्चानुवर्तते इहतर्हि अव्ययसर्वनाम्नामकच्प्राक्टेरितिवचनाच्चाकच्स्या
द्यथाप्राप्तश्चकःश्रूयेत नैषदोषः नाप्राप्तेकेअकजारभ्यतेसबाधकोभविष्यति निपातनमप्येवंजातीयकमेव नाप्राप्तेणत्वेनिपा
तनमारभ्यतेतद्बाधकंभविष्यति यदितर्हिनिपातनान्यप्येवंजातीयकानिभवंति समसलनेदेयेभवति इहान्येवैय्याकरणाःसमस्तेतिवि
भाषाऽऽप्रमारभंतेसमोहितततयोर्वेतिसततंसंततंसहितंसंहितमिति इहपुनर्भवानिपातनाल्लोपमिच्छति अवस्यत्क्रियामतत्वइतियथाप्राप्तंचालोप

हौलुत्वार्थंधातुकयोश्वार्थाभिधानेएकैकेनैवस्याहायकस्यसंपादनात् शबादेशाइति श्यनश्चशित्करणंतापर्यं स्थानिवद्भावाभावस्यतेनकरोतीत्युप्रत्ययस्यापित्वाद
नुदात्तत्वंनभवति कुर्वंतीत्यत्रशप्श्यानोर्नित्यमितिनुमागमोभवति आदित्यधिकाराद्वाउरुपादिभ्यःश्नमिस्यरूपादीनांश्नुतत्राप्येषामंत्यादचःपरःश्नुभवति
नतुशपः यथाचश्नसोरोपधयोरमन्यतरस्यामितिरमागमोरोपधयोर्निर्धतकः एवंशपःश्नम् इहतर्हीति इशमेदाद्वोधाभावेपिकाकवोरेकार्थत्वाद्विकल्पएवयो

नर

श्री२

५८

तत्रापीति गृह्यमाणविभक्तेरिति सप्तमीनिर्दिश्य उच्यत इति च डतरादिभ्यो यो विहित इति अर्थद्वारकं विधानमाश्रयिष्यते तेन डतरादिभ्यो विहितायाः परस्याः विभक्तेः कार्यं भवति युष्मदस्मद्भ्यां ङसोऽश् इत्यत्र तु प्रकरणेन विभक्तिर्विशेष्यते अर्थद्वारेण युष्मदस्मद्भ्यां तु परत्वमात्रेण लतियुष्मदस्मदित्यत्रापि कार्यं भवति अतिसः इति शासनः सः इति प्रादिसमासः नञ्समासे प्यसः अषट् अकृतर इति भवति सर्वेषां यानीति स्वविषयापेक्षया सर्वनामत्वं बोध्यं यथा गोत्वादेः स्वविषयापक्षं सर्वगतत्वं न तेतानि सर्वादीनि परस्परपर्यायतां यान्ति भिन्नार्थत्वात् एतेषां चापीति ततश्च सर्वस्मिन्नोदन इत्योदनशब्दस्यापि स

तत्रापि वक्तव्यं न वक्तव्यं इह तावद् डतरादिभ्यः पंचभ्य इति पंचमी अंगस्येति षष्ठी तत्राशक्यं विभक्तिलात् डतरादिभ्य इति पंचम्यांग विशेषयितुं तत्र किमन्यच्छक्यं विशेषयितुमन्यत् ततो विहितात्प्रत्ययात् ईं डतरादिभ्यो यो विहित इति इहेदानीमस्थिदधिसक्थ्यक्ष्णामनङ् उदात्त इति त्यदादीनामोऽभवतीति अस्थ्यादीनामित्येषा षष्ठी अंगस्येत्यपि त्यदादीनामित्यपि षष्ठी अंगस्येत्यपि तत्र कामचारः गृह्यमाणेन वा विभक्तिं विशेषयितुं अंगेन वा यावता कामचारः इह तावदस्थिदधिसक्थ्यक्ष्णामनङ् उदात्त इत्यंगेन विभक्तिं विशेषयिष्यामः अस्थ्यादिभिरनङ् अंगस्य विभक्तावनङ् भवति अस्थ्यादिनामिति इहेदानीं त्यदादीनामोऽभवतीति गृह्यमाणेन विभक्तिं विशेषयिष्यामः अस्थ्यादिभिरनङ् अंगेनाकारं त्यदादीनां विभक्तावो भवति अंगस्येति यद्येवमतिसः अत्वं न प्राप्नोति नैष दोषः त्यदादिप्रधान एष समासः अथवा नेदं संज्ञाकरणं पाठविशेषणमिदं सर्वेषां यानि नामानि तानि सर्वादीनि संज्ञोपसर्जने च विशेषे वतिष्ठते यद्येवं संज्ञाश्रयं यत्कार्यं तन्न सिध्यति सर्वनाम्नः स्मै आमि सर्वनाम्नः सुडिति अन्वर्थग्रहणं तत्र विज्ञास्यते सर्वेषां यन्नाम तत्सर्वनाम सर्वनाम्न उत्तरस्य ङेः स्मै भवति सर्वनाम्न उत्तरस्यामः सुड् भवति यद्येवं सकलं कृत्स्नं जगदित्यत्रापि प्राप्नोति एवं तर्ह्युभयमनेन क्रियते एतेषां चापि शब्दानामेकैकस्य सर्वविषयः तस्मिंस्तस्मिन् विषये योऽयः शब्दो वर्तते तस्य तस्य तस्मिंस्तस्मिन् वर्तमानस्य सर्वनामकार्यं प्राप्नोति एवं तर्ह्युभयमनेन क्रियते पाठश्चैव विशेष्यते संज्ञा च ॥

र्वनामकार्यं प्राप्नोति सामानाधिकरण्यात्तयोः ननु प्रतिनियतवस्तुभागाभिनिवेशिलाञ्छब्दानां सर्वत्वमोदनशब्देन नाभिहितं ओदनत्वमपि सर्वशब्देनेति कुतोऽयं प्रसंगस्तत्रेदं दर्शनं सर्वशब्द ओदनार्थविग्रहेण प्रवृत्त ओदनशब्दोऽपि सर्वशब्दार्थाप्रतिपत्तावेव केवलात्सर्वशब्दाद्विशेषं न प्रतिपद्यते रूपसादृश्यात् नाप्योदनशब्दादिति तत्प्रतिपत्त्यर्थमुभयोरुपादानं तत्रैकस्य सर्वनामकार्यं भवति नापरस्येति प्रमाणाभावादतिप्रसंग उद्भावितः

श्रीः श्रीः नमो भगवते वासुदेवाय श्रीः श्रीः नमः शिवाय श्रीः श्रीः नमो नारायणायेति रामाय च श्रीः छ

भा· कै· प्रथ·

५९

अनुपसर्जनादिति ननु प्रधानेन तदन्तविध्यर्थो योग आरब्धव्यः कौंभकारेय इति यथा स्यादिति न वाणिति हि कुम्भकारेणाश्च इत्येष णस्तीति नैतदस्ति स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमाभावात्कारशब्दादपि ङीप् विहितः कुम्भकारीशब्दात् स्त्रीभ्यो ढगिति ढग्भविष्यति अनुपसर्जनात् अश्वादिति सुपां सुमनकारान्ताभ्यां विधीयत इति परिभाषानुपस्थानादुपसर्जनाभ्यामपि भवति त्यदादीनाम इत्ययमकारान्तस्य हलः स्थाने विधीयत इत्यकारात्परोऽकारो भवतीति परिभाषोपस्थानादतितदित्यत्र न भवति एवं तु प्रियो दादास्येति बहुव्रीहौ कृते अकारादविधानात्परिभाषानुपस्थानादत्वं प्राप्नोति तदोः सः सावित्यस्य मविशेषितमित्युपसर्जनस्यापि प्राप्नोति तत्रायं समाधिः त्यदादीनाम इत्यत्र त्यदादिषु परिभाषोपस्थानादनुपसर्जनानां तेषां ग्रहणं न तु हृदयाद् इशब्दोऽपि तथाविध एव गृह्यते सत्वविधौ वा तथा विधानामेवानुवृत्तिरित्यत्रापि न दोषः अतिसर्वायेत्यादौ तु विशेषकार्यमपार

अनुपसर्जनादित्येष योगः प्रत्याख्यायते तमेवमभिसंभंत्स्यामः अनुपसर्जन अ आदिति किमिदमआदिति अकारात्कारो शिष्यमाणश्चानुपसर्जनस्य द्रष्टव्यो यद्येवमतियुष्मदस्मादिति न सिध्यति प्रश्लिष्टनिर्देशोऽयं अनुपसर्जन अ अ अदिति अकारान्तात् अकारात्कारो शिष्यमाणानुपसर्जनस्य द्रष्टव्यो अथवा गाधिकारस्य उच्यते गृह्यमाणविभक्तेस्तद्भवति यद्येवं परमपंच परमसप्त षड्भ्यो लुगिति लुङ् प्राप्नोति नैष दोषः षट्प्रधान एष समासः इह तर्हि प्रियसक्थ्ना ब्राह्मणेन अनङ् प्राप्नोति सप्तमीनिर्दिश्य उच्यते प्रकृतविभक्तौ तद्भवति यद्येवं तितन्तु अतितरो अतितद इति अत्वं प्राप्नोति हतमेव गृह्यमाणविभक्तेरिति गृह्यमाणानां त्यदादीनां डतरादीनां च स्वार्थद्वारेण संबंधनीया विभक्तिस्तदर्थगतसंख्याकर्मादिवाचिनी तस्याः इत्यर्थः यद्येवमिति गृह्यमाणाद्याविहिता विभक्तिरित्येवं संबंधमन्वानस्य प्रश्नः आर्यः संबंधो गृह्यत इत्युत्तराभिप्रायः यद्येवं पंचकाः शकुनय इति कनः स्वार्थिकत्वाज्जसो लुक् प्राप्नोति उच्यते कनि कृते शब्दान्तरत्वान्नान्तत्वाभावान्नायं षट्संज्ञक इत्यदोषः युष्मदस्मद्भ्यां ङसोऽशित्यत्रांगेन विभक्तिर्विशेष्यत इत्युपसर्जनाभ्यामपि सिध्यति प्रियसक्थ्नेति सक्थिशब्दः शकटावयववचनोऽत्रेति बहुव्रीहौ सक्थ्यक्ष्णोरिति समासान्तो न कृतः प्रकृतविभक्ताविति अंगार्थसंबंधिन्यां विभक्तावित्यर्थः ॥ ॥ ॥

५९

कश्चेदानीमिति स्पैसरे वनास्तिविशेषः अवश्येहवनास्याद्रोनहिलक्षणेन पदकारा अनुवर्त्याः उभकाभ्यां हेतुभ्यां उभकयोर्देवतेति षष्ठीतृतीयीसिद्धे निमित्त
कारणहेतुषु सर्वासां प्रायदर्शनमितिवचनात् उभशब्दोपमिति द्विवचनेनंतरे श्रूयमाणे उभशब्दः साधुर्नाभाष्यं न तु भिन्नव्यवहिते के पुनः संति निपूर्वस्य द्विवच
नस्य स्वसत्तादपरस्यकेन व्यवधानात् तत्र कविषयेव्यवहितद्विवचनविषयउभशब्दः साधुर्भवतीति वक्तव्यं यथैवं तर्हि इति ननु टाब्विषयत्वादिस्त्रत्र पठ्यमानत्वा
त्वोस्यानुपपत्तिः एवं तर्हि टाब्विषयत्वमेकवचनबहुवचनयोर्माभूदित्येवमर्थं भाष्यपि द्विवचनपरतावक्तव्येत्युक्तं वचनादिति स्वार्थिकत्वादामउभार्थस्याद्य अ
नादापि सिद्धा द्विवचनपरतेत्यर्थः केपि तुल्यमिति द्विवचनविषयत्वादिस्त्रत्र द्विवचनशब्देन प्रयुज्यमानस्यैव ग्रहणं तर्ह्यर्थाभिधानसमर्थस्येत्यर्थः उभयतः

कश्चेदानीं काकचोर्विशेषः उभशब्दोयं द्विवचनटाब्विषय इत्युक्तं तत्राकचि सस्यकचत्वान्मध्यपतितत्वाच्च का तदेतदुक्तं द्विवचनपरोयमिति
केपुनः सतिनायं द्विवचनपरोपि स्यात् द्विवचनपरतावक्तव्या यथैव तर्हि केसति नायं द्विवचनपरः एवमाप्यपि सति नायं द्विवचनपरः स्यात् त
त्र द्विवचनपरतावक्तव्या अवचनादापितस्वरविज्ञानं अंतरेणापिवचनमापि द्विवचनपरोयं भविष्यति किं वक्तव्यमेतत् नहि कथमनुच्य
मानं गंस्यते एकादेशे कृते द्विवचनपरोयमंतादिवद्भावेन अवचनादापितस्वरविज्ञानमितिनेत्केपि तुल्यं अवचनादापितस्वरविज्ञानमि
ति चेत् केपि अंतरेण वचनं द्विवचनपरो भविष्यति कथं स्वार्थिकाः प्रत्ययाः प्रकृतितो विशिष्टा भवंतीति प्रकृतिग्रहणेन स्वार्थिकानाम
पि ग्रहणं भवति अथ भवतः सर्वनामकत्वे कानि प्रयोजनानि भवतो कच्छेषात्वानि भवतः अकच्छेषात्वानि प्रयोजनानि अकच्च भवकान्
शेषः स च भवांश्च भवंतौ आत्वं भवादृगिति किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रं उदाहरणमात्रमित्याह तृतीयादयोपि हि प्रयो
ते सर्वनाम्नस्तृतीया च भवता हेतुना भवतो हेतोरिति ॥ ॥ ॥ उभयत्रेति त्रतसोरप्यपवादित्वाभिधानसामर्थ्यं नास्तीत्यभेदवि

वयउभयशब्द एव प्रयुज्यते न तु भशब्दः एवं प्रत्याख्यातो कदर्थं उभशब्दस्य पाठः सर्वनाम्नस्तृतीया चेति षष्ठीतृतीयार्थः पाठ इति केचित् निमि
त्तकारणहेतुषु सर्वासां प्रायदर्शनादनर्थोपि पाठो न कर्तव्य इत्यन्ये अथ भवतु इति भवकारांतत्वात्साध्यात्स्यभावात् अत्र शेष इति पाठः सति स
दादित्वाच्छेषो भवति तृतीयादयोपीति निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमित्युक्तं पक्षे तदुक्तं इदं तु प्रयोजनं भावतायाभिः भवद्भ्युः भ
वन्मयः पूर्वनिपातश्च भवन्मित्रः भवतष्ठक् छसौ चेति रथस्ताद्धक् छसोगुणवचनसंज्ञा बाधनं च भवतो भावो भावस्य भिन्नः ॥ ७ ॥

भा॰ कैय॰ ५८०

एकशेषनिर्देशाइति ननु सहविवक्षाया अभावात्कथमेकशेषः एकशेषफलत्वात्तंत्रन्यायआवर्तिवैकशेषशब्देनोच्यते अथवा आकृत्यभि
धानपक्षे एकस्येव प्रयोगे सिद्धे प्रत्याख्यातमेकशेषशास्त्रं संज्ञापरिभाषावच्छास्त्रं प्रक्रियासंपादनार्थं भवतीति सहविवक्षामंतरेणापि
भवत्येकशेषः संज्ञोपसर्जनो वेति यदा सर्वशब्दः संज्ञात्वेन विनियुज्यते तदा प्रसिद्धप्रवृत्तिनिमित्तपरित्यागेन स्वरूपमात्रोपकारी प्रवर्तत इति
विशेष एवावतिष्ठते उपसर्जनमपि जहत्स्वार्थं अजहद्वा तिक्रांतार्थविशेषणतामापन्नमतिक्रांतार्थवृत्तिर्भवत्यतिसर्वायेत्यत्रवाक्ये लसंस्पृष्टा
र्थत्वात्स्वार्थमात्रं प्रतिपादयतो न विशेषः वस्त्वानं यतो न लघीय इति शब्दव्यवहारो लघुः ततोपि लघीयो नाम तत्र गुरुसंज्ञाकरणात्सर्वादी

कथं पुनरेकेन यत्नेनोभयं लभ्यं लभ्यमित्याह कथं एकशेषनिर्देशात् एकशेषनिर्देशोयं सर्वादीनि च सर्वादीनि च सर्वादीनि सर्व
नामानि च सर्वनामानि च सर्वनामानि सर्वादीनि सर्वनामसंज्ञानि भवंति सर्वेषां यानि च नामानि तानि सर्वादीनि संज्ञोपसर्जने
च विशेषे अवतिष्ठेते अथ वा महतीसंज्ञा क्रियते संज्ञा च नाम यतो न लघीयः कृत एतत् लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः सं
ज्ञायाः करण एतत्प्रयोजनं अन्वर्थसंज्ञा यथा विज्ञायेत सर्वादीनि सर्वनामसंज्ञानि भवंति सर्वेषां नामानीति चातः सर्वना
मानीति संज्ञोपसर्जने च विशेषे अवतिष्ठेते अथोभयस्य सर्वनामत्वे कोर्थः उभयस्य सर्वनामत्वे अकजर्थः उभयस्य सर्वनामत्वे कजर्थः
पाठः क्रियते उभकौ किमुच्यते अकजर्थ इति न पुनरन्यान्यपि सर्वनामकार्याणि अन्याभावो द्विवचनटाब्विषयत्वात् अन्ये
षां सर्वनामकार्याणामभावः किं कारणं द्विवचनटाब्विषयत्वात् उभशब्दोयं द्विवचनटाब्विषयः अन्यानि च सर्वनामकार्या
णि एकवचनबहुवचनेषूच्यंते यदा पुनरुभशब्दो द्विवचनटाब्विषयः कइदानीमस्यान्यत्र भवति उभयोन्यत्रेति उभयो य
त्रोस्यान्यत्र भवति उभये देवमनुष्याः उभयोमणिरिति किं च स्याद्यद्यत्रावल्लस्यात् कः प्रसज्येत ॥

नांविशिष्टो धर्मोनुमीयते न न्नमेतानि संज्ञाप्रवृत्तिनिमित्ते न सर्वनामत्वेन युक्तानि यतस्तदनुरूपा तेषां संज्ञा कृतेति सर्वनामकार्यमंतर्गणका
र्यं च सर्वनामत्वयुक्तानामेव भवति न संज्ञोपसर्जनानां अन्याभाव इति टाब्विषयत्वमपि न हि वचनाद्न्यत्र बोध्यं तत्रोभादुदात्तो नित्यमित्य
त्र नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगो माभूदुभयशब्दस्यैव यथा स्यादित्युभयपुत्र इत्यादि भवति द्विदृश्यादिष्वेतत्र

वस्त्रांतरेति उपसर्जनप्रतिषेधो वा निकारस्य नस्य नकारस्य नबहुव्रीहाविस्मारं भादीनि तन्मतेने दंप्रयोजनमुक्तं · नबहु · प्रियविश्वायेति · प्रियशब्दस्य
विश्वविशेषणत्वात्पूर्वनिपातं मन्यते · द्व्यन्यायेति संख्यायाः संख्येयपरतंत्रत्वाद्विशेषणत्वं सर्वनाम्न एवेति नियमः कथमिति चेदुच्यते विशेषणत्वात्संख्या
याः पूर्वनिपाते प्राप्ते एवमर्थमुपसंख्यानं स्यात् सर्वनामसंख्ययोः सन्निपाते सर्वनाम्न एव पूर्वनिपातः स्यादिति · वक्ष्यत इति नेष वाक्यार्थो यस्त्वयाकल्पितः
सर्थः · व्यंजनांतेष्विति उपलक्षणमेतत् द्विकपुत्रो द्विकपुत्र इत्यत्रापि विशेषदर्शनात् कथं पुनरिति अंतरंगत्वात्संज्ञानिमित्तेनाकव्रतावद्भाव्यं पश्चात्पदांतरस

इदं तर्हि प्रयोजनं अवयवभूतस्यापि बहुव्रीहेः प्रतिषेधो यथा स्यात् इहमाभूत् वस्त्रमंतरमेषां त इमे वस्त्रांतराः वसनमंतरमेषां त इमे वसनांतराः वस्त्रांतराश्च
वसनांतराश्च वस्त्रांतरवसनांतराः नबहुव्रीहौ किमुदाहरणं प्रियविश्वाय नैतदस्ति प्रयोजनं सर्वाद्यंतस्य बहुव्रीहेः प्रतिषेधेन भवितव्यं वक्ष्यत्येतत्
बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानमिति तत्र विश्वप्रियायेति भवितव्यं इदं तर्हि द्व्यन्याय त्र्यन्याय ननु चात्रापि सर्वनाम्न एव पूर्वनिपातेन भवितव्यं ·
नैष दोषः वक्ष्यत्येतत् संख्यासर्वनाम्नोर्यो बहुव्रीहिः परत्वात्तत्र संख्यायाः पूर्वनिपातो भवतीति इदं चाप्युदाहरणं प्रियविश्वाय ननु चोक्तं विश्वप्रिया
येति भवितव्यमिति वक्ष्यत्येतद्वा प्रियस्येति नखल्वप्यवश्यं सर्वाद्यंतस्यैव बहुव्रीहेः प्रतिषेधेन भवितव्यं किं तर्हि असर्वाद्यंतस्यापि भवितव्यं किं प्र
योजनं अकच्माभूदिति · किं च स्यात् यद्यत्राकच् स्यात् को न स्यात् कश्चेदानीं काकचोर्विशेषः व्यंजनांतेषु विशेषः अहकं पिता अस्य मकत्पितृकः
त्वकंपिता अस्य त्वकत्पितृक इति प्राप्नोति मत्कपितृकः त्वत्कपितृक इति चेष्यते कथं पुनरिच्छतापि भवता बहिरंगेण प्रतिषेधेनांतरंगो विधिः श
क्यो बाधितुं अंतरंगानपि विधीन्बहिरंगो विधिर्बाधते गोमान्प्रिय इति यथा क्रियते तन्न यत्नः अप्रत्ययोत्तरपदयोश्चेति ननु चेहापि क्रियते न
बहुव्रीहाविति अस्त्यन्यदेतस्य वचने प्रयोजनं किं प्रियविश्वाय उपसर्जनप्रतिषेधेनाप्येतत्सिद्धं अयं खल्वपि बहुव्रीहिरस्त्येव प्राथमकल्पिकः
यस्मिन्नेकपद्यमैकस्वर्यमेकविभक्तित्वं च अस्ति तादर्थ्यात्ताच्छब्द्यं बहुव्रीह्यर्थानि पदानि बहुव्रीहिरिति तद्यत्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणं ·
भिधाने वर्तिपदार्थविशेषणान्यपदार्थविवक्षायां बहिरंगेण बहुव्रीहिणेत्यर्थः · अंतरंगानपीति प्रत्ययोत्तरपदयोश्चेति सामान्येन ज्ञापकं बहिरंगोपि
समासाश्रयो विधिरंतरंगं बाधत इत्यस्यार्थस्येति भावः · क्रियते त्विति तद्विषयमेतज्ज्ञापकमित्यर्थः · अस्त्यन्यदिति अत्र हि विधिप्रतिषेधौ समान
कालौ कार्यकालत्वात्संज्ञाया इति मन्यते अयं खल्वपीति सूत्रोपारूढ एवायमर्थ इति प्रतिपादयति अप्रयोगसमवायि यत्प्रक्रियावाक्यं तत्रा
यं प्रतिषेधो न लौकिके वाक्ये प्रयोगार्हे तस्य पृथगेव प्रयोगात्तादर्थ्याभावात् ·

भा·कै·

६१

विभाषा · दिक्ग्रहणमिति एकस्मिन्विषये विकल्पप्रतिषेधयोरसंभवात्सामर्थ्याद्विषयभेदमाश्रितम् इति प्रश्नः वचनमंतरेणाभिमतो विषयभेदो न लभ्यत इ
त्युत्तर · समास एवेति · मुख्य इत्यर्थः अन्यस्तु तत्कार्यलाभात्तद्व्यपदेशं लभत इति मुख्यः दक्षिणोत्तरपूर्वाणामिति द्वंद्वे चेत्यनेन सर्वाद्यंतस्य द्वंद्वस्य सर्वनाम
संज्ञाप्रतिषेधो न त्ववयवानामिति सर्वनाम्नोऽकच्निमित्तमिति पुंवद्भावः येन नाप्राप्त इति अयमत्रार्थः नबहुव्रीहाविति अनेन सर्वः स्वविषयो व्याप्तः द्वंद्वे चेत्यनेन तु न

विभाषा दिक्समासे बहुव्रीहौ दिक्ग्रहणं किमर्थं नबहुव्रीहाविति प्रतिषेधं वक्ष्यति तत्र न ज्ञायते क्व विभाषा क्व प्रतिषेध इति दिक्ग्रह
णे पुनः क्रियमाणे न दोषो भवति दिगुपदिष्टे विभाषा अन्यत्र प्रतिषेधः अथ समासग्रहणं किमर्थं समास एव यो बहुव्रीहिः तत्र यथा
स्यात् बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र माभूदिति दक्षिणदक्षिणस्यै देहि अथ बहुव्रीहिग्रहणं किमर्थं द्वंद्वे माभूत् दक्षिणो
त्तरपूर्वाणामिति नैतदस्ति प्रयोजनं द्वंद्वे चेति प्रतिषेधो भविष्यति नाप्राप्ते प्रतिषेधे इयं विभाषा आरभ्यते सा यथैव नबहुव्रीहा
वित्येतं प्रतिषेधं बाधते एवं द्वंद्वे चेत्येतमपि बाधेत न बाधते किं कारणं येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते नबहुव्रीहावित्येत
स्मिन्प्रतिषेधे इयं विभाषारभ्यते द्वंद्वे चेत्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च अथवा पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तरानित्येवमि
यं विभाषा नबहुव्रीहावित्येतं प्रतिषेधं बाधिष्यते द्वंद्वे चेत्येतं प्रतिषेधं न बाधिष्यते अथवा इदं तावदयं प्रष्टव्यः इह कस्मान्न भवति याः
पूर्वाः सोत्तरा अस्याः मुग्धस्य सोयं पूर्वोत्तर उन्मुग्धस्तस्मै पूर्वोत्तराय देहीति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति यद्येवं नार्थो
बहुव्रीहिग्रहणेन द्वंद्वे कस्मान्न भवति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति उत्तरार्थं तर्हि बहुव्रीहिग्रहणं कर्तव्यं न कर्तव्यं क्रिय
ते न्यास एव नबहुव्रीहाविति द्वितीयं कर्तव्यं बहुव्रीहिरेव यो बहुव्रीहिस्तत्र यथा स्यात् बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र माभूत् ए
कैकस्मै देहि एतदपि नास्ति प्रयोजनं समास इति वर्तते तेन बहुव्रीहिं विशेषयिष्यामः समासो यो बहुव्रीहिरिति ॥ ७ ॥ ॥

प्राप्ते विभाषा असतीति प्राप्तिविकल्पविधानात् यदि चानेन द्वंद्वे विभाषा स्यात् जस्यनुवाददोषः प्रसज्येत बहुव्रीहौ त्वनुवाददोषमलभमाना
कृतार्था सती परत्वादियं विभाषा द्वंद्वे चेत्यनेन बाध्यते लक्षणप्रतिपदोक्तयोरिति दिक्समास इति व्यपदेशो दिङ्नामानीति विहितस्य
नान्यः तत्र हि दिक्शब्दोस्ति ॥ श्रीः ॥ ॥ श्रीसांबसप्तकोटीश्वराय नमः ॥ ॥ ७ ॥ श्रीमहामायादुर्गायै नमः ॥ ७ ॥

कथंपुनरिति पूर्वंगणपाठोनियतसंनिवेशोव्यवस्थितः पश्चात्सूत्रपाठइत्यत्र प्रमाणाभावात् आदिशब्दः प्रकारवाचीदृष्टोव्यवस्थावाचीचतत्रसर्वादी
नीतत्रादिशब्दस्यप्रकारार्थतापिसंभवतिप्रकारार्थप्रदर्शनायपश्चादभियुक्तागणान्यठंतियदुक्तं श्रेण्यादयः पठ्यंतेकृतादिराकृतिगणइति कृतादय
श्ववृत्तिकारैर्निदर्शनार्थंपठिताः तत्रवेदेमध्यमस्यामवस्थायामितिप्रयोगदर्शनात्प्रकारार्थतादिशब्दस्यसर्वादीनीत्यत्रसंभाव्यतइतिप्रश्नः
तानिहिपूर्वादीनीति पूर्वकालपठितत्वात्पूर्वशब्देनसर्वशब्दोभिधीयतेतेनायमर्थः सर्वादीनीत्यत्रव्यवस्थावाच्यादिशब्दः प्रकारवाचित्वेहिकृता
दीनामपिसंज्ञास्यात् मध्यमस्यामवस्थायामितितुव्यत्ययेनछांदसः प्रयोगः इमान्यवरादीनीति अवरकालपाठात्पूर्वशब्दोऽवरशब्देनोच्यते
तेनपूर्वंगणपाठः पश्चात्सूत्रपाठइत्यर्थः हेत्वभिधानमंतरेणाशक्योयमर्थः प्रतिपत्तुमित्याह इमान्यपीति नवग्रहणमिति तत्रनवग्रहणंत्य
दादिनिरासार्थंक्रियतेयदिचनियतसंनिवेशोगणपाठः पूर्वः ततोधिकव्यवच्छेदायनवग्रहणंकर्त्तव्यं इदंतर्हीति प्रतिनियतविशेषणाभिधा॥

कथंपुनर्ज्ञायतेसपूर्वःपाठः अयंपुनःपाठइति तानिहिपूर्वादीनिइमान्यवरादीनि इमान्यपिपूर्वादीनि एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापयतिसपू
र्वःपाठः अयंपुनःपाठइतियदयंपूर्वादिभ्योनवभ्योवेतिनवग्रहणंकरोतिनवेवाहिपूर्वादीनि इदंतर्हिप्रयोजनंव्यवस्थायामसंज्ञायामितिवक्ष्या
मीति एतदपिनास्तिप्रयोजनं एवंविशिष्टान्येवतानिगणेपठ्यंते इदंतर्हिप्रयोजनंत्यदादिपर्युदासेनपर्युदासोमाभूदिति एतदपिनास्तिप्रयो
जनं आचार्यप्रवृत्तिर्ज्ञापयतिनेत्यदादिपर्युदासेनपर्युदासोभवतीतियदयंपूर्वत्रासिद्धमितिनिपातनंकरोति वार्त्तिककारश्चपठतिजश्भाव
दितिचेदुत्तरत्रभावादपवादप्रसंगइति इदंतर्हिप्रयोजनंजसिविभाषांवक्ष्यामीति॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

यप्रतिपदंपाठइत्यर्थः एवंविशिष्टान्येवेति पाठविशेषणायगणेऽर्थनिर्देशइत्यर्थः त्यदादिपर्युदासेनेति त्यदादीनिपठित्वागणेकेचित्पूर्वादीनिपठितानि तत्रा
त्यदादिभ्यइतितसिलादीनांप्रतिषेधः प्राप्नोति तत्रपुनः सर्वनामसंज्ञातसिलादिविधानार्थंविधीयते तेनत्यदादिपर्युदासोबाध्यतेयथानुल्लक्षणइतिपुनर्विधानेन
हेतुस्तृतीयाबाध्यतेवाक्यभेदेनचविभाषाजसिविधीयते यथामिपूर्वः संप्रसारणाच्चेत्यत्रवाक्यभेदेनवाछंदसीतिसंबंधाच्छंदसिविकल्पःक्रियतइतिभावः इदंत
र्हीति यदिपूर्वादीनिनवेत्युच्येत तदागणपाठेऽर्थनिर्देशस्यनित्यसंज्ञाविधानएवोपयुक्तत्वात्पाठविशेषणेप्रमाणाभावाद्प्राप्तविभाषेयमर्थात्तुपूर्वादीनांज
सिविज्ञायेत प्राप्तविभाषायामुक्तानुवाददोषादप्राप्तविभाषायामपूर्वविधानात् विभाषामिति प्राप्तविभाषामित्यर्थः प्रतिपदपाठंचांतरेणासंकरेणार्थनिर्देशाशक्यः

भा॰के॰

६२

गोनर्दीयस्त्वाहेति सूत्रप्रत्याख्यानमेतत् यथोत्तरंहिमुनित्रयस्यप्रामाण्यं स्वरःस्वांगशिटामदंतानामिसाधुदात्तत्वं आद्यपूर्वायेति अबहुव्रीह्यर्थंवचनं नवा
त्रेति प्राधान्येनेतिभावः अत्रहिपूर्वत्वमाद्यत्वस्यविशेषणं यथानिपूर्वायेतिपूर्वार्थातिक्रांतस्येकस्योपसर्जनत्वात्पूर्वार्थस्यनभवति संज्ञामयूरव्यंसकादित्वात्समा
सः तृतीयासमासे अत्रतादर्थ्यानास्त्वबालत्वेसतिप्रयोगार्हस्यलौकिकस्यवाक्यस्यग्रहणंसतिमासेनपूर्वायेतिप्रयोगःसाधुःवाक्यभेदेनवतुरवे
समासेतिषेधः अथवेति पर्युदासाश्रयणात्समासस्तद्दृशस्यवाक्यस्यग्रहणं पूर्वसदृशेतिवप्रतिपदोक्तस्तृतीयासमासोगृह्यते विभाषा जसः कार्यप्र
तीतिजसःइःजसीतिनिर्देशात्किकारेणईकारस्यग्रहणादित्याह अन्येतुकार्यकालत्वात्संज्ञायाःजसःशीसत्रैवास्योपस्थानं मन्यते पूर्वपरावरा
गोनर्दीयस्त्वाह अकच्स्वरौतुकर्त्तव्यौप्रत्यंगंमुक्तसंशयौ त्वकत्पितृकोमकत्पितृकइत्येवभवितव्यमिति प्रतिषेधभूतपूर्वस्योपसंख्यानं प्रतिषे
धभूतपूर्वस्योपसंख्यानंकर्त्तव्यं आद्योभूतपूर्वआद्यपूर्वः आद्यपूर्वायदेहीति प्रतिषेधभूतपूर्वस्योपसंख्यानानर्थक्यं पूर्वादीनांव्यव
स्थायामितिवचनात् प्रतिषेधभूतपूर्वस्योपसंख्यानमनर्थकं किंकारणं पूर्वादीनांव्यवस्थायामितिवचनात्पूर्वादीनांव्यवस्थायांसर्वनाम
संज्ञोच्यतेनचात्रव्यवस्थागम्यते तृतीयासमासे समासइतिवर्त्तमानेपुनःसमासग्रहणंकिमर्थं अयंतृतीयासमासोस्त्येवप्रत्ययमकल्पि
कः यस्मिन्नेकपद्यमेकस्वर्यमेकविभक्तिकत्वंचेति अस्तितादर्थ्यात्तत्स्थवाक्यं तृतीयासमासार्थानिपदानितृतीयासमासइति
तद्यत्तादर्थ्यात्तत्स्थवाक्यंतस्येदंग्रहणं अथवासमासइतिवर्त्तमानेपुनःसमासग्रहणस्यैतत्प्रयोजनं योगांगंयथाविज्ञायेत सतियो
गांगेयोगविभागःकरिष्यते तृतीया तृतीयासमासेसर्वादीनिसर्वनामसंज्ञानिनभवंति मासपूर्वायदेहि संवत्सरपूर्वाय
देहि ततोसमासेअसमासेचनतीयायाः सर्वनामकार्यंप्राप्तिनभवति मासेनपूर्वायदेहि विभाषा जसि जसः कार्यं
प्रतिविभाषा अकच्चिनभवति पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायामसंज्ञायां अवरादीनांचपुनः
सूत्रपाठेग्रहणमनर्थकं किंकारणं गणेपठितत्वात् अवरादीनांचपुनः सूत्रपाठेग्रहणमनर्थकं किंकारणं गणेपठितत्वात्
गणेपठितानिपठ्यंते॥ अवरादीनांचेति किमर्थमितिपृष्टः पूर्वादीनिजसिविभाषाचेवहितानि पाठ तारणाय
विशेष विशिष्टानिसर्वनामसंज्ञानिभवंति तत्रपूर्वादीनिनवेत्येवंसूत्रपठनीयं प्राप्तविभाषाचेयंभविष्यति सेवाम्नेयागपुसभित्रानाद
गणपाठार्थनिर्देशः पाठविशेषणंभविष्यति यथातिङोगोत्रादीनीत्यत्र कुत्सनाभीक्ष्ण्यग्रहणंगोत्रादिपाठविशेषणमितिवार्त्तिककारो
भिप्रायः अवरादीनामित्येवप्रकारार्थआदिशब्दः तेनपूर्वपरशब्दावपिगृह्येते॥ ६२॥ श्री॥ अनादरापदयोर्नतिः प्रफुल्यतां॥

६२

स्वरादि किमर्थमिति स्वरादिषु किंचित्क्रियाप्रधानं किंचित्साधनं प्रधानमिति असत्ववचनत्वाच्चादिष्वेव स्वरादीनि पठितव्यानीति मत्वा प्रश्नः स्वरादीनां पुनरि ति स्वस्तिवाचयति स्वः पश्यति स्वस्ति स्वः शब्दे क्रियासंबंधेऽनेकशक्तिदर्शनात्सत्ववाचित्वनिश्चयः लोहितगंगमित्यादीनां चाव्ययानां सत्वधर्मनपुंसकत्व दर्शनात्सुतरामेव सत्ववाचित्वं न निपातसंज्ञैवेति प्राग्रीश्वरान्निपाताः स्वरादीनि चादयोऽसत्व इति सूत्रन्यासः कार्य इत्यर्थः स्वरादीनामिति किमोदित्य त्ययो दक्षिणादाजित्याच् केनप्रभृतयस्तु कृत एकाचः संतीति भावः तच्चाशक्यमिति अव्ययसंज्ञायामेव सत्यामव्ययमेकाजनाङिति सूत्रं कर्त्तव्यं ततश्चाप्र भृतीनामपि प्रगृह्यसंज्ञाप्रसंगः प्राप्नोति अथ चादय एकाजनाङिति क्रियते तदा चादीनामसत्वविशेषणमलभ्यं तासितश्चा इह संज्ञाविधौ प्रत्ययग्रहणे तदंत

स्वरादिनिपातमव्ययं किमर्थं पृथग्ग्रहणं स्वरादीनां क्रियते न चादिष्वेव पठ्येरन् चादीनां वै असत्ववचनानां निपातसंज्ञा स्वरादीनां पुनः सत्ववचनानामस त्ववचनानां च अथ किमर्थं शुभे संज्ञे क्रियेते न निपातसंज्ञैव स्यात् नैवं शक्यं निपात एकाजनाङिति प्रगृह्यसंज्ञोक्ता सा स्वरादीनामेष्येकाचां प्रसज्ये त अहक्ष्व एवं तर्ह्यव्ययसंज्ञैव स्तु तच्चाशक्यं वक्ष्यत्येतत् अव्ययेनेऽकुनिपातानामिति तद्गरीयसा न्यासेन परिगणनं कर्त्तव्यं स्यात् तस्मात्पृथग्ग्र हणं कर्तव्यं उभे च संज्ञे कर्तव्ये तसिलादयश्चासर्वविभक्तिः असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानं असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्या नं कर्तव्यं विनानाना

विधिप्रतिषेधाद्यद्यपि केवलस्य प्रत्ययस्य ग्रहणं तथापि प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वाचनिकस्तदंतविधिरस्तीति तदंतस्याव्ययसंज्ञाविधी यते तत्र वृत्तिकारेण व्याख्यातं असर्वा विभक्तिर्यस्य सोऽसर्वविभक्तिरिति तत्र यदायमर्थः यस्य तद्धितस्यासर्वा विभक्तिः कार्या यस्मान्न सर्वा वि भक्तिरुत्पद्यत इत्यर्थस्तदा न दोषः यदा तु यस्य तद्धितस्योत्पत्तौ निमित्तत्वेनासर्वा विभक्तिराश्रिता सोऽसर्वविभक्तिः यथा सर्वैकान्यतिदा प्रत्ययस्य सप्तम्येवोत्पत्तिनिमित्तमित्यतास्मिन् सूत्रार्थे विनानानेत्यव्ययसंज्ञा न सिध्यति नहि विनञ्भ्यामित्यत्र प्रतिनियता काचिद्विभक्तिराश्रितेत्याह असर्व विभक्ताविति अतिव्याप्तिश्चास्मिन् सूत्रार्थे दोषस्तिरितीनः षष्ठ्येव निमित्तमिति संज्ञाप्रसंगात् अविभक्तिनिमित्तस्येति अश्रूयमाणविभक्तिकमव्ययमविभ क्तीत्युच्यते तन्निमित्तस्य यस्येष्यते न च प्राप्नोति तस्य उपसंख्यानं कर्तव्यं न च सामान्येनाविभक्तिनिमित्तस्य संज्ञाविधेया विशालविशंकटादीनामपि प्रसंगात्

भा॰के॰प्र॰ ६२

स्वमज्ञाति आत्मीयज्ञातिधनवचनः स्वशब्दः आमिनिज्विषयस्त्वेव स्वर्यवाची आख्याग्रहणमिति स्वपुत्राः स्वेगावः इत्यत्र स्वशब्दः आत्मीयत्वमेवाह पुत्रादिशब्दास्तु ज्ञा तिधनयोर्वर्तंते न स्वशब्द इति प्रतिषेधो न भविष्यतीति प्रश्नः तस्य यथा स्यादिति प्रतिषेध इति शेषः इह माभूदिति असत्याख्याग्रहणे स्वपुत्रा इत्यादौ स्यादेव प्रति षेधः अत्राप्यात्मीयत्वं प्रवृत्तिनिमित्तं उपादाय स्वशब्दो ज्ञातिधनयोर्वर्तते पुत्रादिभिः सामानाधिकरण्यात् आख्याग्रहणे तु सति न दोषः स्वशब्दो ह्यत्रात्मीयस्या ख्यान तु ज्ञातिधनयोरिति विधिः सिद्धः अंतरं बहिरित्यनावृतो देश उच्यते तेन योगो बहिर्योगः स च बाह्यस्य भवतीति अंतरे गृहा इति नगरबाह्याश्चंडालादिगृहा उ च्यंते बहिः शब्देन बाह्य उच्यते बाह्येन योगो बहिर्योग इति तदा नगराभ्यंतरे ये गृहास्त उच्यंते उभयथापि स्मर्यते उपसंख्यानशब्दोऽपि कर्मकरणार्थभेदाभिन्नार्थः

यदातु

स्वमज्ञातिधनाख्यायां आख्याग्रहणं किमर्थं ज्ञातिधनपर्यायवाचीयः स्वशब्दस्तस्य यथा स्यादिह माभूत् स्वपुत्राः स्वाः पुत्राः स्वेगावः स्वाः गावः अंतरं बहिर्योगोप संख्यानयोः उपसंख्यानग्रहणानर्थक्यं बहिर्योगेण कृतत्वात् उपसंख्यानग्रहणमनर्थकं किं कारणं बहिर्योगेण कृतत्वात् बहिर्योग इत्येव सिद्धं न वा शाटक युगाद्यर्थं न वाऽनर्थकं किं कारणं शाटकयुगाद्यर्थं शाटकयुगाद्यर्थं तर्हीदं वक्तव्यं यत्रेतन्न ज्ञायते किमंतरीयं किमुत्तरीयमिति अथापि य एवम नुष्यः प्रेक्षापूर्वकारी भवति निर्ज्ञातं तस्य भवति इदमंतरीयमिदमुत्तरीयमिति अपुरीति वक्तव्यं इह माभूत् अंतरायां पुरि वसति वाप्रकरणे तीयस्य ङित्सूपसंख्यानं वाप्रकरणे तीयस्य ङित्सूपसंख्यानं कर्तव्यं द्वितीयायै द्वितीयस्यै तृतीयायै तृतीयस्यै विभाषा द्वितीयातृतीयाभ्यामित्येतन्न व क्तव्यं भवति किं पुनरत्र ज्यायः उपसंख्यानमेवात्र ज्यायः इदमपि सिद्धं भवति द्वितीयाय द्वितीयस्मै तृतीयाय तृतीयस्मै ॥ श्री ॥ ६ ॥ ६

ततः सर्वथा बहिर्योगात्सिद्धिं मत्वाह उपसंख्यानेति नवेति समानप्रमाणे शाटकयुगे परिहिते इदं न ज्ञायते किमुत्तरीयं किमंतरीयमिति तदर्थमे तदित्यर्थः अत्रापीति यथोपसंख्यानत्वं भाविबुध्या व्यवस्थाप्यते तथा बहिर्योगेपीत्यर्थः अन्ये त्वाहुः आदिशब्दो वार्त्तिके शाटकयुगाद्यर्थमित्यत्रो पात्तः तत्र शाटकानां त्रये चतुष्टये वा तृतीय चतुर्थयोर्बहिर्योगाभावादुपसंख्यानग्रहणं कर्त्तव्यं अपुरीति गणसूत्र एतत्कर्त्तव्यं लिंगविशिष्टपरि भाषया ग्रहणप्रसंगात् इह लनेन नार्थः अतद्इति जसः शीविधानादाबंतात्प्राप्त्यभावात् पूः कस्मिंश्चिद्देशे प्रकाराभ्यंतरे क्रियते कश्चित्प्राकाराद्बहि रिति अस्ति पुरो बहिर्योगः॥

६२

अथवेति वृद्धव्यवहारादेव शब्दार्थसंबंधावगमादेकत्वादिव्यवहारवद्लिंगासंख्यत्वमप्यव्ययार्थस्य प्रसिद्धमित्यर्थः अत्रैवोपपत्तिमाह तथापीति किंचिदिति अव्यया नां द्वैविध्यमेवेति प्रतिपाद्यते। लिंगासंख्यत्वप्रतिपादनाय अन्ये त्वाहुः किंचिदव्ययं क्रियाप्रधानं किंचित्सत्त्वप्रधानं अन्ये तु नापि क्रियाप्रधानं नापि सत्त्वप्रधानं यथा स्वःपश्य लोहितगंगं उन्मत्तगंगं देश इति तथा चात्र नपुंसकत्वं अव्ययीभावश्चेत्यत्र व्याख्यायते पूर्वं च भाष्यकारेणोक्तं स्वरादीनां पुनः सत्त्ववचनानाम सत्त्ववचनानां चेति तस्माद्वा द्वृत्त्यभिप्रायेणालिंगासंख्यमव्ययमित्युच्यते उच्चैर्नीचैरिति सप्तम्यर्थे वर्त्तते इति साधनप्रधानता हिरुक्पृथगिति क्रियाविशेषणत्वादेवां क्रियाप्रा

अथवा पुनरस्त्वविभक्तिः शब्दो व्ययसंज्ञो भवतीत्येव ननु चोक्तं अविभक्तावितरेतराश्रयत्वादप्रसिद्धिरिति नैष दोषः इदं तावदयं प्रष्टव्यः यद्यपि तावद्वैयाक रणा विभक्तिलोपमारभमाणा अविभक्तिकाञ्छब्दान्प्रयुंजते ये त्वेते वैयाकरणेभ्योन्ये मनुष्याः कथं ते विभक्तिकाञ्छब्दान्प्रयुंजते अभिज्ञाश्च पुनर्लौकिका एकत्वादीनामर्थानां आतश्चाभिज्ञा अन्येन हि बह्वोनेकं गोकीर्णंति अन्येन द्वौ अन्येन त्रीन् अभिज्ञाश्च न च प्रयुंजते तदेवं संदृश्यतामर्थरूपेण वेतरेवज्ञाती यकं येनात्र विभक्तिर्न भवतीति तत्राप्येतदेवमनुगम्यमानं दृश्यतां किंचिदव्ययं विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानं उच्चैर्नीचैरिति विभक्त्यर्थप्रधानं हिरुक् पृथगिति क्रियाप्रधानं तद्धितश्चापि कश्चिद्विभक्त्यर्थप्रधानः कश्चित्क्रियाप्रधानः तत्र यत्रेति विभक्त्यर्थप्रधानः विनानानेति क्रियाप्रधानः न चैतयोरर्थयो लिंगसंख्याभ्यां योगोस्ति अथाप्यसर्वविभक्तिरित्युच्यते एवमपि न दोषः कथं इदं वाप्यसर्वेति न दृक्क्रियते एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनं इ तिकथं तर्हि एकवचनमुत्सर्गः करिष्यते तस्य द्विबह्वोरर्थयोर्द्विवचनबहुवचने बाधके भविष्यतः॥ श्री ॥ ॥ ॥ ॥

धान्यं क्रियापदप्रयोगमंतरेणापि पृथग्देवदत्त इत्यादिप्रयोगः क्रियाक्षेपादुपपद्यते शब्दशक्तिस्वाभाव्याच्चैकस्मिन्नर्थे विधीयमानयोस्तेनैकादिकृत्तसिश्चेत्यण्त सोर्भिन्नधर्मत्वं तत्र पेलुमूलमिति द्वयं प्राधान्येनाभिधीयते पीलुमूल तद्रतित द्व्योपसर्जनत्वतीयार्थ इति तस्य साधनप्रधानता अथवेति सूत्रारंभकालइत्य र्थः पूर्वाह्न्यासांतरा श्रयेण सूत्रं प्रत्याख्यातं अविभक्ताविति एकस्मिन्नित्यपनीयैकवचनमिति सूत्रं कर्तव्यं ततो हि बह्वोर्द्विवचनबहुवचने इत्येवं कर्तव्यं तेन द्वि त्वबहुत्वयोर्द्विवचनबहुवचने भविष्यतः एकवचनं त्वेकस्मिन्नपि भविष्यति अलिंगासंख्येभ्यो व्ययेभ्यश्चेति ननु कर्मणि द्वितीयेत्यादिना कर्मादिषु द्वितीयादी नां नियतत्वात्कथमेकवचनमव्ययेभ्यः स्यात् नैष दोषः एतदर्थमेवैकवचनमित्येतत्क्रियते अप्राप्तप्रापणार्थं तेन कर्माद्यभावेपि भवति द्वित्वबहुत्वयोस्तुप्रा

सा·के·प्र· ६४

किंपुनरिति एकवचनमुत्सर्ग इति वचनात्क्रमव्यतिक्रमे कारणाभावात् विनानानेत्यत्रापि असर्वविभक्तिरस्त्वेतो निमित्तमिति प्रश्नः सर्वविभक्तिरिति अविशेषेणोत्पद्यं ते उत्पन्नानां नियमः क्रियत इत्यव्ययात्सर्वविभक्तयउत्पद्यंते इत्यर्थः अविशेषादिति विशेषस्यानाश्रयणादिति भावः चलादीनां चेति आदिशब्दः स्वप्रकारवाचित्वात्त सिलपि गृह्यते वक्ष्यत्येतदिति सर्वदादिप्रयोग एवाप्राप्तिश्चोद्यत इत्यर्थः यदि पुनरिति प्रयोगे योऽश्रूयमाणविभक्तिः सोव्ययमित्यर्थः न चदधिमधित्यतिप्रसंगः दृश्येत्यादौ विभक्तिश्रवणात् अविभक्ताविति अव्ययत्वाद्विभक्तित्वं अविभक्तित्वादव्ययत्वमिति दोषः अलिंगमसंख्यमिति अविभक्तिरव्ययमित्यस्य लक्षणस्य

किंपुनः कारणं न सिध्यति सर्वविभक्त्यविशेषात् सर्वविभक्तिर्यपभवति किं कारणं अविशेषेण विहितत्वात् चलादीनां चोपसंख्यानं चलादीनां चोपसंख्यानं कर्त्त व्यं तत्र यत्र ततः यतः ननु चाविशेषेण एते विधीयंते पंचम्यास्तसिल् सप्तम्यास्त्रलिति वक्ष्यत्येतादितरेभ्योपि दृश्यंत इति यदि पुनरविभक्तिः शब्दो व्ययसंज्ञो भवतीत्युच्यते अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः संज्ञायाः का इतरेतराश्रयता सत्या विभक्तित्वे संज्ञया भ वितव्यं संज्ञया चाविभक्तित्वं भाव्यते तदितरेतराश्रयं भवति इतरेतराश्रयाणि च कार्याणि न प्रकल्पंते अलिंगमसंख्यमिति वा अथवा लिंगमसं ख्यमव्ययसंज्ञं भवतीति वक्तव्यं एवमपीतरेतराश्रयमेव का इतरेतराश्रयता सत्यलिंगासंख्यत्वे संज्ञया भवितव्यं संज्ञया चालिंगासंख्यत्वं भाव्यते तदेत दितरेतराश्रयं भवति इतरेतराश्रयाणि च कार्याणि न प्रकल्पंते नेदं वाचनिकमलिंगता संख्यता च किं तर्हि स्वाभाविकमेतत् तद्यथा समानमीहमाना नां चाधीयानानां च केचिदर्थैर्युज्यंते परे न तत्राकिमस्माभिः कर्त्तुं शक्यं स्वाभाविकमेतत् तत्तर्हि वक्तव्यं अलिंगमसंख्यमिति न वक्तव्यं सिद्धं तु पाठा त् पाठाद्वा सिद्धमेतत् कथं पाठः कर्त्तव्यः तसिलादयः प्राक्पाशपः शस्प्रभृतयः प्राक्समासांतेभ्यः मांतः तसिवातीकृत्वोर्थः नानाञोऽइति॥ ॥

दूषितत्वात्तत्रापि तदेव दूषणमिति प्रदर्शनार्थो वाशब्दः अलिंगासंख्यत्वस्य लौकिकत्वान्नेतरेतराश्रयमिति पूर्वःपक्षः एवमपीति अर्थमपि कश्चित्कचिच्छास्त्रा देव प्रतिपद्यत इति भावः सिद्धंत्विति वार्तिककारस्येतरेतराश्रयदोषः स्थित एवेति तुशब्दो विशेषप्रदर्शनार्थः भाष्यकारेण तु इतरेतराश्रयदोषः परिहृत इ तिवाशब्दार्थस्तु शब्दो व्याख्यातः यएवप्रकारवचनेथाल् स एव प्रत्नादिभ्यो विधीयत इति नाव्याप्तिः मांत इति अम् आम् तसिः प्रतियोगे पंचम्यास्तसिः तेनैकदिक् तसि

ध्वनितल्लोकेन दर्शितं ... तन्मते तद्वितं ... श्री ॥ ॥

सिद्धं तु पाठादिति ... स्यात्तस्य ...

शास्त्रे कर्तव्यं ... ६४

ती

तदंतविधिनेति प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वचनेनेति भावः अत्युच्चैसाविति शक्तिप्रधानान्यव्ययान्यव्ययानिवृत्तिविषये शक्तिमत्प्रधानानि भवंति यथा दोषामन्यमहः दोषाभूतमहरिति ततउच्चैः शब्दस्य प्रक्रियायां ह्रियेत स्वसमासः कथुनरिति श्लोके सप्तमीनिर्देशात् त्र्येपि सप्तमीनिर्दिष्टा सदृशमिति लिंगविशेषप्रतिपादने सामर्थ्याभावात् विभक्तिष्विति कारकेषु तत्रचानि साधनप्रधानानि अव्ययानि तेषां शक्यंतरानावेशात् क्रियाप्रधानानां च शक्तिसंबंधाभावात् सर्वासु विभक्ति ष्वित्युक्तं वचनेष्विति एकत्वादिषु अव्ययीभावस्य शक्तिलिंगविशेषयोगेपि वचनादव्ययत्वं यथा स्वस्त्यादीनां कर्मप्रवचनीयसंज्ञा तत्र यान्यसत्वभूतार्थाभिधायीन्यव्ययानिते

तदंतविधिनाभविष्यति इहापि तर्हि प्राप्नोति अत्युच्चैसौ अत्युच्चैसइति उपसर्जनस्यनेति प्रतिषेधो भविष्यति सतर्हि प्रतिषेधो वक्तव्यः नवक्तव्यः सर्वनामसंज्ञायां प्रकृतः प्रतिषेध इहानुवर्तिष्यते सर्वैव तत्र प्रत्याख्यायते इहापि तथा शक्यः प्रत्याख्यातुं कथं सतत्र प्रत्याख्यायते महतीयं संज्ञाक्रियत इति एवमिहापि च महती संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः कुत एतत् लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञायाः करण एतत् प्रयोजनं अन्वर्थसंज्ञा यथा विज्ञायेत न व्येतीत्यव्ययमिति कथुनर्नव्येति स्त्रीपुंनपुंसकानि सत्वगुणाः एकत्वद्वित्वबहुत्वानि च एतानर्थान्के चिद्व्ययंति केचिन्न विर्यंति ये न विर्यंति तदव्ययं सदृशं त्रिषुलिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं कृन्मेजंतः कथमिदं विज्ञायते कृद्यो मांत इति आहोस्वित् कृदंतं यन्मांतमिति किंचातः यदि विज्ञायते कृद्यो मांत इति कारयांचकार हारयांचकारेत्यत्र न प्राप्नोति अथ विज्ञायते कृदंतं यन्मांतमिति॥ ७ ॥श्री ॥ ७ ॥

यां लिंगादिभिरयोगः तेषां द्रव्यधर्मत्वात् सत्ववचनानामपि शक्तिस्वाभाव्यात्तदयोगः यथा युष्मदस्मदोर्लिंगायोगः केचित्तु लिंगादिविशेषेणायोगात्तत्सामान्येन तु योगमव्ययानामाहुः तदयुक्तं लिंगादिसामान्यसद्भावे प्रमाणाभावात् यन्नव्येतीति नाना त्वं न गच्छति सत्वधर्मान्न गृह्णातीत्यर्थः कृन्मेजंतः कथमिति किं मेजंतग्रहणे न पूर्वं कृद्विशेष्यते पश्चात् कृता तदंतविधिः आहोस्वित् पूर्वं कृता तदंतविधिः पश्चात् कृदंतं मेजंतग्रहणेन विशेष्यत इति प्रश्नः प्रयोजनं सर्वनामाव्ययसंज्ञायामिति चात्र तदंतविधिः अथवा अन्वर्थसंज्ञाश्रयणात् प्रत्ययग्रहणे संज्ञाविधावपि अत्र तदंतविधिर्भवति न हि केवलस्य प्रत्ययस्याप्रयोगार्हस्य नानागमनमगमनं वा संभवति कारवा

भा॰के॰प्र॰

६५

इदानीं कृतिकारांतरमंतविशेषप्रदर्शनेन संक्षिप्यते न व्याप्ये वमिति एवं विग्रहे च सर्वशब्दस्य प्रकारकार्त्स्न्येपि वर्तनादेकवचनमात्रोत्पत्तावपि सर्वा विभक्तयः स्याव्ययेभ्य उत्पद्यंत इति न स्यादसर्वविभक्तित्वं कथं तर्हीति इत्यकार्त्स्न्ये वृत्तिः सर्वशब्दः एकवचनमात्रोत्पत्तौ निरवशेषा विभक्तिर्नोत्पन्ना भवतीति भवत्येवासर्वविभक्तित्वं यदा त्वयं न्यायः प्रथमातिक्रमे कारणाभावात्प्रथमाया एवैकवचनमव्ययेभ्य उत्पद्यत इति तदा सर्वा विभक्तयो य स्मादित्यपि विग्रहे आश्रिते न दोषः यदा तु खलेकपोतिकान्यायेन सर्वैकवचनोत्पत्तिप्रसक्तेः तदुक्तं अव्ययीभावादप्येकवचनमेवोत्पद्यते तावतैव ततीया सप्तम्योर्बहुलमित्यस्योपपादनात् एवंगत इति यदा सर्वा विभक्तिरस्मादिति विग्रह आश्रीयते तदा एवं विज्ञातसंख्यातावल्लक्षणमस्तु असर्वविभक्तिरव्ययमिति पंचसूत्रीनकर्तव्या एतदसर्वविभक्तित्वं कृत्स्वपि तुल्यं यस्य कृन्मेजंत इत्यनेनाव्ययसंज्ञेष्यते मांतस्येति सूत्रोपलक्षणं ततः परइति कृन्मेजंत इत्यस्मात् सूत्रात्परे कृदर्थाः कृत्संज्ञाविषया क्त्वातोसुन्कसुन इत्यर्थः ग्रहणेनउच्चा

न व्याप्येवं विग्रहः करिष्यते नसर्वाः असर्वाः असर्वा विभक्तयो य स्मादिति कथं तर्हि न सर्वा असर्वा असर्वा विभक्तिरस्मादिति त्रिकं पुनर्विभक्तिसंज्ञं एवंगते कृत्स्वपि तुल्यमेतन्मांतस्य कार्यं ग्रहणं न तत्र ततः परे चानिमित्तानकार्यात्प्रत्ययः कृदर्थग्रहणेन योगः कृतद्धितानां ग्रहणं तु कार्यं संख्याविशेषं स्वभिनिश्चिता ये तेषां प्रतिषेधो भवतीति वक्तव्यं इहमाभूत् एको द्वौ बहव इति तस्मात् स्वरादिग्रहणं च कार्यं कृत्तद्धितानां ग्रहणं च पाठे पाठेनैयमव्ययसंज्ञा क्रियते सा इह न प्राप्नोति परमोच्चैः परमनीचैरिति॥ श्री॥ ७ श्रीराम॥ श्रीसांबसप्तकोटेश्वरप्रसन्न श्रीरामचंद्रार्पणमस्तु॥ श्री ॥ श्री ॥

रणेन प्रतिपदमित्यर्थः योगश्च न कर्तव्याः स्वरादिनिपातमव्ययमित्येवमादयः पंचेत्युपसंहारः इदानीमतिव्याप्तिपरिहारार्थं तद्धितग्रहणं कर्तव्यं तस्मिन्कृते कृन्मेजंत इत्याद्यपि कर्तव्यामिति दर्शयति कृत्तद्धितानामिति संख्याविशेषमिति तन्निवृत्त्यर्थमित्यर्थः तेषामिति असति तद्धितग्रहणे एकादीनामप्यसर्वविभक्तित्वात्प्रतिषेधो वक्तव्यः स्वादिति तद्धितग्रहणं कर्तव्यं तस्मिन्कृते स्वरादिग्रहणं कर्तव्यं स्वरादीनामतद्धितांतत्वात् ननूभयशब्दस्य द्विवचनात्स्वत्वादादसर्वविभक्तित्वं तथा गोदोवरणादिति तत एषामपि तद्धितश्चासर्वविभक्तिरित्यव्ययत्वप्रसंग इत्याह कृत्तद्धितानामिति प्रतिपदं तद्धिताः पठितव्याः येषामव्ययसंज्ञेष्यत इत्यर्थः तस्माद्गणपाठ एवाश्रयितव्यः प्रपंचार्थस्तु सूत्रा

६५

सन्निपातलक्षण इति सन्निपातः संश्लेषः तन्निमित्तो यो विधिः स तद्विघातस्यानिमित्तं तं संनिपातं यो विहंति तस्येत्यर्थः ग्रामणिकुलमिति इको ह्रस्व इति पूर्वोत्तरप दसंनिपातनिमित्तं ह्रस्वत्वं तुको न निमित्तं तुकि हि सति पूर्वोत्तरपदयोरानंतर्यविघातः स्यात् यदा तु ह्रस्वमात्रस्य तुगागमो न तदं तस्य अवयवावयवश्च समुदा यावयवो न भवति तदे तत्प्रयोजनं न त्वन्यथा बहिरंगमिति द्विपदाश्रयत्वात् यदपि ह्रस्वो नपुंसक इति ह्रस्वत्वं तदपि अर्थाश्रयत्वाद्बहिरंगं तुक् तु वर्णाश्रयत्वादंत रंगः यदि तु संनिपातलक्षण इति आश्रीयते तदा ग्रामणिच्छत्रमित्यत्रापि तुग्न स्यात् ह्रस्वत्वतुगागमयोरत्र साम्यादंतरंगत्वबहिरंगत्वं नास्तीति छलक्षणस्तुक्

न वा सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न वा वक्तव्यं किं कारणं संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति एषा परिभाषा कर्तव्या कः पुनरत्र विशेषः एषा वा परिभाषा क्रियेत अनन्यप्रकृतिरिति वोच्येत अवश्यमेषा परिभाषा कर्तव्या बहून्येतस्याः परिभाषायाः प्रयोजनानि कानि पुनस्तानि प्रयोज नानि प्रयोजनं ह्रस्वत्वं तुग्विधेः ग्रामणिकुलं सेनानिकुलमिति ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुग्भवतीति तुक् प्राप्नोति संनिपातलक्षणो विधिरनिमित्तं तद्विघा तस्येति न दोषो भवति नैतदस्ति प्रयोजनं बहिरंगं ह्रस्वत्वं अंतरंगस्तुक् असिद्धं बहिरंगमंतरंगे नलोपो वृत्रहभिः वृत्रहभिर्भ्रूणहभिरित्यत्र नलोपे कृते ह्र स्वस्य पिति कृति तुग्भवतीति तुक् प्राप्नोति सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति दोषो न भवति एतदपि नास्ति प्रयोजनं असिद्धो नलोपः तस्यासिद्धत्वान्न भविष्यति उदुपधत्वमकित्त्वस्य निकुचिते उदुपधत्वमकित्त्वस्यानिमित्तं कौ निकुचिते निकुचितमित्यत्र नलोपे कृते उदुपधाद्भावादिकर्मणोरन्य तरस्यामिति अकित्त्वं प्राप्नोति संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति एतदपि नास्ति प्रयोजनं अस्त्यत्राकित्त्वं न धातुलोप आर्धधातुक इति प्रतिषे धो भविष्यति नाभावो यञि दीर्घत्वस्य अमुना नाभावो यञि दीर्घत्वस्यानिमित्तं अमुना नाभावे कृते अतो दीर्घो यञि सुपि चेति दीर्घत्वं प्राप्नोति संनिपातलक्षणो

विधिरनिमित्तं तद्विघातस्येति न दोषो भवति॰

सिद्धो भवति असिद्धो नलोप इति नलोपः सुप्स्वरेति असिद्धं बहिरंगमिति वा निकुचित इति कुंचेः क्तप्रत्ययः अनिदितामिति नलोपः तत्र कित्त्वनिमित्तमुदुप धत्वमुदुपधाद्भावादित्यकित्त्वस्यानिमित्तमिति गुणो न भवति अमुनेति न मु न इत्यस्यायमर्थः ने कर्तव्ये मुभावः सिद्धो भवति ने परतो यद्दीर्घत्वं प्राप्नोति तत्र मुभावस्यासि द्धत्वात् अकारांतत्वाद्दीर्घप्रसंगः तस्मिन् कृते अदसोऽसेरिति दीर्घस्य दीर्घ ऊकारः प्राप्नोति तत्रश्चामूनेति स्यात् उकारः संनिपातनिमित्तस्तु नाभावो दीर्घत्वस्यानिमित्त

प्रा॰ कौ॰ प्र॰

६६

प्रतामावेति क्ङिति लुप्ते प्रत्ययलक्षणेन कृदंतमेतदिवति प्रयुक्त्वाच मांतं अव्ययादिति लुगिति ननु हल्ङ्याब्भ्य इति लोपेन सिद्धत्वात्किं लुका प्रयोजनं यदा हि अनुप्रयो गवशात् द्वित्वबहुत्वावगतिस्तदास्ति द्विवचनबहुवचनोत्पत्तिरिति लुगेषितव्यः अकत्र तु न संभवति अपरिसमाप्तार्थत्वादसत्त्वादिभिर्योगाभावात् इष्यते चे ति पूर्वोक्तार्थे तोस्तरबाद्यनुत्पादादनुप्रयोग एव तरबाद्युत्पत्तिः समाप्तार्थस्य प्रकर्षादियोगादित्यर्थः अत्रैवार्थे ज्ञापकमाह आतश्चेति तत्र लुक्तं व्यवहितनिवृत्यर्थं चेति प्रशानूशब्दमिति तस्य मो नो धातोरिति नत्वस्यासिद्धत्वात्सिद्धमव्ययत्वमिति भावः तुल्यजातीयस्य धातोर्नियमेन व्याप्

प्रतामोप्रताम ः अत्रापि प्राप्नोति यथैषु सितथाल्लु अस्तु तावत् लक्ष्यामांत इति कथं कारयां चकार हारयां चकारेति किं पुनरत्राव्ययसंज्ञया प्रार्थ्य ते अव्ययादिति लुग्यथा स्यात् मा भूदेवं आम इत्येवं भविष्यति न सिध्यति लिङ्ग्रहणं तत्रानुवर्तते लिङ्ग्रहणं निवर्तयिष्यते यदि निवर्त्तते प्रत्य यमात्रस्य लुक् प्राप्नोति इष्यते च प्रत्ययमात्रस्य आतश्चेष्यते एवं ह्याह कृञ्चानुप्रयुज्यते लिटीति यदि च प्रत्ययमात्रस्य लुग्भवति ततः ...दुप पन्नं भवति अथवा पुनरस्तु कृदंतं यन्मांतमिति कथं प्रतामोप्रताम इति आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणे नाव्ययसंज्ञा भवतीति य दयं प्रशानूशब्दं स्वरादिषु पठति कृन्मेजंतश्चानिकारोकारप्रकृतिः कृन्मेजंतश्चानिकारोकारप्रकृतिरिति वक्तव्यं इह मा भूत् आधये आधेः चिकीर्षवे चिकीर्षोरिति अनन्यप्रकृतिरिति वा अथवा अनन्यप्रकृतिः कृदव्ययसंज्ञो भवतीति वक्तव्यं किं पुनरत्र ज्यायः अनन्यप्रकृतिरिति वच

नमेव ज्यायः इदमपि सिद्धं भवति कुंभकारेभ्यो नगरकारेभ्य इति तत्तर्हि वक्त

व्यं ति: क्रियत इति कारयां चकारेति भवत्येव मांतस्याव्ययसंज्ञा शानते जन इत्यस्य तु धातोः प्रशानिति रूपं न भवति तस्य क्विबंतस्य प्रयोगादर्शनात् लावयंतेर्लो

६६

इत्यस्यापि न भवति अस्मादेव ज्ञापकाल्लाक्षणिकत्वाद्धो कारस्य अनिकारोकारेति एवं एतद्विशेषणं न मकारस्य व्यवच्छेद्यासंभवात् आधय इति गुणे कृते तत

ग

रं बहिरंगयोरिति न्यायादव्ययसंज्ञा स्यात् न त्वयादयः अंतरंगत्वादेव च सुलुक् स्यात् परिभाषांतरप्रयोजनकथनार्थं लक्षणप्रतिपदोक्तयोरित्येतदनाश्रि तं लाक्षणिकं ह्यनुमेयं प्रतिपदोक्तं तु प्रत्यक्षमिति तस्यैव ग्रहणं न्याय्यं॥ श्री०॥ ५ ॥ ६ ५ ॥ ६ ७ ॥ ६ ५ ॥

दाक्षिरिति प्रयोगेष्यवस्थितस्यैवेकारस्यान्वाख्यानमनेन क्रियत इति संनिपातलक्षणत्वं प्रत्ययस्य संभाव्यते न प्रत्यय इति कल्पितप्रकृतिप्रत्ययविभागेनान्वाख्यानात्प्रकृतेर विद्यमान एव प्रत्यय उत्पाद्यत इत्याशयः अंगसंज्ञेति सत्यामंगसंज्ञायामकारलोप इति स्यादानंतर्यविघातः तत्र वर्णविचालस्यानिमित्तं स्यादिसंगसंज्ञाहारेयोत्यर्थः
अत्र केचिदिह वर्णाश्रय इति व्याचक्षते तेषामात्रेयायुदाहरणं अन्ये तु वर्णाश्रय इति अकारप्रश्लेषमाहुः क्नापयतीति पिचित्रयोः कृतायामात्वं युको न निमित्तं स्यात्
अंगस्य य आकारस्तस्य युगित्यवयवभक्तं युकं मत्वा दोषोपन्यासः अग्निमानिति पूर्वमुदात्तमाश्रित्य मतुप उदात्तत्वं उदात्तत्वं क्रियमाणं पूर्वस्य निघातं न कुर्यात् परमवा

तस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्य तस्यैव तस्य लक्षणस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात् क अतइ अ दाक्षिः प्लाक्षिः प्रत्ययः
संनिपातलक्षणः अंगसंज्ञा तद्धनिमित्तं स्यात् आत्वं युग्विधेः क्नापयति आत्वं युग्विधेरनिमित्तं स्यात् क क्नापयतीति युष्मत्स्व स्यादीदयत् युष्मत्स्व
त्स्यानिमित्तं स्यात् क अदीदयत् त्यदाद्यकारष्टाविधेः त्यदाद्यकारष्टाविधेरनिमित्तं स्यात् क्रयासेति इड्डुधिराकारलोपस्य पपिवान् इड्डुधिराकार
लोपस्यानिमित्तं स्यात् क पपिवान् तस्थिवानिति मतुप्स्वरभक्तत्वुदात्तत्वं पूर्वनिघातस्य मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्यानिमित्तं स्यात् क अग्निमान् वायु
मान् परमवाचा परमवाचे इति नदीह्रस्वत्वं संबुद्धिलोपस्य नदीह्रस्वत्वं संबुद्धिलोपस्यानिमित्तं स्यात् क नदि कुमारि ब्राह्मणि किशोरि ब्रह्मबन्धिति ह्रस्वत्वे कृते एङ्ह्र
स्वात्संबुद्धेरिति संबुद्धिलोपो न प्राप्नोति माभूदेवं अंतादित्येवं भविष्यति न सिध्यति दीर्घादित्युच्यते ह्रस्वात्तावन्न प्राप्नोति इदमिह संप्रधार्यं ह्रस्वत्वं क्रियतां
संबुद्धिलोप इति किमत्र कर्तव्यं परत्वाद्ध्रस्वत्वं नित्यः संबुद्धिलोपः कृतेऽपि ह्रस्वत्वे प्राप्नोत्यकृतेऽपि अनित्यः संबुद्धिलोपः नहि कृते ह्रस्वत्वे प्राप्नोति किं कारणं
संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति एते दोषाः समा भूयांसो वा तस्मान्नार्थो नयापरिभाषया नहि दोषाः संतीति परिभाषा न कर्तव्या लक्षणं वा न प्रणेयं
नहि भिक्षुकाः संतीति स्थाल्यो नाधिश्रीयंते न च मृगाः संतीति यवा नोप्यंते

चेति अचो दात्तादुत्तरपदादिति विभक्त्युदात्तत्वं विधीयमानं पूर्वनिघातस्यानिमित्तं स्यात् माभूदिति हल्ङ्याब्भ्य इति सूत्रे दीर्घग्रहणमहृष्टैरुच्यते तत्र कृते पि ह्रस्व
त्वे स्यानिवद्भावाद्भविष्यतीति भावः ब्रह्मबन्धुशब्दापेक्षयाचैवं तदुच्यते तस्याप्यबंतत्वात् नित्य इति कार्यं तावन्नित्यं तद्येन केनचिल्लक्षणेन भवतीति भावः
संबुद्धिलोपस्यावकाशः हे देवदत्तेति भूयांसो वेति दुष्टत्वमपि प्रतिपादनाय प्रकर्षोल्लेखः सर्वादिषु समशब्दस्य सर्वपर्यायस्य सर्वनामसंज्ञाविधानात्तुल्यवा
चिनोऽत्र समास इति प्रयोगः अस्ति समशब्दः सर्वपर्यायः यथा समराज्यं वर्तते सर्वराज्यं वर्तत इत्यर्थः वेदे पि मानः समस्य ऊर्ध्व इति प्रयोगः सर्वस्य दुर्धियो

प्रतिपदोक्तं नामा नुपपन्नवृष्टोन्नानानाम्नो लक्षणान्यतः संस्कारानादेव न्यायः ॥ श्री ॥

५ निमित्तंस्या

भा॰कै॰प्र॰

८७

नमुटादेश इति अनेकविभक्त्यंतस्तत्र समासआश्रितः राया आदेशः रायामादेश इति उपादास्तेति पदविषय आत्वविधानात्कित्त्वसंनिपातनिमित्तमात्वं स्नाघ्वोरिति
कित्वस्यानिमित्तं कित्वसंनियुक्तं चेत्वमिति कित्वाभावेन भवति यदयमिति ननु समस्तार्थमेतत्स्यात् प्रियातिसृणां ब्राह्मणानामिति अत्रांगं पुंसि वर्तत इति नास्ति
ङीपः प्राप्तिरिति केचित् तदयुक्तं नहि ङीब्विधाने गाधिकारोऽस्ति त्र्यवयवस्यस्त्रीत्ववृत्तित्वान्ङीपः प्राप्तिः केन वार्यत इति ज्ञापकमेव तज्ज्ञापकादेव च सिद्धत्वात्स्वला
दिष्वनयोः पाठो न कर्तव्यो भवति शतानीति विभक्तिसंनिपातनिमित्तो नुमागमः षट्संज्ञाहेतुकस्य विभक्तिलुको न निमित्तं ननु षण्णां तावदुच्यं तत्ग्रहणं औपदेशिकप्र
तिपत्त्यर्थमिति अत्र न भविष्यतीति चेत्संख्यासंप्रत्ययार्थं बहुव्रीह्यर्थं तत्स्यादिति अदोषः शकटाविति विभक्तिसंनिपातकृतमत्वं यदि टापो निमित्तं स्यादानंतर्यं

एतदपि नास्ति प्रयोजनं वक्ष्यत्येतन्नमुटादेश इति आत्वं कित्वस्योपादास्त आत्वं कित्वस्यानिमित्तं स्यात् क उपादास्तास्य स्वरः शिक्षकस्येति आत्वे कृते
स्नाघ्वोरित्वेतीत्वं प्राप्नोति संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति एतदपि नास्ति प्रयोजनं उक्तमेतत् दीङः प्रतिषेधः स्नाघ्वोरि
त्वे इति तिसृचतसृत्वं ङीब्विधेः तिसृचतसृत्वं ङीब्विधेरनिमित्तं स्यात् क्व तिस्रस्तिष्ठंति तिसृचतसृभावे कृते ऋन्नेभ्यो ङीबिति ङीप्प्राप्नोति संनिपातलक्षणो
विधिरनिमित्तं तद्विघातस्येति न दोषो भवति एतदपि नास्ति प्रयोजनं आचार्यप्रवृत्तिर्ज्ञापयति न तिसृचतसृभावे ङीप् भवतीति यदयं न तिसृचतसृ
नामि दीर्घत्वस्य प्रतिषेधं शास्ति इमानि तर्हि प्रयोजनानि शतानि सहस्राणि नुमि कृते षण्णांतावादिति षट्संज्ञा प्राप्नोति संनिपातलक्षणो विधिरनिमि
त्तं तद्विघातस्येति न दोषो भवति शकटौ पद्धतौ अत्वे कृते तद्इति टाप्प्राप्नोति संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति इयेष उवो
ष गुणे कृते इजादेश्च गुरुमतोऽनृच्छ इत्याम्प्राप्नोति संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति ॥ श्री ॥ ७ ॥ श्री ॥ श्री ॥

विहन्येत शास्त्रीये च कार्ये अंतादिवद्भावेनांतर्येलौकिके टापि च सति शकटायामिति स्यात् अक्षद्योरितु तपरकरणेनाप्यत्र टाप्निवर्तयितुं शक्यते इदुतोऽहिस्य
नैमात्रिक एवाकारो भविष्यति भाव्यमानत्वाद्ध्रस्वर्णस्याकारो ग्नाहकेन न भविष्यतीति लक्षणांतरेण प्राप्तस्य दीर्घत्वस्य निराकरणार्थं तपरकरणं संपद्य
ते इयेषेति आमि सति लुक् स्यादिति प्रकृतिप्रत्ययसंनिपातस्य विघातः स्यात् उषविदेति विकल्पः ओषांचकार रूपतुरित्यादौ सावकाश इति उषोषितिनित्ये
आम्प्रसज्यते प्रतिपदविधेस्तु बलवत्वात्परत्वाच्चात्रापि विकल्पेनैव भाव्यमिति अनुदाहरणमेतत् गुरुमत इति नित्ययोगे मतुपाश्रयणादपि शंकाया अभावः

प्रतिपदोद्योतः ८८

नन्वेकमिति सामान्यलक्षणमेकप्रयोजनार्थं न कर्तव्यमित्यर्थः तन्नैवायमिति न चोक्तं तस्मान्मुखस्वरेणात्र भवितव्यमेवेत्याहुः अन्ये वर्णयन्ति अनव्ययमव्ययं भवती
त्यन्वर्थसंज्ञाविज्ञानान्मुखस्वरनिवृत्तिर्भविष्यतीति नार्थः सूत्रेणेति केचित्तु स्वरादिपाठात्सिद्धायामव्ययसंज्ञायां पुनर्वचनमनित्यत्वज्ञापनार्थं तेन कतिपयान्येवाव्य
यकार्याणि भवन्तीति नार्थः परिगणनेनेत्याहुः तेषां वचनमन्तरेण विशेषे प्रमाणाभावः शिसर्व शिसर्वनामस्थानं स्वडनपुंसकस्येति चेदिति अस्मिन्नन्यासे दोषः स्वुटस्त्री
पुंसयोरिति न्यासेन दोष इत्यर्थः प्रसज्यप्रतिषेधाश्रयेण पूर्वः पक्षः पर्युदासाश्रयेण सिद्धान्तः अप्राप्तेर्वेति प्रसज्यप्रतिषेधे यद्दोषः तत्र सुडिस्थनेन याप्राप्तिः सा प्रतिषिध्य

नन्वेकं प्रयोजनं योगारंभं प्रयोजयति यद्येतावत्प्रयोजनं स्यात्तन्नैवायं ब्रूयात् नाव्ययादव्ययीभावाच्चेति शिसर्वनामस्थानं स्वडनपुंसकस्य शिसर्वनामस्थानं स्वडनपुं
कस्येति चेज्जसिशि प्रतिषेधः शिसर्वनामस्थानं स्वडनपुंसकस्येति चेज्जसिशिप्रतिषेधः प्राप्नोति कुंडानि तिष्ठन्ति वनानि तिष्ठन्ति असमर्थसमासश्चायं द्रष्टव्यः अन
पुंसकस्येति न हि नञो नपुंसकेन सामर्थ्यं केन तर्हि भवतिना न भवति नपुंसकस्येति यत्तावदुच्यते शिसर्वनामस्थानं स्वडनपुंसकस्येति चेज्जसिशिप्रतिषेध इति ना
प्रतिषेधात् नायं प्रसज्यप्रतिषेधो नपुंसकस्येनेति किं तर्हि पर्युदासोऽयं यदन्यन्नपुंसकादिति नपुंसकेन व्यापारः अधिके न चित्याम्नोति तेन भविष्यति पूर्वेण च प्राप्नो
ति अप्राप्तेर्वा अथवा नंतरा या प्राप्तिः सा निषिध्यते कुत एतत् अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति पूर्वा प्राप्तिः अप्रतिषिद्धा तया भविष्यति ननु चेयं प्राप्तिः पूर्वां प्रा
प्तिं बाधते नोत्सहते प्रतिषिद्धा सती पूर्वां बाधितुं यदप्युच्यते असमर्थसमासश्चायं द्रष्टव्य इति यद्यपि वक्तव्यः स्यात् अथ वेतर्हि बहूनि प्रयोजनानि कानि असूर्यंप
श्यानि मुखानि अपुनर्गेयाः श्लोकाः अश्राद्धभोजी ब्राह्मण इति॥ श्रीगजाननार्पणमस्तु॥ श्रीसत्तकौंडिन्येश्वरार्पणमस्तु॥ श्री॥ ७॥ ७॥ श्री

तेन नु शिसर्वनामस्थानमिति या प्राप्तिः अन्यथा शिसर्वनामस्थानमिति निरवकाशं स्यात् नपुंसकस्यैव हि शिः संभवति ननु चेयमिति परत्वादित्यर्थः प्रतिषेधयुक्तायुक्तस
द्भावाद्विशेषसद्भावः तत्र परत्वात्सुडिति प्राप्तिः पूर्वां प्राप्तिं बाधते तामपि प्रतिषेध इति दोषः नोत्सहत इति अपवादविषयपरिहारेणास्याः प्रवर्तनादित्यर्थः अथ
वेतर्हीति इदानीमित्यर्थः तत्र स्त्रीपुंसयोरिति वक्तव्ये अनपुंसकस्येति वचनं ज्ञापकं प्रसज्यप्रतिषेधेपि नञ्समासोस्तीति॥ श्री॥ ७॥ ७॥ श्री

भा०वे०प्र० ५८

प्रतिषिधेयं इति तत्र विधानसामर्थ्यादंगोवर्णविचालो भविष्यति कष्टं वेति ज्ञापकात् यशब्दे दीर्घो भविष्यति नयासंयोरिति लिंगाद्दाप् भविष्यति पपिवानिति वस्वेकाजाद्ध्य
यं नियमः इट्टेन नलपूर्वो यं विधिरिति आकारस्य लोपः करिष्यतीत्याकारांतभक्तः पुड् व्यवधायकः अदीदयदिति लिंगाद्ध्रस्वः यदयं मारणतोषणेति ज्ञाना नेर्मित्वमुपधाह्रस्वार्थं
शास्ति तं ज्ञापयति पुकि कृते उपधाह्रस्वत्वं भवतीति न हि ज्ञानातेरकृते पुकि ह्रस्वभाविन्युपधा भवति अग्निमानिति अनुदात्तं पदमेकवर्जमिति परिभाषा स्वरविषयासं

दोषाः खल्वपि साकल्येन परिगणिताः प्रयोजनानामुदाहरणमात्रं कुत एतत् न हि दोषाणां लक्षणमस्ति तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तद
र्थमेषा परिभाषा कर्तव्या प्रतिषेधे यं दोषेषु अव्ययीभावस्य अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः अव्ययीभावस्याव्ययत्वे प्रयोजनं किं लुङ्मु
खस्वरोपचाराः लुकूउपाग्नि प्रत्यग्नि अव्ययादिति लुक् सिद्धो भवति मुखस्वर आग्निमुखः प्रत्यग्निमुखः नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्य इ
त्येष प्रतिषेधः सिद्धो भवति उपचार उपपयःकारः उपपयःकामः इति अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्येति प्रतिषेधः सिद्धो भवति किं पुनरिदंप
रिगणनमाहोस्विदुदाहरणमात्रं परिगणनमित्याह अपि खल्वप्याहुः यदन्यदव्ययीभावस्याव्ययकृतं प्राप्नोति तस्य प्रतिषेधो वक्तव्य इति किं पुनस्तत् परा
गवद्भावे व्ययप्रतिषेधश्चोदितः उच्चैरधीयानं नीचैरधीयानेत्येवमर्थं सद्भावापि प्राप्नोति उपाग्न्यधीयान प्रत्यग्न्यधीयानेति अकच्च व्ययग्रहणं क्रियते उच्च
कैः नीचकैरित्येवमर्थं सद्भावापि प्राप्नोति उपाग्निकं प्रत्यग्निकं मुख्यव्ययप्रतिषेधश्चोद्यते दोषामन्यमहः दिवामन्या रात्रिरित्येवमर्थं सद्भावापि प्राप्नोति उपकुंभम
न्यः उपमणिकंमन्य इति अस्यच्वौ अव्ययप्रतिषेधश्चोद्यते दोषाभूतमहः दिवाभूता रात्रिरित्येवमर्थं सद्भावापि प्राप्नोति उपकुंभीभूतं उपमणिकीभूतं यदि प
रिगणनं क्रियते नार्थोऽव्ययीभावस्याव्ययसंज्ञाकथं यानि अव्ययीभावस्याव्ययत्वे प्रयोजनानि नैतानि संति प्रयोजनानि यत्तावदुच्यते लुगिति आचार्यप्रवृत्ति
र्ज्ञापयति भवत्यव्ययीभावाल्लुगिति यदयं नाव्ययीभावादिति प्रतिषेधं शास्ति उपचार अनुत्तरपदस्थस्येति वर्तते तत्र मुखस्वर एकः प्रयोजयति॥ श्री॥

निपातपरिभाषां बाधते ङे इह्रस्वादिस्यत्रापि गुणात्संबुद्धेरिति वक्तव्ये ह्रस्वग्रहणसामर्थ्यात् निपातपरिभाषाया बाधः दर्भात्यत्र छंदसि गुणाभावपक्षे छंदसो लुग्भ
विष्यति अव्ययी प्रयोजनमिति मुखस्वरोपचारो निवर्त्यमानो प्रयोजनं यथा मशकार्थो धूम इति अपि खल्विति एवं खल्वित्यर्थः परिगणनमनेन दृढीक्रियते उ
पाग्न्यधीयानेति अग्निसमीपे अधीयानेत्यर्थः तत्र षष्ठ्यामंत्रितकारकवचनमिति पराङ्गवद्भावो भवति॥ ७॥ श्री॥ श्री॥ श्री॥

५९

नवाविधिपूर्वकत्वादिति प्रदेशवाक्यार्थपर्यालोचनयेयं संज्ञा व्यवस्थाप्यते प्रदेशेषु च कार्याणि विधाय विभाषाशब्द उच्चारितो न वा शब्दार्थं गमयति तत्र लोकवन्नितार्थो नञर्थो भवति न तु प्रत्यग्रार्थावगतिरित्यर्थः विलिंगमिति भिन्नलिंगं व्यधिकरणमित्यर्थः विलिंगत्वेन वैयधिकरण्यं लक्ष्यते न तु प्रतिषेधवाचिना नवाशब्दस्य लिंगयोगोऽस्ति एवं चेति नैव कश्चिद्व्याकरणे समानलिंगो निर्देश इत्यर्थः विभाषा सेनासुरेति यद्यपि समानलिंगो निर्देशस्तथापि भिन्नविभक्तित्वात्सामानाधिकरण्याभावः अपि चेति

नवाविधिपूर्वकत्वात्प्रतिषेधसंप्रत्ययो यथा लोके नवा एष दोषः किं कारणं विधिपूर्वकत्वात् विधाय किंचिन्नवेत्युच्यते ते न प्रतिषेधवाचिनः संप्रत्ययो भवति तद्यथा लोके ग्रामो भवता गंतव्यो न वा नेति गम्यते अस्ति कारणं येन नवेत्युक्ते लोके प्रतिषेधवाचिनः संप्रत्ययो भवति किं कारणं विलिंगं हि भवान् लोके निर्देशं करोति अंग हि समानलिंगो निर्देशः क्रियतां प्रत्यग्रवाचिनः संप्रत्ययो भविष्यति तद्यथा ग्रामो भवता गंतव्यो नवः प्रत्यग्र इति गम्यते एवमेव न जातु कश्चिद्व्याकरणे समानलिंगो निर्देशः क्रियत इति अपि चात्र कामचारः प्रयोक्तुः शब्दानामभिसंबंधे तद्यथा यवागूर्भवता भोक्तव्या न वा यदा यवागूशब्दो भुजिनाभिसंबध्यते भुजिर्नवाशब्देन तदा प्रतिषेधवाचिनः संप्रत्ययो भवति यवागूर्भवता भोक्तव्या न वा नेति गम्यते यदा यवागूशब्दो नवाशब्देनाभिसंबध्यते न भुजिना तदा प्रत्यग्रवाचिनः संप्रत्ययो भवति यथा यवागूर्नवा भवता भोक्तव्या प्रत्यग्रेति गम्यते न चेह वयं विभाषाग्रहणेन सर्वादीन्यभिसंबध्नीमः दिक्समासे बहुव्रीहौ सर्वादीनि विभाषा भवंतीति किं तर्हि भवति रभिसंबध्यते दिक्समासे सर्वादीनि भवंति विभाषेति विध्यनित्यत्वमनुपपन्नं प्रतिषेधसंज्ञाकरणात् विधेरनित्यत्वं नोपपद्यते शुशाव शुशुवतुः शुशुवुः शिश्वाय शिश्वियतुः शिश्वियुः किं कारणं प्रतिषेधसंज्ञाकरणात् प्रतिषेधस्येयं संज्ञा क्रियते तेन विभाषाप्रदेशेषु प्रतिषेधस्यैव संप्रत्ययः स्यात् ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री

तत्र सामर्थ्याद्विशेषावगतिः यदा भोस्त्वया गृभोजनेवाक्यमुदीर्यते तदा प्रत्यग्रार्थावगतिः यदा त्वातुरं प्रति गुरुभोजननिषेधार्थमुच्यते तदा निषेधार्थावगतिः न चेहेति क्रियायाः प्राधान्यात्सैव विभाषाग्रहणे न संबध्यते न तु तदंगमित्यर्थः तदेवं स्थितमेतत् नवाविधिपूर्वकत्वादिति विध्यनित्यत्वमिति विकल्प इत्यर्थः नवाशब्द एकनिपातः प्रतिषेधवाचीतस्य हेयादानादिति भावः परिहारांतराभिधानाय नबहुव्रीहावित्यसंबद्धं स्यादिति नोक्तम् ॥ श्री ॥ ॥

भा॰कै॰प्र॰ ६९

नवेति नवेति विभाषायामिति समुदायस्यानुकरणादनुकरणस्य चानुकार्येणार्थवत्त्वात्प्रातिपदिकत्वे सति विभक्त्युत्पत्तिः स्त्रीप्रत्ययेच तदादिनियमाभावार्थश्चयोभवतः अथवा नवेत्युच्चार्य या विभाषा कृता तस्यामिति व्याख्या तत्र लौकिके क्रियापदसंनिधानेन नवाशब्दयोर्योऽर्थो द्योत्यो विकल्पप्रतिषेधलक्षणः स संज्ञीत्यर्थः अन्यथा विधिप्रदेशेषु नवाशब्दोपेक्षा देशोऽस्यात्तां युग्रहणे चेति शब्दस्य संज्ञाकरणात्प्रदेशेषु तस्यैव संप्रत्यय इत्यर्थः इतिकरण इति क्रियत इति करणः कर्मणि ल्युट् इतिश्चासौ करणश्चेति विशेषणसमासः क्रियत इति सामान्यविशेषभावेन निर्देशः शब्दाधिक्यादिति उपहासपरमेतच्चोदकस्य वचनं अशब्दार्थस्यालाभादिति भावः गोरित्ययमाहेति

नवेति विभाषा नवेति विभाषायामर्थसंज्ञाकरणं नवेति विभाषायामर्थस्य संज्ञा कर्तव्या नवाशब्दस्य योऽर्थस्तस्य संज्ञा भवतीति वक्तव्यं किं प्रयोजनं शब्दसंज्ञायां ह्यर्थासंप्रत्ययो यथान्यत्र शब्दसंज्ञायां सत्यां अर्थस्यासंप्रत्ययः स्यात् यथान्यत्र अन्यत्रापि शब्दसंज्ञायां शब्दसंप्रत्ययो भवति नार्थस्य क्वान्यत्र दाधाघ्वदाप् तरतमपौ घ इति घुग्रहणेषु घग्रहणेषु च शब्दस्य संप्रत्ययो भवति नार्थस्य तर्हि वक्तव्यं न वक्तव्यं इतिकरणोऽर्थनिर्देशार्थः इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति किं गतमेतदिति ना आहोस्विच्छब्दाधिक्यादर्थाधिक्यं गतमित्याह कुतः लोकतः तद्यथा गौरित्ययमाहेति गोशब्दादितिकरणः प्रयुज्यमानो गोशब्दं स्वात्पदार्थात्प्रच्यावयति सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासावर्थपदार्थकता तस्याः शब्दपदार्थकः संपद्यते एवमिहापि नवाशब्दादितिकरणः प्रयुज्यमानो नवाशब्दं स्वस्मात्पदार्थात्प्रच्यावयति सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासौ शब्दपदार्थता तस्याः लौकिकमर्थं संप्रत्याययति नवेति यद्गम्यते नवेति यत्प्रतीयत इति समानशब्दप्रतिषेधः समानशब्दानां प्रतिषेधो वक्तव्यः नवा कुंडिका नवा घटिकेति किं च स्यात् यद्येतेषां विभाषा संज्ञा स्यात् विभाषा दिक्समासे बहुव्रीहौ दक्षिणपूर्वस्यां शालायां अचिरकृतायां संप्रत्ययः स्यात् ॥ श्रीः ॥ ॥ ॥ श्री ॥ ॥ ॥ ॥ श्री ॥ ॥ श्री ॥

यद्यपि नित्ये शब्दार्थसंबंधे उपात्तस्यार्थस्य त्यागो नास्ति तथापि प्रसिद्धिवशादेतदभिधीयते अर्थपदार्थकतायाः प्रच्युत इति तत्र तत्त्वादावेव स्वरूपपदार्थको गोशब्दः प्रयुक्तः सादृश्यात्तु तमर्थमनभिव्यक्तमिति शब्दो घोतयतीति पदार्थविपर्यासकृदित्युच्यते अर्थपदार्थकतेति संबंधे भावप्रत्ययः संबंधात्प्रच्युतो तोऽर्थात्प्रच्युतो भवति समानशब्दप्रतिषेध इति समानः शब्दो वाचको येषामर्थानां तेषामित्यर्थः विभाषा दिक्समास इति विभाषाशब्देनाभिनवलक्षणोऽर्थः प्रत्याय्यते तत्र प्रत्यग्रवाचीयो दिक्समास इति संप्रत्ययः स्यात् तत्र हि दिशो नित्यत्वान्नवपुराणत्वासंभवात्तन्निमित्तो यदा शालायां व्यपदेशः दक्षिणपूर्वा शाला सा चाभिनवा तदा स

साध्वनुशासनइति साधुत्वप्रतिपादनार्थत्वाच्छास्त्रस्य साधुत्वस्यैव प्राधान्याद्धि कस्येन संबंधः स्यात् न तु तदंगभूतानां संज्ञादीनामिति भावः ततश्च विभाषाग्रहणं व्यर्थं स्यात् विभाषा ध्वयते: साधु संप्रसारणं भवति पक्षे त्वसाध्विति अस्य यः साधुरिति यथा नञ्ज्यास्य संनिधौ भस्यमिवेत्यादीयते न चैव हीति सर्वदा त्वस्य साधुत्वं नो भवतीत्यर्थ: द्वैधाप्रतिपत्तिरिति साधुत्वविकल्पेन विभाषाग्रहणस्योपयुक्तत्वात् शिश्वियतुरित्यादिरूपं न सिध्यतीत्यर्थः यस्य पुनरिति एवं मन्यते व्याकरणेन शब्दा उत्पाद्यंते तत्र मतेन विभाषाग्रहणे नापूर्वत्वेन विधेयत्वात् संप्रसारणमेव विकल्प्य तद्वति द्वैधप्रतिपत्तिः शब्दानां सिध्यतीति यस्यापीति साधुत्वस्यापौरुषेयत्वाद विकल्पात्वाच्चदंग नानेव विक

इति करणोर्थनिर्देशार्थ इत्युक्तं साध्वनुशासनेस्मिन् शास्त्रे विभाषा तस्य साधुत्वं साध्वनुशासनेस्मिन् शास्त्रे यस्य विभाषा क्रियते स विभाषा साधुः स्यात् समासश्च वहि विभाषा क्रियते ते न समासस्यैव विभाषा साधुत्वं स्यात् अस्य यः साधुः स प्रयोक्ष्यतेः साधुर्न प्रयोक्ष्यते न चैव हि कदाचित् राजपुरुष इत्येतस्याम वस्थायाम साधुत्वमिष्य ते अपि च द्वैधाप्रतिपत्तिः द्वैधं शब्दानाम प्रतिपत्तिः स्यात् इकामश्च पुनर्विभाषाप्रदेशेषु द्वैधं शब्दानां प्रतिपत्तिः स्यादित्येतन्न सिध्यति यस्य पुनः कार्याः शब्दा वि
पि भाषा सोस मासं निर्वर्तयति यस्यां नित्याः शब्दास्तस्याप्येत दोषो न भवति कथं न विभाषा ग्रहणेन साधुत्वमभिसंबध्यते किं तर्हि समास संज्ञाभिसंबध्यते समासइ त्येषा संज्ञा विभाषा भवति तद्यथा मेध्यः पशुर्विभाषितो मेध्योनड्वान् विभाषित इति न तदविचार्यते अनड्वान् आलनड्वान् किं तर्हि आलब्धव्य इति कार्ये युगपदन्वाचय योगपद्यं कार्येषु शब्देषु युगपदन्वाचयेन यदुच्यते तस्य युगपद्वचनता प्राप्नोति तव्यत्तव्यानीयरः ढक्छमंडूकादिति यस्य पुनर्नित्याः शब्दाः प्रयुक्तानामसौ साधुत्वम न्वाचष्टे ननु चयस्यापि कार्याः तस्याप्येष न दोषः कथं प्रत्ययः परो भवतीत्युच्यते न चैकस्याः प्रकृतेरनेकस्य प्रत्ययस्य युगपत्परत्वेन संभवोस्ति॥ श्री ॥
योनात्यथ ३
त्यः तद्यथेति पशुत्वानड्वुत्वयोरविकल्प्यत्वात् क्रियाविकल्प्यते तेन न चैत्य चोक्तेन च संज्ञायाभावाभावाविष्येते इति इहत्वक्तं संज्ञाभिसंबध्यत इति तत्र विरोधः नैषदोषः इह वृत्तिवाक्ययोर्मुख्यार्थाभेदाद भिन्नार्थत्वाश्रित्योक्तं अन्यत्र तु व्यपेक्षैकार्थीभावभेदात् भिन्नार्थत्वमाश्रित्यैकार्थीभाव एव संज्ञायाभावाभावो नेष्यते इत्युक्तमित्यविरो धः नित्यवादी कार्यपक्षे दूषणमाह कार्य इति युगड्वावेयुगपच्छब्दोवर्तत इति द्वंद्वः कृतः अन्वाचयः समुच्चयोभिमतो यस्य चकारेण स्वरितं तेन वा विधानं यस्य कार्याः शब्दाः सप्रयोग निरपेक्षः शब्दानन्वाचष्ट इति तत्वादीनां युगपदुत्पत्तिः प्राप्नोति न चैकस्मादिति ननु व्यवहितेपि परशब्दः प्रवर्तते सत्यं अंतरा श्लक्ष्णमपेक्ष्यानंतर्यमारोप्य तत्र प रशब्द प्रयोगः निर्दिष्टग्रहणं त्वानंतर्यार्थमिति कुतो व्यवहितस्य प्रयोगः कथं तर्हि उक्तौ भिक्षा प्रकृतिर्बहवश्च प्रत्यय इति तत्र यत्र कृतेरेकत्वात्तस्याश्च परत्वाच्चानंतर्याद्दोषः

चकारेण स... रितं तेन वा... यो नानसमुच्चयो ...भित इत्यन्वयः

भा॰के॰प्र॰ ७० सिध्यंत्विति प्रतिषेधाद्विधिरनुमास्यते ततो विकल्पः सेत्स्यतीत्यर्थः विप्रतिषिद्धं त्विति एकविषययोर्विधिनिषेधयोर्विरोधादित्यर्थः न वा प्रसंगेति सामर्थ्याद्विधिप्रतिषे धयोः पर्यायो भविष्यतीत्यर्थः महतीसंज्ञेति तेन द्वावत्र संज्ञिनौ विकल्पप्रतिषेधावित्यर्थः यदि केवलः प्रतिषेधः संज्ञी स्यात् संज्ञाकरणमनर्थकं स्यात् विभाषाप्रदेशेषु ने त्येव ब्रूयात् तत्र समुदायस्येयं संज्ञेति विभाषाप्रदेशेषु विकल्पप्रतिषेधावुपतिष्ठेते अप्राप्तविभाषा सु च प्राप्त्यभावात् प्रतिषेधस्याव्यापाराद्विकल्प एवोपतिष्ठते एवम पीति यद्यपि विरुद्धयोरेका संज्ञा क्रियते तथापि प्रदेशेषु युगपद्विरोधाद्वावानां वो विधातुं न शक्येत इत्यर्थः सिध्यंत्विति उभयत्र विभाषा सुप्रतिषेधे न समीकृते विषये पश्चाद्विकु

सिध्यंतु प्रसज्य प्रतिषेधात् सिद्धमेतत् कथं प्रसज्यप्रतिषेधात् प्रसज्य विधाय किंचिन्नवेत्युच्यते तेनोभयं भविष्यति विप्रतिषिद्धं तु विप्रतिषिद्धं तु न वर्तते अत्र न ज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति न वा प्रसंगसामर्थ्यादन्यत्र प्रतिषेध विषयात् न वा एष दोषः किं कारणं प्रसंगसामर्थ्यात् स्यात् प्रसंगसामर्थ्याच्च विधि र्भविष्यति अन्यत्र प्रतिषेधविषयात् प्रतिषेधसामर्थ्याच्च प्रतिषेधो भविष्यति अन्यत्र विधिविषयात् तदेतत्कसिद्धं भवति या अप्राप्तविभाषा या हि प्राप्तेविभा षा कृतसामर्थ्य स्तत्र पूर्वेणैव विधिरिति कृत्वा प्रतिषेधस्यैव संप्रत्ययः स्यात् एतदपि सिद्धं कथं यदि भाषेतिमहती संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः कुत एतत् लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञायाः करण एतत् प्रयोजनं उभयोः संज्ञा यथा स्यात् नेति च वेति च तत्र यावद् अप्राप्तविभाषा तत्र प्रतिषेध्यं नास्ती ति कृत्वा वेत्यनेन विकल्पो भविष्यति या हि प्राप्तविभाषा तत्रोभयमुपस्थितं भवति नेति च वेति च तत्र नेत्यनेन प्रतिषिद्धे वेत्यनेन विकल्पो भविष्यति एवम पि विधिप्रतिषेधयोर्युगपद्वचनानुपपत्तिः विधिप्रतिषेधयोर्युगपद्वचनं नोपपद्यते शुशाव शुशुवतुः शुशुवुः शिश्वाय शिश्वियतुः शिश्वियुः किं का रणं भवतीति चेन्न प्रतिषेधः भवतीति चेत् प्रतिषेधो न प्राप्नोति नेति चेन्न विधिः नेति चेत् विधिर्न सिध्यति सिध्यंतु पूर्वस्योत्तरेण बाधितत्वात् सिद्धमेतत्
कथं पूर्वविधिमुत्तरो विधिर्बाधते

त्यः प्रवर्तत इत्यर्थः यदि तु पूर्वं विकल्पः प्रवर्तते पश्चात् प्रतिषेधः तदा विकल्पप्रवृत्तिरनर्थिकैव स्यात् आनुपूर्वी च यासंज्ञा विभाषाश्रितो सेव प्रदेश वाक्येष्वाश्रीयते उभय
प्रा त्र विभाषार्था चेयं संज्ञा तेन विभाषायाम प्राप्त विभाषायां च संज्ञाकरणस्यानुपयोगात् तथा हि प्राप्तविभाषासु पक्षे निवृत्तिः क्रियते पक्षे प्रवृत्तिः स्थितैव अप्राप्तविभाषासु च पक्षे कार्यस्य प्रवृत्तिः क्रियते पक्षांतरे त्वप्रवृत्तिः स्थितैवेति नास्ति तत्र संज्ञाफलं विभाषा श्वेरित्यत्र तु यदि विधिमुखेन विभाषा श्रुतिः प्रवर्तते पि श्वेवसंप्रसारणं विभाषा स्या त् कित्वयजादित्वान्नित्यमेव स्यात् अथ प्रतिषेधमुखेन प्रवृत्तिस्तदापि कित्वे च विकल्प इति पित्सु न स्यात् संज्ञाकरणे तु पूर्वं प्रतिषेधे कित्सु प्रवृत्ते पश्चाद्विधिमुखेन स र्वत्र पक्षे संप्रसारणप्रवर्तनादिष्टसिध्यति यदा तु प्रातिलक्ष्यभेदेन विभाषा श्वेरित्यस्य व्यापारः क्वचिद्विधिमुखेन क्वचित् प्रतिषेधमुखेन तदा संज्ञाकरणमंतरे

अनाप्तइति अधिकारोयं त्रिसंशयादिति त्रिष्वर्थेषु संशयो यास्तत्रास्त्रिसंशयाः इहेद्वेवेति प्रकरणोपलक्षणार्थमेतदुपात्तं प्रथमचरमतयेत्यत्र तयब्ग्रहणे संशयः तत्र तयशब्दस्य प्रयोग
नं सर्वनामाव्ययसंज्ञायामिति आन्वर्थसंज्ञाविज्ञानाद्धि केवलस्य प्रयोगाभावात् तस्यैव सर्वनामत्वसंभवात् तयब्ग्रहणपरिभाषया यावतं तद्विधिस्तत्र यदि सर्वादिग्रहणेन त
यांतं विशेष्यते नेमशब्दः व्यभिचारात्तयप्प्रत्ययस्य संभवात् विशेष्यते तदा भयशब्दस्य जसि नित्यासंज्ञा विभाष्यतइति प्राप्तविभाषास्यात् अथ सर्वादीनीति निवृत्तं पूर्वविप्र
तिषेधश्च तदा प्राप्तविभाषा अप्राप्तविप्रतिषेधः तदेवमत्र विभाषा प्रत्ययोत्तरमिति आदेशपक्षे पूर्वविप्रतिषेधोवक्तव्यइति प्रयोगात् पक्षआश्रितः उभादुदात्तो नित्य
च तयस्येति नानुवर्तत इति प्रत्ययोत्तरमयङ्भवति नेत्यन्नाचेति प्रत्याहारे सति तत्करणमात्रशब्देन विशेषितइति ह्याम्नायसिद्धिनिमित्तमिति चनेनादधिमात्र

आचार्यः खल्वपि संज्ञामारभमाणो भूयिष्ठमन्यैरपि शब्दैरेतमर्थं संप्रत्याययति बहुलमन्यतरस्यामुभयथा वाएकेषामिति अप्राप्तेत्रिसंशयाः इतउत्तरं या विभाषा अनुक्रमि
ष्यामि अप्राप्ते ता द्रष्टव्याः त्रिसंशयास्तु भवंतिप्राप्ते प्राप्तेभयत्रवेति इहेद्वे विभाषा जसि प्राप्ते प्राप्तेउभयत्रवेति संदेहः कथं वा प्राप्ते कथं वा प्राप्तेकथं वा भयत्र उभयशब्दः
सर्वादिषु पठ्यते तयप्प्रत्ययस्यायजादेशः क्रियते तेनवा निलोपो प्राप्ते अन्यत्र वा प्राप्तेउभयत्रवेति अप्राप्ते अयच्प्रत्ययांतरं यदिमत्ययांतरं उभयीतीकारोनप्राप्नोतिमाभूदे
वं मात्रचइत्येवं सिद्ध्यति कथं मात्रज्ञेति नेदं प्रत्ययग्रहणं किं तर्हि प्रत्याहारग्रहणं कसेनिविष्टानां प्रत्याहारः मात्रशब्दात्प्रभृति आ अचेर्वेश्वकारात यदि प्रत्याहा
रग्रहणं कतितिष्ठति अत्रापि प्राप्नोति अत इति वर्तते एवमपि तेलमात्रा घृतमात्रा अत्रापि प्राप्नोति सहशस्याप्रसंगश्चस्यन भविष्यति न प्रत्याहारेण ग्रहणं ऊर्णो
विभाषा प्राप्ते प्राप्तेउभयत्रवेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र असंयोगाल्लिट् किदिति वा नित्ये प्राप्ते अन्यत्र वा प्राप्तेउभयत्रवेति अप्राप्ते अन्यद्धि
कित्वमन्यद्धित्वं एकं वेति क्ङिति तोयत्वं कङिति तो नास्ति संदेहः अथ हि नानास्ति संदेहः यदापि नानाएवमपि संदेहः ऊर्णोतु रिसार्वधातुकमपिदिति नित्ये प्राप्ते अन्य
त्रवा प्राप्तेउभयत्रवेति अप्राप्ते॥

प्रसंगः सहशस्यापीति प्रमाणे वर्तमानात्प्रमेयेयोमात्रज्विहितः स प्रत्याहारेण गृह्यत इत्यर्थः ऊर्णोतेर्विभाषेति विभाषोर्णोरिति सूत्रं यस्य संयोगाल्लिट् किदित्यत्रानुवर्तते ऊर्णु
श्चासंयोगात् एवेत्यसंयोगग्रहणादाक्षभेदेनोर्णोः परस्येडादेर्निर्त्यं कित्वं प्राप्ते विकल्प्यते ततः प्राप्तविभाषा इडुपजीवनार्थं तु स्वभावतः सूत्रं पठितं अथवत्स्वं ना
नुवर्तते परविप्रतिषेधश्च ततोऽप्राप्तविभाषा अथ पूर्वविप्रतिषेधस्तदोभयत्रेति संशयः अन्यद्धीति यत्पदे शात्तिदेशो यमिति किं तिङिः सत्यर्थभेदः ङकं चेदिति कार्या
तिदेशपक्षेतु गुणनिषेधस्य कार्यस्य कृत्वादेकत्वमनयोरित्यर्थः ऊर्णोतीति लङ्उत्तमैकवचनं सार्वधातुकमपि दिद्भवत्यदि विभाषोर्णोरित्यत्राक्षभेदेन संबध्यते ततः

भा॰के॰प्र॰

७१

नापिब्रूमइति एकस्याः प्रकृतेः सर्वैभवंत्विति न ब्रूमः किं तर्हि प्रत्ययांतरेण प्रकृत्यंतरस्याक्षेपात्कर्तव्यमिति प्रयुयुक्षितकरणीयादीनामपि प्रयोगः प्राप्नोति अर्थगत्यर्थइति तव्य
तव्यानीयरइत्यस्माद्वाक्याद्वाक्यांतराण्युपप्लवंते प्रातिपदिकानि धातोस्तव्यङ्यतिभावकर्मणोरित्यादीनि तत्र कर्तव्यशब्देन तस्यार्थस्य प्रतिपादितत्वात्करणीयशब्दोनप्र
युज्यते आचार्येति आचार्यस्य देशस्य च पुनः पुनः संकीर्तनमाचार्यदेशशीलनं तत्र तस्य शब्दस्य। तद्विषयत्वमेवस्यात् सर्वप्रयोक्तृत्वप्रसंगे गालवस्यैवतत्प्रयोक्तृत्वंइ
ति नियमार्थं स्यात् यस्यपुनरिति अनादित्वाच्छब्दव्यवहारस्य नित्यत्वपक्षे नास्ति प्रयोक्तृनियमः केवलं गालवः स्मर्तृत्वेनानिर्दिष्टोस्य शास्त्रस्य प्रामाण्यं प्रतिपादयितुं

नापिब्रूमः प्रत्ययमालाप्राप्नोतीति किं तर्हि कर्तव्यमिति प्रयोक्तव्ययुगपद्द्वितीयस्य तृतीयस्य च प्रयोगः प्राप्नोतीति नैषदोषः अर्थगत्यर्थः शब्दप्रयोगः अर्थं संप्रत्या
ययिष्यामीति शब्दः प्रयुज्यते तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य च तृतीयस्य च प्रयोगेण न भवितव्यं उक्तार्थानामप्रयोगइति आचार्यदेशशीलनेन च तद्विषयतं
आचार्यशीलनेन देशशीलनेन च यदुच्यते तस्य तद्विषयता प्राप्नोति इकोह्रस्वोऽङ्यो गालवस्य प्राचामवृद्धात्फिन्बहुलमिति गालवा एव हि ह्रस्वान्प्रयुंजीरन् प्रा
क्षुचैव हि फिन्स्यात् तद्यथा जमदग्निर्वा एतत्पंचममवदानमवाद्यत् तस्माज्जामदग्न्यः पंचावत्तं जुहोति यस्य पुनर्नित्याः शब्दाः गालवग्रहणं तस्य पूजार्थं
देशग्रहणं च कीर्त्यर्थं ननु च यस्यापि कार्याः शब्दास्तस्यापि गालवग्रहणं पूजार्थं स्यात् देशग्रहणं च कीर्त्यर्थं तत्कीर्तने च द्विधाः प्रतिपत्तिः तत्कीर्तने च द्वैधं शब्दा
नां अप्रतिपत्तिः इहापि पुनराचार्यग्रहणेषु देशग्रहणेषु च द्वैधं शब्दानां प्रतिपत्तिः स्यादिति तच्च न सिध्यति अशिष्यो वा विदितत्वात् अशिष्यो वा पुनरयं योगः
किं कारणं विदितत्वात् यदनेन योगेन प्रार्थ्यते तस्यार्थस्य विदितत्वात् यपि खल्वतां संज्ञां नारभंते तेपि विभाषेत्युक्ते अनित्यत्वमवगच्छंति याज्ञिकाः खल्वपि संज्ञा
मनारभमाणा क्रियायेत्युक्ते नित्यत्वमवगच्छंति तद्यथा मेध्यः पशुर्विभाषितां मेध्यो नड्वान्विभाषित इति आलब्धव्यो नालब्धव्य इति गम्यते॥ श्री ॥

इति पूजार्थमाचार्यग्रहणं शास्त्रस्य धनाद्यर्थप्रतिपादकत्वात् जायते कीर्त्यर्थमिति कीर्तौ सत्यां तेषां स्वर्गव्यवस्थानं चिरं भवति यथेंद्रद्युम्नादीनां ननु च यस्यापीति कार्य
पक्षेयमर्थः स्यात् यस्माद्गालवेन ह्रस्वत्वं प्रयुक्तं तस्मान्मया त्वक्तव्यमिति ततश्च ह्रस्वत्वस्य विकल्पो न स्यात् नित्यपक्षे तु गालवो ह्रस्वत्वस्य वक्ता अन्यो दीर्घत्वस्येति सत्यंतरानु
संधानद्वारेण विकल्पः सिध्यतीति नित्यपक्षएव युक्तः अशिष्यो वेति वाशब्दो विकल्पे तेनाकृतिपक्षे उभयत्र विभाषार्थं सूत्रं कर्तव्यं व्यक्तिपक्षे तु लक्ष्यभेदेन लक्ष
णभेदात् क्वचित् किंचिल्लक्षणं विधिमुखेन प्रवर्तते क्वचित्प्रतिषेधमुखेन प्रवर्तत इतीष्टसिध्यासूत्रं न कर्तव्यमित्यर्थः॥ श्री ॥ श्री ॥ श्री॥

पि पूजा शक्यते व्याख्यातुं यस्माद्गालवेन ह्रस्वत्वं प्रयुक्तं तस्मात्त्वमपि प्रयुंक्ष्वेति खलु स एषोर्थवादः स्यादित्यर्थः इदानीं कार्यपक्षे दूषणमाह तत्कीर्तन इति कार्यपक्षे प्रसर्वः ३

७१

तृन्नादीनामिति आक्रोशइत्यत्र यद्यङ्कौ नानुवर्तेते तदायं संशयः एकहलादाविति पूरयितव्यस्यास्ति संज्ञायाउदपानमिति चादिभिरिति प्रतिषेधस्याप्राप्तविभाषा स्यात्तेनवि
धेस्तु प्राप्तविभाषैव यङीतिवेति यङ्लुकि रूते यङः अजादिपरश्च भवति ञेगिल इति अत्र चपचाद्यच्चियञेचि चेति यङ्लुङ् प्राप्तेचेति सरूतानुवृत्त्या प्राप्तविभाषा व्यवति

तृन्नादीनां विभाषा प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र आक्रोशे चेति वा नित्ये प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते आक्रोश इति
निवृत्तं एकहलादौ पूरयितव्येऽन्यतरस्यां प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र उदकस्योदः संज्ञायामिति वा नित्ये प्राप्ते अन्यत्र वा प्राप्ते उभ
यत्र वेति अप्राप्ते संज्ञायामिति निवृत्तं [illegible]आदेरञ्ञ पदांतस्यान्यतरस्यां प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र इञीति वा नित्ये प्राप्तेः
न्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते इञीति निवृत्तं सपूर्वायाः प्रथमाया विभाषा प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र चादिभिर्योग
इति नित्ये प्राप्ते न्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते चादिभिर्योग इति निवृत्तं न्नोयङ्यचि विभाषा प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभ
यत्र यङीति वा नित्ये प्राप्ते न्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते यङीति निवृत्तं प्राप्ते च इत उत्तरं या विभाषा अनुक्रमिष्यामः प्राप्ते ता द्रष्टव्याः त्रिसंशयास्तु भवंति प्रा
ते प्राप्ते उभयत्र वेति विभाषा विप्रलापे प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र व्यक्तवाचामिति वा नित्ये प्राप्ते न्यत्र वा प्राप्ते उभयत्र वेति प्रा
प्ते व्यक्तवाचामिति हि वर्तते विभाषोपपदेन प्रतीयमाने प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र स्वरितञित इति वा नित्ये प्राप्ते न्य
त्र वा प्राप्ते उभयत्र वेति प्राप्ते स्वरितञित इति हि वर्तते तिरोंतर्धौ विभाषा कृञि प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र अंतर्धा
विति नित्ये प्राप्ते न्यत्र वा प्राप्ते उभयत्र वेति प्राप्ते अंतर्धाविति हि वर्तते अधिरीश्वरे विभाषा कृञि प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्रा
प्ते कथं वोभयत्र ईश्वर इति वा नित्ये प्राप्ते न्यत्र वा प्राप्ते उभयत्र वेति प्राप्ते अधिरीश्वर इति हि वर्तते ॥ श्री ॥ श्री ॥ श्री

हते अन्यत्र वेति विप्रवदंति शकुनय इत्यत्र पूर्वविप्रतिषेधश्च यदीति भावः विभाषोपपदेनेति कर्त्रभिप्राये क्रियाफले विषये आत्मनेपदं भवति इत्येवं प्राप्तविभा
षा व्यवतिष्ठते अप्यनु तदर्थद्योतनायात्मनेपदं क्रियते तदोपपदेनैव द्योतितत्वादप्राप्तविभाषैव स्यात् ॥ ॥ श्री ॥ श्री ॥ श्री

विभाषोपयमन इति यदा गंधनागसुपयमनं तव गृह्यते तदा प्राप्ते पूर्वविप्रतिषेधे त्वप्राप्ते परविप्रतिषेधे उभयत्रेति संशयः जातिरिति चर्मादिमयास्तदा मृगादयो ग्राह्याः
निवृत्तमिति तन्निवृत्तौ च गौणत्वाच्चर्मादिमयानामग्रहणं प्रत्ययांतादिति वेदिति कथं पुनः प्रत्ययांताः शब्दा रूपांतरयुक्ता उपादिव्यपदेशं लभंते उच्यते सनाद्यंता
धातव इत्यस्य यदायमर्थो व्याख्यायते धातवः सनाद्यवयवा भवंति धातुनामंतावयवास्सनादयो भवंतीति यथा समासांतास्टजादयः तदा पूर्वोक्तचोद्याभावः प्रत्ययांतं इ

विभाषोपयमने प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र वृत्तिसर्गतायनेषु क्रम इति वा नित्ये प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति अप्रा
प्ते गंधन इति निवृत्तं अनुपसर्गाद्वा प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र वृत्तिसर्गतायनेषु क्रम इति वा नित्ये प्राप्ते अन्यत्र वा प्राप्ते
उभयत्र वेति अप्राप्ते वृत्त्यादिष्विति निवृत्तं विभाषा वृक्षमृगादीनां प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र जातिरप्राणिनामिति वा
नित्ये प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते जातिरप्राणिनामिति निवृत्तं उषविदजागृभ्योऽन्यतरस्यां प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्रा
प्ते कथं वोभयत्र प्रत्ययांतादिति वा नित्ये प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते प्रत्ययांता धात्वंतराणि दीपादीनां विभाषा प्राप्तेः प्राप्ते उभयत्र वेति संदेहः क
थं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र भावकर्मणोरिति वा नित्ये प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते कर्तरीति हि वर्तते एवमपि संदेहः व्याप्येवाकर्तरि क
र्मकर्तरि वेति नास्ति संदेहः सकर्मकस्य कर्ता कर्मवद्भवति अकर्मकाश्च दीपादयः अकर्मका अपि वेत्सोपसर्गाः सकर्मका भवंति कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्म
स्थक्रियाणां च भवंति कर्तृस्थभावकाश्च दीपादयः विभाषाग्नेः प्रथमपूर्वेषु प्राप्तेः प्राप्ते उभयत्र वेति संदेहः कथं वा प्राप्ते कथं वा प्राप्ते कथं वोभयत्र आभीक्ष्ण्य इति
वा नित्ये प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते आभीक्ष्ण्य इति निवृत्तं ॥ ॥ श्री ॥ [illegible] ॥

गंधन इति वा

तिसनाद्यंता धातव इत्ययं योगः संज्ञासंज्ञिसंबंधार्थ इति भावः भावकर्मणोरिति चिण्भावकर्मणोरित्यत्र सूत्रे यदि दीपजने त्येतत्सूत्रं अनुवर्त्य वाक्यभेदेन संबंधः
क्रियते पृथक्पाठसामर्थ्यात्तदा प्राप्तविभाषा अथ नानुवर्तते परविप्रतिषेधश्च तदा प्राप्तविभाषा पूर्वविप्रतिषेधे तूभयत्रेति संशयः अकर्मकाश्चेति यद्यपि बुधिः स
मा·कें·प्र· पेतव्यसेय इति लोपवचनं तु सर्वादेशार्थं स्यात् होतापोता तावितिरेफस्य संयोगांतलोपे कृते तस्यासिद्धत्वान्न लोपो न स्यात् एकादेशस्येति पूर्वपरयोर्निलसमुदायस्य स्थानि

८८

त्वेन चोदितत्वात्तस्य च ऋवर्णरूपत्वाभावादिति भावः अवयवग्रहणादिति पूर्वपरयो रित्वेन नोद्भूतावयवभेदः समुदायो निर्दिश्यते अवयवावेव चापेक्षितपरस्य रेसमुदाय इति भवत्ययमृवर्णस्य स्थाने इत्यर्थः रांतप्रतिषेध इति आनङि विधीयमाने आकारस्याणो भावादित्यर्थः तस्मादवयवग्रहणादित्यस्यानि व्यापकत्वात् घत्रसाद्देहिवर्ण

८५

स्याहे विधीयते तत्रैवेदमुपतिष्ठते इत्येकादेशस्योपसंख्यानं कर्तव्यं नैव यदि पुनरिति उरितिऋवर्णग्रहणादृवर्णग्रहणं च सर्वत्र तदेतावधिं प्रयोजयतीतिन्यायात्

रलोपे पेतव्यसेयः लोपः आनङ् होतापोतारौ आनङ् अनङ् फता हर्ताअनङ् रीङ् मात्रीयति रीङ् रिङ् क्रियते रिङ् उदात्तादिषु चाकिंरपरत्वस्य प्रतिषेधो वक्तव्यः कृतिः हृतिः हृतं हृतं प्रकृतं प्रहृतं नृः पाहि तस्मादण्ग्रहणं कर्तव्यं एकादेशस्योपसंख्यानं एकादेशस्योपसंख्यानं कर्तव्यं खट्वर्श्यः मालर्श्यः किं पुनः कारणं न सिध्यति उः स्थाने प्रसज्यमान एवरपरो भवतीत्युच्यते न चायमुः स्थाने णः शिष्यते किं तर्हि उ स्थानेऽन्यस्य च अवयवग्रहणात्सिद्धं यदत्र ऋवर्णं तदाश्रयं रपरत्वं भ विष्यति तद्यथा माषान्नभोक्तव्या इत्युक्ते मिश्रा अपि न भुज्यन्ते अवयवग्रहणात्सिद्धमिति चेदादेशे रांतप्रतिषेधः अवयवग्रहणात्सिद्धमिति चेदादेशे रांतस्य प्रतिषेधो वक्तव्यः होतापोतारौ यथेव उ स्थान्यस्य स्थाने णू रपरो न चाति एवं य उः स्थाने एचान एच सोपि रपरः स्यात् यदि पुनः ऋवर्णान्तस्य स्था निनो रपरत्वमुच्यते खट्वर्श्यः मालर्श्यः नैवं शक्यं इह न प्रसज्येत कर्ता हर्ता किरति गिरति ऋवर्णान्तस्येत्युच्यते न चैतदृवर्णान्तं ननु च एतदपि व्यपदेशि वद्भावेन ऋवर्णान्तं अर्थवता व्यपदेशिवद्भावः नैवैषोऽर्थवान् तस्मान्नैवं शक्यं न चेदेवमुपसंख्यानं कर्तव्यं ऋचरपरत्वस्य प्रतिषेधो वक्तव्यः मातुः पितुरिति उभयं

ऋवर्णान्तग्रहणं खट्वर्श्य इत्यत्र च समुदाय ऋवर्णान्तो न भवतीति सिद्धं रपरत्वं कर्तेति अंगस्येति षष्ठी अंत्यमलमुपसंहरतेति ऋवर्णस्य गुणेन भाव्यं न च ऋव र्णान्तं ऋवर्णान्तो भवतीति दोषः न चेह तदन्तविधिरस्ति उरण्णीति भूतानुवादात् न च प्रदेशेषु तदन्तस्य कार्यमन्यस्येवानुसंहारेण स्थानित्वप्रतिपादनादिति भावः अर्थवतेतिय येवेयायेत्यत्रैकान्तं अर्थस्याहत्यागोपादानाभ्यां वर्णरूपता धातुरूपता च व्यवस्थाप्यते इह चेति उपसंख्यानस्यातिव्याप्तिरित्यर्थः

१

कल्प्यपदेति चकल्पशब्दादित्वश्चौचरेफः प्रत्ययसमुदायस्य कल्पिशब्दस्य भक्तत्वादवयवानतु कल्पशब्दस्य ततश्च कल्पशब्दपरतः पदसंज्ञाविधीय
मानात्वदादीत्यधिकाराद्रुफांतस्य भवतीति विसर्जनीयप्रसंगः पदशब्देन परतः नेनार्थ इति प्रत्यय उच्यते तेन प्रत्ययसमुदायभक्तोरेफः कल्पशब्दपर
तोव्यवस्थितः नकल्यावयव इति तयोः पौर्वापर्यमस्त्येवेति अवयवस्यात्मनः पदांततां विहंतुं नोत्सहते इत्यर्थः केचित्तु कल्पपदसंघातभक्तं इतिपाठः
तत्रायमर्थः कल्पशब्दस्य संबंधियत्पदं नार्कल्पिबिगिति तस्यपदस्यावयवः प्रत्ययसंघातः कल्पिशब्दस्त्विह क इत्यर्थः धिनुत इति एकवचनेःमस्य
यकारलोपे आद्गुणेन विकरणस्य वा गुणे पररूपेण धिनोतीति सिध्यतीति द्विवचनमुदाहृतं आर्धधातुकोपदेश इति संनियोगेन चाकारस्यवि

परादावपि विसर्जनीयस्य प्रतिषेधो वक्तव्यः नार्कल्प्यिर्न्यचनर्थं कल्पिपदसंघातभक्तोयोनोत्सहते अवयवस्यपदांततां विहंतु इति विसर्जनीयः प्रा
प्नोति यक्त्वस्य यक्त्वस्य न सिध्यतीर्यते स्वयमेव यथे तस्य यमेव भनः कर्तृयकीर्येस्म गन प्राप्नोति न चदोषः उपदेश इति वर्तते अथवापु
नरस्तु परादिः परादावकारलोपे आत्वयुक्प्रतिषेधश्च लघूपधाह्रस्वत्वमिटो व्यवस्थाभ्यामलोपोऽन्यत्ताद्स्वरादीर्घत्वं च यदि परादिः अकार
लोपः प्रतिषेध्यः कर्ता हर्ता अतोलोपः आर्धधातुक इत्यकोरलोपः प्राप्नोति न चदोषः उपदेश इति वर्तते यद्युपदेश इति वर्तते धिनुतः उत्वं न प्रा
प्नोति नोपदेशग्रहणेन प्रकृतिरभिसंबध्यते किं तर्हि आर्धधातुकमभिसंबध्यते आर्धधातुकोपदेशे यदकारांत मिति अकारलोपं आत्व
आत्वं च प्रतिषेध्यं चकार अहारास्त आत्वेन इत्यात्वं प्राप्नोति नैषदोषः निर्दिश्यमानस्यादेशा भवंतीत्येवं न भविष्यति यस्मार्हि निर्दिश्य
ते तस्य युक्कस्मान्न भवति रेफेण व्यवहितत्वात् आत्वं युक्प्रतिषेधः युक्प्रतिषेध्यः काम्यति दाम्यति आतो युगिति युक्प्राप्नोति च
अपदो ह्रस्वत्वं च लघूपधाह्रस्वत्वं च न सिध्यति अचीकरत अजीहरत् णाच लघूपधायाः ह्रस्व इति ह्रस्वत्वं न प्राप्नोति ॥ श्री ॥

धानादर्धधातुकप्रतिपत्तिकाले कागतप्रतिपत्त्या सिद्धो लोपः निर्दिश्यमानस्येति नत्वादेः परस्येति रफस्यो न नाथेनैषदोषः णलइत्येन नयत्र
आयितं प्रयोगविषयकारमात्रं तस्याकारांतादंगादुत्तरस्यादेशः प्रवर्तते संग्रहस्य न अनुमीयमानत्वादादेशाभावः प्रत्याख्यप्रत्यायकालेऽविवक्षया
षष्ठीनिर्दिष्टस्यादेशाइत्युच्यते रकेणातयद्रूपं षष्ठीनिर्दिष्टं अकारमात्रं तद्व्यवहितमित्यर्थः यदि तु प्रत्ययस्येत्युच्यते लिड् इति वा तदाव्यवधानान्ना

ह्वोरिति अवयवोवनाश्रोपसितपरस्यरेस्थानिनो अतएवं मदशं स्थानिनिर्देशो नेदंन्त्वर्थकृतं अन्यतरत इति तत्र यो ता दाद्यादिस्वाभाविः तद्यथेति एकःपुरुष
भाष्यानपिपद्या व्यपदिश्यंते तथेहापि पूर्वपरयोर्नकार्याणि कृत्वेनादेशस्य व्यपदेशः प्रकडादेस्तु समुदायस्यादेशत्वेनाण्इतिस्वत्वाभावः अप्रत्ययेति
असिव्ययंसमुदायः प्रत्ययो न तकार इति तदादेशोऽप्यप्रत्यय इति भावः प्रत्ययेति प्रत्ययावयवत्वात्का गतिप्रत्ययः अतस्तदादेशोऽपि प्रत्यय इति भावः लुप्य

कथं ह्रयोह्वयोः षष्ठीनिर्दिष्टयोः प्रसंगेन वातलुभंतः स्यान्वयतरेनाव्यपदेशे तद्यथा देवदत्तस्य पुत्रोदेवदत्तायां पुत्र इति कथं नातु पितुरिति अत्रस्वत्रा
परत्वंकालपसिद्धिः रात्सस्येति सकारस्य लोपः रफस्य विसर्जनीयो नेवं न कोटुमातुः करोतिपितुः करोतीति अप्रत्ययविसर्जनीयस्येति षत्वं प्राप्नो
ति अप्रत्ययविसर्जनीयस्येत्युच्यते प्रत्ययविसर्जनीयस्यायं लुप्यते अप्रत्ययोऽगत्स्येति एवं तर्हि लुप्यत्र नहणं ज्ञापकं एकादेशनिमित्तात्षत्वप्र
तिषेधस्य यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति तज्ज्ञापयत्याचार्यो नैकादेशनिमित्तात्षत्वं न वर्ततीति किं पुनरयं पूर्वांतः आहोस्वित्परादिः आहोस्विद
भक्तः कथं चायं पूर्वांतः स्यात् कथं परादिः कथं दीनभक्तः यदा न दृति वर्तते तदा पूर्वांतः अथादिरिति वर्तते तदा परादिः अथोन दृतिर्न तदा नो
भक्तः कस्यात्र विशेषः अभक्ते दीर्घलत्वयणभ्यस्व हलादि णपविसर्जनीयप्रतिषेधः प्रत्ययाव्यवस्थानच यद्यनभक्तः दीर्घत्वं न प्राप्नोति गीः पुः रफवकारांत
स्यधातोरिति दीर्घत्वं न प्राप्नोति किं पुनः कारणं रेफवकाराभ्यां धातुर्विशेष्यते न पुनः पदं विशेष्यते रेफवकारांतस्य पदस्येति नैवं शक्यं इहापि प्रसज्ये
त अग्निर्वायुरिति एवं तर्हि रेफवकाराभ्यां पदं विशेषयिष्यामः धातुना इकं रेफवकारांतस्य पदस्य का धातोरिति एवमपि प्रियं गनानणि कुञ्डमस्यांप्रियगाम
णिः प्रियमस्तानिः अत्रापि प्राप्नोति तस्माद्धातुरेव विशेष्यं तथा तात्र विशेष्यमाणे इह न प्राप्नोति गीः पुः दीर्घ ॥ ॥ ॥ ॥ ॥

लइति सकारसन्निधिकाले कारणेन वलव्यात्रत्ययसंज्ञासमुदायसंनिवेशानीत्वात्स्यादिति कृतत्सदादेशस्तोनुच्यते उत्वं च अकृतेः वशिष्टः सकार एव प्रत्ययसंज्ञः
सचलुप्त इति भावः एकादेशनिमित्तादिति एकादेशशास्त्रं निमित्तं यस्य तस्मात्परस्येत्यर्थः यदंत इति यद्यपि परपद इत्यत्रान्यपदार्थस्य प्राधान्येन तथापि रफ
स्य विधेयतया प्राधान्यात्तस्यैवांतत्वविशेषणमिति भावः यद्यपि समस्यमानपदे वाणपरो विधीयते तथाप्यानदि वक्ष्यमाणरेफनार आरदुत्त्वमविधानात्तत्पर्यवसा

इतरथेति यदि षष्ठीमात्रमनुसंह्रियेतेत्यर्थः तत्र लविनेतित्त चकारात्पूर्वमिट् प्राप्नोतीति दोषः दापलतीति पुगागमस्य स्यात् ततो यदुक्तमर्थवतो ह्यागम इति तन्न युज्यते यदि पुनरिति षष्ठीस्थाने योगे त्वनेनास्यैकवाक्यता अन्तु प्रदेशे करणे ङिच्चेत्यादेः संबंधार्थं तन्नाप्यमर्थो भवति प्रान्त्यायाम् षष्ठ्यास्थाने किमाचस्थाने योगेन तिन तु स्थाने विज्ञातस्य पश्चादनुसंहारः प्रतिपत्तिगौरवप्रसंगादिति भावः अनिष्टमिति आद्यंतौ टकितौ मिदचोऽन्त्यात्पर इत्येतावत् स्थाने योगत्वमेव बाध्यते तुल्यजाती यत्वात् संबंधस्य संबंधांतरेणबाधोपपत्त्या षष्ठ्यास्तु यद्रूपं तत्स्थानेयोगत्वं व्यवस्थितमिति पूर्ववद्दोषप्रसंग इत्यर्थः अनुसंहारः पुनरनुसंहारांतरेणादेः परस्यानेका

स्प इतरथा ह्यनिष्टप्रसंगः इतरथा ह्यनिष्टं प्रसज्येत टिकिन्मितो येऽत्वः स्युः यदि पुनरयं योगशेषो विज्ञायेत योगशेषे च किं अनिष्टं प्रसज्येत टित्किन्मि तोऽन्त्यस्य स्युः तस्मात्तु तु उच्यते अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः इतरथा ह्यनिष्टप्रसंग इति ङिच्च नात ङः स्वस्थाने कस्मान्न भवति ङिच्चा लोऽन्त्यस्येति प्राप्नोति तातङि ङित्करणस्य सावकाशत्वाद्धि प्रतिषेधात्सर्वादेशः तातङि ङित्करणं सावकाशं कोऽवकाशः गुणवृद्धिप्रतिषेधार्थो ङ कारः तातङि ङित्करणस्य सावकाशत्वाद्धि प्रतिषेधात्सर्वादेशो भविष्यति प्रयोजनं नाम तदुक्तं व्यवस्थितं यागतः स्यात् यदि चायं नियोगतः स र्वादेशः स्यात्तत एव प्रयोजनं स्यात् कृतानुवत्तत ङित्करणादयं सर्वादेशो भविष्यति न पुनरन्त्यस्य स्यादिति एवं तर्हि तदेव ज्ञापयति नात ङः स्वस्थाने भवतीति यदेतं ङितं करोति इतरथा हि लोट एरुप्रकरणे एवं ब्रूयात् तिह्योस्तातङ्ङाशिष्यन्यतरस्यामिति आदेः परस्य अलोऽन्त्यस्या नष्प १५

स्य देः परस्यानेकाल्शित्सर्वस्येत्यपवादो विप्रतिषेधात्सर्वादेशः अलोऽन्त्यस्येत्युत्सर्गः तस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवादो अपवादविप्रतिषेधा त्सर्वादेशो भविष्यति ॥ ॥

त्वशित्सर्वस्येत्यनेन बाध्यते ङिच्च विप्रतिषेधादिति नन्वयमपवादः अनेकाल्शिदित्युत्सर्गः उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः नैतदस्ति ङित्त्वस्यान्या र्थत्वसंभवे सति दौर्बल्यात् संदिग्धो यस्मान्नो यं योग इत्यपवादत्वमेवात्र विषयेऽस्य नास्ति प्रजोजनमिति सति सर्वादेशत्वे ङित्करणं गुणवृद्धिप्रतिषेधार्थं स्या त्तदेव तु सर्वादेशत्वमलभ्यं ङिद्वादेः सम्बन्धप्रसंगादिति भावः ङित्करणादिति गुणवृद्धिप्रतिषेधार्थादिति भावः एवं तर्हीति अंतरेणापि ङित्वमे तस्य प्रकरणे तातिविधीयमानेऽत्यादेशत्वं सिद्धमिति तिङ नादेव गुणवृद्धिप्रतिषेधार्थं ङित्त्वमिति ज्ञायते ॥ ॥ श्री ॥ श्री ॥

भा॰कै॰प्र॰ आस्तरितेति नित्यत्वाद्गुणे रपरत्वे च कृते ने इति रिक् नीतिप्रतिषेधात्प्रयत्नलक्षणे तो प्रव्यवस्थान प्रवृत्तो धारकात्पूर्व इति अनिष्टव्यवस्थाप्राप्नोति गीरिति अंतरंगत्वा ८५ द्विर्लोपे कृते इत्वे रपरत्वे सुपायमादौ रेफ इति कस्मान्नायं गत्वं स्यादिति लोपे कृते दीर्घत्वं न स्यादिति पर्यं तपक्षो व्यस्थितः अलोऽन्त्यस्य किमिदमिति षष्ठी प्रथ मेयानिर्दिष्टस्य सान्यात्पश्नः यदि पुनरिति प्रथमा बहुवचनं अल इति यदि व्याख्यायेतेत्यर्थः अस्मिन्पक्षे रहे जसो लोपश्चेति लोपः सर्वादेशः प्राप्नोतीति वि

इटो व्यवस्था इटश्च व्यवस्थानकल्पं तेनास्तरितानिपारिता इत्यपिपरादिः केपि तत्र व्यवस्थानप्रकल्पं ते इटो व्यवस्था अभ्यासलोपः अभ्यासलोपश्च वक्त व्यः चक्रेत्वचकृषे अभ्यासस्येति हलादिशेषो न प्राप्नोति अभ्यासलोप अभ्यस्तस्वर अभ्यस्तस्वरश्च न सिध्यति माहिस्म तेपिपरः माहिस्म तेबिभरः अभ्य स्तानामादिः इदत्तो भवतीत्यजादेः कस्मार्धधातुक इत्येषस्वरो न प्राप्नोति अभ्यस्तस्वर तादिस्वर तादिस्वरश्च न सिध्यति प्रकर्तो प्रकर्तुं तादौ च निति कृ त्यतौ विन्येव स्वरो न प्राप्नोति नैष दोषः उक्तमेतत् इदुपदेशो वा ताद्यर्थमिति दुर्ध्वमिति दीर्घत्वं च न सिध्यति गीः पूः रेफवकारान्तस्य धातोरिति दीर्घत्वं न प्राप्नोति उरण्रपरः अलोऽन्त्यस्य किमिदमल्ग्रहणमंत्यविशेषणमाहोस्विदादेशविशेषणं किं चातः यद्यंत्यविशेषणं आदेशः अविशेषितो भवति

स्प तत्र को दोषः अनेकाल्त्यादेशो त्वंतस्य प्रसज्येत यदि पुनरल् स्यादेशस्तु च्यते तत्रायमप्यर्थः अनेकाल्शित्सर्वस्येत्येतन्न वक्तव्यं भवति इदं नियमार्थं भ विष्यति अलेवान्त्यस्य भवति नान्यदिति एवमप्यंत्यः अविशेषितो भवति तत्र को दोषः वाक्यस्यापि पदस्याप्यंत्यस्य प्रसज्येत तथा दिवन्न पष्ठेषो प्राप्नोति नन्वकि येतेति अंत्यविशेषणेपि सति तन्न करिष्यते कृ यथा ङिच्च अलोऽन्त्यस्य स्यात् नियमार्थं भविष्यति ङिदेवानेकालन्त्यस्य भवति नान्यदिति किमर्थं पुनरिद मुच्यते अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः अलोऽन्त्यस्येत्युच्यते स्थाने विज्ञातस्यानुसंहारः क्रियतां स्थाने प्रसक्तस्य ॥ ॥

रजीकरोतीति इदं नियमार्थमिति अंत्यस्यादेशात् यंतीत्यलोप्याक्षेपादल्ग्रहणमनल्व्यावृत्त्यर्थमिति भावः वाक्यस्यापीति दोषपरत्वादेवमुक्तं न तु वाक्यं प २ ष्ठीनिर्दिष्टमस्ति पदस्य तु पंचानदुह्यानित्यमानडुच्छब्दस्यांत्यस्य सर्वस्य पदस्य दत्वं प्राप्नोति यदि स्वल्पपीति अवश्यकर्तव्यो सो योगोऽपवादविप्रतिषेधार्थं अथला घवमा चेज्ञा दरस्तत्राप्युच्यते अंत्यविशेषणेपीति स्थाने विज्ञातस्येति षष्ठीस्थाने योगे स्येत इति तेन यथा षष्ठीस्थाने योगेत्वेन विज्ञातासां त्यनलम

श्री: स्थानिवत् वत्करणमिति विनापि वतिना नदर्थलाभ: यथा ङित् किदिति भाव: ननु स्थान्यादेशत्वं कल्प्यमाने स्थानिरूप आदेश: अपि प्रवर्तते इति कल्पना अयुक्ता अस्तेर्भूरित्यादेशविधानवैयर्थ्यप्रसंगात् न त्वेवं न तु स्यप्रामाण्यादिकल्प: वास्तीति विकल्पाद्भावात् संज्ञाधिकार इति संज्ञाप्रस्तावस्यार्थ: न त्रको दोष इति आदेशे कार्यं सिध्यतीति देश: तत्रादेशे कार्यं संज्ञासंज्ञिसंबंधे पि सिध्यतीति प्रश्न: वधेरेवेति संज्ञा हि प्रदेशेषु संज्ञिप्रत्यायनार्था संज्ञिन प्रत्यानिवर्तते ननु स्वत: कार्यप्रतिपद्यत इति भाव: बहुगणवतुडति संख्येत्यन्वर्थताश्रयणा लौकिकार्थग्रहणाद्विनापि वतिना अतिदेशपक्षे उपन्यस्त: वत्करणात् इहातिदेश: स्थानिकार्याण्यादेशे क्रियते ननु स्थानिनि निवर्तते इत्यदोष: ङिकिदिति संज्ञा तु न भवति नक्कालेडिति प्रतिषेधात् नहि तक: किसंज्ञा विहिताया प्रतिषिध्येत किंकिनोर्लिङ्वत्यत्र तु संज्ञाप्रकरणाभावान्नइत्यतिदेश: स्थानिकार्यमित्यनेन तु कार्यातिदेशायमिति दर्शयति शास्त्रातिदेशापेक्षया कार्यातिदेशस्य प्राधान्यात् इतरेषां कार्यार्थत्वादिति भाव: आदेशग्रहणमिति स्थानिशब्दस्य संबंधिशब्दत्वादादेशो लभ्यत एव यथा पितृवदधीते इत्युक्ते पुत्र इति भाव:

श्री: स्थानिवदादेशोनल्विधौ वत्करणं किमर्थं स्थान्यादेशोनल्विधाविति उच्यमाने संज्ञाधिकारोयं तत्र स्थानी आदेशस्य संज्ञा स्यात् तत्र को दोष: आङो यमहन: आत्मनेपदं भवतीति वधेरेव स्यात् हन्तेर्न स्यात् वत्करणे पुन: क्रियमाणे न दोषो भवति स्थानिकार्यमादेशे अतिदिश्यते गुरुवद्गुरुपुत्र इति यथा अथादेशग्रहणं किमर्थं स्थानिवदनल्विधाविति उच्यमाने कद्दानीं स्थानिवत्स्यात् य: स्थाने भवति कश्च स्थाने भवति आदेश: इदं तर्हि प्रयोजनं आदेशमात्रं स्थानिवद्यथा स्यात् एकदेशविकृतस्योपसंख्यानं चोदयिष्यति तन्न वक्तव्यं भवति अथ विधिग्रहणं किमर्थं सर्वविभक्त्यन्त: समासो यथा विज्ञायेत

कद्दानीमिति द्विविध: आदेश: प्रत्यक्षश्चास्तेर्भूरित्यादिरानुमानिकश्च रारित्यादि: अत्र हीकारेणकारांत: स्थान्यनुमीयते उकारेणोकारांतश्चादेश: ततस्ते स्तुरिति संपद्यते तत्र प्रत्यक्षस्यैव ग्रहणं स्यान्नानुमानिकस्येति भाव: आदेशमात्रमिति प्रत्यक्षमनुमितं वेत्यर्थ: एकदेशस्यात्र प्रत्यक्षमुदेश: ततस्ते स्तुरिति संपद्यते ... [illegible] इतिपदत्वसिद्धि: सर्वकारस्यादेशत्वं इकारस्य वा स्थानित्वं ... [illegible] बहुतरप्रतिपादनपरमेतत् नत्वत्र सर्वविभक्तय: संभवति तत्र संबंधमात्रे षष्ठीविभक्त्यंत इति सर्वविभक्त्यंतो वयवो वास्यास्तीति मत्वर्थीयो कार: ... [illegible]
पादाने अनेकविभक्त्यर्थी तदभावात् फलत: सर्वविभक्त्यंतता संभवति

भा॰ कै॰ प्र॰ ८७

अनेकाल् शित्करणादेवेति सतिशकारे: नेकाल्त्वादिति भाव: अनेकाल्त्वसंपादनेन चरितार्थ: शकार इतीत्संज्ञकं लुप्यते अष्टाभ्य औशिति आदे: परस्येत्यादे: शास इति भाव: अंत्यस्यायमिति ननु सर्वनाम्नो नपुंसकादिति च पंचमीनिर्देशादादे: परस्येत्यादेशे प्राप्तं तत्किमुच्यते त्यस्यायं भवतीति एवं तर्हि सर्वनाम्न इति षष्ठीमन्य

आदे: परस्येत्यस्यावकाश: ह्रांतरुपसर्गेभ्योप ईत् द्वीपं अंतरीपं समीपं अनेकाल्शित्सर्वस्येत्यस्यावकाश: अस्तेर्भू: भविता भवितुं इहोभयं प्राप्नोति अतो भिस ऐस् अनेकाल्शित्सर्वस्येत्येतद्भवति विप्रतिषेधेन शित्सर्वस्येत्यस्यावकाश: इदम इश् इत: इह आदे: परस्येत्यस्यावकाश: स एव इहोभयं प्राप्नोति अष्टाभ्य औश् शित्सर्वस्येत्येतद्भवति विप्रतिषेधेन अनेकाल्शित्सर्वस्य शित्सर्वस्येति किमुदाहरणं इदम इश् इत: इहेनानदत्ति शित्करणादेवात्र सर्वादेशो भविष्यति इदं तर्हि अष्टाभ्य औश् ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति इदं तर्हि जस: शी जसा सो: शि: ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति अस्त्वन्यच्छित्करणे प्रयोजनं किं विशेषणार्थ: शकार: क्व विशेषणार्थेनार्थ: शि सर्वनामस्थानं विभाषा ङिश्यो शीति शि सर्वस्येति शक्यमकर्तुं कथं अंत्यस्यायं स्थाने भवन्प्रत्यय: स्यात् असत्यां प्रत्ययसंज्ञायामित्संज्ञा न स्यात् असत्यामित्संज्ञायां लोपो न स्यात् असति लोपे नेकाल्त्वं यदा नेकाल्तदा सर्वादेश: यदा सर्वादेश: तदा प्रत्यय: यदा प्रत्यय: तदेत्संज्ञा यदेत्संज्ञा तदा लोप: एवं तर्हि सिद्धे सति यच्छित्सर्वस्येत्याह तज्ज्ञापयत्याचार्य: अस्त्येषा परिभाषा नानुबंधकृतमनेकाल्त्वं भवतीति किमेतस्य ज्ञापने प्रयोजनं वा सरूपसर्वादेशदाप्प्रतिषेधे पृथक्त्वनिर्देशो नाकारांतत्वादित्युक्तं तन्न वक्तव्यं भवति॥ ॥इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे सप्तममाह्निकम्॥ श्रीरस्तु॥

तेन पुंसकादिति च विहितविशेषणमिति ज्ञापकत्वमेव शित्करणस्य अथ यासत्यपीह शित्करणे नेकाल्त्वादादे: परस्येति बाधितत्वात्सर्वादेशो भविष्यति किं शिद्ग्रहणेनेति पुनरपि ज्ञापकमेवाशिद्ग्रहणं अनेकांतेषु चानुबंधेषु नात्स्येवानुबंधकृतमनेकाल्त्वमिति एकांतेषु च तेषु ज्ञापकेन प्रयोजनं इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादे सप्तममाह्निकं॥ ७॥ श्री॥ ॥

स्थान्यादेशपृथक्त्वादिति· स्थानिस्वरूपाश्रयं यत्कार्यं तद्भिन्नरूपत्वादादेशे न सिध्यतीति भावः· ओकत इति· ओकेहि च यन्मतं तेनापि न तत्स्थानापत्त्या लघु र्लाभो हि· उपाध्यायस्येति प्रसंगापेक्षेयं षष्ठी· ननु शिष्य विशेषणमेतत् व्यभिचाराभावात् प्रतिषेधं वक्ष्यामीति· नह्यप्रदर्शितविषयः प्रतिषेधः शक्योऽपि विधातुमिति भावः· एवं तावल्लिंगेनाभिमतोऽर्थः सिद्ध इति प्रदर्शितं· इदानीं क्रियमाणेऽपि यत्नेनाल्विधावितिनकर्तव्यमित्याह· अल्विधौ प्रतिषेध इति· यदी ष्टो भवति· इष्टिर्धो बलादेरिति विशेषणमाश्रितं तच्च स्थान्याश्रितं वस्तु तत्र संनिहितमविवक्षितं आदिष्टं स्थानिन्या विवक्षितत्वादनाश्रितं· तथाहि·

स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद्गुरुपुत्र इति यथा· अन्यः स्थानी अन्य आदेशः स्थान्यादेशपृथक्त्वादेतस्मात्कारणात्स्थानिकार्यमादेशेन प्राप्नोति· तत्र को दोषः· आङो यमहनः आत्मनेपदं भवतीतिहं तेऽपि स्यादूधेने स्याद्ध्येनेच यधेरपि स्यादिति तद्वानरणत्वं तं न सिध्यति· त स्मात्स्थानिवदनुदेशः एवमर्थमिदमुच्यते· गुरुवद्गुरुपुत्र इति· यथा तद्यथा गुरुवदस्मिन् गुरुपुत्रे वर्तितव्यमिति गुरौ यत्कार्यं तद्गुरुपुत्रेऽतिदि श्यते· एवमिहापि स्थानिकार्यमादेशेऽतिदिश्यते· नैतदस्ति प्रयोजनं· लोकत एतत्सिद्धं तद्यथा लोके यो यस्य प्रसंगे भवति लभतेऽसौ तत्कार्याणि तद्यथा· उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा ग्रासनादि निलभते यद्यपि तावल्लोकत एष दृष्टान्तः दृष्टान्तस्यापि तु पुरुषारंभो निवर्तको भवति· अस्ति चेह कश्चित्पुरुषारंभः अस्तीत्याह· कः स्वरूपविधिर्नाम हंतेरात्मनेपदमुच्यमानं हंतेरेव स्यादूधेने स्यात्· एवं तर्ह्याचार्यप्रवृत्ति र्ज्ञापयति· स्थानिवदादेशो भवतीति· यदयं युष्मदस्मदोरनादेश इत्यादेशे प्रतिषेधं शास्ति कथं कृत्वा· न पकं युष्मदस्मदोर्विभक्तौ कार्यमुच्यमा नं कः प्रसंगो यदादेशे स्यात्· पश्यति त्वाचार्यः स्थानिवदादेशो भवतीति अत आदेशे प्रतिषेधं शास्ति· इदं तर्हि प्रयोजनं· अनल्विधाविति प्रतिषेधं वक्ष्यामीति· इहमाभूत· द्यौः पंथाः स इति· एतदपि नास्ति प्रयोजनं· आचार्यप्रवृत्तिर्ज्ञापयति· अल्विधौ स्थानिवद्भावो न भवतीति· यदयमदो जग्धिर्ल्यप्ति किति इति तिकितीत्येव सिद्धे ल्यप्ग्रहणं करोति तस्मात्तथा नेन योगेन आरभ्यमाणेऽप्येतस्मि न्योगे अल्विधौ प्रतिषेधे विशेषणप्राप्तिस्तस्यादर्शनात् अल्विधौ प्रतिषेधे सत्यपि विशेषणे समाश्रीयमाणे अस्मिन्नस्मिन् विशेषणे अप्राप्तिर्विधेः प्रदीव्य प्रसीव्येति कारणं तस्यादर्शनात् वलादौ विस्पष्टमुच्यते· न चात्र वलादिं पश्यामः॥ ॥

इडादिरपि स्थाभवत्येव स्थाके वलोऽपि आकारान्तोऽपि स्थात्वीनीकारांश्च नोऽपि दत्वाद्येति च यगं तोऽपि इष्टिनिमित्तिमांतो वित्तत्र स्थामात्रमेनि दृ॥ इं यत्कार्यं तत्प्रत्ययत्वाद्यपत्वादि तदादेशोऽतिदिश्यते· ननु वलादित्वमनित्यपोनस्थतो नापि स्थानिना यनादित्वमिति भावः सिद्ध एवेति

भो· के·
८८

अथवाल्विधिशब्दवाच्योऽल्विधिरिति विशिष्टमर्थं तु निमित्तानाश्रयणात्सर्वे विभक्त्यंतत्वं सति विधिशब्दे समाससद्भावादेतद्भक्तत्वमाः केवलस्त्व ल्शब्द उपादीयमानो यद्विभक्तिरूपमापन्नं तदर्थोपपत्त्यै एवस्यात् तत्रालः परस्य विधिः द्यौः पंथाः स इति इह हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इति लोपो न भवति अलि परतो विधिः क इष्टः स इष्टः इति हशि चेत्युत्वं न भवति· अलो विधिः धुकाम इति लोपो व्योर्वलीति लोपो न भवति उत्वं त्वविसावकाशं स्याद् दृ र्विमल घु इति· अला विधिः महोरस्केनेति अयोगवाहानामट्सूपदेशाण्णत्वं न भवति· प्रातिपदिकनिर्देशाश्चेति· अनल्विधावेतावद्वाच्यतो

अलः परस्य विधिरल्विधिः अलो विधिरल्विधिः अलि विधिरल्विधिः अला विधिरल्विधिरिति· नैतदस्ति प्रयोजनं प्राति पदिकनिर्देशोऽयं प्रातिपदिकनिर्देशाश्चार्थतंत्रा भवंति न कांचित्प्राधान्येन विभक्तिमाश्रयंति तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या इदं तर्हि प्रयोजनं उत्तरपदलोपो यथा विज्ञायेत अलमाश्रयते अलाश्रयः अलाश्रयो विधिरल्विधिरिति यत्र प्राधान्येनाल् आश्रीयते तत्रैव प्रतिषेधः स्याद्यत्र विशेषणत्वेनाल् आश्रीयते तत्र प्र तिषेधो न स्यात् किं प्रयोजनं प्रदीव्य प्रसीव्येति वलादिलक्षण इण्माभूदिति किमर्थं पुनरिदमुच्यते॥ ॥

अत्र शब्दसंस्काराय केवलं प्रथमा विभक्तिरुपादीयते न तु तदर्थो विवक्ष्यते यथा भाव इत्यत्र लिंगसंख्ये इति भावः उत्तरपदलोप इति अनल्विधावुच्य माने यत्र कार्येत्वातंत्र्येणाल् आश्रीयते तत्रैव निषेधः स्यात् क इष्टः स इष्ट इत्यादौ प्रदीव्येत्यादौ इट् प्रतिषेधो न स्यात् न हीट्विधौ वलः स्वातंत्र्येणा श्रयणं वलादेरित्यन्यपदार्थस्य प्राधान्याद्गुणभावाद्वल उत्तरपदलोपे त्वलाश्रयत्वादिद् विधेः प्रतिषेधसिद्धिः अलमाश्रयत इति अर्थप्रदर्शनमेत त् एवं घुलाश्रय इति स्यात् तस्मादाश्रीयत इत्याश्रयः एवं अलाश्रयो विधिरल्विधिः अलाश्रयत्वादिड्विधिरेवाल्विधिरुच्यत इति गतार्थत्वा दप्रयोग एव उत्तरपदस्य लोपः किमर्थमिति तत्स्थानापत्त्या तद्धर्मलाभात्स्थानिकार्यमादेशः प्राप्स्यतीति भावः॥ श्रीसांबसदाशिवायनमः॥

८८

तत्रानल्विधाविति इत्युगमार्थमेतत्स्थानिवद्भावः प्राप्नोति तस्मादाद्ध्रिमिति अनल्विधाविति प्रतिषेधात् सार्वधातुकस्यापि तर्थवादेश न प्राप्नो
तीति यत्तदर्थं तत्र प्रतिषेधान प्रवर्तते तथापि चारपूर्वकं प्रतिपादयितुमाह किं पुनरिति आदेशोऽस्यास्तीत्यादेशी [illegible] स्थानी किं स्थानीभूतकार्यस्या
त्रिवक्षानिषेधोऽयमात्राश्रयेणेति विचारः किमत्र यास निगृह्यते अथवा व्याप्तिविधिरिति भावः वधकरोति हन्तेर्ण्वुलि वधादेशो [illegible] अनवधका
त्रविवक्षणान्न एव अर्थमिति विधादेशः स्वस्थानं तद्गि निर्देशोपन्यासः अर्द्धतत्त्वे तल्लोपस्य स्थानिवद्भावाद् ध्यभावः स्फाति [illegible] दृष्टेऽपि आदिष्ट एवा

नैलद्भिवदामहे वलादिर्न वलादिरिति किं तर्हि स्थानिवद्भावात्सार्वधातुकत्वमेषितव्यं तत्रानल्विधाविति प्रतिषेधः प्राप्नोति किं पुनरादेशि
न्यलाश्रीयमाणे प्रतिषेधो भवति आहोस्विदविशेषेण आदेश आदेशिनि च कश्चात्र विशेषः आदेश अल्विधिप्रतिषेधे कुरु वधक पिवा
गुणवृद्धिप्रतिषेधः आदेश अल्विधिप्रतिषेधे कुरु वधक पिवा गुणवृद्ध्योः प्रतिषेधो वक्तव्यः कुर्वित्यत्र स्थानिवद्भावादंगसंज्ञा स्वाश्रयं च
लघूपधत्वं तत्र लघूपधगुणः प्राप्नोति वधक इत्यत्र स्थानिवद्भावादंगसंज्ञा स्वाश्रयं चादुपधत्वं तत्र वृद्धिः प्राप्नोति पिवेत्यत्र स्थानि
वद्भावादंगसंज्ञा स्वाश्रयं च लघूपधत्वं तत्र गुणः प्राप्नोति अस्तु तर्ह्यविशेषेण आदेश आदेशिनि च आदेश आदेशाइतिचेत् स्फ
दिभ कृदतिदिष्टेषूपसंख्यानं आदेश आदेशाइतिचेत् स्फ निङ् कृदतिदिष्टेषूपसंख्यानं कर्तव्यं स्फप इत्यायस्फायि स्थानिवद्भावात् स्फप्र
त्ययस्वाश्रयं च यजादित्वं तत्र प्रतिषेधः प्राप्नोति स्फप निङ् अरुदितां अरुदितं अरुदित स्थानिवद्भावात्सार्वधातुकसंज्ञा स्वाश्रयं च
वलादित्वं तत्र प्रतिषेधः प्राप्नोति निङ् कृदतिदिष्ट भुवनं स्वुवनं स्थानिवद्भावात्प्रत्ययसंज्ञा स्वाश्रयं च वलादित्वं प्रतिषेधः प्राप्नो
ति किं पुनरत्र न्यायः आदेशिन्यल्याश्रीयमाणे प्रतिषेध इत्येतदेव न्यायः ॥ श्रीमदार्यदुर्गायै नमः ॥ ॥

निर्दिष्टो विवक्षितः उपलक्षणं चैतत् तद्धिनादेशोऽपि न प्राप्नोति लिंगवायन इति अत्राहि स्वाश्रयमजादित्वं स्थानिवद्भावान्नाधितं किं पुन
रिति न्यायापेक्षः प्रकर्षः कः पक्षो न्यायोपपन्न इत्यर्थः आदेशिनीति प्रत्यासत्त्येति भावः यत्कार्यमादेशः स्वतो न प्रतिपद्यते तत्र स्यादति दे
शाकांक्षा तत्त्वे च प्रतिषेधस्तद्वारक एवाल्कार्ये युक्तः अरुदितामित्यत्र त्वादेशस्य स्वतो वलादित्वात्तत्रातिदेशं प्रत्याकांक्षा सार्वधातु
कत्वं तस्य नास्तीति तदेवातिदेशेन प्राप्यते यथा गुरुपुत्रो गुरुत्वे सति नातिदेशमपेक्षते तथा वलादित्वं प्रत्यादेशनास्यातिदेशापेक्षेत्येतावतादृ

मौ.के.

८९

ब्राह्मणवदिति सामान्यशब्दोपादानेन यत्र कार्यमतिदिश्यते तत्र विशेषस्याशब्दार्थत्वात् विशेषाश्रयकार्यानतिदेशः यत्र तु विशेषशब्दोपादा
नेनातिदेशः तत्र विशेषातिदेशोऽपवादः अयुर्हीहिति अग्रहीदित्यत्र दीर्घ इत्यर्थः इति कृते इति भावः दीर्घो धौ [illegible] वस्तुतस्तुन [illegible]
नित्यं इत्युक्तत्वजंतराणां व्यावर्तकं इति इट्कार्यं विशेषकार्यत्वान्न प्राप्नोति तथा प्रदीव्यो गुणप्रतिषेधो न प्राप्नोति देवित्वस्यादावृकितोऽपि क्त्वा
प्रत्ययस्य संभवात् कित्वस्यापि विलादित्ववत् तस्यातिदेशः तस्माद्विशेषकार्यातिदेशज्ञापनार्थमनल्विधाविति कर्तव्यमिति भावः अनु
बंधकार्येष्वनल्विधाविति प्रतिषेधो न प्रवर्तते स्यानिन्यनुबंधस्यासन्निधानादसंतत्वाचानुबंधाः कार्यस्य विशेषकाइति सिद्धांतव्यवस्थापना

ननु यद्येवमर्थ एवायं यत्नः क्रियते अन्यस्य कार्यमुच्यमानमन्यस्य यथा स्यादिति सत्यं एवमर्थः न तु प्राप्नोति किं कारणं सामान्यातिदेशे विशेषा
नतिदेशः सामान्ये ह्यतिदिश्यमाने विशेषोऽनतिदिष्टो भवति तद्यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति सामान्यं यद्ब्राह्मणकार्यं तत्क्षत्रियेऽति दि
श्यते यत्तद्विशिष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते एवमिहापि सामान्यं यत्प्रत्ययकार्यं तदतिदिश्यते यद्विशिष्टं वलादेरिति न तदतिदिश्यते य
द्येवमग्रहीदिति सिचो लोपो न प्राप्नोति अनल्विधाविति पुनरुच्यमाने इहापि प्रतिषेधो भविष्यति प्रदीव्य प्रसीव्येति विशिष्टं ह्युपालमा
श्रयते वलं नाम इह च प्रतिषेधो न भविष्यति अग्रहीदिति विशिष्टं ह्युपालमाश्रयते इटं नाम यदि तर्हि सामान्यमप्यतिदिश्यते विशेषश्च
सत्याश्रयो विधिरिष्टः प्रतिषेधवलादित्वे इटा भवितव्यं अरुदितां अरुदितं अरुदित किमत्र प्राप्नोति भवितव्यं प्रतिषेधस्तु प्राप्नोत्यल्विधित्वात्
प्रतिषेधस्तु प्राप्नोति किं कारणं अल्विधित्वात् अल्विधिरेष भवति तत्रानल्विधाविति प्रतिषेधः प्राप्नोति न वाऽऽनुदेशिकस्य निषेधादितरेण भावः
न वा एष दोषः किं कारणं आनुदेशिकस्य प्रतिषेधात् अस्त्वत्रानुदेशिकस्य वलादित्वस्य प्रतिषेधः स्वाश्रयं वलादित्वं भविष्यति ॥ श्रीः ॥

त् विशिष्टं ह्युपालमिति इट् ईधीति सलोपे समुदायरूपेणाश्रयणादुहोलिटि दीर्घ इत्यत्रापि इट् एव स्थानिवंनावः अनियमप्रसंगा
न्नियमफलाया अव्यभिचारिभाषाया अनुपस्थानात् सत्याश्रय इति आश्रीयेत इत्याश्रयः यथा वलादित्वं सिद्धं तथा च इडागमस्याल्विधि
त्वादनल्विधौ चस्यानिवद्भावविधानादरुदितामित्यत्र स्थानिकार्यमिडागमो न प्राप्नोति न वेति अतिदेश एवानुदेशः सः प्रयोजन
मस्य तदानुदेशिकं तत्र स्वाश्रयं वलादित्वमाश्रित्य स्थान्याश्रयं च सार्वधातुकत्वमिति द्विधा स्यते ॥ ॥

८९

शिव

रूपान्यत्वान्नेति यथ य मवयवादेशो रूपं न भिद्यात्स्यादेव प्रत्यभिज्ञाना तिङ्त्वं यत्र तु भेदकोरूपस्य न तस्मान्नास्ति तिङ्त्वमिति भावः योन्यादेशा इति इकारस्य उकारः नासावाश्रीयते पदसंज्ञायां साहि तिङ्शब्दनिबंधना नावयवनिबंधना यस्येति तुशब्दः साक्षादविधानान्नादेशः पदसंज्ञानिमित्तत्वेन नाश्री यत इत्यर्थः तत्रोत्तरमाह नैतदिति तिङन्तं पदमिति सन्निविष्टइकारतकारावपि साभावित्वादितीकारस्यातिङ्त्वान्नादेशस्याप्युकारस्य तिङ्त्वमिति सि ध्यापदसंज्ञा अल्विधिप्रसंगइति इकारस्य पदसंज्ञानिमित्तत्वादल्विधिः पदसंज्ञास्यादित्यर्थः यत्र प्राधान्येनेति यत्र साक्षादल्निर्देशः न

रूपान्यत्वात् अन्यत्वं त्वपिरूपं प्रवर्तीति अन्यत्व प्रवर्तितिति इमेप्यादेशाः कथं आदिश्यते मः स आदेशः इमेवाप्यादिश्यंते आदेशाः स्थानि वदितिवैन्नानाभिन्नत्वात् आदेशः स्थानिवदिति विज्ञं किंकारणं अनाभिन्नत्वात् योन्यादेशानासावाश्रीयते यश्चाश्रीयते नासावादे शः नैतमंतव्यं समुदाय आश्रीयमाणेऽवयवोनाश्रीयतइति अभ्यंतरो हि समुदायेऽवयवः तद्यथा वृक्षः प्रचलन्सहावयवैः प्रचलति आश्रयइति चेदल्विधिप्रसंगः आश्रयइति चेदल्विधिरयं भवति तत्रानल्विधाविति प्रतिषेधः प्राप्नोति नैषदोषः नेवं सति किंचिदनल्विधिः स्यात्

यतेन्वेदमनल्विधाविति तत्र प्रकर्षगतिर्विज्ञास्यते साधीयोयोल्विधिरिति कथं साधीयः यत्र प्राधान्येनाल्आश्रीय ते यत्र नांतरीयकोलाश्रीयते नासावल्विधिरिति अथवा क्रमादेशग्रहणस्य प्रयोजनं आदेशमात्रं स्थानिवद्यथास्यादिति अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात् स्थानीआदेशइत्येतन्नित्येषु शब्देषु नोपपद्यते किंकारणं नित्यत्वात् स्थानीहिनामयोभू त्वानभवति आदेशोहिनामयोऽभूत्वाभवति एतच्चनित्येषु शब्देषु नोपपद्यते यः सतोनामविनाशः स्यात् असतो वा प्रादुर्भा वइति सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेष्वपि स्थानशब्दप्रयोगात् सिद्धमेतत् कथं यथा लौकिकेषु वैदिकेषु च कृतां तेष्वभूतपूर्वेष्वपि स्थानशब्दप्रयोगो वर्त्तते लोके तावत् उपाध्यायस्य स्थाने शिष्य इत्युच्यते न च तत्रोपाध्यायोभूतपूर्वोपि भवति वेदेपि सोमस्य स्थाने पूतिकतृणान्यभिषुणुयात् इत्युच्यते न च तत्र सोमो भूतपूर्वो भवति

त्र प्रतिषेधो नानुमीयमाने संभवमात्रेणाल्यर्थः प्राधान्यग्रहणं प्रत्यक्षोपलक्षणं आदेशमात्रमिति आनुमानिकमपीत्यर्थः अनु पपन्नमिति एकदेशविकारेपि यत्रानित्यत्वहानिस्तत्र सर्वविकारे कुतो नित्यत्वं यत्रान्वयापि कस्य विनाशो सीत्यर्थः सोमस्येति सा

मत्तृणविशेषः तत्सन्निधौ पूतिकतृणानि प्रातिनिधीयंते

भा. के.
१०

एव
कोयंतावदिति अकारस्य ककारो भाविकं न्याय्यइति शास्त्रांतरेणापि धातोः स्यान्निन्नकालस्यानित्यस्येत्यर्थः अन्योपमिति सनोवमन्वेति कृत्प्रत्ययः एकदेशविकृतस्येति एकदेशेन विकृतं तृतीयासमासः तत्स्येति छिन्नेपि पुच्छे शिष्टावयवसान्निवेशः श्वत्वजातेरभिव्यंजकः एवं पचतिसंज्ञका स्यविकारेपितकारः तिङ्त्वस्य व्यंजकः तथान्विकारलोपेपि प्रपचाति तिकारमात्रस्यातिङ्त्वमर्थप्रतीतिहेतुत्वं चास्ति नारवइति अवयवापगमेपि

कुतएतत् तथाप्ययं विशिष्टं स्थानिकार्यमादेशेतिदिश्यते गुरुवद्गुरुपुत्र इति यथा तस्य थाग्रुरुवदस्मिन् गुरुपुत्रे वर्तितव्यं अन्यत्रोच्छिष्टभोजना त्पादोपसंग्रहणाच्चेति यदि च गुरुपुत्रोपि गुरुर्भवति तदपि कर्तव्यं भवति अकृतं मदिदिशेन्यत्वात्माश्रीयमाणप्रतिषेधः नत्वेतत्क्रमादेशस्याल्विधि प्रतिषेधकुरु वचोपि बाधुणत्वे प्रतिषेधइति नैष दोषः करोतीति परत्वेन प्राप्त्यादिशात्सिद्धं पिबिरदंतः वध कइति नायं ण्वुल् अन्योयम कशब्दः किदीणादिकः रुचकइति यथा एकदेशविकृतस्योपसंख्यानं एकदेशविकृतस्योपसंख्यानं कर्तव्यं किं प्रयोजनं पचतु प चंतु तिङ्ग्रहणेन ग्रहणं यथा स्यात् एकदेशविकृतस्यानन्यत्वात्सिद्धं एकदेशविकृतमनन्यवद्भवतीति तिङ्ग्रहणेन ग्रहणं भविष्यति तद्यथा श्वाकर्णे वा पुच्छे वा छिन्ने श्वैव भवति नाश्वोनगर्दभइति अनित्यविज्ञानं तु अनित्यविज्ञानं तु भवति नित्याः शब्दाः नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः न त्वसएवायं विकृतश्चेति तन्नित्येषु नोपपद्यते तस्मादुपसं ख्यानं कर्त्तव्यं भारद्वाजीयाः पठंति एकदेशविकृतेषूपसंख्यानं एकदेशविकृतेषूपसंख्यानं कर्तव्यं पचतु पचंतु तिङ्ग्रहणेन ग्रह णं यथा स्यात् किं च कारणं न स्यात् अनादेशत्वात् आदेशः स्थानिवदित्युच्यते न चेमे आदेशाः ॥ ॥ श्रीसांबसदाशिव ॥ श्री ॥

न तस्य शास्त्रांतरेण योगः किं तर्हि स्वेनैवेत्यर्थः अनित्यविज्ञानमिति अवस्थिते तकारे इकारस्य उकार इत्यनित्यत्वं स्फुटं इवप्राप्नोती ति भावः उपसंख्याने क्रियमाणेनास्त्यनित्यत्वं एकशिरनिस्थान्यादेशाभ्यांतिशब्दतुशब्दयोरनुमीयमानत्वात् प्रसंगेनाविधानात्तयोरेश ग्रहणाद्वा उपसंख्यानाद्वानुमानिकस्याप्यादेशस्य स्थानिवद्भावः सिद्धः न चेम इति तुशब्दादयः एकैकस्यत्र साक्षात्समुदायानुपा दानात् ॥ ॥ ॥ ॥ श्रीः ॥ ॥ ॥ श्रीगुरुदेवदत्त ॥ ॥ शिव धन्यकाशी ॥

१०
शिव

षष्ठीनिर्दिष्टस्येति नन्वपवादः षष्ठीनिर्दिष्टस्य स्थाने विधीयते तेनाभिनिर्वृत्त्यादोषश्च्याः स्थाने प्रथमायाविधानात् अस्ति षष्ठी भिन्नवचनत्वेनेति तु शब्दांतरं प्रत्यय विधे
यंशेयं यथोक्तं पातुवायोविदूरस्य प्रकृत्यंतरमेवेति विश्रवः शब्दात्वनभिधानात्प्रत्ययाभावः परत्वमिति नन्वपित्व निवृत्यर्थं नियमार्थं श्यनोनित्ताज्ञापकालि
त्वनिवृत्तेः सिद्धत्वात् नह्यत्र पित्वस्य नित्वस्य वा विशेषोस्तीति के विदाहुः नरभुक्तं ताकील्यादौ विषयेवान शिनित्वं प्रकृतेराद्युदात्तार्थं स्यात् नत्वादिष्टस्थिये

अथवास्तिभंतु षष्ठीनिर्दिष्टस्यस्थानिवद्भवनात् सिद्धमेतत्कथं पूर्वी निर्दिष्टस्यादेशः स्थानिवदिति वक्तव्यं तत्रार्हि षष्ठीनिर्दिष्टग्रहणं कर्तव्यं न कर्तव्यं
प्रकृतमनुवर्तते क्व प्रकृतं षष्ठीस्थानेयोगेति अथवाचार्य प्रवृत्तिर्ज्ञापयति नापवादे उत्सर्गकृतं भवतीति यदयं श्यन्नादीन्कांश्चित् क्ङितः करोति श्यन
भ्यस्भ्याम्शसु इति तस्य दोषस्तयादेशे उभयप्रतिषेधः तस्यै तस्यलक्षणस्य दोषः तयादेशे उभयप्रतिषेधो वक्तव्यः उभये देवमनुष्याः तयपाग्रहणे
न ग्रहणाज्जसि विभाषा प्राप्नोति नैषदोषः अयच् प्रत्ययांतरं यदि प्रत्ययांतरं उभयीति ईकारो न प्राप्नोति माभूदेवं मात्रजित्येवं भविष्यति कथं
मात्रजिति नेदं प्रत्ययग्रहणं किंतर्हि प्रत्याहारग्रहणं क्व संनिविष्टानां प्रत्याहारः मात्रशब्दात्प्रभृति आ यचश्चाकारात् यदि प्रत्याहारग्रहणं
मात्रजिति नेदं प्रत्ययग्रहणं प्रत्याहारग्रहणे तितिष्ठं ति अत्रापि प्राप्नोति अत इति वर्तते एवमपि तैलमात्रा घृतमात्रा अपि प्राप्नोति सदृशस्यापि संनिविष्टस्य न भवति प्रत्याहारग्रहणे
नग्रहणं आत्याख्यायां वचनादेशे स्थानिवद्भाव प्रतिषेधः आत्याख्यायां वचनादेशे स्थानिवद्भावस्य प्रतिषेधो वक्तव्यः श्रीहिभ्य आगतः इ
त्यत्र घेर्ङितीति गुणः प्राप्नोति नैष दोषः उक्तमेतत् अर्थातिदेशात् सिद्धमिति ग्रहणे दीर्घः ग्रहणे घेरादेशो न स्थानिवदिति वक्त
व्यं किं प्रयोजनं निष्कौशांबिः अतिखट्वः ग्रहणेन ग्रहणात् लुलोपो माभूदिति ननु च दीर्घो हि स्युच्यते तन्न वक्तव्यं भवति किं पुनरत्र ॥
ज्यायः स्थानिवत्प्रतिषेध एव ज्यायान् इदमपि सिद्धं भवति अतिखट्वाय अतिमालाय इति याण्न भवति ॥

सामान्येन ज्ञापकं शितमाश्रीयते अपवादे उत्सर्गकृतं न भवतीति कतितिष्ठंतीति परिहारांतरसद्भावात्र षट्स्वस्नादिभ्य इति प्रतिषेधो नोक्तः
तैलमात्रेति वकारस्य प्रत्याहारार्थस्योपादानात् अस्याविशेषकत्वात् मात्रशब्दमात्रग्रहणप्रसंगः सदृशस्येति प्रत्ययानुकरणं मात्रशब्द इति प्राति
पदिकस्याग्रहणमित्यर्थः आत्याख्यायामिति एकस्मिन् प्रत्यासं एकवचनं तस्य प्रसंगे बहुवचनमादेश इति कल्पनाश्रयेण दोषोपन्यासः ॥

भा॰कै॰
१२

कार्यबुद्धिरिति अन्यस्यात्र विपरिणामासंभवात्सामर्थ्यात्कार्यत्वेन बुद्धिर्गृह्यते न तु कार्यशब्दो बुद्धिपर्यायः संतीति ङ्यापोरित्यत्र बहुलग्रहणात्
भूतपूर्वेण वापीति नन्वनित्यत्वाविरोधः बुद्धिधर्मः केवलमर्थेषु प्रतिपत्तृवशादारोप्यते न तु तच्छब्दार्थानां तथा वक्ष्यमाणं भवतीनामिति आन्विदेश अक
तलोविभाषांतरस्विक्रियाइति स्वार्थेरव तत्र संज्ञान्यपरस्याभिहितत्वात्तृतीया तत्वात्प्रथमैव कृता आत्र श्रु ध्या इति तस्याअनंतरक्रियर्थः अपवा
द प्रसंगस्त्विति बुद्धिविपरिणाममात्रं यदि स्थान्यादेशभावइति भावः कर्मण्यणिति सर्वत्राणबुद्धिः प्रसक्ता आतोनुपसर्गे क इति कबुद्ध्या निवृत्तत्
कार्यविपरिणामाद्वा सिद्धं अथवा कार्यविपरिणामाद्वा सिद्धमेतत् किमिदं कार्यविपरिणामादिति कार्याबुद्धिः सा विपरिणम्यते ननु च
कार्याविपरिणामाद्धितिम्लवितव्यं सतिवैवं योजरपा क्कानि कस्त्वानि अपि तु बुद्धिः संप्रत्ययः इत्यनर्थांतरं कार्या बुद्धिः कार्यः संप्रत्ययः
कार्यस्य संप्रत्ययस्य विपरिणामः कार्यविपरिणामः कार्यविपरिणामादिति परिहारांतरमेवेदमत्रापठितं कथं नेदं परिहारांतरं स्यात्
यस्मिन्नत्र पूर्वं स्थानशब्दो वर्तते भूतपूर्वेण वापि स्थानशब्दो वर्तते कथं बुध्या तद्यथा कश्चित्कस्मैचिदुपदिशति प्राचीनं ग्रामादाम्रा इति तस्य
सर्वत्राम्रबुद्धिः प्रसक्ता ततः पश्चादाह ये क्षीरिणो ऽवरोहवंतः पृथुपर्णास्ते न्यग्रोधा इति स तत्राम्रबुध्या न्यग्रोधबुद्धिं प्रतिपद्यते
स ततः पश्यति बुध्या आम्रांश्चापकृष्यमाणान् न्यग्रोधांश्चोपाधीयमानान्नित्या एव च स्वस्मिन्विषये आम्रा नित्याश्च न्यग्रोधाः बुद्धि
स्त्वस्य विपरिणम्यते एवमिहापि अस्तिरस्मा अविशेषेणोपदिष्टस्तस्य सर्वत्रास्तिबुद्धिः प्रसक्ता सोस्तेर्भूरित्यनेनास्तिबुध्या भवतिबु
द्धिं प्रतिपद्यते स ततः पश्यति बुध्या अस्तिं चापकृष्यमाणं भवतिं चोपाधीयमानं नित्य एव च स्वस्मिन् विषये अस्तिर्नित्यो भवतिः
बुद्धिस्त्वस्य विपरिणम्यते अपवादप्रसंगस्तु स्थानिवत्वात् अपवादे तु उत्सर्गकृतं प्राप्नोति कर्मण्यण् आतोनुपसर्गे क इति के पि
अण्कृतं प्राप्नोति किं कारणं स्थानिवत्वात् उक्तं वा किमुक्तं विषयेण तु नानालिंगकरणात्सिद्धमिति

१२

इति के पि अण्कृतप्रसंगः विषयेण त्विति तुशब्दः पुनरर्थे यद्यं गापोष्टगिनिकापवादस्य टकः कित्त्वं शास्ति तज्ज्ञापयति नोत्सर्गकृतमपवा
दे भवतीति

आर्धधातुकीयेति यदायं प्रयोगः यदार्धधातुकेइति तदा तिङ्सार्वधातुकनिघातः प्राप्नोति निपातैर्यद्यदिहन्तेति प्रतिषिद्धः स्यादेतदुदाहरणं न विलयदार्धधा
तुकाधिश्च द्रष्टुं विधेयः आर्धधातुकेइष्ट एकाचउपदेशेनुदात्तादितिनिषेधः प्राप्नोति नैषदोषः आद्युदात्तनिपातनं करिष्यते सनिपातनस्वरः प्रकृतिस्व
रस्य बाधको भविष्यति एवमप्युपदेशिवद्भावो वक्तव्यः यथैव हि निपातनस्वरः प्रकृतिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेत आर्धधातुकेति नैषदोषः
आर्धधातुकीयाः सामान्येन भवन्ति अनवस्थितेषु प्रत्ययेषु तत्रार्धधातुकसामान्ये वधिभावे कृते सति शिष्टत्वात् प्रत्ययस्वरो भविष्यति आकारा
न्तान्नुक्पुकौ प्रतिषेधः आकारान्तान्नुक्पुकोः प्रतिषेधो वक्तव्यः विलापयति भापयति लीभीग्रहणेन ग्रहणान्नुक्पुकौ प्राप्नुतः लीभियोः
प्रश्लिष्टनिर्देशात् सिद्धं लीभियोः प्रश्लिष्टनिर्देशोयं ली ई ईकारान्तस्य भी ई ईकारान्तस्येति लोडादेशे शाभावजभावधित्वहिलोपैत्वप्रतिषेधः
लोडादेशे एषां प्रतिषेधो वक्तव्यः शिष्टात् हतात् भिन्तात् कुरुतात् स्तात् लोडादेशे कृते शाभावो जभावो धित्वं हिलोप एत्वमित्येते विधयः प्राप्नु
वन्ति नैषदोषः इदमिह संप्रधार्यम् लोडादेशः क्रियताम् एते विधय इति किमत्र कर्तव्यं परत्वाल्लोडादेशः अथेदानीं लोडादेशे कृते
पुनः प्रसंगविज्ञानात् कस्मादेते विधयो न भवन्ति सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा त्रयादेशस्यत्वप्रतिषेधः त्रया
देशस्य त्वं तस्य प्रतिषेधो वक्तव्यः तिसृणां तिसृभावे कृते त्रेस्त्रय इति त्रयादेशः प्राप्नोति नैषदोषः इदमिह संप्रधार्यं तिसृभावः क्रि
यतां त्रयादेश इति किमत्र कर्तव्यं परत्वात्तिसृभावः अथेदानीं तिसृभावे कृते पुनः प्रसंगविज्ञानात् त्रयादेशः कस्मान्न भवति सकृद्ग
तौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति आम्विधौ च आम्विधौ चतुरस्त्वं तस्य प्रतिषेधो वक्तव्यः चतस्रस्तिष्ठन्ति चतसृभावे कृ
ते चतुरनडुहोरामुदात्त इत्याम् प्राप्नोति नैषदोषः इदमिह संप्रधार्यं चतसृभावः क्रियतां चतुरनडुहोरामुदात्त इत्यामिति कि
मत्र कर्तव्यं परत्वाच्चतसृभावः अथेदानीं चतसृभावे कृते पुनः प्रसंगविज्ञानादाम् कस्मान्न भवति सकृद्गतौ विप्रतिषेधे यद्बा
धितं तद्बाधितमेवेति · ७

धीङिति धातः · श्री सांबो विजयते · ७

भा· के·

१२

भूतपूर्व इति यत्तु बन्धकार्यं सर्वत्र भूतपूर्वगत्याश्रयणाद् इति चत्रूपसञ्ज्ञावात् लक्षणेति अत्र चान्तरान् हस्ते कृते स एवाय मिति बुधे

अथेदानीं असत्यपि स्थानिवद्भावे दीर्घत्वे कृते पिजासोपि वे भूते इति कस्मादायादय इति स्यात्क स्मान्न भवति लक्षणप्रति
पदोक्तयोः प्रतिपदोक्तस्यैवेति ननु चेदानीं सत्यपि स्थानिवद्भावे एतया परिभाषया शक्यमिहोपस्थातुं नेत्याह न तर्हिइदा
नीं क्वचिदपि स्थानिवद्भावः स्यात् वक्तर्हि वक्तव्यं न वक्तव्यं प्रश्लिष्टनिर्देशात् सिद्धं प्रश्लिष्टनिर्देशोयं उ ई ई ईकारान्तात् आलोप
आकारान्तादिति आहि भुवोरीट् प्रतिषेधः आहि भुवो री ट् प्रतिषेधो वक्तव्यः अथि अभूत् अस्तिब्रूग्रहणादीट् प्राप्नोति आ
हस्तावन्न वक्तव्यः आचार्यप्रवृत्तिर्ज्ञापयति नाहरीट् भवतीति यदयमाह इति झलादिप्रकरणे चत्त्वं शास्ति नेत दस्तिज्ञा
पकम् अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् किं भूतपूर्वगतिर्यथा विज्ञायेत झलादिर्यो भूतपूर्व इति यद्येवं थवचनमनर्थ
कं स्यात् आथिमेवोच्चारयेत् ब्रुवः पञ्चानामादित आथो ब्रुव इति भवन्ति आधि न वक्तव्यः अस्तिसिचोपृक्त इति हि सकारको
निर्देशः अस्तेः सकारान्तादिति व ध्यादेश वधित्व प्रतिषेधः वध्यादेशे वधित्वयोः प्रतिषेधो वक्तव्यः वधकं पुष्करमिति
स्थानिवद्भावात् स्थानिवद्भावाद्धधित्वे प्राप्नुतः नैषदोषः उक्तमेतत् नायं ण्वुल् किं तु अन्यो यमकशब्दः किरोणादिकः
कृवुक इति यथा ॥ ७॥

१२

शिव

विंतेरः झलादिरिति णलादिषु थले च भूतपूर्वो झलादिरित्यभिभावः आथिमिति निबाधयोरिसर्वे झलाद्य इति णलाद्योपि पूर्वे पू
र्वं झलाद्य इति भावः ॥

अचः परस्मिन् अल्विध्यर्थोयं तथाहि वव्रश्चेति उरदत्वे कृतेन संप्रसारणे संप्रसारणमिति वकारस्य संप्रसारणनिषेधः स्थानिवद्भावाश्रयः ए
वमचितीकः सुचितीकः चकञ्चतीकः इति चिते कपीति दीर्घत्वे कृते ककारस्य त्वान्तेन्यत्पूर्वमिति स्थान्यकाश्रयः स्वरो स्यादुचनाद्वति वार्तानिर
सुदाहरणानि कानिचित्स्थकास्तिविधानीति प्रश्नः अचइति किमर्थमिति अंतरंगत्वादिति अन एव युगपत्प्राप्त्यभावादुर्णादांग बलीय
स्त्वेतदत्र नास्ति यत्राहि युगपदांगवार्णयोः प्राप्तिर्यथा कारककोरति रदिङ्यणादेशयोः यथा चकिरतः किरतीति यणि तुयोः नत्वेतदुपलिश
ते तत्रायं यत्नः श्रौः श्रौति नकारठकारयोः समुदायनिर्देशात् सनुक् ऊकारः स्थानी समुदायनिर्देशसामर्थ्यात् चालोस्य स्येस्यानुपस्था
नं अनर्थकत्वाद्वा एवं च नडोऽऊ स्कृणं किमरयत्र गुणनिषेधार्थमर्थवद्भवति स्थान्यपमिति नयतिदेशेन स्थाश्रयाभर्मान वर्त्यन्ते पथाग्रा

अचः परस्मिन्पूर्वविधौ अचइति किमर्थं किंभः प्रश्नः धूत्वास्पृत्वा आकारां आगत्य प्रश्नोकिंभ इत्यत्र ऊकारस्य शकारः परनिमि
त्तकः तस्य स्थानिवद्भावाच्छे चेति तुक्प्राप्नोति अचइति वचनान्न भवति नैतदस्ति प्रयोजनं क्रियमाणेपि च ऊत्यते अवश्यमत्र तुग
भावे यत्नः कर्तव्यः अंतरंगत्वाद्धि तुक्प्राप्नोति इदं तर्हि धूत्वास्पृत्वा वकारस्य ऊठ परनिमित्तकः तस्य स्थानिवद्भावाच्चीति यणा
देशो न प्राप्नोति अचइति वचनाद्भवति एतदपि नास्ति प्रयोजनं स्थाश्रयमत्रान्तरत्वं भविष्यति अथ चायेवादेशो नास्ता याश्रीयते यथा
श्रीयते नास्तावादेशः ॥ ७ ॥

यणवदास्यन् स्थानिवद्वार्तत्वमिति स्थानियस्य स्थाश्रयधर्माः चाय्योरस्यारैनुसत्यपि स्थाश्रये वल
त्वे बहिरंगत्वात् पर्णोसिद्धत्वात् दुलिडोपाभावः पूर्वत्रासिद्धमिति नाशाननतर्य इति असिद्धत्वनिषेधा घण्प्रवर्तते ऊठः स्थानिवत्वाद्यलोपः कथं ना
शंकितद्वि तिनेधोनादिषादचदत्येयमर्थस्य ज्ञापनस्य स्थापयिष्यमाणत्वात् नोचादेश इति समुदायरूपऊठ् यथाश्रीयत इति य
त्रविधावच् नास्ता वादेश इति समुदायस्यादेशत्वान्न चादेशस्यावयव आदेशीभवति मुख्यसंभवे गौणग्रहणस्यान्या
य्यत्वात् रव्या भोक्ति दीनां नत्र अनुबंधाविमुक्तानां धातुसंज्ञा आदेशावयवत्वान्न प्राप्नोति यत्स्थादेशस्य लुदित्वाद्
र्थास्ता पेक्षा धातुकार्याणि भविष्यंतीत्यदोषः ॥ ७ ॥ ७ ॥ ७ ॥

भा·के
९३

उकाराद्व प्रभृतीति तनादिकृञ्भ्य उरिस्यन्तस्तत्र च वसुरन्तर्भूतः यदीति श्राम्य यस्य प्रत्याहारेन्तर्भावात् शता यइति नत्वात्र श्राशलुक्कातस्यानुम
वशता मुंचतीति शत्रंतस्य सनुक्तत्वादिति भावः तस्मादागमग्रहणेपि शतैव विशेषणीयइति प्रत्याहारग्रहणेपि सत्येव विशेष्यत इत्यदोषः

स्वरे स्वत्वस्यादेशे स्वरेस्वत्वस्यादेशे प्रतिषेधो वक्तव्यः नियुषः पश्य शतुरनुमोनद्यजादी आदात्तादिर्येषस्वरः प्राप्नोति नैषदोषः
अनुमइति प्रतिषेधो भविष्यति अनुमइत्यस्यन्ते न चात्र नुमं पश्यामः अनुमइति नेदमागमग्रहणं किं तर्हि प्रत्याहारग्र
हणं क्व संनिविष्टानां प्रत्याहारः उकारात्प्रभृत्या नुमो मकारात् यदि प्रत्याहारग्रहणं तुनता तुनता अत्रापि प्राप्नोति अनुम्
ग्रहणेन न शत्रंतं विशेष्यते किं तर्हि शतैव विशेष्यते शतायो ऽनुम्क इति अवश्यं चैतदेवं विज्ञेयं आगमग्रहणे हि सति
इह प्रसज्येत मंचता मंचतीति गोः पूर्वणित्वात्स्वरेषु गोः पूर्वणित्वात्त्वस्वरेषु प्रतिषेधो वक्तव्यः चित्रग
वं शबलग्वयं सर्वत्रविभाषा गोरिति विभाषा पूर्वत्वं प्राप्नोति नैषदोषः एङइतिवर्तते तत्रानल्विधाविति प्र
तिषेधो भविष्यति एवमपि हे चित्रगो अयं अत्र प्राप्नोति णित्वं चित्रगुः चित्रगू चित्रगवः गोतोणिदिति णित्वं प्राप्नोति
आत्वं चित्रगुं पश्य शबलगुं पश्य आओत इति आत्वं प्राप्नोति नैषदोषः तपरकरणात्सिद्धं तपरकरणसामर्थ्या
णित्वात्वे न भविष्यतः स्वरवहुगुमान् नगोश्चन्नावर्णे तिप्रतिषेधः प्राप्नोति करोति पिबसोः प्रतिषेधो वक्तव्यः
कुरुपिबेति स्थानिवद्भावाल्लघूपधगुणः प्राप्नोति उक्तं वा किमुक्तं करोतौ तपरकरणात्सिद्धं पिबिरदंत इति

सर्वत्रेति प्रकृतिभावो ऽनेन विधीयते न तु पूर्वत्वं तस्मादेङः पदान्तादिति इति पूर्वत्वं प्राप्नोतीति वाच्यं यद्यत्र प्रकृतिभावस्तदायं प्रसंगउक्तः
उत्तरत्वल्विधित्वात्स्थानिवत्वाभावः

९३

थद्यमिति अन्ते वायोरिति स्थानिवत्त्वात् स्वाहिस्येवलोपः सिद्धः एवं हे मालेइत्यादौ हल्ङ्याब्भ्य इति न यत्यादीनां बिलनानां विगुणे कृते लोपोऽ सारीनां कथं संबुद्धिलोप इति चेन्न नैभ्यो विकृद्दश्यते बाल्यवियाद्धृतिसंनिपातपरिभाषायाअनित्यत्वाच्छब्दसंनिपातनिमित्तो वा नादेशोयज्लोपनिमित्तं प्रतिपद्येत यौनादेश इति वातः समुदायः स्थानि लोपं प्रति निमित्तं तेन वकारः नेय इति स्थानिवद्भावात्त्यक्त्वव्यपदेश सन्निविशेधात्वाश्रयं द्यार्ङ्गं न लभ्यते यद्विरुद्धस्याश्रयं तदतिदेशेन न बाध्यते विरुद्धं तु बाध्यत एवसंख्याकृतस्य व्यपदेशः परस्यापरिहारेण लोके स्थितः नहि निपुत्रो द्विपुत्रव्यप

थद्यमेङः ह्रस्वात्संबुद्धेरिति एङः ग्रहणं करोति नेनदस्तिज्ञापकं गोथमित्स्यात् यत्तर्हि प्रत्याहारग्रहणं करोति इतरथा ह्योत्हस्वादि सेवब्रूयात् इदं तर्हि प्रयोजनं वाभ्रवीयाः वांतादेशः परनिमित्तकस्तस्य स्थानिवद्भावाद्वलस्त्र्येतस्येनियलोपेन प्राप्नोति पूर्वविधाविति वचनाद्भवति एतदपिनास्ति प्रयोजनं स्वाश्रयमत्र हल्त्वं भविष्यति अथवायोत्रादेशो नासावाश्रीयते यश्वाश्रीयते नासावादेशः इदं तर्हि प्रयो जनं नैधेयः आकारलोपः परनिमित्तकस्तस्य स्थानिवद्भावाद्द्व्यज्लक्षणो ढक् न प्राप्नोति पूर्वविधाविति वचनाद्भवति अथ विधिग्रहणं किम् र्थं सर्वविभक्त्यंतः समासो यथा विज्ञायेत पूर्वो विधिः पूर्वविधिः पूर्वस्माद्विधिः पूर्वविधिरिति कानि पुनः पूर्वस्माद्विधौ स्थानिवत्त्वस्य प्रयोजनानि बेभिदिता चेच्छिदिता माथितिकः अपीपचत् बेभिदिता चेच्छिदितेति अकारलोपे कृते यलोपेव एकाजनुदात्तलक्षण इट् प्र तिषेधः प्राप्नोति स्थानिवद्भावान्न भवति माथितिकः अकारलोपे कृते तान्तात्क इति कादेशः प्राप्नोति स्थानिवद्भावान्न भवति ॥ शिवसांब ॥

देशं लभते अपीपचत् पूर्वस्मिन् पूर्वस्येव पञ्चाविध्यर्थ आक्षिप्तः पूर्वस्य कार्येकर्तव्ये इति कार्यमेव विधिरिति प्रश्नः बेभिदितेति बेभिदशब्दा त्तनिमित्यत्वाद्लोपयलोपे तत एकाच इतीट्प्रतिषेधः प्राप्नोति उपदेशग्रहणं द्वयोरपि विशेषणं उपदेशे एकाच उपदेशे नुदात्तादिति हि प्रयोग इति चेन्न अलोपस्य तु स्थानिवत्त्वेन व्यवधानादिट्प्रतिषेधाभावः माथितिक इति यदाठस्य क इति संघातग्रहणं तदा स्थानिवद्भा वादिकस्य कादेशः प्राप्नोति वर्णनिर्देशे तु अल्विधित्वात्कादेशस्याप्रसंग एवसंनिपातपरिभाषां वानाश्रित्येत दुक्तम् श्रीसांब ॥ ७

मा.के.
९४

पुवजानिरिति अयुस्य न तातु नादीनां आशस्याकारलोपो न भवति अन्यथाकारस्य निङि कृते परलोपे चानङः स्थानिवद्भावात्स्यतथ तोराकारलोपः स्यात् न चासिद्धवदत्राभात् इत्याकारलोपे कर्तव्ये सिद्धः समानस्य त्वाश्रयत्वात् पुनरिति यस्येति लोपे सिद्धे पादः तस्य तत्र पुनर्लोपवचनं स्थानिवत्त्वनिषेधार्थं पुनर्लोपवचने सति लुप्यत एवाकारः कार्येनाश्रीयत इत्यर्थः ननु चात्राधीति यस्येति लोपे सिद्धे

इदं तर्हि प्रयोजनं आकारांतस्य वो लोपः परनिमित्तकः तस्य स्थानिवद्भावात्स्यठा कस्तीति कत्वं प्राप्नोति अचः इति वचनान्न भवति एतदपि नास्ति प्रयोजनं वक्ष्यत्येतत्सर्वं वासिद्धं न स्थानिवदिति इदं तर्हि प्रयोजनं आगत्य अधिगत्य अनुनासिकलोपः परनि मित्तकः तस्य स्थानिवद्भावात् स्वस्येति तुक् न प्राप्नोति अचः इति वचनाद्भवति अथ परस्मिन्निति किमर्थम् पुवजानिः द्विप दिका वैयाघ्रपद्यः आदीध्ये युवजानिः पञ्चजानिरिति जायायानिङ् अपरनिमित्तकस्तस्य स्थानिवद्भावाद्धलीति यलो पो न प्राप्नोति परस्मिन्निति वचनाद्भवति नेनदस्ति प्रयोजनं स्वाश्रयमत्र वलत्वं भविष्यति अथवा यो त्रादेशः नासा वाश्रीयते यश्चाश्रीयते नासावादेशः इदं तर्हि प्रयोजनं द्विपदिका त्रिपदिका पादस्य लोपो परनिमित्तकः तस्य स्थानिवद्भावा त्पद्भावो न प्राप्नोति परस्मिन्निति वचनाद्भवति एतदपिनास्ति प्रयोजनं पुनर्लोपवचनसामर्थ्यात्स्थानिवद्भावो न भविष्यति इदं तर्हि प्रयोजनं वैयाघ्रपद्यः ननु चात्रापि पुनर्वचनसामर्थ्यादेव न भविष्यति अस्ति ह्यन्यत्पुनर्लोपवचने प्रयोजनं किं यत्र भसंज्ञा नव्याघ्रपात् श्येनपादिति इदं चाप्युदाहरणं आदीध्ये आवेव्ये इकारस्य एकारो परनिमित्तकः तस्य स्थानिवद्भावात् यीवर्ण योर्दीधीवेव्योरिति लोपः प्राप्नोति परस्मिन्निति वचनान्न भवति अथ पूर्वविधाविति किमर्थं हे गौः बाभ्रवीयाः नैधेयः हे गौरिति ओकारः परनिमित्तकस्तस्य स्थानिवद्भावादेङ् ह्रस्वात्संबुद्धेरिति लोपः प्राप्नोति पूर्वविधाविति वचनान्न भवति नैतदस्ति प्रयो जनं आचार्यप्रवृत्तिर्ज्ञापयति न संबुद्धिलोपे स्थानिवद्भावो भवतीति ०॥

ह्रस्वलोप इति पुनर्लोपवचनादित्यर्थः आदीध्य इति इत्ये कृते लोपः प्राप्नोति विधिग्रहणं त्वत्र अनित्यत्वात् कस्यात् तस्य ... रनेकाचइति

यत्रस्थानिवत्त्वं ... स्थानिवत्त्वनिषेधार्थं ० ॥

९४

स्वाश्रयाद् इति विधिग्रहणं स्वाश्रयनिवृत्त्यर्थं व्याख्यातं इति स्वाश्रयाद् इत्यस्य व्याख्यायते शब्दान्तरं आश्रीयं लक्षणं तेन ज्ञापकाश्रयाद् इत्यर्थः द्वयोरेकस्य उत्तरस्य देश(?) र्णे किरतौ लवने इत्यादि ज्ञापकात् आदेशाश्रयकार्यभावस्य निमित्तभिति आसन्निस्याद् इत्युक्त निमित्तात् पूर्वस्य विधिरिति सिद्धः स्थानिवद्भावः सर्वाभिषिक्तमिति सर्वत्र इत्युदाहृतत्वात् पटुई आइति क्विपरयणादेशेनाकारस्य व्यवधानात् प्रभः व्यवहितेपीति पूर्वस्येति ९

यद्येवं तर्हि स्वविधावपि स्थानिवद्भावो भवति इहाभ्यां देयं लवनं अत्रापि प्राप्नोति द्वाभ्यामित्यत्र तस्य स्थानिवद्भावाद्दीर्घत्वं न प्राप्नोति दे
यमिति ई तस्य स्थानिवद्भावाद्गुणो न प्राप्नोति लवनमिति गुणस्य स्थानिवद्भावाद्वादेशो न प्राप्नोति नैष दोषः स्वाश्रयाद् एतेन विधयो भवि
ष्यन्ति न तर्हि वक्तव्यं अपरविधाविति न वक्तव्यं पूर्वविधाविति एव सिद्धं कथं न पूर्वग्रहणेनाचोभिसंबध्यते अजादेशः परनिमित्तः
कः पूर्वस्य विधिं प्रति स्थानिवद्भवति कुतः पूर्वस्य आदेशादिति किं तर्हि निमित्तमभिसंबध्यते अजादेशः परनिमित्तकः पूर्वस्य वि
धिं प्रति स्थानिवद्भवति कुतः पूर्वस्य निमित्तादिति अथ निमित्तेनाभिसंबध्यमाने यदेतस्य योगस्य मूर्धाभिषिक्तमुदाहरणं तदपि संग
हीतं भवति किं पुनस्तत् पट्व्याम इति बाढं संगृहीतं ननु च ईकारयणा व्यवहितत्वान्नासौ निमित्तात् पूर्वो भवति व्यवहितेपि पूर्वशब्दो व
र्तते तद्यथा पूर्वं मथुरायाः पाटलिपुत्रमिति अथवा पुनरस्त्वादेश एवाभिसंबध्यते कथं यानि स्वविधौ स्थानिवद्भावस्य प्रयोजना
नि तेतानि संति इहलावत् आयन् धिन्वंति कृण्वंतीति अयं विधिशब्दोस्ति एव कर्मसाधनः विधीयते विधिरिति अस्ति भावसाध
नः विधानं विधिरिति तत्र कर्मसाधनस्य विधिशब्दस्योपादानेन सर्वमिष्टं संगृहीतमिति कृत्वा भावसाधनस्य विधिशब्दस्योपादानं
विज्ञास्यते पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति पूर्वस्यादेति स्थानिवद्भवतीति एवमाट् भविष्यति इद्दनं भविष्यति दध्यत्र मध्वत्र
चक्रतुश्चक्रुरिति परिहारं वक्ष्यति ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ॥

साक्षान्निर्देशान्ताभिर्विति निर्दिष्ट इत्यस्यानुपस्थानादिति भावः भावसाधनस्येति भावसाधन एव विधिशब्दो व्यापकत्वादाश्रीयते पूर्वस्येः
तिरवषष्ठी संबंधसामान्ये विज्ञायते इद्दनेति विधिग्रहणं स्वाश्रयनिवारणार्थमतीडभावः ॥ श्रीसांबसदाशिव ॥ ९ ॥

एतद्वनास्तितस्यदोषः संयोगादिलोपलक्षणत्वे

भा॰ के॰ ९५

अपीपचन्निति सेरितश्चेतीकारलोपे कृते एकदेशविकृतमनन्यवदिति णिरेवायं तत्रांतादेशे कृते चङः कारस्य परस्य पेकृते तस्यादि वद्भावाज्जस प्राप्नोति
स्थानिवद्भावेन णिलोपस्य परत्वस्य वा व्यवधानान्न भवति ननु पूर्वस्माद्विधौ स्थानिवद्भाव कथं रैगोरित्यादि सिध्यति उच्यते अचोयः पूर्वस्तस्मान्निमित्त
त्वेनाश्रितादित्याश्रयणात् तथाहि गोशब्दे ओकारात् पूर्वो गकारो न च तस्मादत्र विधिरस्ति विधिमात्रमिति अचः परस्मिन् पूर्वस्येत्येतेन स्थानिवद्भा
वे सिद्धे पुनर्विधावितिवचनं नियमार्थं स्थानिवदेव यथा स्यात् मा भूत् स्वाश्रयमित्यर्थः अनाश्रीयमाणायामिति कार्येनिमित्तत्वेनेत्यर्थः आय१
न्निति अजादेशाद्विधानात् स्वविधिराट् दध्यत्रेति पूर्वत्रासिद्धे न स्थानिवदिति विधित्यत्र संयोगादिलोपस्य संयोगोपलक्षितलोपोपलक्ष
अपीपचन्निति एकादेशे कृते अभ्यस्तात् झेर्जुस् भवतीति जुस् भावः प्राप्नोति स्थानिवद्भावान्न भवति नैतानि संति प्रयोजनानि प्रातिपदिक
निर्देशोयं प्रातिपदिकनिर्देशाश्चार्थतंत्रा भवंति न कांचित् प्राधान्येन विभक्तिमाश्रयंति तत्र प्रातिपदिकार्थो निर्दिष्टः यां यां विभक्तिमाश्रयितुं बु
द्धिरुपजायते सा साश्रयितव्या इदं तर्हि प्रयोजनं विधिमात्रे स्थानिवत् यथा स्यात् अनाश्रीयमाणायामपि प्रकृतौ वाय्वोः अध्वर्य्वोः लोपो व्योर्वलीति
यलोपो मा भूदिति अस्ति प्रयोजनमेतत् किं तर्हीति अपरविधाविति तु वक्तव्यं किं प्रयोजनं स्वविधावपि स्थानिवद्भावो यथा स्यात् कानि पुनः१
स्वविधौ स्थानिवद्भावस्य प्रयोजनानि आयन् आसन् धिन्वंति कृण्वंति दध्यत्र मध्वत्र चक्रतुः चक्रुः इहतावदायन् आसन्निति यणस्योयण१
लोपयोः कृतयोरनजादित्वादाडजादीनामित्याण्न प्राप्नोति स्थानिवद्भावाद्भवति धिन्वंति कृण्वंतीति यणादेशे कृते वलादिलक्षण इ
ट् प्राप्नोति स्थानिवद्भावान्न भवति दध्यत्र मध्वत्रेति यणादेशे कृते संयोगांतलोपः प्राप्नोति स्थानिवद्भावान्न भवति चक्रतुश्चक्रुरि
ति यणादेशे कृते नक्त्वात् द्विर्वचनं न प्राप्नोति स्थानिवद्भावाद्भवति ॥ ॥ ॥ श्रीसांबसदाशिवायनमः ॥

णार्थत्वात् पदांतविधिं प्रति नेत्ययमपि प्रतिषेधोत्र नास्ति पदांतविधानस्य प्रतिषेधो न वलोपो ऽभावात्मकत्वात् पदांतः चक्रतुरिति अत्र सानुकस्य द्विर्वच
नमिति स्वविधिर्भवति नतश्च द्विर्वचनेचीत्येतन्न वक्तव्यं भवति नन्व परविधावित्युच्यमाने कथं बेभिदितेत्यादि संगृह्यते उच्यते निमित्तापेक्षयापर
त्वविज्ञानात् तथाहि बेभिदितेत्यत्राकारलोपस्य निमित्तमार्धधातुकं न च तस्मात् परस्य विधिः किं तर्हि तस्यैवेति सिद्धः स्थानिवद्भावः एवमाक्षि
तिकः अपीपचन्नित्यत्रापि वाजव्यः रैगोरित्यत्र तु स्थानिवद्भावः प्राप्तः एडिति प्रत्याहारग्रहणान्न भवति वाभ्रवीयाइत्यत्र यो त्रादेशेनासावाश्री
यत इति परिहारः नैधेय इत्यत्र तु निमित्तात् परस्य ठको विधिरिति स्थानिवत्त्वाभावः ४

९६

असिद्धंबहिरंगेति नित्याद्यंतरंगंबलीयइतिन्यायात्प्रथमंपूर्वस्ययणितिभावः अवश्यंचेतिस्थानिवद्भावस्ययणोपीत्यर्थः कर्त्र्येति कर्त्री ई आइति स्थितेयदि
नहीति षड्भ्यो लुगित्यादावुभयत्रास्तीति भावः काक इति अत्र ककारान्तः शब्दः उभयत्रापीति जश्शसोर्ब्वषकारान्तलक्षणं कर्तव्यः षण्णामिति नवुट् अप्रि हूमिति ठकारान्तस्य यणा णोपि ठुत्वस्यासिद्धत्वात्षकारान्तस्य स्वरूपस्य ग्रहणं भविष्यतीत्यर्थः मंत्राद्यर्थमिति मंत्रादयः शब्दस्य संज्ञाः शास्त्रसामर्थ्यादिति दवसुन्नयुक्ता रोको जातीनामिति तत्रोपादाना यजुर्षि ऋचि मंत्र इति च स्वरूपं न गृह्यते नहि तथाविधलक्ष्यमस्तीति भावः मंत्रादिशब्दसहचरित इति साहचर्येण [illegible] सिद्धस्यैवार्थस्यानुगमात् सितद्विशेषाणामिति वृक्षस्य च गस्य इत्येवं निर्देशः कर्तव्यः एतदपि न्यायसिद्धं तुल्यजातीयानां द्वंद्व एकवद्भवतीति वक्ष्य नहि षकारान्ता संज्ञा काचिदिति ठकारान्ता अपि ठञश्त्वं तस्यासिद्धत्वात् षकारान्ता मंत्राद्यर्थं नहि दं वक्तव्यं मंत्रेऋग्यजुषीति यदुच्यते तन्मंत्र श ब्देऋक्शब्दे यजुःशब्दे च माभूत् मंत्राद्यर्थमिति वक्तव्यं सामर्थ्याद्धि गतेः सिद्धं मंत्राद्यर्थमिति ते वेन्न किंकारणं शास्त्रस्य सामर्थ्याद् र्थस्य गतिर्भविष्यति मंत्रे ऋग्यजुषीति यदुच्यते मंत्रशब्दे ऋक्शब्दे यजुःशब्दे च तस्य कार्यस्य संभवो नास्ति इति कृत्वा मंत्रादिशब्द सहचरितो योर्थः तस्य गतिर्भविष्यति साहचर्यात् सितद्विशेषाणां वृक्षाद्यर्थमिति निर्देशः कर्तव्यः ततो वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति किं प्रयोजनं वृक्षाद्यर्थं विभाषा वृक्षमृगेति प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः पित्पर्यायवचनस्य च स्वाद्यर्थं पिन्निर्देशः कर्त व्यः ततो वक्तव्यं पर्यायवचनस्य च विशेषाणां च ग्रहणं भवति स्वस्य च रूपस्येति किं प्रयोजनं स्वाद्यर्थं स्वे पुषः स्वपोषं पुष्णाति रै पोषं धनपोषं विद्यापोषं अश्वपोषं गोपोषं जित्पर्यायवचनस्यैव राजाद्यर्थं जिन्निर्देशः कर्तव्यः ततो वक्तव्यं पर्यायवचनस्यैव ग्रहणं भवति किं प्रयोजनं राजाद्यर्थं सभा राजामनुष्यपूर्वा इनसभं ईश्वरसभं तस्यैव न भवति राजसभा तद्विशेषाणां च न भवति पुष्यमित्रसभा चंद्रगुप्तसभा झित्स्य च तद्विशेषाणां च मत्स्याद्यर्थं झिन्निर्देशः कर्तव्यः ततो वक्तव्यं तस्य च ग्रहणं भवति तद्विशेषाणां भवति किं प्रयोजनं मत्स्याद्यर्थं पक्षिमत्स्यमृगान्हंति मात्स्यिकः तद्विशेषाणां शाफरिकः शाकुलिकः पर्यायवचनानां न भवति अ जिह्मान्हंति अनिमिषान्हंति अस्य कस्य पर्यायवचनस्येष्यते मीनान्हंति मैनिकः स्वं रूपं शब्दस्याशब्दसंज्ञा तेन पर्यायाणां युगपत्प्रयोगाभावात्सामान्यविशेषाणां वाच्याभावात्सामान्यशब्देन सर्वविशेषाणामाक्षेपात् धवखदिरावित्यादौ सिद्धं [illegible] भावादि शेषाणामेव प्लक्षन्यग्रोधादीनां ग्रहणं सिद्धं पित्पर्यायवचनस्य चेति वाच्यं स्वरूपस्य विशेषाणां च ग्रहणमिदं वाच्यं किंकरं जित् पर्यायेति इत्यादि सिद्धमित्याह अराजेति पर्युदासमाश्रित्य तेन राजशब्दसदृशानां तत्पर्यायाणामेव ग्रहणं सिध्यति झित्तस्य चेति इदं वाचनिकमेव मत्स्याद्यर्थमिति मृगपक्षिणोरपि निर्देशस्तत्फलकं भाष्यकर्तव्यः अस्य कस्येति इदं वाचनिकमेव इयमिष्टिः

नवेति शब्द उपलब्धोर्थं प्रत्याययति न सत्तामात्रेण चक्षुरादीनि तु सत्तामात्रेण विषयमवगमयंति अर्थस्य वशात्कीयकार्ये कश्चिद्योग्यत्वात्प्र त्यासत्त्यास्य बोधात्तः शब्दो ग्रहीष्यते न विप्रकृष्टः शब्दान्तरमिति भावः शब्दपूर्वक इति अस्योपलब्धुः शब्दपूर्वक इत्यर्थः अशब्दसंज्ञेति न्यायात्स्वरू पग्रहणासिद्धेः शब्दसंज्ञायां स्वरूपग्रहणमाभूदिति एवमर्थमिदमित्यर्थः अन्यथोपसर्गे घोः किरिति किं प्रयोजनं घो धातोः शब्दार्थत्वात् शब्देनोच्चारितेनार्थो गम्यते गामानय दध्यशानेति अर्थ आनीयते अर्थश्च भुज्यते अर्थे कार्यस्यासंभवात् इह हि व्याकरणे अर्थकार्य स्यासंभवादग्नेर्ढगिति न शक्यते अंगारेभ्यः परो ढक् कर्तुं शब्देनार्थगतेरर्थे कार्यस्यासंभवात् यावंतस्तद्वाचिनः शब्दास्तावद्भ्यः सर्वेभ्य उत्पत्तिः प्राप्नोति इष्यते तस्मादेव स्यादिति तद्व्यतिरेकेण यत्नं न सिध्यतीति तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनं एवमर्थमिदमु च्यते न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः न वा एतत्प्रयोजनमस्ति किं कारणं शब्दपूर्वको ह्यर्थे संप्रत्ययः आत श्च शब्दपूर्वकः यो पि ह्यसावाहूयते नाम्नानामेव यदानेन नोपलब्धो भवति तदा पृच्छति किं भवान् आहेति शब्दपूर्वकश्चार्थे संप्रत्ययः इह व्याकरणे शब्दे कार्यस्य संभवः नार्थे संभवस्तस्मादर्थनिवृत्तिः तस्मादर्थनिवृत्तिर्भविष्यति इदं तर्हि प्रयोजनं अशब्दसंज्ञे ति वक्ष्यामीति इह मा भूत् दाधा घ्वदाप् तरप्तमपौ घ इति शब्दसंज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात् शब्दसंज्ञाप्रतिषेधोन र्थकः शब्दसंज्ञायां स्वरूपविधिः कस्मान्न भवति वचनप्रामाण्यात् शब्दसंज्ञा वचनसामर्थ्यात् ननु वचनप्रामाण्यात्संज्ञिनां संप्रत्य यः स्यात् स्वरूपग्रहणाच्च संज्ञायाः एतदपि नास्ति प्रयोजनं आचार्यप्रवृत्तिर्ज्ञापयति शब्दसंज्ञायां न स्वरूपविधिर्भवतीति यदयं ष्णान्ता षडिति षकारान्तायाः संख्यायाः षट्संज्ञां शास्ति इतरथा हि वचनप्रामाण्यान्नकारान्तायाः संख्यायाः स्यात् स्व रूपग्रहणाच्च षकारान्तायाः नैतदस्ति ज्ञापकं

ननु दाधाघ्वः कुमारी घ इत्यत्र घरूपकल्पेति ह्रस्वः प्रसज्येत इह ल्यघोरित्यत्र तु घुशब्दस्याकारान्तत्वाभावाद्दाधामेव ग्रहणं सिध्यति वचन प्रामाण्यादिति प्रदेशेषु संज्ञिप्रत्यायनार्थं संज्ञाकरणमिति सामर्थ्यात्स्वरूपग्रहणं न भविष्यति ननु चेति उभयगतिरिह शास्त्रे दृष्टा संख्या कर्मकरणादिष्विति इहापि स्वरूपस्य संज्ञिनश्च प्रदेशेषु ग्रहणं स्यात् श्री

अनएत्वादिति अत्रहि सूत्रेप्रत्याहारसंनिविष्टाएवगृह्यंते त्वात्मानिक्रियाविरोधात् अनिष्यादाद्ग्रहणकशास्त्रांतराभावाद्वात्रसूत्रे कारादिभिरका
रादीनांग्रहणासंभवोन्येषुतुप्रदेशेषु अनेनसूत्रेणाकारादिभिरकारादेर्योग्रहमाणात्अन्नादिकार्यांणिलभंते भाष्यमानेनेति प्रतीयतेविधीयत
इतियौगिकस्यात्र प्रत्ययस्यग्रहणमितिभावः किमर्थंपुनरिति आकृतिनिर्देशात्सिद्धमितिप्रश्नः अण्सवर्णस्येति उदिद्ग्रहणस्याविचारयिष्यमा
णत्वादेवमुक्तं यकिंनिर्देशेकालादिभिन्नस्यग्रहणंनप्राप्नोतीतिभावः प्रत्याहारग्रहणइति अकोदीर्घइत्यत्रसंज्ञया प्रत्यायनमिकारादीनां
नतैस्तेषांग्रहणंनस्यात् यत्रस्वरूपेणोच्चार्यंते अस्यच्वौयस्येतिचेतितत्रैवेषांग्राहकत्वंनस्यात् अनुपदेशादिति अनुच्चारणादित्यर्थः नहिप्र

अनएत्वान्नग्रहीष्यति एवंतर्हि सिद्धेसतियदप्रत्ययइतिप्रतिषेधंशास्ति तज्ज्ञापयत्याचार्यः भवत्येषापरिभाषाभाव्यमानेनसवर्णानां
ग्रहणंनेति किमर्थंपुनरिदमुच्यते अण्सवर्णस्येति स्वरानुनासिक्यकालभेदात् अण्सवर्णस्येत्युच्यते स्वरभेदादानुनासिक्यभेदात्
कालभेदाच्चाण्सवर्णान्नगृह्णीयात् धिष्यतेचसवर्णग्रहणंस्यादिति नचांतरेणयत्नंनसिध्यतीत्येवमर्थमिदमुच्यते अस्तिप्रयो
जनमेतत् किंतर्हीति तत्रप्रत्याहारग्रहणेसवर्णाग्रहणमनुपदेशात् तत्रप्रत्याहारग्रहणेसवर्णानांग्रहणंनप्राप्नोति अकःसवर्णेदीर्घ
इति किंकारणंअनुपदेशात् यथाजातीयकानांसंज्ञाकृता तथाजातीयकानांसंप्रत्यायिकास्यात् ह्रस्वानांक्रियते ह्रस्वानामेवसंप्रत्या
यिकास्यात् दीर्घाणांनस्यात् ननुचह्रस्वाः प्रतीयमानादीर्घान्संप्रत्याययिष्यंति ह्रस्वसंप्रत्ययादितिचेदुच्चार्यमाणसंप्रत्यायक
त्वाच्छब्दस्यावचनं ह्रस्वसंप्रत्ययादितिचेदुच्चार्यमाणःशब्दःसंप्रत्यायकोभवति नसंप्रतीयमानः नतथा अगिरुत्केसंपाठम
गम्यतेनास्याअर्थोगम्यते ॥ ॥

प्रत्याहारेदीर्घाउच्चारिताः यतोगादिभिर्दन्तमिर्गृह्येरन् अथवाकोचीत्यादावनुच्चारितादिकारादयोदीर्घाणांप्रत्यायकानस्युरित्यर्थः ननुचे
ति उच्चार्यमाणेत्वप्रत्यायकेभवितव्यं इतिनास्ति सन्निहितास्तेप्रत्यायकाः तत्रसंनिधानंयथायोगमस्त्येवेत्यर्थः उच्चार्यमाणेति प्रतीयमा
नोहिप्रधानंसतक्कथमन्यप्रत्यायनेगभावंतदैवगडेदित्यर्थः शब्दस्यावचनमिति प्रतीयमानशब्देनान्यस्याप्रत्यायनमित्यर्थः अगिरुत्क
इति यत्सवर्णप्रकरणवशाद्विशिष्टसन्निवेशापित्रकशब्देनककुप्रत्यायंत्यनेनतथापि सास्वार्थंनप्रत्याययतीत्यर्थः ॥श्रीसांब॥श्री॥

भा॰कै॰
१२०

अणुदित् अप्रत्ययइति किमर्थमिति किं यस्यप्रत्ययसंज्ञाविहितात्सुप्रतिषेधः उत यः प्रतीयते विधीयतइति यौगिकः प्रत्ययस्तस्यापीतिप्रश्नः इनइति विशेष
दित्वाद्यस्यादाधत्वेबाधितात्रिमात्रआशिशः प्राप्नोति बभूवेति अनुनासिकः प्राप्नोति अनगुरिति आमपियप्राप्नोति यत्सूमिति ग्रहेरेवंदीर्घोनान्ये
भ्यइतिनियमाभावादितिभावः नियमार्थमिति ग्रहोपूर्वनतु ह्रस्वइत्येवमर्थंस्यादित्यर्थः दूनोवेति ननुचववरिथेतिलिटिदीर्घमात्रेदिते [illegible]
दितिकथंज्ञापकं एवंतर्हि इत्तइत्यत्रापि अलिटिसनुवर्तनालिटिदीर्घनिषेधात्प्रत्ययांतस्यानिटो धात्वग्रहणंज्ञापकं इटइत्यग्रहणाभावस्य प्रत्ययभूयानि
ति साधारणोऽसाधारणश्चेत्यर्थः प्रत्ययस्तन्वर्थसंज्ञाकृता येनार्थंप्रतीयंतिसप्रत्ययोयंनदीर्घप्लुतयोरर्थस्याभिधानमस्ति प्रत्ययइति प्रतीयं

अणुदित्सवर्णस्यचाप्रत्ययः अप्रत्ययइति किमर्थं सनाशंसभिक्षउः असांप्रतिकं अग्न्यलमिदमुच्यते अप्रत्ययइति अप्रत्ययादेशटिकित्
इतिवक्तव्यं प्रत्ययेत्यादेशे इत्यनेन इनः इहदितिलविता लवितं किति बभूव मिति हेअनद्युदितःपरिहारः आचार्यप्रवृत्तिर्ज्ञापयति
नरितासवर्णानांग्रहणंभवतीति यदयंग्रहोलिटिदीर्घत्वंशास्ति नैतदस्तिज्ञापकं नियमार्थमेतत्स्यात् ग्रहःअलिटिदीर्घत्वेति यत्तर्हि
तेवेतिविभाषांशास्ति सर्वेषामेषपरिहारः भाव्यमानेनसवर्णानांग्रहणंनेत्येवंनभविष्यति प्रत्ययेभूयान्परिहारः अनभिधा
नात्प्रत्ययःसवर्णान्नग्रहीष्यति यावद्धि प्रत्ययःसवर्णग्रहणेनगृह्णीयात् नतेरर्थस्याभिधानंस्यात् अनभिधानान्नभविष्य
ति इदंतर्हिप्रयोजनं इहकेचित्प्रतीयंते केचित्प्रत्याय्यंते ह्रस्वाःप्रतीयंते दीर्घाःप्रत्याय्यंते यावद्ब्रूयात् प्रत्याय्यमानेनसवर्णानां
ग्रहणंनेति तावदप्रत्ययइति कंपुनर्दीर्घःसवर्णग्रहणेनगृह्णीयात् ह्रस्वं यत्नाधिक्यान्नग्रहीष्यति कुतंतर्हिगृह्णीयात्

तेप्रयंते उच्चार्यंते अगादिभिरुन्नीत्स्वित्यर्थः दीर्घाइति ह्रस्वैर्गृहीतैरणस्त्वादीर्घाणांग्रहणात् तत्रापिन आविभक्तावित्यत्राकारोग्राहको
माभूदित्यर्थः यथैवहि अणन्तादाकारादपरत्वादिकार्यं प्रतिपद्यतेतथायाद्रूपत्वमपिप्रतिपद्येतेतिभावः कथंपुनरप्रत्ययइत्यस्यार्थः प्र
त्याय्यमानस्येत्यर्थः अंतर्भावितण्यर्थादेतेःकर्मण्यच्विधानात् यत्नाधिक्यादिति ननुचह्रस्वोच्चारणेऽर्धमात्रिकस्यमात्रिकत्वेस्यादिति
दीर्घोच्चारणमुक्तयार्थंस्यात् एतत्तुनेनिरूपितंन्याय्यएवात्रपरिहारोभिधास्यते ॥

१२०

एवंव्यक्तिपक्षेसत्यपिसवर्णारंभेनास्तीत्यसिद्धिराकृतिपक्षेतुसत्वंनकर्तव्यमित्याह सवर्णइति प्रत्याहारेष्वनुवृत्तिनिर्देशेन सर्वजातिरुपदिश्यते नांतरीयकत्वम्
नुच्चारणं अत्वंचरूपदीर्घप्लुतेष्वपिविद्यते यथागोशब्दःकृष्णोपिगोपिंडेस्थूलेकेशशुक्लेचेतिभावः ननुवान्येति श्रुतिभेदादिदमन्यमानस्यप्रश्नः अनन्यत्वाच्चे
ति सत्यपिश्रुतिभेदे एकाकृतियोगोस्त्येव यथा कृशेस्थूलेपिचगोपिंडेगोत्वयोगः सोहीति अभेदस्यापिप्रत्युभिज्ञानात्सद्भावइत्यर्थः यस्त्विति अ
त्रापि यदाप्राणीनहंतव्यइति प्राणित्वेनाश्रयणं तदाऽभेदएवगवाश्वरूपाश्रयेतुभेदइतिभावः अष्टनआविभक्तावित्यत्रतुयत्नाधिक्याद्दीर्घग्रहणमि
समवेतंसामान्यंगृह्यते यथापूर्वंवयाब्राह्मणः प्रस्कन्नेयइतिविशिष्टव्यक्तिस्थब्राह्मण्यमाश्रीयते अपरआहेति आकारवशब्दार्थः आदिशब्दार्थो स्त
एवंतर्हि सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् सवर्णेऽण्ग्रहणमपरिभाष्यंकुतः आकृतिग्रहणात् अवर्णाकृतिरुपदिष्टासासर्वमवर्णकुलं
ग्रहीष्यति तथेवर्णाकृतिः तथोवर्णाकृतिः ननुवान्याकृतिरकारस्यरेचाकारस्यच अनन्यत्वात्र अनन्याकृतिरकारस्याकारस्यच अनेकांतो
ह्यनन्यत्वकरः योह्यनेकांतेनभेदः नासावन्यत्वंकरोति तद्यथा नयोगोश्चगोश्चभेदः सोन्यत्वंकरोति यस्तुखलुगोश्चाश्वस्यचभेदः सोन्यत्वं
करोति अपरआह सवर्णेऽण्ग्रहणमपरिभाष्यंआकृतिग्रहणादनन्यत्वं सवर्णेऽण्ग्रहणमपरिभाष्यं आकृतिग्रहणादनन्य
त्वंभविष्यति अनन्याकृतिरकारस्याकारस्यच अनेकांतोह्यनन्यत्वकरः योह्यनेकांतेनभेदोनासावन्यत्वंकरोति तद्यथानयोगोश्च
गोश्चभेदः सोन्यत्वंकरोति यस्तुखलुगोश्चाश्वस्यचभेदः सोन्यत्वंकरोति तद्ग्रहणेषु एवंचकृत्वाहल्ग्रहणेषुसिद्धं
भवति झलोझलि अवात्तां अवात्तं यत्रैतन्नास्त्यण्सवर्णान्गृह्णातीति अनेकांतोह्यनन्यत्वकरइत्यस्यार्थम्

पि अभेदत्वस्यचेत्यस्तीति सर्वव्यक्तीनामभेदाश्रयणादेकव्यक्तिनिर्देशेपिग्रहणंसर्वव्यक्तीनांसिध्यतीत्यर्थः अत्रपक्षेआकृतिग्र
हणमाकृतेरेकाकारप्रत्ययानिमित्तत्वेनज्ञातिपरिरुच्यते तद्ग्रहेति यथाकृतिग्रहणादणुसकार्यंसिध्यतितथाहल्ग्रहणेपिआकृति
ग्रहणादेवसिध्यति व्यक्तिनिर्देशपक्षेतुएकैवतकारव्यक्तिर्झल्व्यपदेशमासादयेत्पूर्वापरावयवत्वाभावान्निमित्तलोपोनस्यातअ
बुद्धेसादावेवतुस्यात् धातुप्रत्ययावयवयोस्तकारयोर्भेदात्तेनेत्याह अनेकांतइति

मा.कै. एवंतर्हीति अइउणित्यत्रह्रस्वोरएवाकारादिभिराकारादीनांग्रहणान्निपामप्यगादिसंज्ञाभिर्ग्रहणंभविष्यतीत्यर्थः उपदेशइति प्रत्यायनमित्यर्थः
१२१ करिष्यन्तइति आख्यास्यते अवरकालत्वादिति निष्पन्नेषुयोगेषुनयान्यत्रास्यत्वाद्विस्पादौसवर्णानांग्रहणंभवति नागेषुनापिस्वात्मनिअनिष्पन्नत्वादि
तिभावः सर्वेषुनिअर्थक्रमेणापिनशब्दक्रमेणैवेत्यर्थः वर्णानामुपसत्ताविति अइउणित्यत्रद्वयमेववर्णानाकारादीनुत्पादयतीत्येतन्नास्ति तस्मादि
ति

एवंतर्हि वर्णपाठएवोपदेशःकथ्यते वर्णपाठउपदेशइतिचेदवरकालत्वात्परिभाषायाअनुपदेशः वर्णपाठउपदेशइतिचेदवरकालत्वात्प
रिभाषायाअनुपदेशः किंपारास्त्राक्रियतेइत्यतोवरकालानेत्याह सर्वथावरकालेवर्णानामुपदेशस्तावत् उपदेशोत्तरकालाइत्संज्ञाइत्संज्ञोत्तरका
लआदिरंत्येनसहेतेतिप्रत्याहारः प्रत्याहारोत्तरकालासवर्णसंज्ञासवर्णसंज्ञोत्तरकारमणुदित्सवर्णस्यचाप्रत्ययइतिएषाउपदेशोत्तरका
लाअवरकालावर्णानामुपसंतोतिभिन्नत्वायपकल्पयिष्यतइत्येतन्न तस्मादुपदेशः तस्मादुपदेशः कर्तव्यः तत्रानुवृत्तिनिर्देशेसवर्णा
ग्रहणमनण्त्वात् तत्रानुवृत्तिनिर्देशेसवर्णानांग्रहणंनप्राप्नोति अस्यचोपस्येतिच किंकारणं अनण्त्वात् नह्येतेनण्येनुवृत्तिनिर्देशेकेच
हिपेसरसामासायउपदिश्यंते एवंतर्हिनएवादनुवृत्तौ अनुपदेशाच्चप्रत्याहारेनउत्पतेचेदमणसवर्णानिग्रहणातीति वचनाद्भविष्यति वच
नास्यत्रतन्नास्ति नेदंवचनाल्लभ्यंअस्तिह्यन्यदेतस्यवचनेप्रयोजनंकिंयएतेप्रत्याहाराणामादितोवर्णाः तैःसवर्णानांग्रहणंयथास्यात् ॥७॥

१२१

प्रत्याहारएवदीर्घप्लुताअपिपठनीयाइत्यर्थः तत्रानुवृत्तीति व्यक्तिपक्षेसत्यपिसत्रारंभेवांतरभेदसंभवात्ग्रहणंनसिध्यतीत्यर्थः वचनादिवि
अण्सदृशोणिविग्रहीष्यतइत्यर्थः यत्रेति अनंतरोक्तमुभयंयत्रनास्तिअकोचीत्यादावत्रहनुबंधेनचिन्हेनप्रत्याहारत्वएवनिर्दिष्टइत्येव शिव
मुच्चारणंनास्ति तत्राकारउच्चारितआदिरंत्येनसहेतेतिमध्यपतितानांस्वरूपस्यचग्राहकोस्माच्चवचनात्सवर्णानामपीत्यर्थः ॥श्रीसांबः॥७॥

तत्कालस्येति यावदेकस्य वर्णस्य परिच्छेदिका क्रिया निमेषादिः सैव यस्य स तत्कालकालः उष्ट्रमुखवदिति न च समानार्थत्वात् द्वितीयमुखशब्दाप्रयोग उ
ष्ट्रमुखमस्य उष्ट्रमुखः न च प्राणी प्राण्यन्तरस्य मुखमिति सामर्थ्यात् सादृश्यस्य प्रतीतिः समयग्रहणेऽपि मुखस्य सादृश्याभावादुष्ट्रशब्दो व्यवतिष्ठते मुखेन मु
खस्य सादृश्यं प्रसिद्धमिति सामर्थ्यादुष्ट्रमुखमिव मुखमस्येत्यर्थो गृह्यते एवमिहापि वर्णः कालो न भवतीति सामर्थ्यात्तदीया क्रिया क्रियान्तरपरिच्छिन्ना सती
क्रियान्तरस्य परिच्छेदिके तु वर्ण एव परिच्छेदक उच्यते अथवेति वर्णसमुच्चरितायां क्रियायां तत्स्वरूपो वर्तते स कालो यस्येति तद्रूपसमवेता क्रिया परिच्छेदिका
स्येत्यर्थः यथा आदित्यः द्रव्यान्तरपरिच्छिन्नसुवर्णादीनां परिच्छेदक तद्वत् क्रियापीत्यर्थः दीर्घग्रहणमिति भेदका उदात्तादय इति भावः तत्र च्छिद्रादेर्जातिः षण्णा

तस्य कालस्तत्कालः तत्कालः कालो यस्य सोयं तत्कालकालः तत्कालकालस्येति सति हि तथा निर्देशः कर्तव्यः न कर्तव्यः उत्तरपदलोपोऽत्र द्रष्टव्यः त
था उष्ट्रमुखमिव मुखमस्य सोयमुष्ट्रमुखः खरमुखः एवं तत्कालकालस्तत्काल स्तत्कालस्येति अथवा साहचर्यात् ताच्छब्द्यं भविष्यति काल
सहचरितो वर्णः वर्णोपि काल एव किं पुनरिदं नियमार्थमाहोस्विज्ज्ञापकं कथं च नियमार्थं कथं वा ज्ञापकं स्यात् यद्यत्रापि ग्रहणमनुवर्तते ततो नियमा
र्थं अथ निवृत्तं ततः ज्ञापकं कश्चात्र विशेषः तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नाग्रहणं तपरस्तत्कालस्येति नियमार्थमिति
चेद्दीर्घग्रहणे स्वरभिन्नानां ग्रहणं न प्राप्नोति केषां उदात्तानुदात्तस्वरितानुनासिकानां अस्तु तर्हि ज्ञापकं ज्ञापकमिति चेद्ध्रस्वग्रहणे दीर्घप्लु
तप्रतिषेधः ज्ञापकमिति चेद्ध्रस्वग्रहणे दीर्घप्लुतयोस्तु प्रतिषेधो वक्तव्यः विप्रतिषेधात्सिद्धम् अणसवर्णान् गृह्णातीत्येतदस्तु तपरस्त
त्कालस्येति वा तपरस्तत्कालस्येतद्भवति विप्रतिषेधेन अणसवर्णान् गृह्णातीत्यस्यावकाशः ह्रस्वा अतपराः अणः तपरस्तत्काल
स्येत्यस्यावकाशः दीर्घास्तपराः ह्रस्वेषु तपरेषु उभयं प्राप्नोति तपरस्तत्कालस्येतद्भवति विप्रतिषेधेन ।

आकाराणां वृद्धिसंज्ञेष्यते एकस्यैव तु दीर्घस्य स्यात् तपरकरणं त्वेजर्थमेव स्यात् ह्रस्वग्रहणमिति अतोभिस ऐसित्यकारग्रहणे पूर्वसूत्रेण दीर्घप्लुतयोः
ग्रहणं प्राप्नोति इदसूत्रमनणस्तु ग्रहणे चरितार्थं विप्रतिषेधादिति विरोधाभावे तत्र विधते यदि पूर्वसूत्रेणाकारः सवर्णानां ग्राहकः स्यात् दृष्टानां
ग्रहणप्रसंगोऽनेन तु अणन्तत्र परत्वादनेनैव तपरेण सवर्णानां तत्कालानां स्वरूपस्यैव ग्राहकः ननु अत इति तकारोच्चारणसामर्थ्यादनेनैव ग्र
हणं भविष्यति किं विप्रतिषेधाश्रयेण नैतदस्ति मुखसुखार्थस्यापि तकारस्य दर्शनात् तकं तदुदाहरणमिति यथा ॥ ॥

भा. कौ. प्र.
१२२

प्लुतेति ह्लस्वग्रहणे प्रवेदमुच्यते यत्रैतल्लक्षणस्य सवर्णान् गृह्णातीति अणसत्यव्यक्तिनिर्देशेपि ग्रहणकशास्त्रेण स्यादेव भिन्नस्य ग्रहणं वृत्तिपृथक्
त्वमिति ह्रस्वदीर्घप्रमाणलक्षणापि वृत्तिर्न भेदिका स्यादिति रवद्वा भिरिसेव प्रसज्येतेति भावः क्रियत इति अवश्यकर्तव्यतां दर्शयति व्यक्तिपक्षे
अणसवर्णान् गृह्णातीति प्रसंगः सूत्रप्रत्याख्याने त्वाकृतिग्रहणात् उदित्करणं कर्तव्यमेव न हि कवर्गादीनामेकाकृतियोगोस्ति कर्तव्ये सूत्रे कृतोऽस्य
द्वित्वादौ भाव्यमानस्य उदित्सामर्थ्यात् प्रसंगः इति निषेधो नाव्यवतरति अणसवर्णे वाऽयं निषेधः प्रत्याख्यानपक्षे भाव्यमानेषु यथाश्रुतरूपमेव
यत इति आकृतिग्रहणेपि भिन्नकालानां ग्रहणं न भवति यथा पशुना यजेत पशुमालभेतेति उत्पत्तिवाक्यता तस्याभिवक्ष्यते उदात्ता
दयस्तु भेदकाः कस्मात् अनुवादे तु नान्तरीयकत्वादेकव्यक्त्युच्चारणेपि सकलव्यक्तिग्रहणं यथा ग्रहं संमार्ष्टीति सर्वेषां ग्रहाणां प्राजापत्या
नवग्रहा इत्यादिभ्यो वाक्येभ्यो ज्ञातानां संमार्जनं तपर अयुक्तमिति न्यायेनासंबद्ध इत्यर्थः न्यायशब्दस्य प्रयोगः प्रसिद्धत्वान्नकृतः क्वापि
त्वसिद्धस्यापि प्रयोगो दृश्यते न्यायेनायुक्तमिति धात्वर्थान्तर्भूतस्य प्रयोगाभावः न हि भवति जीवति प्राणानिति तद्व्यनेनेति सकालो

प्लुतविलम्बितयोश्चानुपदेशात् प्लुतविलम्बितयोश्चानुपदेशान्मन्यामहे आकृतिग्रहणात्सिद्धमिति यद्यमेकस्यांपि वृत्तौ वर्णानुपदि
श्य सर्वत्र कृती भवति अस्ति प्रयोजनमेतत् किं तर्हीति वृत्तिपृथक्त्वं तु नोपपद्यते वृत्तेस्तु पृथक्त्वं नोपपद्यते तस्मात्तत्र तपर
निर्देशः सिद्धः तस्मात्तत्र तपरनिर्देशः कर्तव्यः न कर्तव्यः क्रियत एतन्न्यास एव अतो भिस ऐसिति अयं दिर्दिष्टवर्णस्य चाप्रसयः
तपरस्तत्कालस्य अयुक्तोयं निर्देशः तत्कालस्येति तद्दिशनेन कालः प्रतिनिर्दिश्यते तदित्ययं च वर्णः तत्रायुक्तं वर्णस्य कालेन
सह सामानाधिकरण्यम् कथं तर्हि निर्देशः कर्तव्यः तत्कालकालस्येति किमिदं तत्कालकालस्येति ।

यस्येति कालसामानाधिकरण्येन तच्छब्दोपादानात् तदित्ययं च वर्ण इति परामृश्य इत्यर्थः तपरशब्दवाच्यस्यार्थस्य तच्छब्देन परामर्शा
त् वर्णस्येति वर्णवाचिनस्तच्छब्दस्येत्यर्थः कालेनेति कालवाचिनेत्यर्थः कालो हि प्रसिद्धपरिमाणा क्रिया अप्रसिद्धपरिमाणस्य
क्रियान्तरस्य परिच्छेदिका यथा दिवसमधीत इति दिवसशब्देनोदयादिरस्तमयान्त आदित्यगतिप्रबन्ध उच्यते स चाध्ययनस्य परिच्छेदक
त्वात्कालः वर्णस्तु क्रियात्मको न भवति ।

१२२

आदिरंभसंप्रत्ययइति अप्रतिपत्तिरित्यर्थः संबंधिशब्दैर्वेति यत्तद्येवाक्षिप्तसंज्ञीत्यर्थः आद्यंतौ च मध्यापेक्षाविति मध्यमानामेव संज्ञित्वं स्यात्
मित्युक्तं भुवनंनास्त्वत्र प्रत्यक्षसद्ग्रहणात् ... [illegible] ... इति कस्य पणं वीतिसमुदायादेव विभक्त्युत्पत्तिर्नादिमा ... [illegible]
प्राधान्यादिति विरुध्यते ... [illegible] ... शब्दानुशासनप्रस्तावात् ... [illegible]
अनितरेतरस्य प्रसंगः ... [illegible] ... प्रकरणादिवशात् ... [illegible] ... इति स्यात् निर्दिश्यमानस्या
देशा इत्याश्रितं परिहारांतरं विवक्षया ... [illegible] ... वर्णानस्य तद्रूपस्या

आदिरंत्येनसहेता आदिरंत्येनसहेते त्यसंप्रत्ययः सन्निनोनिर्देशात् आदिरंत्येनसहेतेति असंप्रत्ययः किंकारणं संज्ञिनोनिर्देशात् अर्हद
संज्ञिनोनिर्दिश्यंते ... [illegible] ... कथं आदिरंत्येनसहेता गृह्यमाणः स्वस्य च प्रत्याहारकः तस्माद्धानां
वेतिवक्तव्यं संबंधिशब्दैर्वातुल्यं संबंधिशब्दैस्तुल्यमेतत् तत्संबंधिशब्दाः मातरिवर्तितव्यं पितरिशुश्रूषितव्यं ... [illegible]
स्यामातरि ... [illegible] ... पितेति एवमिहापि आदिः अंत्य इति संबंधिशब्दावेतौ तत्र संबं
धादेतद्गंतव्यं यं प्रत्यय आदिः अंत्यइति च भवतितस्य ग्रहणं भवतिस्वस्य च रूपस्येति ... [illegible] ... इति
विरुध्यते ... [illegible] ... इति नैव
दोषः यथैव ... [illegible] ... आदिशास्यां ... [illegible]
षः स्यात् ... [illegible] ... स्यात् ... [illegible] ... स्यान स्याना: ॥ [illegible] ॥

आदेशप्रसंगात्तु स्यप्रसंगः ... [illegible] ... स्यान इति सिवे बाहुलकादीनादिके ... [illegible] ... इति कार्य
त्वप्रसंगः तत्रोपबाधस्तु ... [illegible] ... गुणोपसंगसंबंधिनी ... [illegible] ... धातुकार्यमिति उदुतु
वर्णांतमंगं अनुनासिकादिस्त्वप्रसंगः ... [illegible] ... आदेशेनांतरंगः अवतिते
नानाश्रयत्वात् ... [illegible] ... इति सूत्रांतरं

भा·कै·

१२२

यथैवमिति यथयंथोगस्तत्कालानवाति पादयन् भिन्नकालान्निवर्तयंतीत्यर्थः त्रिभागाधिकाइति द्रुतंश्लोकमंत्रं चोच्चारयति वक्तरि नाडिकायां यस्मिन्नवपानीयपलानि
स्रवंति तस्यामेव मध्यमायां वृत्तौ ... पलानि स्रवंति न वानां त्रिभागस्त्रीणि पलानि तदधिकानि नव द्वादश संपद्यंते विलंबितायां तु वृत्तौ षोडशपलानि स्रवंति
सिद्धमिति सर्वासु वृत्तिषु नवर्णानां उपचयापचयौ यथा गंतृणामालस्यादिभेदाद्गतिभेदेपि न मार्गभेद इत्यर्थः विषमइति वर्णाः प्रयत्नजन्याः तद्
भेदाद्भिन्नकाला एव अध्वातु व्यवस्थित एव न गंतृक्रियाजन्यः एवं तर्हीति व्यक्तिः स्फोटोत्र विवक्षितः सत्वान्यः एतच्चयेनोच्चरितेन सत्वपरस्पशायां विवारि
तमिति तत एववोढव्यं शब्दगुणइति शब्दस्य गुणः उपकारकोव्यंजकस्तेनेत्यर्थः तथा घटः पुनः पुनर्दृश्यमानो पि न भेदमवलंबते तथा विलंबितायां तावक
एव पुनः पुनरुपलभ्यत इति वृत्तिषु वर्णस्य भेदो न गम्यत इति सर्वत्र वृत्तिषु तत्कालत्वं ह्रस्वदीर्घप्लुतास्तु स्वत एव भिन्ना भिन्नैर्ध्वनिभिर्व्यज्यंत इति तेषां

यथैव द्रुतायां तपरकरणे मध्यमविलंबितयोरुपसंख्यानं कालभेदात् द्रुतायां तपरकरणे मध्यमविलंबितयोरुपसंख्यानं कर्तव्यं तथा मध्यमायां
द्रुतविलंबितयोः तथा विलंबितायां द्रुतमध्यमयोः किं पुनः कारणं न सिध्यति कालभेदात् यो हि द्रुतायां वर्णास्त्रिभागाधिकास्ते मध्यमायां ये मध्य
मायां वर्णास्त्रिभागाधिकास्ते विलंबितायां सिद्धं त्ववस्थिता वर्णाः सिद्धमेतत् कथं अवस्थिता वर्णाः द्रुतमध्यमविलंबितासु किंकृतस्तर्हि
वृत्तिविशेषः वक्तुश्चिराचिरवचनात् वृत्तयो विशिष्यंते वक्ता कश्चिदाश्वभिधायी भवति आशु वर्णानभिधत्ते कश्चिच्चिरेण कश्चिच्चिरतरेण तद्यथा
तमेवाध्वानं कश्चिदाशु गच्छति कश्चिच्चिरेण गच्छति कश्चिच्चिरतरेण गच्छति रथिक आशु गच्छति आश्विकश्चिरेण पदातिश्चिरतरेण विष
मउपन्यासः अधिकरणमत्राध्वा व्रजतिक्रियायाः तत्रायुक्तं यदधिकरणस्य वृद्धिह्रासौ स्यातां एवं तर्हि स्फोटः शब्दः ध्वनिः शब्दगुणः
कथं भेर्याघातवत् तद्यथा भेर्याघातो भेरीमाहत्य कश्चिद्विंशतिपदानि कश्चित्त्रिंशत् कश्चिच्चत्वारिंशत् स्फोटस्तावानेव भवति ध्वनिकृता
वृद्धिः ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः तपरस्तत्कालस्य

कालभेदः भेर्याघातइति भेरीमाहतेति भेर्याघातः उपलब्धिसामान्यं दृष्टांतः यथा प्रयत्नविशेषाद्धन्यमानो भेरीशब्दः कश्चिदल्पं कालमुपलभ्यते कश्चिच्चिरं क
श्चिच्चिरतरं च एवं निरुपलब्धिर्नाकालभेदो विषयस्य त्वभेद एव स्फोटस्तावानेवेति दार्ष्टांतिकोपन्यासः ध्वनिः स्फोटश्चेति व्यंजकोव्यंग्यश्च
त्यर्थः शब्दानां व्यंग्यानां संबंधि व्यंजकस्तेन योध्वनिः स एव महानल्पश्च लक्ष्यते व्यंग्यस्त्वभिन्नकाल एवेत्यर्थः उभयमिति व्यंग्यव्यंजकस्वरूपमुभयं
स्वभावतः स्वरूपेणासंज्ञाविरित्यर्थः केषांचिदिति व्यंजकानामुपलभ्यमाने अव्यक्तानांतु ध्वनिरेव

१२२

सिद्धेलिति इध्यादिसंज्ञा गुणप्रधानभावानपेक्षा एव प्रदेशेषु संज्ञिनं प्रत्याययंति इयं तु संज्ञा गुणप्रधानभावापेक्षा तस्मात्कालो तत्रोतश्च प्रत्ययादित्यादौ विशेषणसंबंधे मनुष्यसविशेषेण संबंध अनुकारादितु भवतीति यथोक्तदोषाभावः समासेति श्रितादिभिः सुबंतस्याविशेषणे सति प्राप्तस्तदंतविधिः प्रतिषिध्यते प्रतिषेधप्रकरणे तत्र दृश्यते श्रितादयः प्राधान्येन श्रितत्वाः तद्विशेषणेन च सुसुपेति कष्टं परमश्रितं इति श्रितांतमेतत्सुबंतं न भवतीति सुबंतमुपादायैव परमश्रितेति एनं प्रत्ययलक्षणेन सुबंतं भवति श्रितांतं नकृस्ते सोऽयमनादेशिति अनुपातिकादिष्वनुभयपदस्थः नंडादिनि जातिपदिकेनावशेषेत इति तदंतविध्यभावः अतिमहतीति महांतमतिक्रांतेति मादिसमासः तत्र यद्यपि गौरादिषु बृहन्महदादीति पठ्यते तथाप्यनुपसर्जनाधिकारात्तत्र ङीप्न भवतीति उगिल्लक्षणो

सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात् सिद्धमेतत्कथं यथेष्टं विशेषणविशेष्ययोर्योगो भवति यावता यथेष्टं इत्येतावुतश्च प्रत्ययादसंयोगपूर्वादिति नासंयोगपूर्वग्रहणेन उकारांतं विशेष्यते किं तर्हि उकार एव विशेष्यते उकारोयअसंयोगपूर्वः तदंतात्प्रत्ययादिति तथा उदोष्ठ्यपूर्वस्येति ओष्ठ्यपूर्वग्रहणेन ऋकारांतं विशेष्यते किं तर्हि ऋकार एव विशेष्यते ऋकारोयओष्ठ्यपूर्वः तदंतस्य धातोरिति समासप्रत्ययविधौ प्रतिषेधः समासप्रत्ययविधौ च प्रतिषेधो वक्तव्यः समासविधौ तावत् द्वितीया श्रितादिभिः समस्यते कष्टश्रितः नकष्टश्रितः कष्टं परमश्रितः इत्यत्र मा भूत् प्रत्ययविधौ नडस्यापत्यं नाडायनः इह न भवति सूत्रनडस्यापत्यं सौत्रनाडिः किमविशेषेण नेत्याह उगिद्वर्णग्रहणवर्जं उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा उगिद्ग्रहणं भवती अतिभवती महती अतिमहती वर्णग्रहणं अत इञ् दाक्षिः प्लाक्षिः अस्ति वेदनीकांश्च केवलोकारः प्रातिपदिकं यथा विधिः स्यात् अस्तीत्याह अत एङ् अः तस्यापत्यं अत इञ् इः अकच्प्रभृतिः सर्वनामाव्ययधातुविधावुपसंख्यानं अकजंतः सर्वनामान्यविधौ श्राम्यतः धातुविधावुपसंख्यानं कर्तव्यं अकजंतः सर्वके विश्वके अव्ययविधौ उच्चकैः नीचकैः

ऽपूर्वार्थ्यते अन्येत गौरादिषु तयोः प्रमादपाठमाहुः तथा चोक्तं न यजापुदात्तते बृहन्महतोरुपसंख्यानमिति ङीपि कृते सति उदात्तस्य सिद्धत्वात् किं च यदि उदात्तविधानेन अत इति तदंतविधावसति श्रितकरणमुत्तरार्थं स्यात् सर्वक इति अकच्चिकृते शीभावो न स्यात् उच्चकैरिति तथैवाकच्चिकृते लुङ्न स्यात् उच्चकैरधीयानस्त्वव्ययानां प्रतिषेध इति परांगवद्भाव निषेधो न स्यात् उच्चकैर्मुखमिति नाव्ययदिक्शब्दे तिमुखस्वरनिषेधो न स्यात् ॰

भा॰कै॰
१२८

अंतरंगलक्षणस्येति असति तदंतत्वा दारितविधिलक्षेयोंतरंगस्तस्येत्यर्थः एवं बहिरंगलक्षणो गुण इत्यादि आश्रयं अविशिष्टोति अल्लोंत्यस्येत्यत्राचिततदंतविधिसञ्ज्ञा यस्त्वानंत्यस्य समुदायस्य कार्यमन्त्यामिति तेनैव पंथाः सख्याः अस्यादेशेन प्राप्तिर्नास्यर्थः तत्र कृतादि तत्स्थानिस्याकारः स्यात् कृतादिति निसस्य अनेकाल्शित्सर्वस्येत्येतत् सर्वस्येतिनियमार्थं स्यात् प्रकृतमिति प्रस्तुते प्रत्यासत्ते कति साक्षात्तदंतादिविधिर्नो निर्देशात् यथेहेरीच्वचनं प्रत्यासत्तिनिर्वचनस्य कचिदधिकारात् यथेरज्जित्यत्र धातोः कारितस्यात् यथेको यस्वरूपं तस्य धातोः कारणेपीति विधिशब्दः कर्मसाधनः येन करणेन कार्यं

अंतरंगलक्षणस्य यणादेशस्य बहिरंगलक्षणो गुणोबाधकः प्रसज्येत ऊनशब्दस्य अभिधयणादेशः नरशब्दमाश्रित्य गुणः अल्विधिश्च प्रसज्येत पंथाः सख्यादिति तस्यात् अकृते तदंतविधि इति वक्तव्यं न वक्तव्यं येनेति करणेपात् तृतीया अन्येन चाप्यस्य चार्विधिर्भवति तद्यथा देवदत्तस्य मासांशदास्यैरोदनेन वयमदत्तः प्रतिविधत्ते तथा संग्रामं हस्त्यश्वरथपदातिभिः एवमिहाप्यवाधातोर्यनं विधत्ते अकारोपधातिपदस्य हृदं विधत्ते येन विधिस्तदंतस्येति चेद्ग्रहणोपाधीनां तदंतोपाधिप्रसंगः येन विधिस्तदंतस्येति चेद्ग्रहणोपाधीनां तदंतप्रसंगः ये ग्रहणोपाधयः ते वितदंतोपाधयः स्युः तत्र को दोषः उतश्च प्रत्ययादसंयोगपूर्वादिति असंयोगपूर्वग्रहणं उकारांतविशेषणं स्यात् तत्र को दोषः असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात् अस्नुहि तनुहि इति इह न स्यात् आप्नुहि शक्नुहीति तथा उदोष्ठ्यपूर्वस्येति ओष्ठ्यग्रहणं पूर्वं ऋकारांतविशेषणं स्यात् तत्र को दोषः ओष्ठ्यपूर्वग्रहणेन इहैव प्रसज्येत संकीर्णामिति इह च न स्यात् निपूर्तीः पिपर्तीति ॥ ७ ॥

विधीयते स शब्दस्तदंतस्य संज्ञेत्यर्थः तेन विशेषणेन विशेष्यस्य तदंतविधिर्भवति नन्यथा इकोयणचीत्यादौ च विशेष्यस्यासन्निधानात् तदंतविधेरभाव इति हस्त्यश्वरथपदातिभिरिति अङ्गप्रकृतित्वात् भावारेकवद्भावाभावः ग्रहणोपाधीनामिति गृह्यते उच्चार्यत इति ग्रहणं तस्य ये उपाधयः एवं ते ते तदंतस्य सति नः प्राप्नुवंति संज्ञादिसंज्ञाप्रत्यायने विशेषणभावमापन्नाः कथमात्मनो विशेषणसंबंधमनुभवेत् संकीर्णामिति ओष्ठ्यः पूर्वो यस्मात् ऋकारांतात् धातोस्तस्येत्वमिति विवक्षार्थः स्यात् अत्र च स्त्रार्थे धात्ववयवत्वमोष्ठ्यस्यार्थयितुं न युज्यते ॥ अवधितावयवत्वयोरेकस्य विरोधात् ॥ श्रीः ॥

१२८

इमाश्चापीति सर्वाद्युपादानेन संज्ञाः क्रियमाणाः कथं सर्वकारादीनां भवंति नित्याहि शब्दा विकारोपजनरहिता इति सर्वशब्दः सर्वकशब्द इति न च कुशक्यमिदमर्थं एवं तर्हीति यद्यपि नित्याः शब्दाः तथापि प्रक्रियायामकजादयो विधीयमाना ज्ञापकात् व्यतिरेकेणतदर्थं प्रयोजनमिति अन्वर्थसंज्ञाक्षिप्तः संज्ञी सर्वादि भिर्विशिष्यते अपूर्वो वा तदंतविधिरूपस्य व्याप्यते एवमुत्तरत्रापि ज्ञेयं उपपदविधावपि भयाद्यादिभिः कर्म विशिष्यते समप्रियमद्रेणेत्य नुकर्मणाद्य मादय इति तदंतविध्यभावः प्रतिषेध इति विधीयत इति विधिः सामान्येन मृग्यत इति प्रतिषेधे पितदंतविधिर्भवति स्वस्रादिभिः प्रातिपदिकस्य

इमाश्चापि संज्ञा अल्पपरिमाणानामर्थानां क्रियंते ताः केनाधिकस्यस्युः एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति नदेकदेशभूतं तद्ग्रहणेन गृह्य ते यदयं नेदमदसोरकोरिति सककारयोरिदमदसोः प्रतिषेधं शास्ति कथं कृत्वा ज्ञापकं इदमदसोः कार्यमुच्यमानं कः प्रसंगो यत्सककारयोः स्यात् पश्यति त्वाचार्यः तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ततः सककारयोः प्रतिषेधं शास्ति कानि पुनरस्याः प्रयो जनानि प्रयोजनं सर्वनामाव्ययसंज्ञायां सर्वे परमसर्वे विश्वे परमविश्वे उच्चैः परमोच्चैः नीचैः परमनीचैः उपपदविधौ भया ढ्यादिग्रहणं प्रयोजनं भयंकरः अभयंकरः आढ्यंकरणं स्वाढ्यंकरणं ङीब्विधावुगिद्ग्रहणं प्रयोजनं भवती अतिभवती महती अतिमहती प्रतिषेधे स्वस्रादिग्रहणं प्रयोजनं स्वसा परमस्वसा दुहिता परमदुहिता अपरिमाणबिस्ताद्दिग्रहणं च प्रयोजनं अपरिमाणबिस्ताचितकंबल्येभ्यो न तद्धितलुकि द्विबिस्ता द्विपरमबिस्ता त्रिबिस्ता त्रिपरमबिस्ता । द्व्याचिता द्विपरमाचिता दितिग्रहणं च प्रयोजनं दितेरपत्यं दैत्यः आदितेरपत्यं आदित्यः दित्यदित्यादित्येति अदितिग्रहणं न कर्त्तव्यं भवति शेण्यास्र ण शेण्या अण्यग्रहणं च प्रयोजनं आजकरोणाः सैंहकरोणः नस्यन्वतस्यत्विति वक्तव्यं रोणः किं पुनः कारणं न सिध्यति नतदे ताग्र तदंतविधिना सिद्धं केवलाद्व्यपदेशिवद्भावेन ॥ ॥७॥ विशेषणांतद्विपरमविस्तेति द्विगुनासन्निधापितमुत्तरपदं स्तादिभिर्विशेष्य तदूति तदंतविधिः दितिग्रहणं चेति परमदित्यादिभ्यस्तनभिधानाण्ण्यानभवति तस्यन्वेति स्वंरूपमिस्यस्यानु वृत्तिं वार्त्तिककारो नेच्छति तथा चास्यंतवदिस्यत्र येन विधिस्तदंतस्येति प्रयोजनमवोचत ॥ श्रीसप्तकोटीश्वराय नमः ॥

भा०कै०

१२५

भिनत्तीति धातोरंत उदात्तो भवतीति उदात्तत्वं न स्यात् प्रत्ययस्वरेण तु तस्मिन् ध्वनौ भिनोत्रीति श्नेति धातोर्विधीयमानं स्वत्वं न स्यादि दित्यत्यां अन्येत्वाहुः भिनत्ती त्यत्रागमानुदात्तत्वेन प्रत्ययस्वरस्य बाधितत्वात् तिशिष्टस्वरो धातुस्वर एष्टव्यः सिद्धं त्विति सर्वशब्दस्य योंतोकारः सोंतः सर्वकशब्दस्य एवमन्यत्रापि योज्यं तत्र सर्वनामानीत्यन्वर्थसंज्ञाक्षिप्तः संज्ञी सर्वादिभिर्विशिष्यते अव्ययसंज्ञाक्षिप्तः स्वरादिभिः धातुसंज्ञा भाओ वा प्रकारा भूवादिभिरिति

नन्वतः भिनत्तीति छिनत्तीति किं पुनः कारणं न सिध्यति इहतस्य वा ग्रहणं नदंतस्य वा न वेदं नतस्नापि तदंतं सिद्धं तु तदंतां तवचनात् सि द्धमेतत् कथं तदंतांतवचनात् तदंतांतस्येति वक्तव्यं किमिदं तदंतांतस्येति तस्यांतस्तदंतः तदंतः अंतो यस्य तदिदं तदंतांतं तदंतांत स्येति सतर्हि तथा निर्देशः कर्त्तव्यः न कर्त्तव्यः उत्तरपदलोपोत्र द्रष्टव्यः तद्यथा उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः ए वमिहापि तदंतांतो यस्य तदंतस्तदंतस्येति तदेकदेशविज्ञानाद्वा सिद्धं तदेकदेशविज्ञानाद्वा पुनः सिद्धमेतत् तदेकदेशभूतस्तद्ग्रह णेन गृह्यते तद्यथा गंगायमुनादेवदत्तेति अनेकानदी गंगायमुनां च प्रविष्टा गंगायमुनाग्रहणेन गृह्यते तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते विषम उपन्यासः इह केचिच्छब्दा अल्पपरिमाणानामर्थानां वाचका भवंति य एते संख्याशब्दाः प रिमाणशब्दाश्च पंचसप्तेति एकेनाप्यपायेन भवंति द्रोणः खारी आढकमिति नैवाधिके भवंति नन्यूने केचित् यावदेव भवति तावदेवाहुः य एते जातिशब्दाश्च तैलं घृतमिति खार्यामपि भवंति द्रोणेपि कुडवे इति हि सर्वस्यापि भवति

भावः उत्तरपदलोप इति वस्तुनिकोत्र लोपो न तु सामर्थ्याद्गम्यमानार्थस्य निवृत्तिरित्याहुः अन्ये तु वर्णयंति यथावयवदर्शनात् गोरित्यवयविवि षयावुद्धिरुदेति तथेहापि सर्वशब्दस्यावयवो यस्य तत्र सर्वशब्दविषया बुद्ध्युत्पादात्तदवयवांतः सर्वशब्द इति व्यपदिश्यते अथवा ऽवय वसमुदायरूपारोपात् तदंततापि भविष्यति गौणेनापि रूपेण शास्त्रे व्यवहारो दृश्यते छत्रपार्श्वायः शलदंडाजिनशालोष्ठाधूम्रस्वादिषु दे दकदेशविज्ञानादिति मध्यपातिनोऽकजादयस्तदेकदेशा इति तत्वबुद्धिर्नविघ्नंति अल्पपरिमाणानामिति परिछिन्नपरिमाणानामि त्यर्थः यावदेव वति अल्पमधिकं वेत्यर्थः

१२५

द्विमाषिकामिति द्विषष्टीपरिमाणमस्येति समासे कृते आर्हादितिठञ् भवति संख्यायास्तदंतविधौ सति संख्यातादपि ठक् प्रतिषेधात् तेन प्राग्वतेरिति ठञ् भवति अध्यर्धपूर्व इति लुग् न भवति सोस्यांशवस्नभृतय इत्यतः सो स्य इत्यनुवर्तमाने तदस्य परिमाणमित्य पुनः प्रत्ययार्थे समर्थविभक्तिनिर्देशात् कृते वाक्ये किं उनस्तन्निर्देशसामर्थ्यात् पुनः प्रत्ययः तद्विधानसामर्थ्यात् पुनर्लुगभावः पदांगाधिकारइति पदशब्देनोत्तरपदं गृह्यते पदेकदेशत्वात् उत्तरपदेन सामर्थ्याक्षिप्तपूर्वपदमिष्टकादिभिर्विशेष्यते महत्स्वस्रादिभिरंगं विशेष्यते स्वस्रादि इति न पूजनादिति समासांतनिषेध अपोत्रो

तदंतविधौ संख्यायाः प्रयोजनं द्विषाष्टिकं पंचषाष्टिकं धर्मात् ठञः प्रयोजनं धर्मं चरति धार्मिकः अधर्मं चरति आधर्मिकः अधर्माच्चेति न वक्तव्यं भवति पदांगाधिकारे तस्य च तदुत्तरपदस्य च पदांगाधिकारे तस्य च तदुत्तरपदस्येति वक्तव्यं पदाधिकारे किं प्रयोजनं प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु इष्टकचितं पक्वेष्टकचितं ईषीकतूलेन मुंजेषीकतूलेन मालभारिणी कन्या उत्पलमालभारिणी कन्या अंगाधिकारे किं प्रयोजनं प्रयोजनं महत्स्वसृनप्तृणां दीर्घविधौ महान् परममहान् महत् अप् आपः स्वसृ स्वसा स्वसारौ स्वसारः परमस्वसा परमस्वसारौ परमस्वसारः नप्तृ नप्ता नप्तारौ नप्तारः एवं परमनप्ता परमनप्तारौ परमनप्तारः पद्दन्नस्समस्थ्याधनडुहोनुम् पद्भावः प्रयोजनं द्विपदः पश्य अस्थि दध्नी कश्चित् केवलः पादशब्दो यदर्थो विधिः स्यात् नास्तीत्याह एवं तर्हि अंगाधिकारे प्रयोजनं नास्तीति किं त्वा पदाधिकारस्येदं प्रयोजनमुक्तं हिमकाषि हतिषु च यथा पत्काषिणो पत्काषिणः एवं परमपत्काषिणो परमपत्काषिणः यदि तर्हि पदाधिकारे पादस्य तदंतविधिर्भवति पादस्य पदाज्यातिगोपहतेषु यथेह भवति पादेनोपहतं पदोपहतं अत्रापि स्यात् द्विधपादेनोपहतं द्विधपादोपहतमिति ॥ ॥

तितलमपि स्वाङ्गिरिति भवति द्विपदिति पादः पदित्यत्र पादशब्देनांगं विशेष्यते पादस्य पदेति ननु पद्भावे तदंतविधिरुक्तः अयं तु पद्भावविधिः नैष दोषः पादशब्देन पूर्वपदस्य विशेषणात् पद्भावे तदंतविधिः अनेनैव न्यायेन पद्भावे पि तदंतविधिप्रसंगः यथा श्रुतः प्रसंगे पादशब्दो निर्दिश्यते तथा तस्यान्तरत्वानुमानात्।

भा.कै. २२६

व्यपदेशिवद्भावोऽप्रातिपदिकेनेति ननु रोणीशब्देन प्रातिपदिकं प्रसज्यांतत्वात् नैष दोषः अप्रातिपदिकेनेत्यत्र वाक्ये प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति वचनात् स्त्रीप्रत्ययांतैरपि व्यपदेशिवद्भावो न भवति न च लिंगविशिष्टपरिभाषा स्वरूपविधिविषयेति प्रातिपदिकसूत्रे वक्ष्यते सपूर्वादिनिमिति पूर्वग्रहणे सति सपूर्वादिनिरित्युच्यमाने सर्वस्मात् पूर्वात् प्राप्नोतीति कथं ज्ञापकमित्यर्थः यत्रानुक्रांतमिति अप्रातिपदिकेनेति तु निषेधोऽयं तांतग्रहणं सूत्र एवोपात्तं त्रयथा दशांताड्ड इति दशाधिका अस्मिन् शत इत्यत्र न भवति यद्विधाविति ठग्विधौ तु तदंतविधेरभावात् पारमहल्लिक इति ठञ् भवति ऋतोरिति ऋतुना

व्यपदेशिवद्भावोऽप्रातिपदिकेन किंपुनः कारणं व्यपदेशिवद्भावोऽप्रातिपदिकेन इह सूत्रांताट्ठक् भवति दशांताड्डो भवतीति केवलात् उत्पत्तिर्माभूदिति नैतदस्ति प्रयोजनं सिद्धमत्र तदंतात् तदंतविधिना केवलात् व्यपदेशिवद्भावेन सोयमेवं सिद्धे सति यदंतग्रहणं करोति तज्ज्ञापयत्याचार्यः सूत्रांतादिव दशांतादेवेति नात्र तदंतादुत्पत्तिः प्राप्नोति इदानीमेव कृतं समासप्रत्ययविधौ प्रतिषेध इति सा तर्हि एषा परिभाषा कर्तव्या न कर्तव्या आचार्यप्रवृत्तिर्ज्ञापयति व्यपदेशिवद्भावोऽप्रातिपदिकेनेति यदयं पूर्वादिनिः सपूर्वाच्चेत्याह नैतदस्ति ज्ञापकं अस्ति ह्यन्यदेतस्य वचने प्रयोजनं किं सपूर्वादिनिं वक्ष्यामीति यत्तर्हि योगविभागं करोति इतरथा हि पूर्वात् सपूर्वादिनिरित्येव ब्रूयात् किंपुनरयमस्येव शेषः तस्य चेति नेत्याह यत्रानुक्रांतं यत्रानुक्रंस्यते सर्वस्यैव शेषः तस्येति रथसीताहलेभ्यो यद्विधौ प्रयोजनं रथ्यः परमरथ्यः सीत्यं परमसीत्यं हल्या परमहल्या सुसर्वार्धदिक्शब्देभ्यो जनपदस्य प्रयोजनं सुपांचालकः सुमागधकः सुसर्वमागधकः सर्व अर्ध अर्धपांचालकः अर्धमागधकः अर्ध दिक्शब्द पूर्वपांचालकः पूर्वमागधकः ऋतोर्वृद्धिमद्विधावयवानां प्रयोजनं पूर्वशारदं अपरशारदं पूर्वनैदाघं अपरनैदाघं।

विन शब्दाघोवृद्धिमान् प्रत्ययस्तद्विधाने अवयवानां तदंतविधिः शरदः पूर्वोभागः पूर्वशरत् तत्र भवमिति ऋतुलक्षणोऽण् तत्र वृद्धिमदिति वचनात् प्रावृषण्य इत्यत्र तदंतविधिर्न भवति तेन ऋत्वणेव भवति पूर्वप्रावृषमिति प्रावृट्शब्दो वर्षपर्यायः अवयवानामिति किं पूर्वास्यां शरदि भवं पौर्वशारदिकमिति अण् न भवति कालाट्ठञित्येव भवति तत्र हि यथाकथंचित् कालत्वाविनो गृह्यंते।

२२६

प्रत्ययग्रहणंचापंचम्याइति प्रत्ययग्रहणेयस्मात्सविहितइतिसिद्धेतदंतविधौअपंचम्याइतिप्रतिषेधार्थंवचनं यत्रपंचम्यंतात्परःप्रत्ययःकार्यांतरविधानायपरिगृह्यते तत्र तदंतविधिर्माभूद्यथारदाभ्यामित्यत्र तत्राहितदंतविधौरेफदकाराभ्यामुत्तरोयोनिष्ठातस्तस्ययस्तकारस्तस्यनत्वं स्यात् नचसंज्ञाविधौप्रत्ययग्रहणेतदंतविधिर्नास्तीतिनि षेधावतारःयत्राहिसंज्ञाविधानंतत्रायंनिषेधःइह्तुनिष्ठानुवादेननत्वविधिःसंज्ञाविधौतर्हितदंतविधिनिषेधस्यकिंफलमुच्यते यदिसंज्ञाविधौप्रत्ययग्रहणेतदंतस्यसं ज्ञास्यात्प्रदेशेषुपुनस्तदंतविधिःस्यादितिप्रत्ययानांतंगृह्येत तस्मात्संज्ञाविधावपितदंतविधिनिषेधेरदाभ्यामित्यत्रैव अपंचम्याइत्यस्यनायमर्थःयत्रपंचम्यंतात्प्र त्ययोविधीयतेतत्रतदंतविधिर्नभवतीति एवंतर्हित्यारव्यायमानेजितअतत्प्रत्ययादित्यत्रतत्प्रत्ययादेवाजिविधीयमानेतस्यैवांगसंज्ञायांवृद्धिस्वरौस्यातांनतुतदंतस्य पर मगार्ग्यायणइति अत्रगार्ग्यायणइत्येवोदाहरणं गार्ग्यशब्दाद्यञंतात्फग्विधानात् नत्वत्रपरमगार्ग्यशब्दात्प्रत्ययस्तस्ययञंतत्वाभावात् तस्मात्फकिविधीयमाने पर मगार्ग्यायणइत्यनिष्टरूपप्रसंगस्तस्मादेतन्न्यायव्युत्पादनार्थं परमगार्ग्यायणइत्युक्तम् उत्तरपदाधिकारेप्रत्ययग्रहणेतदंतविध्यभावोलेरवग्रहणेनज्ञापितः तत्ररदाभ्यामित्यत्रनिष्ठायाःप्राधान्येनाश्रयणात्तदंतविध्यभावःस्यतासीलृलुटोरित्यत्रधातोरित्यधिकारादपंचम्याइतिनिषेधात्लृलुटोर्वाप्राधान्येनाश्रयणात्तदंतवि ध्यभावः अलेवानर्थकेनेति अर्थवद्ग्रहणेनानर्थकस्येतिवर्णनिर्देशेतुनाश्रीयतइतिस्थितेवर्णरूपस्यायस्यशब्दस्याश्रयणंनार्थवत्स्वरूपमपेक्ष्यते तत्रवर्णग्रहणं

प्रत्ययग्रहणंचापंचम्याःप्रयोजनं यञिञोःफभवति गार्ग्यायणःवात्स्यायनःपरमगार्ग्यायणःपरमवात्स्यायनःअपंचम्याइतिकिमर्थं
दृषत्तीर्णा परिषत्तीर्णा अलेवानर्थकेननान्येनानर्थकेनेतिवक्तव्यं किंप्रयोजनं तस्यग्रहणेष्ठीहन्ग्रहणंमाभूत् उग्रहणेग
तुग्रहणंमाभूत् स्त्रीग्रहणेशस्त्रीग्रहणं समग्रहणे पायसंकरोतीतिमाभूत्·

वसर्वत्रसवर्णग्रहणेजातियरूपाद्वर्णसमुदायग्रहणेप्यनर्थकस्यरूपग्रहणमनेननियमेननिवार्यते अलेवेतिचैकत्वसंख्यागुणत्वाद्विवक्ष्यते निय मविधानसामर्थ्याद्वा तस्यग्रहणइति तेनप्लीहानावितिदीर्घोभवति उग्रहणइति उदस्थास्तंभोरित्यत्र तेनगर्भशक्यास्थितिपूर्वसवर्णाभावःशस्त्रीग्र हणमिति तेनशस्त्र्यावितिस्त्रियाइतीयङ्नभवति पायसंकरोतीति सुमपर्युपेभ्यइतिसुण्नभवति तत्रहन्ग्रहणे स्त्रीग्रहणेचांगस्येति शेषत्वात्प्रत्ययान्तदंतविधिःउदस्थास्तंभोरित्यधिकारात्पूर्ववर्णातस्योत्पूर्वेनविशेषणात्स्यात्तदंतविधिःप्रतिषेधविज्ञानेतुनभवतिउदरवत्पूर्वे णविशेष्यत्वात्धातोरित्यस्यवानिवृत्तत्वात् समग्रहणेपदग्रहणात्तदंतविधिःस्यादितिनिवार्यते पदेलसमाद्योविशेष्यत्वादितितदंतवि
ध्यभावः पायसंकरोतीतिकरोतेर्भूषणार्थत्वेनाभावात्भवतीतिसुट्स्यात्·

भा·कै·रु·९ एवंतर्हीति एवंचपरमपादेनकषतीतिविवक्षायांपरमपादकाषीतिभवति यदातुपरमःपत्काषीतिविवक्षातदापरमपत्काषीतिभवति पादस्येतिपि पदेस्यांग
२२७ त्यर्थः परमपंथाइत्यत्रविग्रहपाठःसत्पुरुषःसमासांतविधानात् नपूजनादित्यत्रपूजायांस्वतिग्रहणमितिवचनात्प्रतिषेधः तस्मात्तुपंथाइतिपा ठः परमगौरित्यत्रमध्यपपाठः गौरतद्धितलुकीतिटज्विधानात् तस्मात्सुगौरितिपाठःपरमसखायावितिबहुव्रीहिःतत्पुरुषेतूटजभाव्यः अनडु हःतस्यार्थं पाठः अनडुहोनुमित्यत्रसर्वनामस्थानादित्यधिकारादमामोःकृतयोर्नुम्विधानात्नुम्विधौतदंतविधिनाअमामोरपितदंतविधे

एवंतर्हिअंगाधिकारेएवप्रयोजनं तत्रवोक्तंनात्रैकवस्थ्यदधिइतिअनेयोक्तिपादयतेरप्रत्ययःस्यात् पद्भ्यां पदे पत् युष्मद् अस्मत्
यूयं वयं अतियूयं अतिवयं अस्थ्यादि अस्थ्ना दध्ना सक्थ्ना परमास्थ्ना परमदध्ना परमसक्थ्ना अनडुहोनुम् अनड्वान् परम
नड्वान् धुपथिमथिपुंगोसखिचतुरनडुदन्निग्रहणं प्रयोजनं धीःसुधीः पंथाःसुपंथाःपरमपंथाः मथाःपरममथाःपुमान् प

रमपुमान् गौः सुगौः परमगौः सखा सखायौ सखायः सुसखा सुसखायौ सुसखायः परमसखा परमसखायौ परमसख
यःचत्वारःपरमचत्वारःअनड्वाहःपरमानड्वाहःत्रयाणां परमत्रयाणां त्यदादिविधि भस्त्रादिग्रहणंचप्रयोजनं सः अतिसः भस्त्र
का भस्त्रिका निर्भस्त्रिका निर्भस्त्रका बहुभस्त्रका बहुभस्त्रिका स्त्रीग्रहणंचप्रयोजनं स्त्रियौ स्त्रियः राजस्त्रियौ राजस्त्रियः
वर्णग्रहणंचसर्वत्रप्रयोजनं कसर्वत्र अंगाधिकारेचान्यत्रच अन्यत्रोदाहृतं अंगाधिकारे अतोदीर्घोयञिसुपिच इत्येवस्यात्
आभ्यां घटाभ्यामित्यत्रनस्यात्·

रात्क्षेपात् अन्येत्वाहुःअसतीहपुनर्ग्रहणेयत्रैवनुमुक्तियतेतत्रैवामामोतदंतस्यस्यातां परमनड्वाहइत्यत्रत्वाम्नस्यादितिपुनःपाठःकर्तव्यःपूर्वत्रापिपा ठोनुमर्थःकर्तव्यःअन्यथाअमामोरेवतदंतविधिःस्यान्नतुनुम्विधौ अतिसइति शोभनःसइत्यर्थःउपसर्जनेनतुतच्छब्दार्थेतितादितिभवति बहुभस्त्रिकेति नञ्पूर्वाणामपीतिनवक्तव्यंभवति वर्णग्रहणंचेति यथैवमग्निर्वर्णग्रहणवर्जमित्यत्रकिम र्थंवर्णग्रहणमुच्यते प्रत्यय
विधौतदंतविधिप्रतिषेधाद्वर्णग्रहणेप्रत्ययविधौप्रतिषेधाशंकानिराकरणार्थम्·

२२७

वृद्धिर्यस्या वृद्धिग्रहणमिति असति वृद्धिग्रहणे किमर्थं सर्वस्य संज्ञा न भवति ... अतादिग्यावर्तितस्यात् दाना
इति असति वृद्धिग्रहणे निर्धारणहेतोर्धर्मस्यानुपादानादादिशब्दः समीपार्थो विज्ञायेत ... नामधेयस्य तु पूर्वं भवस्वेव संज्ञा
प्रसंगे वृद्धमिति ... अन्यथा ...
तदिदस्यानुपादाने वृद्धिरेव वृद्धसंज्ञाप्रसंगः गार्गीया इति नहि गार्ग्यशब्दस्य वृद्धिरादिः किंतर्हि ...
... ग्रहणे ... समासे ...

वृद्धिर्यस्याचामादिस्तद्वृद्धम् वृद्धिग्रहणं किमर्थं यस्याचामादिस्तद्वृद्धमितीयत्युच्यमाने दानाः शाक्षिताः अत्रापि प्रसज्येत वृद्धिग्र
हणे पुनः क्रियमाणे न दोषो भवति अथ यस्यग्रहणं किमर्थं यस्येति व्यपदेशाय अथाज्ग्रहणं किमर्थं वृद्धिर्यस्यादिस्तद्वृद्धमितीयत्युच्य
माने इहैव स्यात् औपगवीयाः इह न स्यात् गार्गीयाः शालीया इति अत्र ग्रहणे पुनः क्रियमाणे न दोषो भवति अथादिग्रहणं किमर्थं
वृद्धिर्यस्याचां तद्वृद्धमितीयत्युच्यमाने सभासन्नयने भवः साभासन्नयन इत्यत्र प्रसज्येत आदिग्रहणे पुनः क्रियमाणे न दोषो भ
वति ... संज्ञायामन्तरसन्निवेशादनादित्वं ... संज्ञायामन्तरसन्निवेशादादित्वं तेनैवोपपत्स्यते न सन्निवेशेन ...
विज्ञायते ... इति नैवं शक्यं इहैव प्रसज्येत औपगवीयाः इह न स्यात् गार्गीयाः एकान्तादित्वं हि विज्ञायते ॥ ७ ॥

एकग्रहणस्य प्रयोजनं अचामिति तु बहुत्वं संख्याविवक्षार्थं स्यात् ... सर्वस्य प्रातिपदिकस्य अच्समुदायस्य ... अचामिति
नेन केवलानामचां समुदायः सन्निवेशः ... पौर्वापर्येणावस्थानं सन्निवेशः ...
संभवादचामिति ...
... आकारस्य निरनुप्रसंगः ...

भा·कै·प्र·

१२८

किमर्थमिति अलैवानर्थकेनेत्येतदाक्षिप्यते अस्य हि नियमस्य ष्ठीहानावित्यादि प्रयोजनम् तच्चान्यथा सेत्स्यति अंगाधिकारे हि न ग्रहणं स्त्रीग्रहणं वा
स्ति एङः पदान्तादिति पदाधिकारेऽस्य ग्रहणं वा पदान्तस्येत्यतः पदग्रहणानुवर्तनात् उदस्थास्तंभोरिति पूर्वसवर्णः पदाधिकारे विधीयते पदांगाधिकार
इत्यत्र च केवलपदाधिकारोपि गृहीष्यते उत्तरपदाधिकारोपि ततश्च ष्ठीहानावित्यादिप्रयोजनं न भविष्यति न ष्ठीहानावित्यत्र हि नित्यं अंगं नापि तदुत्तरप
दमिति प्रश्नः तन्न वक्तव्यमिति· पदाधिकार इत्येतदित्यर्थः अलैवानर्थकेन निबन्धनेनार्थवता तदन्तविधिसद्भावादिति भावः नदंतविधेरेवेति भा

किमर्थमिदमुच्यते न पदांगाधिकारे तस्य च तदुत्तरपदस्य चेत्येव सिद्धं न चेदं तत् नापि तदुत्तरपदम् तन्न वक्तव्यं भवति
किं पुनरत्र ज्यायः तदन्तविधिरेव ज्यायान् इदमपि सिद्धं भवति परमातिमहान् एतद्धि नैव तत् नापि तदुत्तरपदं अनिनस्म

न्ग्रहणानि च अर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयंति· अन् राज्ञेत्यर्थवता साम्नेत्यनर्थकेन इन् दंडीत्य
र्थवता वाग्मीत्यनर्थकेन इन् अस् सुपया इत्यर्थवता सुस्रोता इत्यनर्थकेन अस् मन् सुशर्मा इत्यर्थवता सुप्रथिमा इत्य
नर्थकेन यस्मिन्विधिस्तदादावल्ग्रहणे यस्मिन्विधिस्तदादाविति वक्तव्यं किं प्रयोजनं अचि श्नुधातुभ्रुवां य्वोरियं
ङुवङौ इति इहैव स्यात् श्रियौ भुवौ· श्रियः भ्रुवः इत्यत्र न स्यात् येन विधिस्तदंतस्य·

थमकल्पिकः सूत्रेण तदन्तविधिः स एवत्वलैवानर्थकेनेति नियम्यते परमातिमहानिति परमश्चासावतिमहांश्चेति समासः तत्र परमादिर्महच्छब्दो न
भवति नापि महच्छब्दोत्तरपदः अतिमहच्छब्दोत्तरपदत्वादिति सान्तमहत इति दीर्घत्वं न स्यात् अनेनैव न्यायेनोगिल्लक्षणो नुमागमोपि
न स्यात् तदन्तविधिना तु भवति· सुस्रोता इति· अनागमकानां सागमका आदेशा इत्याश्रयणात् स्रोतस आनर्थक्यम् अर्थवत्त्वागमद्द
ति न्यायोऽयेतु अर्थवानेवास्शब्दः यस्मिन्विधिरिति तदन्तविध्यपवादस्तदादिविधिः अत एव विशेषणेन भवतीनान्येन· श्री·

१२८

त्यदादीनि च त्वात्पुचादिति आदिग्रहणान्तु दत्तन्यथानुपपत्त्योपसर्जनानामपि त्यदादिसंस्थादितिभावः अथापि सम्यत्तराथमनु रतिः स्यात् त
त्संबंधस्येहायोग्यत्वान्निर्धारणस्य समानजातीयविषयत्वात् । त्वदीय इति । व्यपदेशवद्भावो मनास्ति अप्राप्तिपरिहारेनेति निषेधात् । संबंधमिति । द्विनी
योनमेतत् । संबंधमनुरोत्स्यन महास्यतीत्यर्थः अथवा संबध्यत इति संबंधं कर्मणि घञ् नपुंसकविवाधकाभावाद्वृत्ति वृद्ध्ग्रहणं संबद्धमादिग्रहण
मिहानुवर्तत इति नास्ति तद्यत्यदादिभिः संबंधः तद्यथेति एतद्दर्शयति स्वरितत्वप्रतिज्ञानादुत्तरसूत्र एव योग्यत्वा यस्याचामादिरिति संबध्यते एङ्
यस्याचामादिस्तद्वृद्धमिति वाक्यार्थसंपादनाय इहत्वयोग्यत्वात्संबंधानुपपत्तिः तुल्यजातीयस्य निर्धारणात् त्यदादीनां चाज्रूपत्वाभावाद्यस्याचामो

त्यदादीनि च यस्याचामादिग्रहणमनुवर्तते उताहो न किं चातः यद्यनुवर्तते इह च प्रसज्येत त्वत्पुत्रस्य छात्रास्त्वात्पुत्राः मात्पुत्राः इह च न स्यात्
त्वदीयो मदीय इति अथ निवृत्तं एङ् प्राचां देशे यस्याचामादिग्रहणं कर्तव्यं एवं तर्ह्यनुवर्तते कथं त्वात्पुत्राः मात्पुत्रा इति संबंधमनुवर्तिष्यते य
द्वृद्धं यस्याचामादिस्तद्वृद्धं त्यदादीनि च वृद्धसंज्ञानि भवंति यद्वृद्धं यस्याचामादिस्तद्वृद्धं एङ् प्राचां देशे यस्याचामादिग्रहणमनुवर्तते वृद्धग्रह
णं निवृत्तं तद्यथा कश्चित्कांश्चित्समुपदिश्य ते स्वार्थमुपादत्ते स यदा निष्कांतो भवति तदा स्वार्थं जहाति एङ् प्राचां देशे एङ् प्राचां
देशे शैषिकेष्विति वक्तव्यम् सैपुरिकी सैपुरिका स्कौनगरिकी स्कौनगरिका ॥ श्रीः ॥ इति श्रीमद्भगवत्पतंजलिविरचिते
व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे नवमाह्निकं ॥ इति प्रथमः पादः ॥ श्रीः ॥ योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु
वैद्यकेन ॥ योऽपाकरोत्तं प्रवरं मुनीनां पतंजलिं प्रांजलिरानतोऽस्मि ॥ १ ५ . २ श्रीः २ ॥

द्यस्य त्यदादय इति संबंधाभावात् । एङ् प्राचामिति नाप्राग्ग्रहणमाचार्यनिर्देशार्थं व्यवस्थितविभाषार्थं चेति व्याख्यातं तेन कौडो नाम [illegible]
मल्लग्रामः कौडीयः एण न भवति अन्ये तु प्राग्ग्रहणं देशविशेषणं व्याख्यातं तेन देवदत्तो नाम वाहीकेषु ग्रामस्तत्र भवो देवदत्तः स वृद्धत्वा
[illegible] भवतः भाष्यकारस्तु [illegible] नमाशिश्रियत् सैपुरस्कौनगरं च वाहीकग्रामौ तत्र वृद्धत्वाद्वाहीकग्रामेभ्यश्चेति [illegible] भवतः
शैषिकेष्विति वचनादपत्यविकारयोर्वृद्धलक्षणप्रत्ययाभावः कौडदेवदत्तयोस्तु प्राग्देशवाचिनोर्व्यवस्थितविभाषया न भवतीति । प्राग्देशवाचि
नोर्व्यवस्थितं तस्तु देवदत्तस्य वृद्धसंज्ञात्वात्काश्यादिलाद्वृद्धलक्षणो [illegible] भवत ॥ इत्युपाध्यायजय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे प्रथमा